श्रीमद्वल्लभाचार्यप्रणीत—

श्रीब्रह्मसूत्राणुभाष्यम् ।

श्रीगिरिधरजीविरचित

विवरणसहितम्

अध्याय ३-४

*

संपादकः —

प्रा. गो. ह. भट्टः, एम्. ए.

अध्यक्षः, रामायणविभागः,

म. स. विश्वविद्यालयः, बडोदा

*

प्रकाशकः —

विद्याविभागः, नाथद्वार.

प्रकाशकः —
श्री आनन्दिलाल शास्त्री
सञ्चालकः, विद्याविभागः, नाथद्वार. (राजस्थान)

R6893,5x1,1
N61

सं. २०१८, प्रथमावृत्तिः, विजयादशमी
प्रतयः – १०००

मूल्यम् : ६–००

मुद्रकः —
चन्द्रकान्त भूषणदासजी साधु
चेतन प्रकाशन मन्दिर (प्रिं. प्रेस),
सीयाबाग, बड़ौदा.

अनुक्रमणिका

*

1	Preface	4
2	Introduction	5-12
3	विवरणनिर्दिष्टविशिष्टनामसूची	13-14
4	तृतीयाध्यायः	1-310
5	चतुर्थाध्यायः	311-456
6	शोधपत्रम्	1-2

1 Sri Vallabhacarya (b, V. S. 1535)

|

2 Sri Vitthalanathaji (V. S. 1572)

|

3 Sri Yadunathaji (V. S. 1615)

|

4 Sri Madhusudanalalaji (V. S 1634)

|

5 Sri Pradyumnalalaji (V. S. 1660)

|

6 Sri Vitthalanathaji (V. S. 1717)

|

7 Sri Pradyumnalalaji (V. S. 1762)

|

8 Sri Vitthalarayaji (V. S. 1785)

|

9 Sri Gopalalalaji (V. S. 181o)

|

10 Sri Giridharaji (V. S. 1847)

Sri Giridharaji took the spiritual initiation (Brahma-sambandha) from Sri Dwarkanathaji and became an ardent worshipper of Shri Gopala. It is said that he

secured many old images of Lord Krisna and showed many miracles by virtue of his worship of Sri Gopala. His mastery over the Gopala mantra induced Damodaraji Maharaj, the then Head of the Sri Nathaji Temple, to take the Diksa of the Gopala mantra from him, and to promise as gift the image of Sri Mukundarayaji. Damodaraji and Girdaraji were brothers-in law as their wives happened to be sisters. After Damodaraji's death his widow Sri Lakshmiji made a gift of Sri Mukundarayaji to Giridharaji.

In about V. S. 1885 (c. 1829 A. D.) Giridharaji constructed a grand temple in Banaras and started the worship of Mukundarayaji in that temple where the worship continues even to-day. Giridharaji had only one child, a daughter, Syama Betiji by name, who devoted her whole life to the worship of Mukundarayaji. She adopted her daughter's son Jivanalalji (b. V. S. 1922) of Mathura, whose son, Muralidharalalaji (b. V. S. 1960) is now continuing the worship in the temple at Banaras.

There are also old images of Lord Krisna and the manuscript of Anubhasya (containing the portion on I. 4) in Vallabhacarya's own handwriting that have been preserved and worshipped in the Banaras temple. Purusottamaji refers to a MS. of Anubhasya written by Vallabhacarya himself, in his Prakasa on I. 4. 9 (रूपेति पाठ. श्रीहस्ताक्षरेषु संदिग्धत्वाद्बोध्यः). It is quite possible that the MS. referred to by Purusottamaji may be identical with the MS. preserved in the Banaras temple. It is said that a MS. of

Sannyasanirnaya in the handwriting of Vallabhacarya was also in possession of Giridharaji.

Giridharaji was not only an ideal devotee but also a great Sanskrit scholar. His permanent residence in Banaras, a centre of Sanskrit learning, and his contact with a profound Sanskrit scholar like Pandit Ramakrishna Bhatt helped him a great deal in attaining proficiency in several Sastras. He also wrote works in Sanskrit, which include the following important works—

(1) Vivarana, a commentary on the Anubhasya of Vallabhacarya.

(2) Haritosini, a commentary on the Vidvanmandana of Vitthalnatha.

(3) Balaprabodhini, a lucid commentary on the Bhagavata.

(4) Suddhadvaitamartanda, an excellent work on the Suddhadvaita Vedanta. It has been commented upon by Pandit Ramakrishna Bhatt, and has been well introduced in Gujarati by Prof. M. G. Shastri in his scholarly work called Suddhadvaitasiddhantapradipa (1st ed. 1903 A. D., 2nd ed. 1937, 3rd ed. in 1957.).

(5) Srutirahasya which tries to show that all the Srutis describe in one form or another Sri Vallabhacarya who, according to Giridharaji, is identical with the

Lord Krisna. It has been commented upon by Pandit Ramkrishna Bhatt.

(6) Urdhvapundramartanda, which discusses the signi ficance of the vertical auspicious mark on the forehead.

Giridharaji thus enjoys a unique position in the sixth House of Sri Vallabacarya. Unfortunately he breathed his last in 1840 A. D. at an early age of 49.

The Vivarana is, as said before, a very lucid commenttary on the Anubhasya and is most helpful for understanding the text of the Bhasya. It generally refers to Purusottamaji's Prakasa for detailed discussions of several problems. It also refers to the works of Vallabhacarya, like Nibandha and small treatises. It again criticises Nirbhayaram Bhatt, the author of Adhikaranasamgraha, in connection with the arrangement of topics (II 1. 7-13, p. 30, Vivarana on the Second Adhyaya, Bombay, 1950 A. D.) The arguments advanced in the commentary clearly bear testimony to the profound scholarship of Giridharaji.

The text of the Vivarana is based on the one MS. which was utilised by me for editing the remaining portion on the Second Adhyaya (pp. 73-151) published by the Trustees of Sheth Narayandas and Jethanand Asanmal Trust, Bombay in 1950 A. D.

The MS. contains both the text of the Anubhasya and the text of the Vivarana in the Devanagari script. The

Anubhasya is in the middle while the Vivarana is both above and below the text of the Anubhasya. The whole MS. of the Anubhasya and the Vivarana, excepting III. 3, is in one hand and undated. It is 14" x 7. 1/4"; 4 to 6 lines of the Bhasya in the centre; 4 or 5 lines of the Vivarana, both above and below. Each line of Vivarana contains about 48 letters. There is a long colophon at the end of every Pada. The MS. on III. 3 is on a different paper and in a different hand. It is 12" x 7. 1/4"; 6 or 7 lines of the Bhasaya in the middle and 2 or 3 lines of the Vivarana both above and below, each line containing about 52 letters. There is a remark on the first page of the MS. of III. 4 as follows—

अत्रत्यतृतीयपादो मातुल-
रामशास्त्रिणां ग्र(गृ)हेऽस्ति ।

The remark shows that the original MS. of III. 3 which is substituted by a different MS. was in the possession of one Ram Shastri, the maternal uncle of the owner of the whole MS. It is not possible for me to identify this Ram Shastri. Is he identical with Ramakrishna Bhatt who was a contemporary of the author of the Vivarana ? The MS. seems to be about one hundred years old. Some portion of the Vivarana on III. 2. 14 (and of the relevant Bhasya) on p. 68 is missing in the MS. probably because the scribe inadvertently omitted one folio of the original MS. which he was copying. Moreover, the MS contains one additional Sutra (भावशब्दाच्च III 4. 22, p. 274) with the Bhasya and the Vivarana. Purusottamaji is aware of this Sutra. His view is stated by me in the Vivarana.

I could not get other MSS. of the Vivarana in spite of my strenuous efforts, and was therefore very much handicapped, as my MS. was corrupt in several places. I have tried my best to present the text of the Vivarana in a correct form as far as possible.

The Chief Executive Officer of Shri Nathji Temple Board, Shri M. G. Dalelia, I. A. S. deserves our admiration for sanctioning the publication of this imprortant commentary on Vallabhacarya's Anubhasya and therby setting an example to the Managers of other Temples in India. I am personally thankful to Shri Dalelia for giving me all facilities and putting up with the delay caused by circumstances beyond my control. It is hoped that he will take up the publication of other important works of the Suddhadvaita School, such as a critical edition of Vallabha's Tattvadipika, a learned Sanskrit commentary on the Bagavadgita. I take this opportunity to assure him of my best co operrtion in the implementation of the literary programme.

It now remains for me to perform the most pleasant duty of acknowleding help I have received from my several friends. Firstly, I am thankful to Shri Vadilal N. Shah, B. A., LL. B., Advocate, Bombay, for the loan of the MS. of the Vivarana but for which the work could not have been published.

Secondly, I thank my friend, Prof. Keshavram Kashiram Shastri of Ahmedabad, who helped me in the beginning in correcting proofs (up to three forms) but unfortunately could not continue it on account of adverse

circumstances. The printing was then started in Baroda, and I had to seek the help of my young friend, Shri Ramanlal Kanaiyalal Joshi, Vyakaranacarya, who helped me a great deal in reading the proofs, I offer my sincere thanks to Shri Joshi for his spentaneous and ungrudging help from the beginning to the end. Further, I am thankful to my learned friend Pandit Sadhu Motidasaji, the Proprietor of Chetan Prakasha Mandir (Printing Press) for taking keen interest in the printing of the work. It is regretted that the diacritical marks have not been used here as they were not available.

Sakuntala,
Kharivav Road,
BARODA.
Vamana Dvadasi
V. S. 2018.
Date 11-9-62

G. H. Bhatt

विवरणनिर्दिष्टविशिष्टनामसूची ।

तत्त्वदीपप्रकाश (चतुर्थस्कन्ध) ३४४

निबन्ध ४४

पाण्डुरङ्गमाहात्म्य (स्कन्दपुराण) १५१

पुष्टिप्रवाहमर्यादा १३७, ३४९, ४२२, ४४९

पुष्टिप्रवाहमर्यादाविवरण २८८

प्रकाश ३, ४५, ५०, ८३, ९३, ९४, १२६, १३६, १५८, १६८, १७२, २३६, ३६०, ४३५, ४५३, ४५६

प्रभुचरण ९३, १०७, ४५५

प्रस्थानरत्नाकर ३५१

भक्तिहंसविवरण १२४

मत्स्यपुराण ४४५

माध्व ४५३

विद्यारण्यभाष्य (तैत्तिरीयसंहिता)... ... १३१, १८५, १८६

विद्वन्मण्डन २९२

विष्णुपुराण ९०

व्यासचरण ९३

श्रीप्रकाशकृत् ४७, १०१, २७०, ४५५

श्रीपुरुषोत्तम (प्रकाशकार) ५०, ८३, ३५१, ४५३

श्रीमदाचार्य ३४९, ४४९

श्रीमदाचार्यकृतभाष्य (जैमिनिसूत्रस्य) २६७

सन्न्यासनिर्णय २९७

सुबोधिनी १२८

सेवाफल ४२२

श्रीमद्वल्लभाचार्यप्रणीत—

श्रीब्रह्मसूत्राणुभाष्यम् ।

श्रीगिरिधरजीविरचित—

विवरणसहितम् ।

अध्याय ३–४

॥ श्रीहरिः ॥

श्रीब्रह्मसूत्राणुभाष्यम्

सविवरणम् ।

अथ तृतीयाध्यायस्य प्रथमः पादः ।

सर्वोपनिषदां सिद्धो ह्यविरोधे समन्वयः ।
कथं बोधकता तासां स तृतीये विचार्यते ॥ १ ॥
एकं वाक्यं प्रकरणं शाखाः सर्वाः सहैव वा ।
एकां विद्यामनेकां वा जनयन्तीति चिन्त्यते ॥ २ ॥

विवरणम्

अस्मिन् तृतीयाध्याय उपनिषद्वाक्यानां ब्रह्मबोधकताविचारार्थं पूर्वाध्यायसंगतिसूचनार्थमध्यायद्वयनिर्गलितार्थं सूचयन्ति **सर्वे**ति । अत्र कारिकापञ्चक पूर्वाध्यायेन **सर्वोपनिषदामविरोधे** सिद्धे सति **सर्वोपनिषदां** ब्रह्मणि **समन्वयः सिद्ध** इत्यर्थः । **तासा**मुपनिषदा **स** बोधजनकत्वप्रकारः ॥ १ ॥ ननु बोधजनकत्वप्रकारस्तृतीये विचार्यत इत्यसंगत तस्य साधनाध्यायत्वेन प्रसिद्धत्वादत आहु· **एक**मिति । प्रथमत उपनिषद्वाक्येभ्यो यत् श्रुत तस्य मनन निदिध्यासश्च कर्तव्य इत्युक्तम् । तत्र तत्साधनीभूतोपासनाबोधकाः विद्या विद्या वा सर्वोपनिषत्सवाक्येन प्रकरणेन प्रत्येकं मिलित्वा वा बोध्यन्ते । तत्रोपनिषत्सु बोधकताप्रकारस्य मुख्यसाधनत्वात्स **चिन्त्यत** इत्यर्थः । तथा च ‘ चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः ’ इति वचनादुपोद्घातसंगतिर्बोध्या ॥ २ ॥

ससाधने हि पुरुषे जन्मना कर्मणा शुचौ ।
केवले वा यथा योगे प्रथमं तद् विचार्यते ॥ ३ ॥
विचारपूर्वकं तस्य ब्रह्मभावाप्तियोग्यता ।
अधिकारे ततः सिद्धे विषयावधृतिस्ततः ॥ ४ ॥
अन्तरङ्गविचारेण गुणानामुपसंहृतिः ।
बहिरङ्गविचारेण कर्मणामिति सा द्विधा ॥ ५ ॥

तस्मादधिकारिणो जन्मनिर्धारः, तदनु तस्य ब्रह्मभावयोग्यता, ततो गुणोपसंहारः, ततोऽङ्गविचारः । तत्र प्रथमे पादे जीवस्य ब्रह्मज्ञानौपयिकं जन्म विचार्यते । तत्र पूर्वजन्मनि निष्कामयज्ञकर्तुर्ज्ञानरहि-

---

एवमध्यायार्थमुक्त्वा पादानामर्थानाहुः **ससाधने**ति । **प्रथमं** प्रथमे पादे विचाररूप**साधनसहिते** जन्मकर्मावदाते **पुरुषे केवले** जन्मादिशुद्धिरहितेऽपि केवलभगवद्भक्तिपरे **तथा योगे** योगयुक्ते **तत्** शुचित्वं **विचार्यते** । तथा च सहकारिसंपत्तिः पादार्थः ॥ ३ ॥ द्वितीयपादार्थमाहुः **विचारे**ति । **विचारपूर्वकं** जीवावस्थादिविचारपूर्वक **तस्य** जीवस्य **ततो** जीवावस्थाविचारानन्तर**मधिकारे** सिद्धे सति **विषयावधृतिः** **विषयस्य** ब्रह्मणः **अवधृति**र्निश्चयः ॥ ४ ॥ तृतीयशब्दार्थमाहुः **तत** इति । **अन्तरङ्गे**ति । **अन्तरङ्गे**ति अन्तरङ्गवत्साधनमुपासनं, त**द्विचारेण** **गुणानां** भगवद्गुणाना**मुपसंहृतिः** उपसंहारः ॥४½॥ तुरीयपादार्थमाहुः **बहिरङ्गे**ति । आश्रमादिविचारेणेत्यर्थः । **कर्मणां** यज्ञतपआदीनामुपसंहृतिरिति पूर्वेणान्वयः । **इति** अनेन प्रकारेण **सा** उपसंहृतिः **विचार्यते** इति पूर्वेणान्वयः ॥ ५ ॥

एव कारिकापञ्चकेन पादार्थानुक्त्वा वैराग्यादिरूपा अन्ये अर्था न संभवन्तीति दृढीकरणार्थं पुनः पादार्थानाहुः **तस्मादि**ति । इतः परं प्रथमपाद व्याख्यातुं पादार्थं श्रुतिप्रमाणेनाहुः **तत्रे**ति । **ब्रह्मज्ञानोपयिकं जन्म** छान्दोग्ये सप्तमे प्रपाठके गौतमप्रवाहणसंवाद उक्त, तादृशश्रुतितात्पर्यमाहुः

तस्य मरणे ज्ञानाभावेन यज्ञाभिव्यक्त्यभावाद्भूतसंस्कारक एव यज्ञो जात इति निष्कामत्वाच्च तदधिकारिदेवाधीनान्येव भूतानीति ते देवास्तत्र तत्र हुत्वा तस्य शरीरं सपादयन्तीति "पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" (छा. ५.९.१.) इति श्रुतिः। तत्र जीवेन्द्रियाणां होमाभावेनाशुद्धिमाशङ्क्य तेषामपि होमं वक्तुमिदमधिकरणमारभ्यते। न च पञ्चाहुतयो धूममार्ग एव, तत्र गमनागमनयोर्बहुविशेषश्रवणात्। "तद्य इत्थं विदुर्ये

तत्रेति। **यज्ञाभिव्यक्त्यभावात्** ब्रह्मरूपयज्ञाभिव्यक्त्यभावादित्यर्थः। नन्वेव चेन्निष्फल एव यज्ञ स्यादित्यत आहुः **भूते**ति। **तत्र तत्रे**ति। **ते देवाः** आदित्यपर्जन्यपृथिवीपुरुषरूपयोषारूपपञ्चाग्निषु **हुत्वा** ब्रह्मज्ञानौपयिकजन्मवतः पुरुषस्य **शरीरं संपादयन्ती**ति। **पञ्चम्यामाहुते**ति **श्रुति**र्वदतीति प्रघट्टकार्थः। श्रुत्यर्थस्तु **प्रकाशे**ऽनुसंधेयः। विस्तरभयाद्विरम्यते ॥

इतः परमधिकरणारम्भे प्रयोजन वदन्ति **तत्र जीवे**त्यादिना। **तत्र** पञ्चाग्निहोमे **जीवे**ति। तथा च यज्ञस्य भूतसंस्कारकत्वाद् भूतानामेव होम इति भाव। **होमं वक्तुं** शुद्धिं वक्तुम्। **आरभ्यते** इति। जीवस्य लोकान्तरगमनावसरे संसारयुक्त भूतसूक्ष्मेन्द्रियाणां साहित्यमस्तीति बोधयितुमिदमधिकरणमारभ्यत इत्यर्थः ॥ ननु धूमादिमार्ग एव गमनं पुनरागमन चेति वाजसनेयिब्राह्मणे वैराग्यार्थं प्रतिपादितं, तेन कृत्वा किं ज्ञायते पञ्चाहुतयस्तत्रैव न तु ज्ञानार्थं शरीरोत्पादने। एव च वैराग्यार्थमेवेदमधिकरणमिति परेषामाशङ्का निवारयन्ति **न चे**ति। **धूममार्ग एव** इति न हीत्यर्थः। तथा च न वैराग्यार्थमिदमधिकरणमिति भावः। कुतो न हीत्यत आहुः **तत्रे**ति। **तत्र** धूममार्गे। **बहुविशेषे**ति। अर्चिरादिमार्गोक्तगमनापेक्षयेति शेषः। **श्रवणा**दिति। श्रुतौ पूर्वं पञ्चाग्निविद्याकथनं तदनन्तरमर्चिरादिमार्गकथनं तत्र पुनरावृत्तौ दृष्टान्तत्वेन धूमादिमार्गकथनमित्यादीत्यर्थः ॥ नन्वर्चिरादिमार्गो हि ब्रह्मविद्या ज्ञानिनां, न तु होमनिष्पन्नशरीराणामत आहुः **तद्य** इति। ये तत् ब्रह्म इत्थ विदुः ये चारण्ये

चेमेरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्ति" (छा. ५.१०.१.) इति तज्ज्ञानवतोऽपि यत्रार्चिःप्राप्तिस्तत्र तथा देवहुतानां कथं सा न स्यात्, ज्ञानार्थमेव तथोत्पत्तेः। पुनरावृत्तिः परं तुल्या। अथवा निष्काम एव धूमादिमार्गः। "योगी प्राप्य निवर्तते" (भ. गी. ८.२५.) इति स्मरणात् भोगार्थमेव धूमादिलोकाः। निष्पत्तिस्तु पञ्चाग्नावेव। अन्ने प्रविष्टानामन्येषामपि रेतोद्वारा योनित उत्पत्तिरिति कपूयचरणवर्णनम् (छा. ५.१०.७.)। "एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते" (भ. गी. ९.२१.) इति कामनायां भिन्न एव प्रकारः, पृथगुपदेशात्।

उपासते इत्यर्थः। **सा** अर्चिरादिप्राप्तिः। तथा चात्र कैमुतिकन्याय इत्यर्थः॥

ननु कथमिदमित्यत आहुः **ज्ञानार्थ**मिति। **पुनरावृत्ति**रिति। धूमे अर्चिरादावपि पुनरावृत्तेस्तुल्यत्वादित्यर्थः॥

ननु कुत्रचित् श्रुतौ यागकर्तृणां धूमादिमार्गे आहुतिभ्य एव शरीरोत्पत्तिः श्रूयत इत्यत आहु **अथवे**ति। **निष्काम एव** निष्कामयज्ञकर्तर्येव। अत्र प्रमाणमाहुः **योगी**ति। योगिनां धूममार्गः कथमित्यत आहुः **भोगार्थ**मिति। भोगेन ब्रह्मप्राप्तिप्रतिबन्धकदुरितक्षयार्थम्। **निष्पत्ति**रिति। ज्ञानोपयोगिदेहनिष्पत्तिरित्यर्थः॥ नन्वेव चेत्कपूयचरणवर्णन किमर्थमत आहुः **अन्येषा**मिति। दुष्कर्मिणामिति शेषः। **वर्णन**मिति। कपूयं निकृष्टं चरणमाचरणं येषां तेषां वर्णनं प्रासङ्गिकमित्यर्थः॥ नन्विदं सर्वं निष्कामकर्मानुष्ठाने, सकामकर्मानुष्ठानेऽपि धूमादिमार्गो दृश्यत इत्यत आहुः **एव**मिति। **भिन्नप्रकारः**। यज्ञेन स्वर्गः, भोगानन्तरं पुनरावृत्तिः, पुनः यज्ञ इति कामनायां भिन्नः प्रकार इत्यर्थः। अत्र हेतुमाहुः **पृथ**गिति। बृहदारण्ये सकामस्य धूममार्गकथनादित्यर्थः॥

तस्माद्योग्यशरीरनिष्पत्तये स्वयमेव गच्छति भूतसहितः, श्रद्धाहोमानन्तरं सोमभावे वा सबन्ध इति संशयः। भिन्नपक्षे योनौ वेति। तत्र श्रौतेऽर्थे श्रौतन्यायेनैव निर्णयस्योचितत्वादाहुतावपां गौणत्वापत्तेः संस्कृतभूतानामुपस्थापकत्वाभावाच्छरीरवियोगे देवानां च तावद्विलम्बे कारणाभावाच्च श्रद्धारूपा आप एव हूयन्ते। अतो न तैः परिष्वक्तो गच्छतीत्येवं प्राप्त उच्यते—

उपसंहरन्ति **तस्मा**दिति। एतादृशश्रुतितात्पर्यादित्यर्थः। **योग्ये**ति। ब्रह्मज्ञानौपयिकेत्यर्थः। **भूतसहितः** पञ्चभूतेन्द्रियसहितः। **श्रद्धाहोमानन्तर**मिति। 'श्रद्धा वा आप' इति श्रुतेः श्रद्धाशब्देन आप उच्यन्ते। तासां द्युलोकवाच्याग्नौ हुतानां परिणामः सोमः, तस्य भाव इत्यर्थः। **सोमभावे** इति। चन्द्रप्रवेशे ॥

इतः परमधिकरणप्रयोजक संशयमाहुः **संबन्धः** [इति]। भूतसंबन्ध। **भिन्नपक्षे** सकामपक्षे। **योनौ** पृथिव्याम्। पूर्वपक्षमाहु **तत्रे**ति। **तत्र** प्रत्यक्षाधिगम्ये श्रौतेऽर्थे जीवोत्क्रमणरूपेऽर्थे। **श्रौतन्यायेनैवे**ति। जीव कर्मसहित एव गच्छतीति श्रुतावुक्तत्वात्तन्यायेनेत्यर्थः ॥ ननु सूक्ष्मभूतसहितोऽपि गच्छतीत्यत्र किं बाधकमत आहु **आहुता**विति। **गौणत्वापत्ते**रिति। गुणकर्मत्वापत्तेरित्यर्थ। तथा च भूतसहितो गच्छति चेत् तादृशभूतैरेव शरीरोत्पत्तिर्भविष्यति, अबाहुतिस्तु भूतसंस्कारार्था भविष्यतीति गौणत्वापत्तिरिति भावः ॥

संस्कृतान्येव भूतानि योग्यशरीरं निष्पादयन्तीत्यत आहुः **संस्कृतभूताना**मिति। अदृष्टस्योपस्थापिकादृष्टसामग्री। तथा चाप्सहितभूतानामेव योग्यशरीरोपस्थापकत्व, न तु संस्कृतभूतानामित्यर्थः ॥ नन्वप्सहितभूतानामुपरिस्थितिर्भविष्यतीत्यत आहु **शरीरवियोगे** इति। शरीरवियोगानन्तरं यावत्पर्यन्तमप्सहितभूतानामुत्पत्तिस्ततः पूर्वमेव योग्यशरीरनिष्पत्त्यर्थं **हूयन्ते**। ततः सोमभावानन्तरं भूतसंबन्ध इत्यर्थः। पूर्वपक्षी स्वाभिप्राय विशदयति **अत** इति। **तैः** भूतै। समाधानसूत्रमाहुः **तदन्तरे**ति।

तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ १ ॥

तस्य जीवस्य यज्ञादिकर्तु**रन्तरप्रतिपत्तौ अन्तरे** मध्ये मुख्य**प्रतिपत्ते**र्मोक्षलक्षणाया अर्वाग् योग्यशरीरनिष्पत्त्यर्थम् । न हि वस्तुतो यज्ञानामिदं फलं भवति । अतो मुख्ये विलम्बात् **प्रतिपत्ति**रेषा । **तस्य** मुख्यफलस्य वा **अन्तरे** या **प्रतिपत्ति**स्तदर्थं वा तत्कारणभूतैः **संपरिष्वक्त** एव **रंहति**, मरणानन्तरमेव कर्मसमाप्तेः सम्यग्भूतानि तदैव संस्कृतानि, प्रतिदिनसंस्कारार्थं च नैकटयमपेक्षते । अतः सम्यगेव परिष्वक्तः, पूर्वं शरीरे व्यवधानात्, शरीरदाहे वा तद्गतानि भूतसूक्ष्माणि सम्यक् तमेवासक्तानि । "तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च"

व्याकुर्वन्ति **तस्ये**ति । तच्छब्देन जीवो वा फल वेति पक्षद्वयम् । तत्र प्रथमपक्षमाहुः **जीवस्ये**ति । **अन्तरे** इति । 'चर्मणि द्विपिन हन्ती'तिवत् तादर्थ्ये सप्तमी । अन्तरशब्दस्य मुख्याधारार्थत्वम् । तथा च कर्मणो **मुख्या प्रतिपत्ति**र्भगवत्प्राप्तिः । मोक्षोपयोगिशरीरनिष्पत्तिरन्तरप्रतिपत्तिः, तदर्थं रंहतीत्यग्रेणान्वय. । मोक्षोपयोगिशरीरनिष्पत्तिः ॥

फलमेव कुतो न भवतीत्यत आहु **नही**ति । इद फलं शरीररूपम् । मुख्ये भगवत्प्रादुर्भावरूपे द्वितीयपक्षमाहुः **तस्ये**ति । **तत्कारणभूतै**रिति । तस्य मोक्षोपयोगिशरीरस्य कारणैः संस्कृतभूतैः सहितो गच्छतीत्यर्थः । तत्रायमेवार्थ. । विशदयितुमाहुः **मरणानन्तर**मिति । तत्र प्रेतायानस्य विहितत्वादित्यर्थः । **संस्कृतानी**ति । भवन्तीति शेषः । सम्यक्पदस्य स्वारस्यमाहु **पूर्व**मिति । मरणात्पूर्वमित्यर्थः । व्याख्यानान्तरमाहुः **शरीरे**ति । अबाहुतेरपि श्रुतत्वात् । अपां होमः परिष्वक्तस्य जीवस्यापि होम इति पक्षद्वयम् । तत्र जीवपक्षे प्रमाणमाहुः **त**मिति । बृहदारण्यस्य वाक्यम् ।

(बृ. ४.४.२.) इति । जीवपक्षे ज्ञानकर्मणी । कर्मणो हि स्वरूपभूता आपः । तत्र हेतुः **प्रश्ननिरूपणाभ्याम्** । "वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" (छा. ५.३.३.) इति प्रश्नः । "असौ वाव लोको गौतमाग्निस्तस्यादित्य एव समित्" (छा. ५.४.१.) इत्यादि **निरूपणम्** । प्रश्ने हि पुरुषत्वं वदति, न देहमात्रम् । तज्जीवाधिष्ठितानामेव भवति, सिद्धवत्कारवचनाच्च । **निरूपणे**ऽपि चन्द्रो भवतीति । तत्रापि

इति अनेन वाक्येन ज्ञानकर्मणी समन्वारभेते इत्यर्थः ॥ नन्वेवं चेदपां होमे गौणत्वापत्तिरत आहुः **कर्मण** इति । **हि** यतः अपां होम्यद्रव्यत्वात्कर्मरूपत्वं, न तु संस्कार्यत्वमतो न गौणत्वमित्यर्थः ॥

परिष्वक्तो रंहतीत्यत्र सौत्रो यो हेतुस्तं विशदयन्ति **प्रश्ने**ति । अपां होमो यदा तस्मिन् काले अप्सु जीवस्याधिष्ठानमस्तीति प्रतिपादयन्ति **प्रश्ने ही**त्यादिना **संभवादी**त्यन्तेन । **इत्यादी**ति । 'असौ वाव लोको गौतमोग्निस्तस्यादित्य एव समिद्रश्मयो धूमोऽहरर्चिश्चन्द्रमा अङ्गारा नक्षत्राणि विस्फुलिङ्गाः । तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति । तस्या आहुतेः सोमो राजा संभवति' । द्वितीये वाक्ये पर्जन्यवाय्वभ्रविद्युदशनिह्रादनयो विस्फुलिङ्गान्ताः, सोमो राजा, होम्यं वर्षं फलम् । तृतीये पृथिवीसंवत्सराकाशरात्रिदिगवान्तरदिशो विस्फुलिङ्गान्ताः, वर्षं होम्यमन्नं फलम् । चतुर्थे पुरुषवाक्प्राणजिह्वाचक्षुःश्रोत्राणि विस्फुलिङ्गान्ताः, अन्नं होम्यं, रेतः फलम् । तदग्रे इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति । स उल्बावृतो गर्भो दश वा नव वा मासानन्तः शयित्वा यावद्वाथ जायते स जातो यावदायुषं जीवति तं प्रेतं दिष्टमितोऽग्नय एव हरन्ति यत एवेतो यतः संभूतो **भवती**ति । निरूपणमित्यर्थः । पुरुषत्वं वदति यथा पञ्चम्यामित्यादिनेति शेषः । तत् पुरुषत्वं प्रश्ने सपरिकरजीवलाभे हेत्वन्तरमाहुः **सिद्धव**दिति । निरूपणेऽपि सपरिकरजीवलाभं वदन्ति **निरूपणेऽपी**ति । प्रथमतोऽङ्गाररूपचन्द्रो भवति, आहुत्यनन्तरं सोमो राजा भवतीति कलावृद्धिकृतराजत्वकथनेन भूतसहितजीवाधिष्ठानमेव

"सोमो राजा" (छा. ५.४.२.) चेतनः। न ह्यन्याधिष्ठाने ह्यन्यस्य शरीरं भवेत्। तथान्नरेतोगर्भाश्च, अन्यथापि विनियोगसंभवात्। जीवसाहित्येऽप्यपामेव मुख्यत्वं शरीरवत्। अयं होमस्तत्र तथा तं जनयन्तीति न दुःखहेतुः। तस्मात् **प्रश्ननिरूपणान्यथानुपपत्त्या संपरिष्वक्त** एव संस्कृतैर्भूतै **रंहतीति** सिद्धम्॥ १॥

त्र्यात्मकत्वात्तु भूयस्त्वात्॥ २॥

ननु कथं भूतसंस्कारमात्रत्वमवगम्यते यावता प्रश्ननिरूपणाभ्यामाप एवावगम्यन्ते। न च तावन्मात्रसंस्कारत्वं, नियामकाभावात्। "अस्थि

बोध्यते। अत्र युक्तिमाहुः **न ह्यी**ति। कदान्यथाविनियोगो जायते इत्यत आहुः **तथे**ति। **गर्भाश्चे**ति। भवन्तीति शेषः। वर्षस्योषरपाते अन्नस्य मांसादिभावः, रेतसो वृथापाते तथा गर्भस्रावे पुरुषभावाभाव इत्**यन्यथापि विनियोगसंभवा**दित्यर्थः। न चैतावता जीवसाहित्यमुक्तं तर्हि अपामेव होम्यत्व कथमित्यत आहुः **जीवे**ति। **शरीरव**दिति। यथा पुरुषस्य षष्ठेऽग्नौ होम्यत्वे शरीरस्य मुख्यत्व तथा प्रथमहोमे अपां मुख्यत्वात्तासामेव होम इत्यर्थः। **अय**मिति। देवैरकृत इत्यर्थः। **तत्र** षष्ठे पर्याये **तथा** ब्रह्मलोकयोग्यं **तं** पुरुषं **जनयन्ती**ति। देवा इति शेष.। **न दुःखहेतुः**। **होम** इति पूर्वेणान्वयः। तथा चास्य होमस्यादुःखदत्वेन वैराग्यहेतुत्वमस्योपाख्यानस्य न वक्तव्यमिति भावः। उपसंहरन्ति **तस्मा**दिति। **रंहति** गच्छतीत्यर्थः। न च स्वतः पूतस्य जीवस्य किमर्थं शुद्धिरपेक्षितेति वाच्यम्। विरजा होमेन कृत्वा अन्तरात्मपर्यन्तं शुद्धिस्तैत्तिरीयोपनिषदि स्पष्टमुक्ता। तृतीयस्कन्धे विदुरवाक्ये 'हृदि स्थितो यच्छती'त्यत्र सुबोधिन्याम्। भक्त्या शुद्धिरुक्ता। तेन कृत्वा कि ज्ञायते। पूतानामपि शुद्धिरस्तीति हृदयम्॥ १॥

सूत्रोक्तं समाधानांशमपाकर्तुं पूर्वं पूर्वपक्षमाहुः **नन्वि**ति। जलसंस्कारकत्वमेव, न तु सर्वभूतसंस्कारकत्वमित्याहुः **यावते**ति। यत इत्यर्थः। जलग्रहणेन सर्वभूतग्रहणमित्याशयेन शङ्कते **न चे**ति।

चैव तेन मांसं च यजमानः संस्कुरुते" (तै. ब्रा. १.५.९.७.) इति विरोधश्चेति शङ्कां निराकरोति तुशब्दः । अपामेव ग्रहणेन तेजोबन्नानि गृहीतानि ज्ञातव्यानि । कुतः । **त्र्यात्मकत्वात्** । लोकादिनिर्माणानन्तरं भावित्वात्ता आपस्त्रिवृत्कृता एव । अतस्त्रयोऽपि गृहीता अपां ग्रहणेन । उपलक्षणत्वेऽप्यपामेव ग्रहणे हेत्वन्तरमाह **भूयस्त्वात्** । शुद्धत्वाद्विशेषाभावान्मध्यभावाच्च, दीक्षिततुल्यत्वेन भावरूपत्वेनाग्रे वक्तव्यत्वात् । शुद्धापामेवेदं शरीरं, बहुहेतुकत्वमेव **भूयस्त्वं** बहुधापरिणामाच्च । द्रव्यभूयस्करत्वं च । तस्मान्नियामकानां भूयस्त्वादपामेव ग्रहणम् ॥ २ ॥

वैदिकीं युक्तिमुक्त्वा लौकिकीमाह—

मात्रशब्दः कात्स्न्र्ये । खण्डयन्ति **नियामके**ति । जलेन सर्वेषा ग्रहणे इति शेषः । विरोधोऽप्याह **अस्थी**ति । इद च वाक्य तैत्तिरीयब्राह्मणे प्रथमाष्टके तृतीयप्रश्ने बोध्यम् । स्पष्टोऽर्थः । **विरोधश्चे**ति । यदि जलग्रहणेन सर्वेषां ग्रहणं चेत् पूर्वमस्थिमांसादिस्थूलभूतसंस्कारस्य कृतत्वाद्विरोध इति भावः । सिन्द्धान्तमाहुः **अपा**मिति । **तेजोबन्नानी**ति । तेजोजलान्नानीत्यर्थः । सौत्र हेत्वन्तर विशदयन्ति **उपलक्षणत्वेऽपी**ति । अपामेव ग्रहणं सर्वेपामुपलक्षकमित्यत्र नियामकसप्तकमाहुः **शुद्धत्वा**दिति । मेध्यत्वादित्यर्थः । **विशेषाभावा**दिति । अन्ने यथा पोषकत्व तथा जलेऽप्यस्तीति जले विशेषाभावादित्यर्थ । मध्यभावाज्जलस्येति शेषः । चतुर्थ नियामकमाहुः **दीक्षिते**ति । बृहदारण्य अग्रे षष्ठे पर्याये शुद्धापामेवेद शरीरमिति दीक्षिततुल्यत्वेन वक्तव्यत्वादित्यन्वयः । पञ्चममाहुः **बह्वि**ति । सोमादिहेतुकत्वमित्यर्थः । **बहुधे**ति । वृष्ट्यन्नरेत शोणितादीत्यर्थः । **द्रव्ये**ति । जलेन सर्वद्रव्यभूयस्त्वम् । अस्थिमासयोस्तु पूर्वशरीरनाशान्तरमेव निवृत्तिरिति न विरोधः ॥२॥

लौकिकीमिति । सूत्रप्रयोजन**मपा**मिति । **जनकत्वा**दिति पूर्व-

प्राणगतेश्च ॥३॥

प्राणस्य गतिः **प्राणगतिः** । "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति" (बृ. ४.४.२.) इति प्राणाप्यायनजनकत्वादपाम् । प्राणो गच्छन् स्वाप्यायकं गृहीत्वैव गच्छति । जलौकावदन्यत्र देहसबन्धः । मुक्तौ न प्राणा गच्छन्ति । क्रममुक्तावपि देहसंबन्ध इति पौराणिकाः । देवभाव इत्यौपनिषदाः । अतो दूरे प्राणगतिरत्रैव । अतोऽपां संश्लेषो वक्तव्यः । चकारात् "विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च" (बृ. ४.४.२.) इति सकर्मसहभावं बोधयति श्रुतिः । तस्मादद्भिः परिष्वक्तो गच्छति ॥३॥

श्रुतिविरोधं परिहरति, परस्परविरोधे व्यवस्था वा बोध्यते—

अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥४॥

ननु "यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राण" (बृ. ३.

णान्वयः । काममयः पिब । आपोमयः प्राणः पिबतो न विच्छेत्स्यतीत्यत्रापां प्राणाधायकत्वं सिद्धम् । पथिकः यथा जलं गृहीत्वा गच्छति तथा प्राण इति लौकिकीं युक्तिमाहुः **प्राण** इति ॥ ननु निष्कामयज्ञकर्तुः प्राणोत्क्रमण एव विचारोऽयमत्र को हेतुरित्यत आहुः **जलौकाव**दिति । अन्यस्यां श्रुतौ पूर्वशरीरावच्छेदेन सा मान्यते । ज्ञानमेव यत्र प्रधानमुक्त तस्य तदानीमेव तृणजलौकान्यायेन देहसंबन्ध उक्त इत्यर्थः । **गच्छन्ती**ति । देहसंबन्ध एव नास्तीत्यर्थः । अत्र विचारे प्रयोजनमाहुः **अत** इति । **अतः** कारणादित्यर्थः । **अत्रैवे**ति । सद्योमुक्तिं विहाय सर्वत्र देहसंबन्धस्तत्काल एव यज्ञकर्तुस्तु दूर इत्यर्थः । उपसंहरन्ति **तस्मा**दिति ॥३॥

बोध्यते इति । श्रुतेर्विरोधपरिहारो वा गौणमुख्यभावेन व्यवस्था वा अनेन सूत्रेण बोध्यत इत्यर्थः । पूर्वपक्षांशं व्याकुर्वन्ति **नन्वि**ति ।

२. १३.) इत्यादिना **अग्न्यादिगतिः** प्राणानां श्रूयते। न च "ओषधीर्लोमानि वनस्पतीन् केशा" (बृ. ३. २. १३.) इत्यत्र प्रत्यक्षविरोधाद् बाधितविषयेयं श्रुतिरिति वाच्यम्। आध्यात्मिकेन्द्रियमध्यपाताल्लोमकेशा अप्याध्यात्मिका एव ग्राह्या यैः कण्डूलावण्यप्रतीतिः। दृश्यमानानि तु गोलकस्थानानि। तस्मात् प्राणोत्क्रमणश्रुतिरग्न्यादिभावश्रुत्या बाध्यत **इति चेन्न, भाक्तत्वात्।** प्रकरणव्यतिरेकेणामुक्तविषये प्रवृत्ता भाक्ता भवति। "अथ हैनं जारत्कारव आर्तभागः प्रपच्छ" (बृ. ३. २. १.) इत्यत्र ग्रहनिरूपणानन्तरं मृत्युं पृष्ट्वा म्रियमाणप्रश्ने नामैव न जहात्यन्यज्जहातीति प्रतिज्ञाते प्राणोत्क्रमणप्रश्ने नेति प्रतिवचने (बृ. ३. २. ११.) वागादीनामग्न्यादिभावानुवादः। ततो मन्त्रणाज्जीवस्य ब्रह्मभावोऽवगम्यते। सामग्र्या गतत्वात्। "तौ ह यदूचतुः" (बृ. ३. २. १३.) इति कर्मप्रशंसा भिन्नप्रश्नोत्तरा, उभयोर्वचनविधानात्। ब्रह्मविद्या च गोप्या।

यत्रेति श्रुतिः बृहदारण्यके आर्तभागब्राह्मणे। श्रुतेर्गौणत्वमाशङ्कते **न चे**ति। **बाधितविषये**ति। पुरुषस्य लोमानि ओषधीः अप्येति (अपियन्ति) केशाः वनस्पतीनित्यादिना तेषामप्ययकथनम्। तथा च तेषामप्ययायोग्यत्वाभावाद्बाधितविषये गौणीत्यर्थः। एतादृशं भाक्तत्वं नास्तीति निषेधन्ति **आध्यात्मिके**ति। यैः केशादिभिः अन्यान्यथाध्यात्मिकान्याहु**र्दृश्यमाना**नीति। तथा चाध्यात्मिकत्वान्न बाधितविषयेत्यर्थः। सूत्रोक्तं भाक्तत्वं वक्तुं हेतुं विशदयन्ति **प्रकरणे**ति। मुक्तप्रकरणं विना व्यवस्थारूपं द्वितीयपक्षं विशदयन्ति **अथे**ति। विषयवाक्यं विशदयन्ति **पप्रच्छे**ति। **नेति प्रतिवचने** इति। उदस्मात्प्राणात्क्रामन्त्याहो नेति प्रश्ने तत्र नेति प्रतिवचने प्रत्युत्तर इत्यर्थः। **अनुवाद** इति। ततो यत्रास्य पुरुषस्येत्यादिनानुवादः। **ब्रह्मभावे**ति। सोम्य हस्तमित्यदिना। **सामग्र्या** इति। सांसारिकभोगसामग्र्या इत्यर्थः। **प्रश्नोत्तरे**ति। प्रश्नोत्तरविषयेत्यर्थः। **उभयो-**

उत्क्रमणश्रुतिस्तु "स यत्रायं शारीर आत्मा" (बृ. ४. ४. १.) इति ब्राह्मणे जीवस्य परलोकविहारार्थं "निष्क्रामति चक्षुष्येव" (बृ. ४. ४. २.) इत्यादिना प्राणानां विहारसाधकानां निर्गमनमाह। अतो मुक्तामुक्तविषयभेदस्य व्यवस्थापकस्य विद्यमानत्वादग्न्यादिभावश्रुतिर्नोत्क्रमणश्रुतिबाधिका। तस्मादन्यत्र सिद्धो धर्मोऽन्यत्रावस्थासाम्याद्योज्यमानो **भाक्तो** भवति। अतः प्राणोत्क्रमणमस्ति। तस्मात्संपरिष्वक्तो गच्छतीति सिद्धम् ॥ ४ ॥

किंचिदाशङ्क्य परिहरति—

प्रथमे श्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥ ५ ॥

"असौ वाव लोको गौतमाग्निः" (छा. ५. ४. १.) इत्यत्र "देवाः श्रद्धां जुह्वति" (छा. ५. ४. २.) इति श्रुतेरापो न संकीर्तिताः। अपां हि पञ्चम्यामाहुतौ पुरुषवचनम्। श्रद्धा मनोधर्मः, स कथं हूयते इति चेन्न, मनसा सह भविष्यति। तथाप्यरुणान्यायेन धर्ममुख्यत्वम्।

रिति। तौ यदूचतुरित्युक्त, न तु तौ यन्मन्त्रयांचक्रतुरित्युक्तम् ॥ ननु मन्त्रणार्था कुतो न विवृतेत्यत आहुः **ब्रह्मविद्ये**ति। **नोत्क्रमणश्रुतिबाधिके**ति। विषयभेदे बाध्यबाधकभावो नास्तीत्यर्थः। विषयवाक्यपर्यालोचनया सुगममिदम् ॥४॥

सौत्रं शङ्काभाग विशदयन्ति **असा**विति। **स कथ**मिति। अन्यथानुपपत्त्या जलानां कल्पनमिति कल्पनया अब्ग्रहणमिति शङ्काकर्तुराशयः। समाधानमाहुः **मनसे**ति। मनसा प्रणयति। इय वै मन इत्यादिश्रुतिप्रामाण्यान्मनःसाहित्यमित्यर्थ. ॥ नन्वेत्र चेन्मनसो होम्यत्वेन श्रद्धाया

तर्हि कथं प्रश्नोपसहारौ। परोक्षवादाद्भविष्यति। चमसवत्। "श्रद्धा वा आपः" (तै. ब्रा. ३. २. ४. १.) इति श्रुतेः शुद्धिहेतुत्वसाम्यात्। "चन्द्रमा मनसो जातः" (तै. आ. ३. १२. ६.) इति श्रुतिश्चैवंपरा भविष्यति। तस्मात् **प्रथमाहुतावपामश्रवणान्न** ताभिः संपरिष्वक्तो गच्छतीति **चेन्न, ता एव** आप एव श्रद्धाशब्देनोच्यन्ते। **हि** युक्तोऽयमर्थः। यथा कर्मकाण्ड आपः श्रद्धाशब्देनोच्यन्ते तथा प्रकृतेऽपि। परं नोपचारः, **उपपत्तेः।** उपक्रमोपसंहारयोर्बलीयस्त्वात्। न तु मध्ये श्रुतेन श्रद्धाशब्देनोपक्रमोपसंहारावन्यथाकर्तुं युक्तौ। श्रद्धासहभावः संस्कारद्वारेण संस्कृतेषु भूतेषु सिद्धः। तेन मनःस्थाने आप एव वाच्याः।

गौणत्वमित्यत आहुः **तथापी**ति। **अरुणे**ति। सोमक्रये अरुणया पिङ्गाक्षयैकहायन्या सोम क्रीणातीति श्रूयते। तत्रारुणगुणस्य द्रव्यत्वाभावात् क्रयसाधनत्वाभावेऽपि द्रव्यद्वारा इतरगोव्यवच्छेदकतया क्रयसाधने मुख्यत्व तथा मनोधर्मश्रद्धाया मुख्यत्वमित्यर्थः॥ ननु श्रद्धापदेन आपो न गृह्यन्ते चेत् प्रश्ने उपसंहारे च अपां ग्रहणं कथमिति शङ्कते **तर्ही**हि। उत्तरयन्ति **परोक्षे**ति। शुद्धिहेतुत्वमपां श्रद्धायाश्च समानमिति परोक्षवादादापःशब्देन श्रद्धैवोच्यत इत्यर्थः। **चन्द्रमे**ति। श्रद्धाहोमे मन सहभाव उक्तः। तस्मात् चन्द्ररूपसोमस्योत्पत्तिबोधकश्रुतिरनुकूलेत्यर्थः। सिद्धान्तमाहुः **ने**ति। **श्रद्धाशब्देनोच्यन्त** इति। श्रद्धा वा आपः। **श्रद्धामेवारभ्य प्रणीप**माचरतीत्यादिना दर्शपूर्णमासप्रकरणे काण्डे तैत्तिरीयब्राह्मणे तृतीयाष्टके प्रथमेऽध्याय उच्यन्त इत्यर्थः। सिंहो देवदत्तवत् श्रद्धापदस्याप्सु लक्षणा भविष्यतीत्यत आहुः **पर**मिति। सत् सत्यं दधातीति श्रद्धेति योगेन श्रद्धापदस्य जलवाचकत्व बोध्यम्। कुत्रचिद्वेदे श्रद्धाजनकत्वमप्यपामुक्तमतोऽत्र जलस्यैव ग्रहणमित्यत्र किं विनिगमकमतः सौत्रं हेतु विशदयन्ति **उपपत्ते**रिति। **श्रद्धासहभावे**ति। यो वै श्रद्धामनारभ्येति तैत्तिरीयप्रथमाष्टकश्रुत्या पूर्वजन्माग्निहोत्रहोमसंस्कारेण सिद्ध इत्यर्थः। **भिन्ना सृष्टिः** विराटसृष्टिः।

"चन्द्रमा मनसो जातः" (तै. आ. ३. १२. ६.) इति तु भिन्ना सृष्टिः। श्रद्धाप्रयोगस्तु कामनाकृतव्यावृत्त्यर्थः। तत्र फल एव श्रद्धा, न कर्मणि। "यो यच्छ्रद्धः स एव सः" (भ. गी. १७. ३.) इति श्रद्धाया आश्रयस्य विषयभावजनकत्वात् कर्तुः कर्मभावाय श्रद्धाप्रयोगः। ततः संस्कृता आपो यजमानरूपा हूयमाना भवन्तीति सिद्धं भवति। तस्मात् प्रथमेऽप्यपामस्ति श्रवणम् ॥ ५ ॥

अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ ६ ॥

स्थितमेतज्जीवः संपरिष्वक्तो रंहतीति। तत्र विचार्यते। सर्वजीवाः संपरिष्वक्ता गच्छन्त्याहोस्विज्ज्ञानोपयोगिन इति विमर्शः। तत्र पञ्चाहुतिब्राह्मणे नाधिकारिणः श्रुताः। वेदे हि श्रुतानुसारिकल्पना। अतो विशेषस्याश्रुतत्वात् सर्वेषामेव पञ्चाहुतिप्रकार **इति चेन्न, इष्टादिकारिणां प्रतीतेः।** साधारणपक्षं दूषयति। कुतः। **इष्टादिकारिणां प्रतीतेः।** इष्टादिकारिणः प्रतीयन्ते श्रद्धापदेन देवकर्तृत्वेन च,

---

अत्र स विषय एव न भवतीति पूर्वपक्षिणं प्रत्युक्तिरिति भाव। ननु तर्हि श्रद्धापदप्रयोगः किमर्थमत आहुः **श्रद्धे**ति। **तत्र** सकामयष्टरि निष्कामयष्टुर्विशेषमाह **यो य**दिति। 'यो य'दिति गीतावाक्यात् श्रद्धाया अय स्वभाव. स्व स्वाश्रय च विषयीकरोति। अतः कर्तुः कर्मात्मकत्व बोधयितु श्रद्धापदप्रयोग इत्यर्थः। सिद्धमाहुः **तत** इति ॥५॥

स्थितमिति। निर्णीतमित्यर्थः। निर्णीतेऽपि विशेषांशे संशये विचारं कुर्वन्ति **तत्रे**ति। **नाधिकारिण** इति। न श्रुता इत्यर्थः। सिद्धान्तमाहु· **इष्टे**ति। यज्ञादिकारिण इत्यर्थः। अत्र हेतुत्रयमाहुः **श्रद्धापदेने**ति। यो 'वै श्रद्धामनारभ्य यज्ञेन यजते' इति तैत्तिरीये प्रथमाष्टके प्रतीयन्त इत्यर्थः ॥६॥

सोमभावसाम्याच्च। इष्टादिकारिणां धूममार्गव्युत्पादने सोमभाव उक्तः। अत्रापि प्रथमाहुतिफलं सोमभाव उच्यते। अतः श्रुतिसाम्यादपीष्टाधिकारिणो रंहन्तीति सिद्धम् ॥ ६ ॥

भाक्तं वानात्मवित्त्वात् तथा हि दर्शयति ॥ ७ ॥

किंचिद्दूषणं परिहरति। ननु यदि श्रुतिसाम्येन सोमभावादिष्टादिकारिणो रंहन्तीत्युच्यते तदा सोमभावे तेषामनिष्टं श्रूयते "तद्देवानामन्नं तं देवा भक्षयन्ति" (छा. ५. १०. ४.) इति। समानश्रुतौ "चाप्यायस्वापक्षीयस्वेत्येवमेनांस्तत्र भक्षयन्ति" (बृ. ६. २. १६.) इति चन्द्रदृष्टान्तेन ते च भक्ष्यन्ते। ततश्च देवाः स्वान्नं पर्जन्येऽग्नौ कथं जुहुवुः। अतः पञ्चाहुत्यभाव इत्याशङ्क्य परिहरति वाशब्दः। तेषां सोमभावो गौणो भक्षणं च। प्रकृतेऽप्यङ्गारत्वाच्चन्द्रमसः कथमाहुतिफलं भवेत्। सोमभावस्य भाक्तत्वमग्रे निरूपयिष्यामः। इदानीं भक्षणस्य गौणत्वं निरूपयति। अन्नभावे हि मुख्यं भक्षणं भवति। तदन्यस्यान्नभावो नोपपद्यते। ब्रह्मज्ञाने तु भवति "स सर्वं भवति" (बृ. ९. ४. १०.) "तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च" (बृ. १.

दूषणमाहुः **नन्वि**ति। **तेषा**मिति। इष्टादिकारिणामित्यर्थः। दूषणपरिहारमाहुः **तेषा**मिति। कथं गौणत्वमत आहुः **प्रकृते**ति। **कथ**मिति। यस्य भक्षणं स आहुतिफलं कथं भवेदित्यर्थः। गौणत्वं कथमित्यत आहुः **सोमभावस्ये**ति ॥

तदन्यस्येति। ब्रह्मज्ञानिनोऽन्यस्येत्यर्थः। **भवति** अन्नभावो भवति। कुत इत्यत आहुः **स सर्व**मिति। अत्र प्रमाणमाहुः **तद्धैत**दिति। कुतः

४. १०.) इति। प्रकृते तु तन्न, **अनात्मवित्त्वात्**। तथा सति मोक्ष एव भवेत्। अतो भक्षणमपि गौणम्। **तथा हि** श्रुतिरेव गौणभावं शब्दस्य बोधयति। "अथ योऽन्यां देवतामुपास्ते" (बृ. १. ४. १०.) इत्यत्र यथा पशुशब्द एवमत्रापि भक्षणं सहक्रीडनं सेवकभावः। चन्द्रतुल्यापदेशाय तथावचनम्। तथा सति तेषाममरत्वेन तथास्तुतिः। चन्द्रस्य भक्षणं तु क्षयादनुमीयते श्रुत्या "प्रथमां पिबते वह्निः" इत्यादिरूपया। देवानामभक्षणं भगवदवयवानामेव। अशनानशने तस्याविरुद्धे। आधिभौतिकानां देवानामशनमेव। तस्माद्भक्षणस्य गौणत्वात् सोमभावे न काचिच्चिन्ता ॥ ७ ॥

इति तृतीयाध्याये प्रथमपादे प्रथमं रंहत्यधिकरणम् ॥ १ ॥

अनात्मवित्त्वमत आहु: **तथा सती**ति। सौत्र **तथा हि**पद व्याकुर्वन्ति **तथा ही**ति। यावत्संपातमुषित्वेति **श्रुतिः**। अत्र श्रौतं दृष्टान्तमाहुः **अथे**ति। **पशुशब्द** इति। पशुतुल्यत्वबोधको गौण इति शेषः। **भक्षण**मिति। यथा स्त्रिय भुङ्क्ते इत्यत्र यथा भोगो, न तु चर्वणमेवमत्रापि। उपचारे प्रयोजनमाहु: **चन्द्रे**ति। **तथावचनं** गौणत्ववचनम्। **तथा सती**ति। यथा अग्निर्माणवक इत्ययथास्तुति. एव चन्द्र पुनः पुनः क्षीयते वर्धते एवमेतेऽपि जीवा इष्टादिकारिणः आवर्तमानाः अमरतां प्राप्नुवन्तीत्येतदर्थं गौणत्ववचनमित्यर्थः। अन्यत्र चन्द्रस्य भक्षण सिद्धम्। गौणस्य चेदस्य गौणत्व वक्तव्यमित्यत आहुः **चन्द्रस्ये**ति। **रूपये**ति। सोमोत्पत्तिपरिशिष्ट्या श्रुत्या ज्ञायत इत्यर्थः। **देवाना**मिति। भगवदवयवीभूतानामाधिदैविकानामित्यर्थः। कुत इत्यत आहुः **तस्ये**ति। ब्रह्मणो विरुद्धधर्माश्रयत्वादिति भावः। **अशनमेवे**ति। कर्मसचिवानां देवताविग्रहाधिकरणन्यायेन विग्रहसिद्धिः। ततश्चः हविर्भोक्तृत्व सिद्धमेवेत्यर्थः। **न काचिच्चिन्ते**ति। इष्टादिकारिणां सोमभावः। तदेषामन्नं भवतीति चिन्ता नास्तीत्यर्थः ॥७॥ इति प्रथमाधिकरणम् ॥१॥

प्रथमाहुतिः सफला विचारिता, द्वितीयां विचारयितुमधिकरणारम्भः। सोमस्य पर्जन्यहोमे वृष्टित्वमिति, सोमाद्वृष्टिभावे रूपरसादीनां हीनतया प्रतीयमानत्वाद्यागस्यावान्तरफलं तत्र भुङ्क्त इति निश्चितम्। तत्र संशयः किं सर्वमेवावान्तरफलं तत्र भुङ्क्ते आहोस्विदनुशयवान् वृष्टिर्भवतीति, सद्वासनयाग्रिमजन्मनि सदाचारयुक्त एव स्यादिति "आचारहीनं न पुनन्ति वेदाः" (वसि. स्मृ. ६ ३) इति बाधोपलब्धेः। अतो विचार उचितः। तत्रावान्तरफलस्यावशेषेऽवान्तरफलत्वबाधाज्ज्ञानौपयिकशरीरभावादेव सदाचारसिद्धेः प्रयोजनाभावाच्च निरनुशय एव वृष्टिभावं प्राप्नोतीत्येवं प्राप्त उच्यते—

कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ ८ ॥

द्वितीयाहुतिविचारं कर्तुं कृतात्ययाधिकरणमाहुः **कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च**। विचारमेवाहुः **सोमस्ये**ति। **अवान्तरफल**मिति। भोग्ये हीनत्वादिति भावः। **तत्र** भोगे। **अनुशयवा**निति। अनु पश्चात् शेते कर्मभोगानन्तरे तिष्ठति यः शेष सोऽनुशयस्तद्वान्। एतद्विचारस्य प्रयोजनमाहुः **वृष्टि**रिति। किंचित्पुण्यशेषत्वे आचारवान्भवतीति भावः। पूर्वपक्षमाहुः **तत्रे**ति। **बाधा**दिति। सकामानां भोगोत्तरमावृत्तिः, निष्कामानां वृष्टिभावः भोगः। पूर्वस्य मुख्यं फल, अपरस्यावान्तरं फलम्। तत्र यावत्संपातमुषित्वेति श्रुतिप्रामाण्यात् संपातशब्देन कर्मबोधनात् कर्मफलभोगपर्यन्त तत्र स्थितिरपेक्षिता। तत्र यदि सशेषस्य वृष्टिभावे संपूर्णफलभोगाभावाद्यवान्तरफलता तत्र न स्यादित्यर्थः॥

ननु जन्मान्तरे सदाचारसिद्ध्यै शेषोऽपेक्षित इत्यत आहुः **ज्ञानौपयिके**ति। घटेन जलमाहरेत्यत्र यथा छिद्रेतरघटलाभः, एवमनाचारेतरशरीरलाभ इत्यर्थः। सिद्धान्तमाहुः **उच्यत** इति। सूत्रं व्याकु-

कृतात्ययेऽनुशयवान्। कृतस्य भावस्य **अत्यये** नाशे सति **अनुशयवान्** अवान्तरफलसाधकलेशसहित एव वृष्टिभावं प्राप्नोति। कुतः। **दृष्टस्मृतिभ्याम्।** **दृष्टं** तावद् भोगसाधकमूलद्रव्यनाशेऽपि भोगसाधकतादशदेहवस्त्रादिसहित एव तस्मात्स्थानादपगच्छति। अन्यथा सद्य एव देहपातः स्यात्। अतो यथा लोके सानुशयः। **स्मृतिश्च** "यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य दत्तस्य कृतस्य शोभनम्। तेनाजनाभे स्मृतिमज्जन्म नः स्याद्वर्षे हरिर्यद्भजतां शं तनोति" (भाग. ५. १९. २८) इति देवगाथा। अतो ज्ञानौपयिकजन्म सानुशयवत एव भवति। अन्यथा पूर्वजन्मस्मृत्यभावे विषयासक्तिः प्रसज्येत॥ नन्वनुशयसहकृत एव जीवो नाद्भिः परिष्वक्तो भवेत्। अत आह **यथेतं** यथागतम्। अन्यथा प्रश्ननिरूपणयोर्बाधः स्यात्। तर्हि तावदवान्तरफलसाधकसहितः स्यात्। अत

वेन्ति **कृतस्ये**ति। प्रथमं देवकृतस्येत्यर्थः। **भावस्य** सोमभावस्येत्यर्थः। न कृतस्य कर्मण इत्यर्थ इति वाच्यम्, तस्य संपूर्णफलभोगान्तरमेव नाशात्। अनुशयशब्दार्थमाहुः **लेश** इति। कर्मजन्यसामग्रीलेश इत्यर्थः। सौत्र हेतु विशदयन्ति **कुत** इति। पूर्वजन्मार्जितकर्मणा भोगसाधन देहद्रव्यवस्त्वादिकमस्मिञ्जन्मनि जायते। तत्र द्रव्यनाशस्य कर्मनाशजन्यत्व न वक्तव्यमिति भावः। **अन्यथे**ति। लेशस्यापि पूर्वकर्मनाशजन्यत्वे स्वीक्रियमाणे सतीत्यर्थः। **सद्य एवे**ति। 'प्रारब्धकर्मनिर्वाणो न्यपतत्पाञ्चभौतिक'मिति वचनादित्यर्थः॥ ननु कर्मशेष एवानुशयो, न तु सामग्रीशेष इत्यत आहुः **स्मृती**ति॥ ननु 'कदाचित्सुकृतं कर्म कूटस्थमिव तिष्ठति। मज्जमानस्य संसारे यावद् दुःखाद्विमुच्यते' इति वचनात् कर्माप्यनुशयपदार्थः प्रतिभातीत्यत आहुः **अन्यथे**ति। कर्मजन्यभोगजनकसामग्रीलेशस्यानुशयपदार्थत्वाभावे इत्यर्थः। सूत्रांशमवतारयन्ति **नन्वि**ति। सोमभावस्य नाशे जाते सति अपामपि साजात्यान्नाश इति भावः। **यथेत**मित्यस्यार्थमाहुः **यथागत**मिति। पूर्वं

आह **अनेवं च**। एवं प्रकारयुक्तागमनं नास्ति, भोगस्य जातत्वात्। चकाराद्वैराग्यसहितोऽपि। तस्माद्**नुशयवान्** भिन्नप्रकाराद्भिः परिष्वक्तो देवकृपासहितो वृष्टिर्भवतीति ॥ ८ ॥

किंचिदाशङ्क्य परिहरति—

चरणादिति चेन्नोपलक्षणार्थेति काष्र्णाजिनिः ॥ ९ ॥

ननु नात्रोत्तमजन्मार्थमनुशयोऽपेक्ष्यते **चरणादेव** भविष्यति "तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्" (छा. ५. १०. ७) इत्यादिना यः पूर्वजन्मनि विहिताचरणं करोति स उत्तमं जन्म प्राप्नोति, यस्तु निषिद्धाचरणं करोति स श्वादियोनिं प्राप्नोतीति "साधुकारी साधुर्भवति" (बृ. ४. ४. ५) इत्यादिश्रुत्या च प्रतिपाद्यते। प्रकृते तु तस्य रमणीयचरणस्य चरणादेव तस्य सम्यग्जन्म भविष्यति किमनुशयसहभावे**नेति चेन्न**, चरणश्रुतौ या योनिरुक्ता सा **उपलक्षणार्था**, अनेन पूर्वजन्मनि समीचीनं कृतमिति ज्ञापिका, न तु तस्मिञ्जन्मनि समीचीनकरणे नियामिका। अन्यथा ब्राह्मणानां निषिद्धकरणं न स्यात्। तस्मादनुशयोऽपेक्ष्यते ज्ञानोपयोगार्थ-

---

यथा भूतः संपरिष्वक्त एवमत्राप्यद्भिः परिष्वक्त इत्यर्थः। **साधकसहिते**ति। साधककर्मसहित इत्यर्थः। **भिन्नप्रकाराद्भि**रिति। वैराग्यसाहित्यमिदानीं, पूर्वं तु भोगमात्रसाधकत्वमपामिति प्रकारभेद इत्यर्थः ॥८॥

चरणादेव पूर्वजन्मकृताचारादिसत्कर्माचरणादेव। तत्र श्रुतिप्रमाणमाहुः **तद्य इहे**ति। **अभ्याशो ह**ेति। शीघ्रमित्यर्थः। **यत्** यस्मात्कारणात्। समाधानांश व्याकुर्वन्ति **ने**ति। **उपलक्षणार्थे**ति। काकवन्तो देवदत्तगृहा इत्यत्र यथा उ तृणवत्त्वेन काकवत्त्वमुपलक्ष्यते तथोत्तमजन्मना पूर्वजन्मनि रमणीयाचरणमस्येति श्रुत्या ज्ञाप्यत इत्यर्थः। एतदेवाहुः **अने-**

मिति **कार्ष्णाजिनि**राचार्यो मन्यते। कार्ष्णाजिनिग्रहणं पञ्चाग्निविद्याया भिन्नप्रकारत्वज्ञापनार्थम्। तस्मादस्य स्वमते भिन्नत्वान्न शङ्का न चोत्तरम्। न हि पञ्चाग्निविद्यायां पुरुषादन्यभावः संभवति। प्रकरणपरिगृहीता श्रुतिर्नान्यत्र न्यायसंपादिका ॥ ९ ॥

आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ १० ॥

नन्वेवं सति चरणश्रुतिर**नर्थि**का, ज्ञापनायां प्रयोजनाभावात्। अतो विधायकत्वं श्रुतेरिष्टानिष्टफलबोधकश्रुतिवत्। अतः कर्मतारतम्येन फलविधानान्निष्कामकर्मकर्तुर्ज्ञानोपयोगिदेहविधानं भविष्यतीत्यनुशयसहभावो व्यर्थ **इति चेन्न, तदपेक्षत्वात्**। धूमादिमार्गस्य तस्याः श्रुतेर-

---

नेति। **तस्मादनुशये**ति। **अनुशयः** कर्मशेषः। कार्ष्णाजिनिमत आचारादिना सत्कर्मणा च ब्रह्मजन्म, न तु ब्रह्मज्ञान, तत्तु पूर्वजन्मकृतयागाद्यनुष्ठानेन पञ्चाग्निविद्यायां पुरुषभावः। स च कर्मशेषरूपानुशयाद्भवतीति भिन्नप्रकार इत्यर्थः। स्वमतमाहुः **तस्मा**दिति। कार्ष्णाजिनिमतीयानुशयात्। **अस्य** भोगसाधकसामग्रीशेषरूपफलशेषस्यानुशयस्य। **न शङ्के**ति। अनुशयस्य कर्मशेषरूपत्वे कर्मरूपाचरणाद्रमणीयामित्यादिशङ्का उत्तरं च संगच्छते। फलशेषरूपत्वे शङ्कोत्तराभाव इत्यर्थः। इदमेव विशदयन्ति **न ही**ति। **प्रकरणपरिगृहीते**ति। प्रश्नोत्तरादिप्रकरणपरिगृहीतेत्यर्थः। **अन्यत्र** रमणीययोनिसाधककर्मान्तरस्थले ॥ ९ ॥

सौत्रं पूर्वपक्षांशं विशदयन्ति **न**न्विति। **एवं सति** अनुशयस्य सहभावे स्वीक्रियमाणे सति। **ज्ञापनायां** पूर्वपुण्यज्ञापनायाम्। **अतः** अतःकारणात्। **श्रुतेः** चरणश्रुतेः **विधायकत्व**मेतज्जन्मविधायकत्वं स्वीकर्तव्यमिति पूर्वेणान्वयः। अत्र दृष्टान्तमाहुः **इष्टे**ति। 'प्रतितिष्ठन्ती ह वा एतास्रीरूपयन्ती'त्यत्र प्रतिष्ठाबोधनेन 'रात्रिसत्रं कुर्या'दित्यादौ इष्टम्, 'केवलाघो भवति भवति केवलादी'त्यत्र अघबोधनेन 'केवलादनं न कुर्या'-

पेक्षत्वात्। काम्येष्ट्यादिकारिणः फलभोगानन्तरमुत्पत्तौ 'सुखानन्तरं दुःख'-मितिन्यायेन पापस्यैवोपस्थितत्वादसमीचीनशरीरप्राप्तिर्मा भवत्विति रमणीयानुष्ठातॄणां रमणीयशरीरप्राप्तिरेव बोध्यते, न न्यायेनासमीचीनशरीरमिति। तस्मादन्यनिषेधार्थं सार्थकत्वान्नानुशयप्रतिबन्धिका। किंच रमणीययोनिः किमाकस्मिकी सकारणा वा। नाद्या वेदवादिनाम्। द्वितीये तु "स्वकर्मणा पितृलोकः" (बृ. ३. ५. १६) इति वस्वादित्यरूपता च वक्तव्या। "प्रजामनु प्रजायन्ते श्मशानान्तक्रियाकृतः" (भाग. ३. ३२. २०) इति च। "त्रैविद्या मां सोमपाः" (भ.गी. ९. २०) इत्यादिना इन्द्रलोकभोगानन्तरं तथैव पुनर्भवनं च वक्तव्यम्। न च सर्वेषामैक्यं, भिन्नरूपत्वात्। तस्मात् कर्मकर्तृवैचित्र्येण श्रुतिस्मृतिभेदाः समर्थयितव्याः। न त्वेकमपरत्र निविशते, उपरोधप्रसङ्गात्। तथा

दित्यादौ अनिष्ट बोध्यत इति तद्वदित्यर्थ। सौत्रं सिद्धान्त विशदयन्ति नेति। कथं धूमादिमार्गे अपेक्षेत्यत आहुः **काम्येष्ट्यादी**ति। उपसंहरन्ति **तस्मा**दिति। तस्मात्कारणादित्यर्थः। **अन्यनिषेधार्थं** काम्येष्ट्यादिकारिणामसमीचीनशरीरव्यावृत्त्यर्थम्। **नानुशये**ति। निष्कामकर्मकर्तॄणां फलसामग्रीरूपशेषरूपानुशयस्य न प्रतिषेधिकेत्यर्थः। तथा च धूममार्गमुपक्रम्य चरणश्रुतेः पठितत्वात् तत्रैव तदपेक्षा, न तु पञ्चाग्निविद्यायामिति भावः। पक्षान्तरमाहुः **किंचे**ति। **वेदवादिनां** वेदप्रामाण्याङ्गीकर्तॄणां, न तु बाह्यानामित्यर्थः। तथा चाकस्मिकी वक्तुं न शक्यते इति भावः। आवश्यकपक्षे विचारमाहुः **द्वितीये** त्विति। सकारणपक्षे। कारणीभूतकर्मणां फलभेदेन श्रुतिस्मृतिसमर्थनमाहुः **स्वकर्मणे**ति। वर्णाचारविहितकर्मणेत्यर्थः। तस्य फलद्वयमाहुः **पितृलोक** इति। सपिण्डीकरणान्तक्रियाफलमाहुः **प्रजा**मिति। पुत्रे पुत्रोत्पत्तिरूपमित्यर्थः। सकामेष्ट्यादिकारिणां गीतोक्तं फलमाहुः **त्रैविद्ये**ति। **ऐक्यमि**ति। फलैक्यमित्यर्थः। **तस्मा**दिति।

च प्रकृतेऽप्यनुशयाभावे भक्षणभवनयोर्नियमो न स्यात् । ब्राह्मणानामप्यन्ने बलिहरणे श्वचण्डालयोर्भक्षणं, ब्राह्मणभक्षणेऽपि मलभावे शूकरभक्षणम् । अनुशयस्य नियामकत्वे तुषादिष्वन्नभाव एव यावत्समीचीनरेतोभावः । तस्मादुपलक्षणतैव चरणश्रुतेर्युक्ता । तस्मादनुशयसहित एव वृष्टिभावं प्राप्नोतीति सिद्धम् ॥ १० ॥

फलांश एवानुशय इति तु स्वमतम् । कर्म फलं च द्वयमेवेश्वरेच्छया

फलभेदकृतकर्मभेदस्यावश्यकत्वादित्यर्थः । **समर्थयितव्या** इति । 'ज्ञान ज्ञेय परिज्ञाते'ति गीतोक्तभेदैः इदं वाक्यमेतादृशकर्मपरमेतादृशकर्तृपरमिति समर्थयितव्या इत्यर्थः । **उपरोधे**ति । विरोधेत्यर्थः । **प्रकृतेऽपि** चरणवाक्येऽपि । अनुशये नियामकत्वेन स्वीकार्य इत्यर्थः । **न स्या**दिति । चरणवाक्यात्पूर्वं धूमादिमार्गवाक्येनान्नानां भक्षणस्य नानायोनीना च नियमो न स्यादित्यर्थः । नियामकत्वमेव विशदयन्ति **ब्राह्मणादीना**मिति । **अन्ने** इति । भक्षणयोग्येऽन्ने इत्यर्थः । **बलिहरणे** कृते सतीत्यर्थः । **मलभावे** इति । केवलमलभाव एव, न तु रेतोभाव इत्यर्थः । तथा च रमणीययोनिचरणयोः कार्यकारणभावं स्वीकृतवतोऽपि अनुशयस्य नियामकत्वाभावे स्वीकृते भक्षितादप्यन्नात्समीचीन रेतो न स्यात् । तदभावे समीचीनयोनिर्न स्यादित्यर्थः ॥ नन्वन्नभावेऽपि तत्र तुषस्यापि सत्त्वात्ततो रेतोत्पत्तिर्नास्तीत्यत आहुः **अनुशयस्ये**ति । **अन्नभाव एवे**ति । तुषस्य गोप्रभृतिभिर्भक्षणे कृते अनन्तरं दुग्धे जाते अद्यते इत्यन्नमितिव्युत्पत्त्या तत्राप्यन्नभाव एवेत्यर्थः । **तस्मा**दिति । धूमादिमार्गे नानाफलानामुक्तत्वादित्यर्थः । **उपलक्षणतैवे**ति । अनुशयोपलक्षणतैवेत्यर्थः । तथा च सर्वत्रानुशयापेक्षास्तीति भावः । उपसंहरन्ति **तस्मादि**ति ॥ १० ॥

कीदृशोऽनुशयः कियत्पर्यन्तं तिष्ठतीति ज्ञापयितुमाहुः **सुकृते**ति । आशयो द्विविधः कर्मानुशयः फलानुशयश्च । तत्र निष्कामकर्मकर्तुर्मरणानन्तरं कर्मनिवृत्तौ पञ्चाग्निविद्यायां फलानुशय एव तिष्ठति स निभृतं

नियतं कर्म पुनर्भगवत्स्वरूपमेव ब्रह्मवादे। सोऽभिव्यक्तः फलपर्यन्तं तदादिसंयोग इति स्वमतम्। अन्तसयोगपक्षमाहैकदेशित्वज्ञापनाय—

सुकृतदुष्कृते एवेति तु बादरिः ॥ ११ ॥

सुकृतदुष्कृते एव विहितनिषिद्धकर्मणी अनुशय इति **बादरि**-राचार्यो मन्यते। तेन मोक्षपर्यन्तमनुशयोऽनुवर्तिष्यत इति सूत्रफलम्। तुशब्देन निरनुशयपक्षशङ्कैव नास्तीत्युक्तम्। एवं द्वितीयाहुतिर्निर्धारिता ॥ ११ ॥

इति तृतीयाध्याये प्रथमपादे द्वितीयं कृतात्ययाधिकरणम्॥२॥

तुल्यत्वेन विचार ऐक्ये वा पञ्चाहुतिधूममार्गयोः सोमभावगतस्य

भगवत्स्मृतियुक्तं जन्मोत्पाद्य निवर्तते। इदं च पञ्चमस्कन्धे देवगाथायां स्पष्टम्। तदनन्तरं भगवानेव सर्वं करोतीति गीतायां 'यत्करोषी'त्यादिनोक्तम्। अथ फलानुशयः स्वमत इति सूचयितुमाहुः **फलांश एवे**ति। **स्वमतं** श्रीमदाचार्यचरणानां मतम्। बादरायणमते कर्मानुशयमाहुः **कर्म फलं चे**ति। नैयायिकमते क्रियारूपस्य कर्मणः चिरस्थायित्वं नास्तीत्यत आहुः **कर्म पुन**रिति। **ब्रह्मवादे** इति। द्वितीयस्कन्धे ब्रह्मवाक्ये 'द्रव्य कर्म चे'त्यादिनोक्तम्। अतस्तस्य स्थायित्वमाहुः **स** इति। **सः** कर्मरूपो भगवान्। **फलपर्यन्त**मिति। तिष्ठतीति शेषः। **तदादी**ति। तस्य कर्मणः अभिव्यक्तिमारभ्य मोक्षोपयोगिजन्मरूपफलसंबन्ध इत्येवंरूपः कर्मानुशय इति। **स्वस्य** बादरायणस्य **मतम्**। मोक्षपर्यन्त कर्मानुशयस्तिष्ठतीत्येक-देशिबादरिमतमाहुः **अन्ते**ति। अन्तमोक्षपर्यन्त संयोग इत्यर्थः। बादरि-ग्रहणमेकदेशित्वज्ञापनाय। सूत्रार्थं विशदयन्ति **सुकृते**ति। **सूत्रफल**-मिति। सूत्रप्रयोजनमित्यर्थः। सूत्रोक्त'**तु**'शब्दस्वारस्यमाहुः **तुशब्देने**ति ॥ ११ ॥ इति द्वितीयाधिकरणम् ॥ २ ॥

पुनरावृत्त्युपसंहार उपलक्षणेनापि पापाचारवतामुपसंहारदर्शनात्तेषामप्या- हुतिसंबन्धो धूममार्गश्च प्राप्नोति। तन्निराकरणार्थमधिकरणारम्भः।

अनिष्टादिकारिणामपि च श्रुतम् ॥ १२ ॥

नन्वनिष्टादिकारिणामपि सोमभावः श्रूयते। इष्टादिव्यतिरिक्तानां "ये वै के चास्माल्लोकात् प्रयान्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" (कौषी. १. २) इति कौषीतकिनः समामनन्ति। अत्र च "कपूयां योनिमापद्यन्ते" (छा. ५. १०. ७) इति पर्यवसानम्। तेन सर्वे चन्द्रमसं गच्छन्ति। अयमाशयः। कर्माकर्मविकर्मेति त्रिविधो विधायको वेदः। "अग्निहोत्रं जुहुयात्" (मैत्री. ६. ३६), "यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषं" (कौर्म. उ. २१. २७.), "न हिंस्याद् भूतजा- तानि" (भाग. ६. १८. ४७)। ब्राह्मणादीनामपि त्रिविधकरणं संभवति। न हि सर्वोऽप्येकान्ततो विहितं वा प्रतिषिद्धं वा करोति।

पापाचारवतां विचारं कर्तुमनिष्टाधिकरणमाहुः **अनिष्टे**ति। अधि करणारम्भप्रयोजनमाहु **तुल्यत्वेने**ति। पञ्चाग्निविद्यायां धूममार्गे च सोमभावस्य एकरीत्या विचारे कृते इत्यर्थः। **ऐक्ये वे**ति। उभयत्र सोमभावस्य तौल्यादुभयोर्मार्गयोरैक्ये वाङ्गीकृत इत्यर्थः। एवमुक्त्वा प्रकृतमाहुः **पञ्चा- हुती**ति। **तेषामपी**ति। उपसंहारे कपूयचरणानामुक्तत्वात्पापिनामपीत्यर्थः। अस्य पूर्वपक्षसूत्रत्वं सूचयितुमाहुः **नन्वि**ति। सर्वेषां चन्द्रगमनमुक्तं, परं तु सर्वेषामाहुतिसंबन्धोऽस्ति वा नास्तीति विचारं कर्तुमाशयं प्रकटीकुर्वन्ति **अयमाशय** इति। **कर्मे**ति। **विधायको वेदस्त्रिविध** इत्यन्वयः। त्रयाणां क्रमेणोदाहरणत्रयमाहुः **अग्निहोत्र**मिति। द्वितीयोदाहरणे **यस्ये**ति पूर्वार्धम्। अनन्तरं 'स वै दुर्ब्राह्मणो नाम सर्वकर्मबहिष्कृत इति'। अस्य तु कर्माकरणनिन्दया तत्कर्मविधायकत्वम्। तृतीयस्य तु निषिद्ध- प्रागभावपरिपालनद्वारा विधायकत्वमेव व्युत्पाद्य प्रकृतमाहुः **ब्राह्मणादी-**

ततो विहितकर्तुरपि त्रयसंभवाज्ज्ञानाभावेन फलभोगनैयत्यात् सोमभावानन्तरमेवाकर्मविकर्मभोगो वक्तव्यः । अत एवाविशेषोपसंहारौ । तस्मात् सोमभावानन्तरमेव सर्वेषां जन्मेति प्राप्तम् ॥ १२ ॥

संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ १३ ॥

तुशब्दः पक्षं व्यावर्तयति । विहितव्यतिरिक्तकर्तॄणां **संयमने** यमसंनिधाने सुखं दुःखं वा**नुभूय आरोहावरोहौ** अनुभवार्थमारोहः अनुभूय अवरोह इति । कुतः । **तद्गतिदर्शनात् ।** तेषां गतिर्विसदृशी दृश्यते । वेदे हि प्रथमं विहिता द्वेधा गतिः सकामा निष्कामा चेति । सकामा यथाकाममनन्तविधा । निष्कामा ज्ञानरहिता द्विधा वैदिकगृह्य-

---

नामिति । **त्रिविधे**ति । कर्म अग्निहोत्रादि, अकर्म अग्निहोत्राकरणं, विकर्म विरुद्धकरणं हिंसादिकमित्यर्थः । कथं संभवतीत्यत आहुः **नही**ति । **तत** इति । **तत**स्तस्मात्कारणादित्यर्थः । तथा च येन विहितं क्रियते तेन निषिद्धमपि क्रियत इत्यपि कश्चित् संभवतीति भावः । एवं चेत्कि जातमत आहुः **ज्ञानाभावे**ति । विहितकर्मणो बलिष्ठत्वादाहुः **सोमे**ति । **वक्तव्य** इति । स च भूम्यामेव भविष्यतीति कपूयादियोनिरिति भावः । अत्रोपष्टम्भकमाहुः **अत एवे**ति । 'तद्य इह रमणीयचरणाः' 'य इह कपूयचरणाः' इत्यत्र 'य' इत्युभयोर**विशेषेणोपसंहारौ** वेद उक्तौ । उपसंहरन्ति **तस्मा**दिति । **प्राप्त**मित्यनेनेदं पूर्वपक्षसूत्रमिति सूचितम् ॥ १२ ॥

पक्षं पूर्वपक्षम् । **अनुभवार्थं** पुण्यफलस्येति शेषः । **अवरोह** इति । तस्मात् स्थानादवरोहः, न तु चन्द्रगतिः । **तेषां** विहितव्यतिरिक्तकर्तॄणां कुत्र कथं दृश्यत इत्यत आहुः **वेदे** हीति । **वैदिके**ति । श्रौताग्निरित्यर्थः । आहिताग्नीनां गतिमाहुः **श्रौते**ति । सोमगतौ हेतुमाहुः **तत्रे**ति ।

स्मार्तभेदेन। तत्र गृह्यस्मार्ते यमः। श्रौते सोमभावः। तत्र त्रेताग्निविधानेन "निष्कामानामदम्भानां पुण्यः स्यात्" ( )

इत्यधिकारिविशेषणाद्विशेषतः सामान्यतश्च प्रायश्चित्तविधानाद्य"दर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्यते" (तै. आ. २. ८) इति "तरति ब्रह्महत्यां" (तै. स. ५.३.१२) इति च सर्वप्रायश्चित्तविधानाद् ब्रह्मानुभवाभावे सोमगतिरेव। पूर्वजन्मधर्मस्य चित्तशुद्धावुपयोगः। तदानींतनस्य गङ्गास्नानादेः श्रौताङ्गत्वम्। अतः पापस्याभावात् पुण्यस्योपक्षीणत्वात् तस्य पञ्चाग्निप्रकार एव। ज्ञानोपयोगिजन्मनि पापसश्लेषाभावोपायमग्रे वक्ष्यति। पितृमेधप्रथमाहुतिमन्त्रस्तु मन्त्रत्वाच्चमसवन्न गतिनियामकः। त्रेताग्निविद्यारहितानां पुण्यपापोपभोगो यम एव, "वैवस्वते विविच्यन्ते यमे राजनि ते जनाः। ये चेह सत्येनेच्छन्ते य उ चानृतवादिनः" (तै. आ. ६. ५.) इति। यमगतेः पञ्चाग्निविद्यायाश्चैषा व्यवस्था। चित्तशुद्धिभावाभावाभ्यां वावश्यं काण्डद्वयव्यवस्था। एकस्यैतद्वक्तव्यम्।

पुण्यः स्यादिति। पुण्यलोकः स्यादित्यर्थः। कदाचित् तस्य पापसत्त्वे त्वाहुः **विशेषत** इति। उभयत्र श्रुतिद्वयमाहुः **यदर्वाचीने**ति। इदानीमर्वाचीनानां स्मार्तस्यापि सत्त्वाद्यमगतिः स्यादित्यत आहुः **पूर्वे**ति॥ ननु पञ्चाग्निविद्याप्रकारानन्तरं पाप चेत्कथमित्यत आहुः **ज्ञानोपयोगे**ति। **वक्ष्यती**ति। तदधिगम उत्तरपूर्वाघयोरविश्लेषविनाशावित्यत्र वक्ष्यतीत्यर्थः॥ ननु ज्ञानरहिताहिताग्नीनामौर्ध्वदेहिके पितृमेधप्रथमाहुतौ 'वैवस्वन्त संयमन'मिति मन्त्रे यमसंबन्धस्योक्तत्वात्कथ सोमगतिरित्यत आहुः **पितृमेधे**ति। **चमसव**दिति। यथा चमसपद'मर्वाग्बिलश्चमस ऊर्ध्वबुध्न' इति सिद्धार्थबोधकं तथाय मन्त्रोऽपीति तस्य न गतिनियामकत्वमित्यर्थः। केवलमाहिताग्निविषय एव पक्षान्तरमाहुः **चित्तशुद्धी**ति। काण्डद्वयेऽपि यत्राग्नियम-

सकामनिष्कामभेदो वा। वेदान्तिनामपि पापार्थं यमापेक्षणात् सा गतिर्वक्तव्यैव। तस्मान्न सर्वेषां सोमगतिः ॥ १३ ॥

स्मरन्ति च ॥ १४ ॥

स्मरन्ति च व्यासादयो "यमेन पृष्टस्तत्राह देवदेव जगत्पते। पूर्वं त्वमशुभं भुङ्क्ष्व उताहो नृपते शुभम्" (भाग. १०.६१.२२) इत्यादि। चकाराल्लोकप्रसिद्धिः ॥ १४ ॥

अपि सप्त ॥ १५ ॥

चेत्यनुवर्तते। पापोपभोगार्थं यमालयगमनमङ्गीकर्तव्यम्। यतस्तत्र नरकाः सप्त सन्ति रौरवादयः। **सप्त**सङ्ख्या सङ्ख्याभेदेष्ववरकक्षा। सर्वथानिराकरणाभावाय **सप्त**ग्रहणम्। तस्माद्यमगतिरस्ति ॥ १५ ॥

किंचिदाशङ्क्य परिहरति—

भेदेन गतिरुक्ता तत्र यस्याहिताग्नेश्चित्तशुद्धिर्नास्ति तस्य पूर्वकाण्डोक्ता यमगतिर्यस्यास्ति तस्योत्तरकाण्डोक्तः पञ्चाग्निसबन्धः। अथवा, एकस्य काण्डस्य एतद्गतिद्वय वक्तव्य, यस्य चित्तशुद्धिरस्ति तस्य पूर्वकाण्डोक्तः पञ्चाग्निसंबन्धः, यस्य नास्ति तस्य पूर्वकाण्डोक्ता यमगतिः। एवमुत्तरकाण्डेऽपि। अथवा, सकामनिष्कामभेदेन वा व्यवस्था वक्तव्या, नो चेद्गतिद्वयं संकीर्णं स्यादित्यर्थः। काण्डे ज्ञानप्राधान्यात्किमर्थमिद वक्तव्यमत आहुः **वेदान्तिनामपी**ति। श्रवणमात्रेण सर्वस्य ज्ञान जायते इत्यत्र नियमाभावात्। पापसत्त्वे यमगतिस्तत्रापि वक्तव्येत्यर्थः ॥ १३ ॥

लोकप्रसिद्धिरिति। यमदूतेन भ्रान्त्या कश्चित्पुरुषो नीतः पुनश्च प्रत्यागतस्यानुभव इति पौराणिकसंवादः ॥ १४ ॥

यमगतिरिति। सोमगत्यतिरिक्तेति शेषः ॥ १५ ॥

परिहरतीति। सूत्रकार इति शेषः। तृतीयगत्या शङ्का। तामाहुः

तत्रापि च तद्व्यापारादविरोधः ॥ १६ ॥

ननु नरकेषु चित्रगुप्तादयो भिन्ना एवाधिकारिणः सन्ति। तथा सति तृतीयः पक्षः स्यादत आह—**तत्र** नरकादिषु येऽधिकारिणस्ते यमायत्तास्तत्सेवकाः। अतो यमस्यैव **तत्रापि व्यापारान्न** तृतीयपक्षप्राप्तिः। **च**कारात् सुखदुःखभोगेऽपि तृतीयपक्ष एव विरोधः।

अथवा। यमगतेर्मन्त्रलिङ्गसिद्धेः पापस्य च पौराणिकत्वे चन्द्रगतिरेकैव स्यादिति विरोधः। तेषां यमसेवकत्वे तु मन्त्रलिङ्गपोषकत्वान्मार्गद्वयसिद्धेर**विरोधः**। तस्माद्यमगतिरस्तीति सिद्धम् ॥ १६ ॥

इति तृतीयाध्याये प्रथमपादे तृतीयमनिष्टादिकारिणामित्यधिकरणम् ॥ ३ ॥

साधारणत्वाभावाय पूर्वोक्तार्थसाधकमधिकरणमारभते।

नन्विति। **सन्ती**ति। अनेन यमस्य नरकाधिकारो नास्तीत्यतः पापिनां यमगतिबोधकस्मृतिविरोध इति सूचितम्। परिहारमाहुः **तत्रे**ति। **चकारा**दिति। **सुखदुःखाभोगेऽपी**ति। तत्र यथा चित्रगुप्ताद्यधिकारिता स्मृत्युक्ता तथा चित्रगुप्ते यमायत्ततापि स्मृत्युक्तेति तृतीयपक्षे स्मृतिविरोध इत्यर्थः। पक्षान्तरमाहुः **अथवे**ति। **मन्त्रलिङ्गसिद्धे**रिति। तथा च यमगतिरपि श्रौतीत्यतः श्रौतायाश्चन्द्रगतेर्व्याप्यत्वे यमगतेर्वैयर्थ्यं, पापस्य पौराणिकत्वाद्दुर्बलत्वं, एवं च पुण्यगतिरेकैव स्यादिति विरोध इति भावः। चित्रगुप्तादीनां यमसेवकत्वे पौराणिकस्य पापस्य मन्त्रलिङ्गपोषकत्वान्मार्गद्वयसिद्धिरित्यर्थः ॥ १६ ॥ इति तृतीयमधिकरणम् ॥ ३ ॥

सूत्रं व्याख्यातुं शङ्कामुत्थापयन्ति **न**न्विति। **ये के चे**ति श्रुतिः कौषीतकिब्राह्मणस्था। **का गति**रिति। तस्मान्न यमगतिरित्यर्थः। यम-

विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १७ ॥

ननु "ये के चास्माल्लोकात्प्रतियन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" (कौषी. १. २) इत्यस्याः श्रुतेः का गतिः । पञ्चाग्निविद्याप्रस्तावे वा यमगतिः कुतो नोक्ता । तस्माद्वेदविरोधान्न तृतीयपक्षसिद्धिरित्याशङ्कां परिहरति तुशब्दः । अत्र वेदान्ते गौणमुख्यफलदेहार्थं **विद्याकर्मणो**रेव हेतुत्वेन निरूपणं विद्यया देवयानं कर्मणा सोमभाव इति, तयोरेव **प्रकृतत्वात्** कारणत्वात् । तेन कौषीतकिब्राह्मणेऽपि प्रकृतत्वात् कर्मिण एव सर्वशब्देनोक्ताः । अत्रापि न यममार्ग उक्तः । तस्मा**द्विद्याकर्मणो**-र्मुख्यत्वान्मार्गद्वयमेवोक्तम् । नैतावता तृतीयबाधः ॥ १७ ॥

ननु द्वयोः स्तुत्यर्थं यस्तृतीयो मार्ग उक्तः "अथैतयोः पथोर्न कतरेण च न तानीमानि क्षेत्राण्यसकृदावर्तीनि भूतानि भवन्ति" (छा. ५. १०. ८.) इत्यादिना "जुगुप्सेत" (छा. ५. १०. ८) इत्यन्तेन

गत्यभावे अन्यदपि साधकमाहुः **पञ्चाग्नी**ति । **कुत** इति । अनुक्तत्वादेव न यमगतिरित्यर्थः । शङ्कापरिहारं व्याख्यातुमाहुः **अत्रे**ति । **फलदेहार्थ**-मिति । मुख्यफलभोगोपयोग्यलौकिकदेहार्थं गौणफलभोगोपयोगिदेहार्थमित्यर्थः । **प्रकृतत्वा**दिति । 'त'द्य इत्थ विदु'रित्यादिना विद्याया मुख्याङ्गफलार्थं, 'य इमे ग्नाम' इत्यादिना गौणफलार्थं, कर्मणश्च कारणत्वेन प्रकृतत्वात्तयोरुक्तिः । यमगतेरप्रकृतत्वात्तदनुक्तिर्न तु यमगतिरेव नास्तीत्यर्थः । एतदेव विशदयन्ति **तेने**ति । **अत्रापी**ति । **कौषीतकिब्राह्मणेऽ**पि । **अपि**शब्देन पञ्चा-ग्निविद्यासंग्रहः । **तृतीये**ति । यममार्गस्य बाधो न भवतीत्यर्थः ॥ १७ ॥

सूत्रमवतारयन्ति **न**न्विति । यत्रोक्तस्तां श्रुतिमाहुः **अथैतयो**रिति । **इत्यादिने**ति । **उक्त** इति पूर्वेणान्वयः । तस्य निन्दाबोधकं वाक्यमाहुः

तृतीयनिन्दया द्वयोः स्तुतिरिति स एव तृतीयोऽस्तु किं यममार्गेणेत्यत आह—

न तृतीये तथोपलब्धेः ॥ १८ ॥

न तृतीये मार्गे **तथा** पुण्यपापयोरुपभोग **उपलभ्यते**। यतः समानब्राह्मणे "कीटः पतङ्गो यदि दन्दशूकं" (बृ. ६. २. १६) इति योनौ निर्वृतेर्विद्यमानत्वात्। न महापापोपभोगः। नापि कीटादिषु महासुखोपभोगः। एकवाक्यता चोभयोरुक्ता। यद्यपि महाराजादिराजदण्डादिषु तथोपभोगः संभवति तथापि रम्भादिसंभोगे नरके च यथा तथा न संभवति। जडे तु पञ्चम्याहुतिर्भरत एव हीश्वरेच्छया जन्मद्वयमधिकं "त्रिभिः" (भाग. ११. २. १८) इति वचनात्। "भरतोऽहम्" (भाग. ५. १२. १४) इति प्रतीतेश्च। ततः पूर्वमस्मरणाद्बाल्यादिव-

---

जुगुप्सेतेति । **स एवे**ति । द्वयामार्गयोः स्तुत्यर्थं यस्तृतीयः श्रुतावुक्तः स एवेत्यर्थः । सूत्रार्थमाहु**र्न तृतीये**ति । **तथे**ति । यादृशो यममार्गे उपभोग उपलभ्यते तथा छान्दोग्योक्ते तृतीयमार्गे नेत्यर्थः ! नोपलभ्यतेत्यत्रोपष्टम्भकं बृहदारण्यस्य समानब्राह्मणस्थ वाक्यमाहुः **यत** इति । **कीट** इति । **योना**विति । योनौ निर्वृतिर्महाभारते कीटोपाख्याने ज्ञेया । ननु समानब्राह्मणे यदुक्त तदन्यदस्त्वित्यत आहु· **एकवाक्यते**ति । **उभयोः** छान्दोग्यबृहदारण्यकयो'र्जायस्वे'ति मार्गे । युक्त्यन्तरमाशङ्कते **यद्यपी**ति । **महाराजे**ति । राज्ञि सुखं, राजदण्डे दुःख **तथोपभोगः** । समाधानमाहुः **तथापी**ति । **रम्भादिसंभोगे**ति । यथा सुखदुःखभोगस्तथा राज्ञि राजदण्डे च नास्तीत्यर्थः ननु यममार्गः पञ्चाग्निमार्गे प्रविशतु । तत्रापि देहान्तरप्राप्तिर्जडभरते दृश्यते । तथा च ' जायस्वे'तिमार्ग एव तृतीयः, न तु यममार्ग इत्यत आहु· **जडे**ति । **त्रिभि**रिति । एकादशस्कन्धे नारदोक्तम् । 'स भुक्तभोगां त्यक्त्वेमाम् ' इति वचनादित्यर्थः । एतेन तस्य यद्वैराग्यं

देव जन्मत्रयम्। तस्मा"ज्जायस्व" (छा. ५. १०. ८) इत्यादि-वैलक्षण्याददतिरिक्तो यममार्गः। पञ्चाहुतिनियमाभावस्तु ज्ञानोपयोगिदेहेऽप्यंशावतरणे, पुष्टिमार्गत्वान्न तत्र दोषः ॥ १८ ॥

साधकान्तरमाह—

स्मर्यन्तेऽपि च लोके ॥ १९ ॥

अपि च लोकेऽपि मूर्च्छादिषु यमलोकगमनसंभाषणपुनरागमनानि **स्मर्यन्ते** ॥ १९ ॥

दर्शनाच्च ॥ २० ॥

यमपुरुषा **दृश्यन्ते**ऽपि कैश्चिदजामिलप्रभृतिभिः। **चकारात्** तेषां वाक्यादिश्रवणम्। तस्माद्वैवस्वतमार्गे न किमपि बाधकमिति सिद्धम्॥२०॥

इति तृतीयाध्याये प्रथमपादे चतुर्थं विद्याकर्मणोरित्यधिकरणम् ॥ ४ ॥

जात तदीश्वरेच्छाज्ञापकमिति बोध्यम्। **प्रतीते**रिति। 'अह पुरा भरतो नाम राजे'ति स्मरणात्। तादृशानुशयवत्त्व स्मृतिर्मजन्मन्यस्तीति ज्ञापितमित्यर्थः। **तत** इति। भरतदेहात्पूर्वमित्यर्थः। एवं च जन्मत्रयविशिष्टभरतदेहस्य पञ्चमाहुतिफलत्वेन नात्र क्रमभङ्गः। ज्ञानोपयोगित्वाच्च न यममार्गप्रवेश इति भावः॥ ननु विदुरार्जुनादौ सामादिभावो नास्ति, ज्ञानोपयोगिदेहस्तु वर्तते इति पञ्चाहुतिनियमभङ्ग इत्यत आहुः **पञ्चाहुती**ति ॥ १८ ॥

मूर्छादिषु। अनेन मरणे अन्तर्भावो नास्तीति सूचितम् ॥ १९ ॥

स्पष्टार्थमेतत्। तथा च यममार्गे एव 'जायस्वे'ति मार्गस्य प्रवेशः, न त्वतिरिक्त इति भावः ॥ २० ॥ इति चतुर्थमधिकरणम् ॥ ४ ॥

तृतीयामाहुतिं विचारयति। तत्र "वृष्टेरन्नं भवति" (छा. ५. ६. २) इति तृतीयाहुतिः सफला। पूर्वद्वयं शब्दैकसमधिगम्यम्। "वृष्टेरन्नं" (छा. ५. ६. २) इति साधनफलयोः प्रत्यक्षत्वान्न वृष्टिमात्रेणान्नं भवति बीजव्यतिरेकेण। बीजस्य हि फलम्। न निमित्तमात्रेण तद्भावो वक्तुं शक्यते। तस्मादसंगतं "वृष्टेरन्न" मित्याशङ्क्याह—

तृतीयशब्दावरोधः संशोकजस्य ॥ २१ ॥

तृतीयशब्दावरोधः तृतीयाहुतौ शब्देन शब्दसाम्येन कारण-भूतस्य जलस्य **अवरोधो** ग्रहणम्। "सदेव सौम्येदमग्र आसीत्" (छा. ६. २. १) इत्यत्र "तत् तेज ऐक्षत" (छा. ६. २. २), "बहु स्यां प्रजायेय" (छा. ६. २. ३) इति "तदपोऽसृजत" (छा. ६. २. ३) "तस्माद्यत्र क्व च शोचति स्वेदते वा पुरुषस्तेजस एव तदध्यापो जायन्ते" (छा. ६. २. ३) इत्यत्र कारणरूपापां निरूपणे **शोकजत्वमपामुक्तम्**। अग्रे च "तस्माद्यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं भवति" (छा. ६. २. ४) इति। अतः पञ्चाग्निविद्यायामपि देवहोमात् कारणभूतैव वृष्टिर्जातेति नात्र बीजान्तरापेक्षा। शोकपदेन "यदश्रवः-

---

ननु शङ्कासत्त्वे विचार इत्यतः पूर्वशङ्कामवतारयन्ति **तत्र वृष्टे**रिति। **तृतीयाहुतिः सफले**ति। अन्नरूपफलसहितश्रुतावुक्तेत्यर्थः। **पूर्वद्वयं** पूर्वाहुतिद्वयमित्यर्थः। **बीजस्ये**ति। अन्न फलमित्यर्थ। **तद्भाव** इति। पूर्त्रं वृष्टिभाव इत्यर्थः। तथा च वृष्टेर्निमित्तकारणत्वमित्यर्थः। शङ्कोत्तरार्थं सूत्रव्याख्यानमाहुः **तृतीये**ति। तृतीये शब्देनावरोध इति समासः। अर्थमाहुः **तृतीये**ति। **शब्दसाम्येने**ति। जलशब्दः सृष्ट्यादौ यज्जलं वृष्टिरूप यज्जल तत्रोभयत्रापि प्रवर्तते इत्यर्थः। कथं ग्रहणमित्यतः श्रुतिमाहुः **सदेवे**ति। **आपो जायन्त** इत्यन्ता श्रुति। **अग्रे चे**ति। तस्मिन्नत्र

शीर्यन्ते तद्रजतं हिरण्यमभवत् (तैत्ति. स. १. ५. १) इति सहायः सूचितः । यद्यपि तत्रान्नशब्देन पृथिवी तथाप्यत्र पृथिव्या अग्निसमिद्रूपत्वादन्नमेव । तस्मात् कारणशक्तियुक्ताया वृष्टेरन्नं भवतीति न काप्यनुपपत्तिः ॥ २१ ॥

किंचिदाशङ्क्य परिहरति । ननु कारणजलरूपवृष्टिरत्र वक्तुं न शक्यते । यतः समानधूममार्गे च्युतौ वृष्टेरन्नाभावे ऐक्ये वा "तस्मिन् यावत्संपातमुषित्वा अथैतमेवाध्वानं पुनर्निवर्तते यथेतमाकाशं" (छा. ५. १०. ५) इत्यादिना "तिलमाषा" (छा. ५. १०. ६) इति "जायन्ते" (छा. ५. १०. ६) इत्यन्तेन तत्र "यथेतं" (छा. ५. १०.

प्रकरणे अग्रे चेत्यर्थः । **अन्त** इति । अत कारणात् । **बीजान्तरापेक्षे**ति । यत्र क्व चेति श्रुतौ प्रयोगाद्बीजापेक्षा नास्तीति सूचितम् । तथा च शोकजन्य कारणीभूत जलमेव वृष्टिजलमिति भावः । सूत्रे **संशोकजस्ये**तिपदस्य स्वारस्यमाहुः **शोकपदेने**ति । यदश्रवः शीर्यन्ते इति वाक्य प्रथमाष्टके संहिताया पञ्चमप्रपाठके ' प्रथमत एव देवासुराः संयत्ता आस'न्नित्यारभ्य ' तस्माद्बर्हिषि न देय'मित्यन्ते मध्ये उक्त 'सोरोदीयदरोदीत्तद्रुद्रस्य रुद्रत्व यदश्रव. शीर्यन्ते तद्रजतं हिरण्यमभवत् ' । **तस्मा**दिति । अग्निसमिद्रूपत्वादिति । छान्दोग्येऽग्निरूपत्व(त्वात्) बृहदारण्ये समिद्रूपत्वादित्यर्थः ॥२१॥

आशङ्कामाहु **नन्वि**ति । कुतो न शक्यत इत्यत आहुः **यत** इति । **श्रीप्रकाशकृत**स्तु **ऐक्ये** इति पञ्चाग्निमार्गधूममार्गयोरभेदे, समाने धूमे मार्गे ऐक्ये वा वृष्टेरन्नभाव इत्यन्वय इति प्राहुः । **यत** इति । यतः कारणादित्यर्थः । अथ वा पञ्चाग्निधूममार्गयोरैक्यमित्याशयेनाहुः **यत** इति । **च्युतौ** अवरोहे स्वर्गाच्च्युताविति यावत् । धूममार्गः समानः । तथा च धूममार्गे पञ्चाग्निविद्यायां येन यथा गमन तेन मार्गेणागमनमिति समानमिति भावः । **तस्मि**न्निति । तस्मिन्धूममार्गे वृष्टेरन्नभावे सति । अत्र

५) इति आकाश एव । "आकाशाच्चन्द्रमसं" (छा. ५. १०. ४) इति पूर्वमुक्तत्वादाकाशस्य मार्गतव । "वायुर्भूत्वा धूमो भवति" (छा. ५. १०. ५) इत्यादिषु तत्तद्भावः श्रूयते । ते च विकृतास्तदनन्तरभावित्वात् । वृष्टिरपि विकृतैव । तस्मान्न कारणत्वमित्याशङ्क्य परिहरति—

साभा व्यापत्तिरुपपत्तेः ॥ २२ ॥

सा वाय्वादिरूपापत्तिः **आभा व्यापत्ति**रेव । वायुव**दाभा** आभानं मध्ये वायुमण्डले सा गच्छन्ती आहुतिर्वायुभवनशब्देनोच्यते, आकृतेरेव पदार्थत्वात् । **व्यापत्ति**शब्देन च तेजोभावापन्नस्य जलभावापत्तौ कान्तिनाशान्नाश इवेति द्योतयति । कुतः । **उपपत्तेः** । तथैवोपपद्यते । चित्रतुरगादिषु विकारस्य विकारान्तरापत्तावियमेव व्यवस्था । उपासनायां न तदपि । न च "भूत्वा"श्रुतेर्बाधः । प्रतिनियतपदार्था हि ते, भवना-

---

श्रुतिमाहु· **याव**दित्यारभ्य **जायन्त** इत्यन्तम् । **इत्यन्तेने**ति । **तत्तद्भावः श्रूयते** इत्यग्रेणान्वयः । श्रुतिं व्याकुर्वन्ति **तत्रे**ति । **मार्गतेवे**ति । येन मार्गेण गमन तेनैव मार्गेणागमनम् । तत्राकाशो भूत्वेति श्रुतौ न श्रूयते इति कृत्वा तस्य मार्गतैवेत्यर्थः । **ते चे**ति । ते चाबादयो **विकृता** जन्या इत्यर्थः । एव वृष्टेरपि जन्यत्वमाहुः **तदनन्तरे**ति । **तस्मात्** वृष्टेर्जन्यत्वात् **न कारणत्वं** न कारणजलत्वम् । परिहारं व्याकुर्वन्तः सूत्रार्थमाहुः **सेति** । **साभा व्यापत्तिरुपपत्ते**रिति । त्रिपदमिद सूत्रम् । सेत्यस्यार्थमाहुः **वाय्वादी**ति । अस्यार्थमाहुः **आभा व्ये**ति । अस्यार्थमाहुः **वायुव**दिति । न तु वायुस्वरूपो जीव इत्यर्थः ॥ नन्वेव चेदस्य वायुभवनं कथमित्यत आहुः **मध्ये**ति ॥ नन्वेव चेत् स्ववायुपदवाच्यत्व कथमित्यत आहु **आकृतेरेवे**ति । 'जात्याकृतिव्यक्तयः पदार्थः' इति न्यायसूत्रादित्यर्थः । तथा च वायोरिवाकृतिरेव वायुमण्डले तस्यास्तीति । तत्र

वरोहाभ्यामेव तथावचनात्। अन्यस्यान्यभावं वदन्ती श्रुतिरेव गौणत्वं वदति, करणांशव्यतिरिक्तस्थले तथैव प्रतीतेः। तस्मात्तदाकृतिमात्रेण न स्वरूपान्यथाभावः॥ २२॥

उपपत्त्यन्तरमाह—

नातिचिरेण विशेषात् ॥ २३॥

तद्रूपता च **नातिचिरेण** न बहुकालं तद्रूपता। कुतः। **विशेषात्** अन्नभावापन्नस्यैव बहुकालश्रवणात्। "अतो वै खलु दुर्निष्प्रतरं" (छा. ४. १०. ६) इति। प्रापतरं प्रपतरं वा। वर्णलोपश्छान्दसः। अतस्तृतीयाहुतौ **न चिरेणे**त्यायाति। बहुकालस्थितौ हि तद्रूपता।

वायुपदस्य गौणी वृत्तिरिति भावः। एव जलभावेऽपि ज्ञेयम्। आभा व्यापत्तिरित्यत्र व्यापत्तिपदस्वारस्यमाहुः **व्यापत्ती**ति॥ नन्वत्र गौणीसत्त्वे किं गमकमित्यत आहुः **चित्रतुरगे**ति। चित्रे कृतो यस्तुरग इत्यर्थः। तथा च तुरगकार्यं चित्रतुरगे नास्तीति तुरगपदप्रयोगस्तत्र मुख्यो नास्तीति भावः। **उपासनाया**मिति। 'वाचं धेनुमुपासीते'त्यादौ वाक्पदस्य गौण्यपि नास्तीत्यर्थः॥ ननु वायुर्भूत्वेति श्रुतेर्बाध इत्यत आहुः **न चे**ति। न हीत्यर्थः। **प्रतिनियते**ति। तुल्यपदार्थे आहिते जीवेत्यर्थः। **तथा** भूत्वेत्यस्य॥ २२॥

अत्र पूर्वसूत्रात्**साभा**त्यनुवर्तते। **तद्रूपते**ति। वृष्टिरूपतेत्यर्थः। कुत्र विशेष इत्यत आहु· **अन्ने**ति। कुत्र श्रवणमित्यतः श्रुतिमाहुः **अत** इति। अन्नभावात्पुरुषभवनं दुर्निष्प्रपतरमित्यत्र विचारयन्ति **प्रापतर**मिति। दुष्प्रापतरमिति योजनीयम्। द्वितीयार्थमाहुः **प्रपतर**मिति। दुर्गमतरमित्यर्थः। **वर्णलोप** इति। दुर्निष्प्रापतरमिति वक्तव्ये दुर्निष्प्रतरमित्युक्तम्। अत्र वर्णलोप इत्यर्थः। एवं च वृष्टिरूपत्वं जीवस्य नास्तीत्याहुः **अत** इति।

कारणवशाद्देवानां मनुष्यभाववदन्नपक्षे न कोऽपि दोषः । ऐक्यपक्षेऽपि ज्ञानवतो गृहस्थस्य दुर्लभत्वादेवं वचनम् । तस्माद्वृष्टेरन्नं भवतीति सिद्धम् ॥ २३ ॥

इति तृतीयाध्याये प्रथमपादे पञ्चमं तृतीयशब्दावरोधाधिकरणम् ॥ ५ ॥

चतुर्थ्याहुतिर्विचार्यते । ननु "संसर्गजैः कर्मदोषैर्याति स्थावरतां नरः" (मनु. १२. ९) इति कथमस्यान्नत्वम् । अपूर्वान्नत्वेऽपि कण्डनपाकादिषु क्लेशेन जीवस्यापगमात् कथं रेतोभावः । चर्वणौदर्यपाकस्त्वावश्यक एव । न च जीवस्य जडभावः, मर्यादाभङ्गप्रसङ्गात । तस्मात् कथमन्नस्य रेतोभाव इत्याशङ्क्य परिहरति—

अत्र दृष्टान्तमाहुः **कारणे**ति ॥ नन्ववरोहे क्लेशस्तु पञ्चाग्नावप्यस्तीति धूममार्गात्को विशेष इत्यत आहुः **भिन्ने**ति । धूममार्गात्पञ्चाग्निमार्गो भिन्न इति पक्षे **दोष** इति । धूममार्गोक्तक्लेशरूपो दोषः पञ्चाग्नौ नास्तीत्यर्थः । **वचन**मिति । अज्ञानिन लक्षीकृत्य क्लेशवचन, न तु साधारण्येनेति दोष इत्यर्थः ॥ २३ ॥ इति पञ्चममधिकरणम् ॥ ५ ॥

चतुर्थीमाहुतिं विचारयितुमन्याधिष्ठिताधिकरणमाहुः ॥

परिहारसूत्रमवतारयितु प्रथमतः शङ्कामाहुः **नन्वि**ति । **कथ**मिति । **अस्य** जीवस्याहुत्या शुद्धत्वेन पापाभावात्कथ स्थावररूपान्नत्वमित्यर्थः । **अपूर्वान्नत्वेऽपी**ति । यथा यज्ञादिषु प्रोक्षणादिना व्रीह्यादीनामपूर्वजनकान्नत्व तथाहुतिभिर्जीवस्येत्यर्थः । तथापि क्लेशेन यथा शरीराज्जीवापगमः तथा कण्डनादिनान्नाज्जीवापगमो भविष्यतीत्याहुः **कण्डने**ति । परिहारसूत्र व्याकुर्वन्ति **अन्याधिष्ठिते**ति । **व्रीह्यादि**रिति । उप्त इति शेषः । तथा च

अन्याधिष्ठिते पूर्ववदभिलापात् ॥ २४ ॥

अन्याधिष्ठिते वृष्टेरन्नभावसमय एव **अन्यैर्जीवैरधिष्ठितो** व्रीह्यादिस्तस्मिन्न पूर्ववत्तद्भावापत्तिः। अतिथिवत् पूर्ववैलक्षण्येन वा। कुतः। **अभिलापात्**। "व्रीहियवा ओषधिवनस्पतयस्तिलमाषाः" (छा. ५. १०. ६) इति **पूर्ववत्तद्भावमात्रं** न वदति किंतु जगति स्थितव्रीह्यादिभाव एवाभिलप्यते। तथा सति यथान्येषु व्रीह्यादिषु तत्तदधिष्ठातृदेवतया नियुक्ता जीवास्तानात्मत्वेनाभिमन्यन्ते एवमत्रापीति न कोऽपि दोषः। अधिष्ठाने हि वेदना, मरणानन्तरं कृमिभावस्य दृष्टत्वात्। तस्मादन्नस्य रेतोभावो युक्तः ॥ २४ ॥

किंचिदाशङ्क्य परिहरति—

यदा वृष्टिर्जायते तदैव उप्ते बीजे जलद्वारा जीवः प्रविशतीत्यर्थः ॥ ननूप्ते बीजे पूर्वं जीवस्य सत्त्वाज्जीवान्तरप्रवेशे तद्भावापत्तिः स्यादत आहुः **न पूर्ववदिति**। वायुर्भूत्वेत्यादिवदित्यर्थः। तर्हि कथं स्थितिरत आहुः **अतिथिवदिति**। कार्यार्थं यथातिथेः स्थितिस्तथेत्यर्थः। **पूर्ववैलक्षण्येनेति**। निरभिमानगृहस्थवद्वा स्थितिरित्यर्थः। अत्र हेतुं सूत्रकार आह **अभिलापादिति**। तस्यार्थमाहुः **व्रीहीति**। **अत्रापीति**। होम्येऽन्नेऽपीत्यर्थः। **न कोऽपीति**। पापान्नतः संसर्गदोषः कण्डनादिनापगमो नास्तीत्यर्थः ॥ ननु वेदनायाः सत्त्वात्कथं नापगम इत्यत आहुः **अधिष्ठानं हीति**। अधिष्ठानमभिमानः। तस्मिन्सत्येव वेदना लोके दृश्यत इत्यर्थः ॥ नन्वस्य क्लेशो मास्तु, तथापि कण्डने कृते तत्रत्यजीवे गते होम्यजीवोऽप्यपगच्छतीति कथमस्य रेतोभाव इत्यत आहुः **मरणेति** ॥ २४ ॥

कृमिभावस्य जीवान्तरस्य अशुद्धमिति चेन्न, **शब्दात्**। सौत्रशङ्कांशं व्याकुर्वन्ति **नन्विति**। परिहारं व्याकुर्वन्ति **शब्दादिति**। श्रुतेरित्यर्थः।

अशुद्धमिति चेन्न शब्दात् ॥ २५ ॥

नन्वन्याधिष्ठानेऽङ्गीक्रियमाणे यातनाजीवानामशुद्धत्वादशुद्धमन्नं स्यात् तथा च कथं योग्यदेह **इति चेन्न, शब्दात्**। "देवा अन्नं जुह्वति तस्या आहुते रेतः सभवति" (छा. ५. ७. २) इति देवैराहुतिरूपेण होमवचनाच्छुद्धत्वम्। अन्यस्य हि संस्कारेणैव शुद्धिः। अन्यथा यावज्जीवं का गतिः स्यात्। तस्मात् संस्कारशब्दाच्छुद्धमेवान्नम्॥ २५ ॥

इति तृतीयाध्याये प्रथमपादे षष्ठमन्याधिष्ठित इत्यधिकरणम् ॥ ६ ॥

पञ्चमीमाहुतिं विचारयति। ननु कथं पुरुषेऽन्नहोमाद्रेतोभावः, बाल्यकौमारवार्धकेषु व्यभिचारात्। तारुण्येऽपि न हि सर्वमन्नं रेतो भवति। जातमपि न नियमेन योनौ सिच्यते। नापि देवापेक्षा। पुरुषप्रयत्नस्य विद्यमानत्वादित्याशङ्क्य परिहरति—

रेतःसिग्योगोऽथ ॥ २६ ॥

रेतःसिग्योगः पुरुषपदेन पौरुषधर्मवानुच्यते। पौरुषं च देशकाल-

श्रुतिरेवाहुः **अन्न**मिति। **अन्यस्ये**ति। अशुद्धस्येत्यर्थः। **का गति**रिति। कुत्सिता गतिरित्यर्थः। शेष स्फुटम् ॥ २५ ॥ इति षष्ठमधिकरणम् ॥ ६ ॥

पञ्चमाहुतिविचारार्थं रेतःसिगधिकरणमाहुः **पञ्चमी**मिति। फलरहितां केवलामित्यर्थः। विचारार्थं प्रथमतः शङ्कां कुर्वन्ति **न**न्विति। स्पष्टम्। परिहारं व्याकुर्वन्ति **पुरुषे**ति। ' पुरुषो वाव गौतमा-

सविधानेन मन्त्रवद्रेतःसेकसामर्थ्यम्। न ह्येतत् सार्वजनीनं सार्वत्रिकं वा। तदर्थं देवापेक्षा। तथा सति न कोऽपि व्यभिचारः। कथं पुरुषशब्दमात्रेण च ज्ञायते। तत्राह—**अथ** आनन्तर्यात्। शरीरार्थमेव देवैस्तत्र तत्र होमः कृतः। तत् कथं पञ्चमाहुतावेवान्यथा भवेत्। तस्मादानन्तर्यात् पुरुषाहुतिर्नान्नं **रेतःसिग्योगः**। **योग**शब्देनात्राप्यन्याधिष्ठानेन **रेतःसिग्योगा**भावः ॥ २६ ॥

इति तृतीयाध्याये प्रथमपादे सप्तमं रेतःसिगधिकरणम् ॥७॥

हूयमानं निरूप्य फलं निरूपयति। "तस्या आहुतेर्गर्भः संभवति" (छा. ५. ८. २) इत्युच्यते। तत्र संदेहः। योनावन्तःस्थितमेव

न' इतिश्रुतौ यत्पुरुषपदं तस्यैव व्याख्यानं सूत्रे **रेतःसि**गिति। तथा च पुरुषपदस्यार्थमाहुः **पुरुषपदेने**ति। स च धर्मः को वेत्यत आहुः **देशे**ति। **सामर्थ्य**मिति। पुरुषपदेन एतादृशो रेतःसिगित्यर्थः। **देवापेक्षे**ति। एतादृशे पुरुषे प्राणाग्निहोत्रप्रकारेणान्नहोमार्थं देवापेक्षेत्यर्थः। अन्यथा इन्द्रियाधिष्ठातृदेवप्रसादं विना तथाभोगाभावात्। **तथा सती**ति। एवं रीत्या तस्यान्नस्य रेतोभावे नियमेन सेके च सतीत्यर्थः। **कथ**मिति। श्रुतौ पुरुषपदमस्ति, तेन कथं व्यभिचारादिवारणप्रकारो ज्ञायत इत्यर्थः। ज्ञाने हेतुः सौत्रः **अथ**शब्दः। तस्यार्थमाहुः **आनन्तर्या**दिति। तथा चानन्तर्ये अन्यथाप्रकारो न भवतीति भावः। **नान्न**मिति। किंत्विति शेषं पूरयित्वा पुरुषाहुतिर्नान्नं, किन्तु रेतःसिग्योग इत्यन्वयः॥ ननु पूर्वाधिकरणे अन्ने अन्याधिष्ठानमुक्तम्। अतस्तज्जन्ये रेतस्यपि अन्याधिष्ठानं स्यादत आहुः **योगशब्देने**ति। एवं चैक एव शुद्धो जीवस्तत्र तिष्ठतीत्यर्थः ॥ २६ ॥ इति सप्तममधिकरणम् ॥ ७ ॥

फलनिरूपणार्थं योन्यधिकरणमाहुः [**योने**रेति।]

फलं बहिर्निर्गतं वेति । तत्र **गर्भ**शब्देन अन्तःस्थित एव । शरीरपरत्वे श्रुतिबाधः स्यात् । उपसंहारोऽप्यग्रे कर्तव्याभावादुपपद्यते । ततश्च षण्मासानन्तरं गर्भे ज्ञानसंभवाज्जननानन्तरं न गुरूपसत्त्यादि कर्तव्यमित्याशङ्क्य परिहरति—

योनेः शरीरम् ॥ २७ ॥

योनेर्निर्गतं **शरीरं गर्भ**शब्देनोच्यते, अग्नेरुत्थितस्यैव फलरूपत्वात्, मध्यभावस्याप्रयोजकत्वात् । मातृपरिपाल्यत्वाय **गर्भ**वचनम् । कलिलादिभावे पुरुषवचनत्वाभावादुपसंहारानुपपत्तिश्च । **शरीर**शब्देन **वैराग्यादियुक्तः** सूचितः, न तु स्वयं तदभिमानेन जात इति । तस्माद्योग्यदेहः साधनसहितो ब्रह्मज्ञानार्थं निरूपितः ॥ २७ ॥

सूत्रप्रयोजनमाहुः **हूयमान**मिति । संशयाकारमाहुः **योना**विति । **श्रुतिबाध** इति । गर्भबोधकश्रुतिबाधक इत्यर्थ । **उपसंहारोऽपी**ति । पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीत्युपसंहार इत्यर्थः ॥ ननु किं कर्तव्यं भवति यस्याभाव इत्यत आहुः **ततश्चे**ति । तथा च यद्गुरोरग्रे ज्ञानार्थं गमनरूपं यत्कर्तव्यं तन्नास्तीत्यर्थः । अत एवोपसंहार उपपद्यत इति भावः । परिहारं व्याकुर्वन्ति **योने**रिति । **मध्यभावस्ये**ति । शरीरान्तर्वर्तिगर्भभावस्येत्यर्थः । एतेनोत्पत्त्यनन्तरं मायया तिरोधानात् गर्भोत्पन्नज्ञानमप्यप्रयोजकमिति सूचितम् ॥ ननूक्त गर्भश्रुतिबाध इत्यत आहुः **मातृपरिपाल्यत्वाये**ति । पूर्वपक्षिमते कलिलरूपगर्भे दूषणमुद्भावयन्ति **कलिला**दिति । तथा च कलिले पुरुषपदवाच्यत्वं नास्तीत्यतः उपसंहारानुपपत्तिरित्यर्थः । **शरीरशब्दे**नेति । शीर्यते तच्छरीरमिति व्युत्पत्त्या वैराग्यं सूचितम् । पादार्थमुपसंहरन्ति **तस्मा**दिति ॥ २७ ॥ इति अष्टममधिकरणम् ॥ ८ ॥

इति तृतीयाध्याये प्रथमपादेऽष्टमं योनेःशरीरमित्यधिकरणम् ॥ ८ ॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभदीक्षितविरचिते ब्रह्मसूत्राणुभाष्ये तृतीयाध्यायस्य प्रथमः पादः ॥

तृतीये प्रथम पादः ॥ १ ॥

इति श्रीमन्मुकुन्दरायसहजमाधुरीपरमानिर्वचनीयसरसवदनतामरससुधाहृदावगाहिश्रीमदाचार्यपदाब्जकृपापारसारश्रीमत्प्रभुचरणात्मजमहाराजश्रीयदुनाथकुलोद्भवगोस्वामिश्रीगोपालात्मज**गिरिधर**विरचिते **अणुभाष्यविवरणे तृतीयाध्यायस्य प्रथमः पादः** समाप्तिमफाणीत् ॥

अथ तृतीयाध्यायस्य द्वितीयः पादः ।

पूर्वपादेऽधिकारियोग्यदेहो निरूपितः । द्वितीये जीवस्य मुक्तियोग्यता निरूप्यते । तत्र प्रथमं स्वप्नं निरूपयति । स्वप्नस्य सत्यत्वे तत्कृतगुणदोषसम्बन्धो जीवस्य भवेत् । ततश्च शुद्धिर्व्यर्था स्यात् । अतः स्वप्नस्य मिथ्यात्वं प्रदर्शयितुमधिकरणारम्भः । तत्र पूर्वपक्षमाह—

सन्ध्ये सृष्टिराह हि ॥ १ ॥

सन्ध्ये स्वप्ने **सृष्टिराह** । "तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदञ्च परलोकस्थानञ्च सन्ध्यं तृतीयं स्वप्नस्थानं" (बृ.४. ३. ९.) इत्युपक्रम्य "न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजति" (बृ. ४.३.१०.) इत्यादिना **सृष्टिराह** ।

विवरणम्

संगतिप्रदर्शन कुर्वन्ति **पूर्वे**ति । **योग्यते**ति । तथा च जीवे योग्यतां विना उपदेशः स्थिरो न भविष्यतीति योग्यतानिरूपणमित्यर्थः । **तत्रे**ति । योग्यतानिरूपणे । स्वप्ननिरूपणप्रयोजनमाहुः **स्वप्नस्ये**ति । **जीवस्ये**ति । ज्ञानाधिकारियोग्यदेहविशिष्टस्येत्यर्थः । **अधिकरणारम्भः** सन्ध्यसृष्ट्यधिकरणारम्भः । एतेन स्वप्नसृष्टिर्मिथ्या वा सत्या वेति संशयः प्रदर्शितः । पूर्वपक्षमाहुः **तत्रे**ति । **सन्ध्यम्** एतल्लोकपरलोकयोः सन्धौ भवम् । नैयायिकैरियमेव सृष्टिः स्वप्ने स्मर्यत इति स्वीक्रियते ।

सन्ध्ये स्थाने **सृष्टिरस्ति** यतः श्रुतिः स्वय**मेवाह** । हि युक्तश्चायमर्थः । यथैव श्रुतिर्वदति तथैव स्वप्ने दृश्यते, देवादिवाक्यानां प्रबोधेऽपि बाधाभावात् । न चेयमेव सृष्टिस्तत्र दृश्यते, "न तत्र रथाः" (बृ. ४. ३. १०.) इत्यादिना निषेधात् । श्रुतिवादिनां श्रुतिरेव प्रमाणं, किम्पुनरनुभवसंवादिनी । तस्मात् स्वप्ने **सृष्टिरस्ति** ॥ १ ॥

निर्मातारञ्चैके पुत्रादयश्च ॥ २ ॥

काठके चतुर्थवल्ल्यां श्रूयते "य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः, तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते" (कठ. ४. २३.) इति **निर्मातारमेके** वदन्ति । यद्यपि "सुषुप्त्युत्क्रान्त्योर्भेदेन' (ब्र. सू. १. ३. ४२.) इत्यत्र "न तत्र रथाः" (बृ. ४. ३. १०.) इत्यपि ब्रह्मप्रकरणं, तथापि नियतधर्मपक्षे जीव एव कर्तेति प्रतिभाति ।

तन्निराकरणार्थमाहुः **सन्ध्ये स्थाने**ति । प्रबोधेऽप्यनुभवमाहुः **देवादी**ति । श्रुत्यक्तदेववाक्यानामित्यर्थः । **बाधाभावा**दिति । स्वप्नानुभवस्य जागरणोत्तरं स्वप्न इद मया भुक्तमिद मया दृष्टमित्यनुव्यवसायो जायते न मया स्वप्ने स्मृतमित्यनुव्यवसाय इति, प्रबोधे बाधाभावादित्यर्थः । तटस्थः शङ्कते **न चे**ति । निराकुर्वन्ति **न तत्रे**ति । **संवादिनी**ति । तथा चानुभव श्रुतिर्यत्र वदति तत्र शङ्कालेशोऽपि नास्तीति भावः ॥१॥

पूर्वसूत्रा**दाहे**त्यस्य बहुवचनान्तत्वेनानुवृत्तौ **एके शाखिनः निर्मातारं चाहुः** पुत्रादयश्च निर्मातारमाहुरिति सूत्रार्थः । यद्यपि सृष्टिस्तु पूर्वसूत्रेणैव सिद्धा तथापि कस्येयं निर्मितेति निश्चयार्थं सूत्रप्रणयनमिति । **एके** कठाः काण्वाः । ब्रह्मकर्तृकत्वमस्याः सृष्टेर्व्यवस्थापयन्ति **यद्यपी**त्यादिना । सुषुप्त्युत्क्रान्त्योरिति सूत्रं प्रथमाध्याये तृतीयपादसमाप्तौ । **न तत्रे**ति बृहदारण्ये । उभयथापि ब्रह्मप्रकरणमित्यर्थः । **नियतधर्मपक्षे** इति ॥

तदर्थं निःसन्दिग्धं वचनमुदाहरति । भगवन्निर्मितत्वात् स्वप्नस्थस्यापि सत्यत्वम् । न हि कर्तुः स्वापोऽस्ति, येन भ्रमः स्यात् । "जागर्ति" (कठ. ४. २३.) इति वचनात् । इच्छापूर्वकञ्च सर्वं सृजति । "शतायुषः पुत्रपौत्रान्" (कठ. १. २३.) इति कामविषयाः पुत्रादय उक्ताः, ते च निर्मिताः परलोकसाधका इति लोकत्रयकल्पना । चकारद्वयेन कारणकार्यगताः सर्वे धर्मा उक्ताः । तस्माच्छ्रुत्युपपत्तिभ्यां स्वप्नप्रपञ्चस्य सिद्धत्वात् तत्कृतगुणदोषसम्बन्धे पूर्वोक्तदेहनिर्माणं व्यर्थमित्येवं प्राप्तम् ॥ २ ॥

मायामात्रन्तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥३॥

तुशब्दः पक्षं व्यावर्तयति । स्वप्नसृष्टिर्मायामात्रम् । तत्र हेतुः

स्वयनिर्माणकर्तृत्वपक्षे इत्यर्थः । तथा च कतम आत्मेति प्रश्ने कृते योऽयं विज्ञानमय इत्युपक्रमोत्तरं स्वयं निर्मायेत्युक्तत्वाददृष्टद्वारा जीव एव कर्तेति प्रतिभातीत्यर्थः । तन्निराकुर्वन्ति **तदर्थ**मिति । तन्निराकरणार्थमित्यर्थः । **वचन**मिति । एष सुप्तेषु जागर्तीति कठवल्लीस्थं वचनमित्यर्थः । पूर्वपक्षी पूर्वपक्षदार्ढ्यार्थमेतस्याः सृष्टेः सत्यत्वमाह **भगव**दिति । जीवनिराकरणार्थमाह **इच्छापूर्वक**मिति । तथा च जीवः स्वक्लेशार्थमिच्छापूर्वकं न सृजतीति भावः । स्वाप्निकलोकमादाय लोकत्रयमस्तीत्याह **शतायुष** इति । **उक्ताः** श्रुताविति शेषः । सौत्र**चकारद्वया**र्थमाहुः **कारणे**ति । उपादानगोचरापरोक्षज्ञानपूर्वकं सामर्थ्यं कारणगतो धर्मः, कार्यगतश्च सत्यत्वमित्यर्थः ॥२॥

सिद्धान्तसूत्रमाहुः **मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्** । **पक्षं** पूर्वपक्षम् । **मायामात्र**मिति । भगवतो द्वादशशक्तिमध्ये या व्यामोहजनिका सैव मायेत्युच्यते । इदं च **निबन्धे** स्पष्ट

कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् । कृत्स्नत्वेन यस्य यादृशं स्वरूपं देशकालवस्तुसापेक्षं तथाभिव्यक्तिः **कार्त्स्न्येनाभिव्यक्तिस्तदभावात्** । अयमाशयः । श्रुतिः सृष्टिमेवाह, न तस्य सत्यत्वमपि । यथा "ऐतदात्म्यमिदं सर्वं तत् सत्यं" (छा. ६. ८. ७.) इति "आत्मानं स्वयमकुरुत" (तैत्ति. २. ७.) "तत् सत्यमित्याचक्षते" (तैत्ति. २. ६.) "कथमसतः सज्जायेत ?" (छा. ६. २. २.) इत्यादिश्रुतिसहस्रेभ्योऽस्य सत्यत्वं प्रतीयते । नैवं स्वप्नप्रपञ्चस्य श्रुतिराह, सत्यप्रयोजनाभावाच्च । स्वप्नमात्रविहारस्तु महामायावित्वान्माययापि सिध्यति । नापि भिन्नः प्रपञ्चः, जीवस्यैकत्वात् । "अविद्यया मन्यते" (बृ. ४. ३. २०.)

प्रथमस्कन्धे च "अपश्यत्पुरुषं पूर्णं मायां च तदुपाश्रयाम् । यया संमोहितो जीव आत्मानं त्रिगुणात्मकम् ॥" इति । **तन्मात्रं** तदेकोपादानमित्यर्थः । तथा च यथा घटचक्रचीवरमृत्तिकादिबाह्यसामग्र्यपेक्षा तथा स्वाप्निकघटे नास्तीति भावः । **देशकाले**ति । **वस्तु**शब्देन विषयः । इदमुपलक्षणं, इन्द्रियव्यापारः, अथ च प्रतिबन्धकाभाव इति । तथा च सामाजिकव्यामोहार्थं नटसृष्टिरेव जीवव्यामोहार्थमीश्वरसृष्टिरियमिति भावः । अत्र स्वप्नविषये मतबाहुल्यं **प्रकाशे**ऽनुसन्धेयम् । पूर्वपक्षोक्तमस्याः सत्यत्वं निराकुर्वन्ति **अयमाशय** इति । **यथे**त्यस्य **सत्यत्वं प्रतीयत** इत्यनेनान्वयः । **अस्ये**ति बाह्यप्रपञ्चस्येत्यर्थः ॥ ननु सृष्टेर्विहारार्थं निर्माणमिति "स वै नैव रेमे" इत्यादिश्रुत्या प्रतिपादितम् । तथा च स्वाप्निकसृष्टेरपि सृष्टित्वाश्रयत्वाद्विहारार्थत्वाच्च बाह्यसृष्टिवत्सत्यत्वं स्वीकर्तव्यमित्यत आहुः **सत्ये**ति । सत्यत्वकल्पनायां प्रयोजनाभावादित्यर्थः ॥ ननु विहारसंभव एव प्रयोजनमिति आहुः **स्वप्नमात्रे**ति । तथा च स्वाप्निकसृष्टेरसत्यत्वेऽपि मायया विहारसिद्धिरिति भावः ॥ ननु स्वाप्निकी सृष्टिर्द्विविधा स्वीक्रियते, एका "तस्य वा एतस्ये"त्यादिना जीवोपक्रमात् जीवसृष्टिर्मिथ्यारूपा, अपरा काठकोक्ता

इति वचनान्न तत्सुखदुःखभोगार्थमपि सत्यत्वमङ्गीकर्तव्यम् । स्थानद्वय-प्रतिज्ञा च विरुध्येत । जीवतो मृतांश्च पश्यतीति लोकद्वयदर्शनम् । अतो लोकद्वयप्रतिच्छायरूपत्वान्मायया क्रीडायामन्यानुरोधाभावेनाति-सुखत्वाद्भगवत्कृतमात्रवाचकत्वाच्च श्रुतेरतिरिक्तकल्पनायां प्रमाणाभावा-ज्ज्योतिःशास्त्रनियमाभावाच्च **मायामात्रमेव** स्वप्न इति न तत्कृतगुण-

---

ईश्वरसृष्टिः सत्या भवतीत्यत आहुः **नापी**ति । **एकत्वा**दिति । तथा चैको जीवो द्रष्टा, स्वप्नप्रपञ्चद्वयम् । इद तु न घटते । यत्पूर्वस्मिन् दिने दृश्यते तदपरस्मिन् दिने न दृश्यत इत्येकरूपत्वाभावात् । यदेकेन दृश्यते तदपरेण न दृश्यत इत्यतो भिन्नः सत्यः स्वप्नप्रपञ्चो नास्तीति भावः ॥ ननु तस्या-सत्यत्वे स्वप्ने सुखदुःखानुभवो न स्यादत आहुः **अविद्यये**ति । **वचना**-दिति । अथ यत्र राजेव देवदत्तेत्यादिना सुखम् । "अथ यत्रैन घ्नन्तीव विच्छाययति गर्तमिव पतति यदेव जाग्रद्भय पश्यति तदत्राविद्यया पश्यति (मन्यते)" इति वचनाद् दुःख पश्यति, न तदर्थ सत्यत्वमङ्गीकर्तव्यमित्यर्थः । स्वप्नस्य मिथ्यात्वे साधकान्तरमस्याहुः **स्थानद्वये**ति । "तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवतः" इत्यादिनाः प्रतिज्ञाया कृतत्वान्न तृतीयं सत्य स्वप्नस्थानमित्यर्थः ॥ ननु सन्ध्य च तृतीयस्थानमित्यनया श्रुत्या तृतीयस्थान-स्योक्तत्वादत आहुः **जीवत** इति । **दर्शन**मिति । तथा च तत्र तेषा दर्शनमेव न तु ते तत्र सन्तीति न तस्य स्थानमिति भावः ॥ ननु यथा-कथञ्चित् तृतीयस्य सत्त्वे कथ लोकद्वयप्रतिज्ञा उक्तेत्यत आहुः **अत** इति । तथा चास्य प्रतिच्छायरूपत्व, न तु सत्त्वमित्यर्थः ॥ नन्वेतादृशा सत्यसृष्टिना किं प्रयोजनमत आहुः **मायये**ति । तथा च सुखजनकत्वमेव प्रयोजन-मित्यर्थः ॥ ननु बाह्यसृष्टेरिवास्यापि भगवत्कृतत्वेन सत्यत्वं कुतो न कल्प्यत इत्यत आहुः **भगव**दिति । **मात्र**पदेन सत्यत्वव्यवच्छेदः । **श्रुते**रिति । काठकश्रुतेरित्यर्थः ॥ ननु मास्तु सत्यत्व तथापि तत्कृतगुणदोषसंबन्धे जीवस्य कुतो नास्तीत्यत आहुः **ज्योति**रिति । अमुकराशिगे सूर्ये एता-

दोषसम्बन्धः । दीक्षितस्यान्नभोजनादिप्रायश्चित्तं तु भगवत्क्रीडायामपि प्रतिच्छायत्वात् क्रियते, तदानीं कर्तृत्वस्यारोपात् । अन्यदा कर्तृत्वस्याशास्त्रत्वान्न धर्माधर्मजनकत्वम् । देवताज्ञादिस्तु जीवब्रह्मणोर्विद्यमानत्वाद्युक्ता । अलौकिकज्ञाने हि प्रतिच्छायात्वात् सवादः । क्वचिद्भगवदावेशे ईषत्संवादोऽपि । तस्मात् स्वतन्त्रसत्यतायां प्रमाणाभावान्**मायामात्रं** स्वप्नप्रपञ्च इति सिद्धम् ॥ ३ ॥

वती रात्रिरित्यादि नियमाभावादित्यर्थः ॥ ननु तत्कुलगुणदोषसंबन्धाभावे स्वीक्रियमाणे दीक्षितेन कृते स्वप्नेऽन्नभोजने प्रायश्चित्तविधान किमर्थमत आहुः **दीक्षितस्ये**ति । **आरोपा**दिति । दीक्षितस्य यज्ञकर्मण्येककर्तृत्व नियमितमिति निषिद्धेऽप्यारोपितकर्तृत्वमपि दोषजनकमित्यर्थः । **अन्यदे**ति । अन्यदा **कर्तृत्वस्य** स्वप्ने अगम्यागमनकर्तृत्वस्य **अशास्त्रत्वात्** अत एव शास्त्रविहितत्वाभावात् शुभसूचकमित्युक्तम् । तथा च न तस्य सत्यत्वमिति भावः ॥ ननु स्वप्नप्रपञ्चे देवतादर्शनं तदाज्ञादिश्च मिथ्या स्यादत आहुः **देवते**ति । **विद्यमानत्वा**दिति । "द्वा सुपर्णा" इति श्रुत्या उभयोरन्तर्हृदि विद्यमानत्वात् । तद्द्वारा जीवस्याप्यनुभवो जायत इति तदंशे सत्यता युक्तेत्यर्थः । **श्रीप्रकाशकृत**स्तु जीवा इन्द्रादयो योगोत्थसामर्थ्याः, ब्रह्म स्वत एवातिसमर्थम्, अत समाधाविव स्वप्नेऽपि अन्तर्हृदि प्रविश्य विद्यमानत्वाद्दर्शनाज्ञादिकं ददतीति प्राहुः ॥ ननु तादृशानुभवस्य असत्त्वमेवास्तु । तथा सति कार्यजनकत्व कथमित्यत आहुः **अलौकिके**ति । बहिरिन्द्रियाजन्यत्वादिति हेतुः पूरणीयः । **प्रतिच्छायात्वात्** प्रतिबिम्बरूपत्वात् । **संवादः** अर्थक्रियाकारित्वं, तद्वदित्यर्थः । युक्त्यन्तरमाहुः **क्वचि**दिति । इन्द्रप्रतर्दनाख्यायिकायाम् । **भगवदावेशे**ति । इन्द्रे भगवदावेशेन उपासनादिकथनरूप **ईषत्संवादः** । एवं स्वप्नेऽपि देवावेशेन कथनं, न तु स्वधर्म इति न तस्य सत्यत्वमित्यर्थः । उपसंहरन्ति **तस्मा**दिति । अधिक तु **प्रकाशा**दनुसंधेयम् ॥ ३ ॥

ननु तर्हि जीवसाक्षिकमेकदेशेन किमिति सृजति । तत्राह—

सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ४ ॥

सूचकः शुभाशुभफलसूचको भवति स्वप्नः । चकारात् क्वचिदाज्ञाविशेषदानं, कलिकालादेः प्रत्यक्षे बाधकत्वात् । युक्तश्चायमर्थः । प्रातः सूचकफलस्यैव दृष्टत्वान्न तु स्वप्नपदार्थस्य । सूचकत्वे प्रमाणमाह "यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति समृद्धिं तत्र जानीयात्तस्मिन् स्वप्ननिदर्शने" (छा. ५. २. ९.) इत्यादि**श्रुतेः** । किञ्च**आचक्षते च तद्विदः** स्वप्नाध्यायविदस्तथैवाचक्षते "आरोहणं गोवृषकुञ्जराणां" (स्वप्ना. १५.) इत्यादिना । तस्मात् सूचनार्थं जीवप्रदर्शनमिति ॥४॥

किञ्चिदाशङ्क्य परिहरति—

पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥५॥

सूत्रमवतारयन्ति **नन्विति** । **एकदेशेने**ति । पदार्थशून्यधर्ममात्रेणेत्यर्थः । सूत्रार्थमाहुः **सूचक** इति । **प्रत्यक्षे** देवताप्रत्यक्षे । **न तु स्वप्नपदार्थस्ये**ति । **दृष्टत्वादि**त्यनेनान्वय. । तथा च तस्यासत्यत्वान्न दर्शनमिति भावः । **श्रुते**रिति । सूत्रांशमवतारयन्ति **सूचकत्वे**ति । उत्तरसूत्रांशं व्याकुर्वन्ति **किं चे**ति ॥ ४ ॥

आशङ्कामाहुः **नन्विति** । **सर्वेलीला**मिति । **जीवाय प्रदर्शयती**त्यनेनान्वयः । **अयं** जीवः । **कथ**मिति । इतिहेतोरिति शेषः । परिहारसूत्रं व्याकुर्वन्ति **तिरोहित**मिति । अतो दुःखित्वमित्यर्थः । तिरोधाने कारण **यदभितो ध्यानम्** । तस्यार्थमाहुः **स्वस्यैतस्य चे**ति । स्वस्य एतस्य जीवस्य च सर्वप्रकारेण भोगो भवतु इत्यादि-इच्छा । एव च तिरोधाने भगवदिच्छैव कारणमित्यर्थः । तदेवाहु. **तस्मा**दिति । केषां धर्माणां

ननु जीवाय भगवान्सृष्टिं करोति प्रदर्शयति च स्वस्य सर्वलीलां, अंशश्चायं, कथमस्य दुःखित्वमित्याशङ्क्य परिहरति तुशब्दः। अस्य जीवस्यैश्वर्यादि तिरोहितम्। तत्र हेतुः पराभिध्यानात्। परस्य भगवतोऽभितो ध्यानं स्वस्यैतस्य च सर्वतो भोगेच्छा। तस्मादीश्वरेच्छया जीवस्य भगवद्धर्मतिरोभावः। ऐश्वर्यतिरोभावाद्दीनत्वं पराधीनत्वं, वीर्यतिरोभावात्सर्वदुःखसहनं, यशस्तिरोभावात्सर्वहीनत्वं, श्रीतिरोभावाज्जन्मादिसर्वापद्विषयत्वं, ज्ञानतिरोभावाद्देहादिष्वहम्बुद्धिः सर्वविपरीतज्ञानञ्चापस्मारसहितस्यैव, वैराग्यतिरोभावाद्विषयासक्तिः। बन्धश्चतुर्णां कार्यो विपर्ययो द्वयोः। तिरोभावादेवं, नान्यथा। युक्तोयमर्थः। एकस्यैकांशप्राकट्येऽपि तथाभावात्। आनन्दांशस्तु पूर्वमेव तिरोहितो येन जीवभावः। अत एव

तिरोभाव इत्यत आहुः **ऐश्वर्येति**। षण्णां तिरोभावः। तन्मध्ये चतुर्णामैश्वर्यादितिरोभावानां कार्यमाहुः **बन्ध** इति। ज्ञानवैराग्यतिरोभावयोः कार्यमाहुः **विपर्यय** इति। अन्यथाज्ञानमित्यर्थः। **द्वयोरि**ति। द्वयोस्तिरोभावः कार्य इति पूर्वेणान्वयः। सौत्रं **तत** इति पदं व्याकुर्वन्ति **तिरोभावादि**ति। एवं बन्धविपर्ययौ। **नान्यथे**ति। न तु स्वत इत्यर्थः। **युक्त** इति। षण्णां तिरोभावादेव बन्धविपर्ययौ, अयमर्थो युक्त इत्यर्थः। कथं युक्त इत्यत आहुः **एकस्ये**ति। **एकस्य** जीवस्य ऐश्वर्यादीना**मेकांशप्राकट्येपि** तथा निश्चयेन बन्धाभावात्। अत्र प्रमाणं यत्पादपङ्कजेति वाक्यम्। तस्माद्युक्तोयमर्थ इति भावः।

ननु षण्णां तिरोभावापेक्षयैक आनन्दांशतिरोभाव एव बन्धविपर्ययोः कारणमित्येव कुतो नोच्यत इत्यत आहुः **आनन्देति**। **पूर्वमेव** सृष्टिकाल एव। **अत एवे**ति। आनन्दस्य तिरोभावादेव जीवः काममय इत्यर्थः। कुत इत्यत

" काममयः "। अकामरूपत्वादानन्दस्य । ∴ निद्रा च सुतरां तिरोभावकर्त्री भगवच्छक्तिः । अतोऽस्मिन्प्रस्तावे जीवस्य धर्मतिरोभाव उक्तः । अन्यथा भगवत ऐश्वर्यादिलीला निर्विषया स्यात् । तस्मान्न जीवस्वरूपपर्यालोचनया किञ्चिदाशङ्कनीयम् ॥ ५ ॥

ईश्वरेच्छयैवैश्वर्यादितिरोभावं स्वमते निरूप्य मतान्तरेणापि नियतधर्मवादेन निरूपयति

देहयोगाद्वा सोऽपि ॥ ६ ॥

देहयोगाद्वा देहसम्बन्धादेवास्य सर्वतिरोभावः विपर्ययो वा । अपिशब्दादन्यत् । अस्मिन्पक्षे देहवियोग एव पुनरैश्वर्यादिप्राप्तिः ।

आहुः **अकामरूपत्वादिति** । स्वरूपानन्दस्याकामरूपत्वादित्यर्थः । तथा च मुक्ता अपि जीवाः सेवायोग्या इति तेषु स्वरूपानन्दस्यैश्वर्यादेश्च तिरोभावो नास्तीति मुक्तत्वमिति भावः । अत एवोक्तं **प्रकाशे पुरुषोत्तमस्वामिचरणैः** द्विविधा हि जीवाः सदा मुक्ताः बन्धयोग्याश्चेति । आद्यस्तूक्त एव । अपरस्तु सर्वेषां तिरोभावादिति । ननु यथा भगवदिच्छया तिरोधानं जायते तथा निद्रयापि जायते, सा कुतो नोक्तेत्यत आहुः **निद्रा चेति** । **सुतरां** प्रपञ्चस्य सर्वस्येत्यर्थः । तथा चेच्छया तु धर्मस्यैव तिरोभाव इति स एवात्रोक्त इत्यर्थः । नन्वेवं भगवता किमर्थमिच्छा कर्तव्येत्यत आहुः **अन्यथेति** । **अन्यथा** ऐश्वर्यादितिरोभावे । तथा च जवनिकासाध्या यथा नटलीला तद्वदित्यर्थः । उपसंहरति **तस्मादिति** । **किञ्चित्** दुःखित्वादिकम् ॥ ५ ॥

अपीति चतुष्पदमिदं सूत्रम् । नन्विदं सूत्रं किमर्थमत आहुः **ईश्वरेति** । **नियतेति** । यावत्पर्यन्तं देहस्तावत्पर्यन्तं बन्धनरूपो धर्मो नियत इतिवादेनेत्यर्थः । तथा च मतान्तराभिप्रायेणेदं सूत्रं **देहयोगादिति** । सूक्ष्मदेहयोगादित्यर्थः । अपीत्यस्य स्वारस्यमाहुः **अपीति** । **अन्यत्** बन्धदुःखादिकम् ।

पूर्वस्मिन्कल्पे विद्यमानेपीति विशेषः। न त्वीश्वरेच्छया विकल्पः।

कश्चित्परशब्देन देहादिमाह। तदा अभिध्यानयोगयोराकस्मिकता स्यात्। "सर्वस्य वशी सर्वस्येशानः" (बृ. ४. ४. २२.) इति विरोधश्च।

कश्चित्तु 'तस्याभिध्यानात्तृतीयदेहभेदे' (श्वे. १. ११.) इति श्रुत्यनुरोधेन जीवकर्तृकाभिध्यानं मत्वा अतिरोहितमिति कल्पयति विपर्ययशब्देन च मोक्षं, बह्वध्याहारेण च सूत्रद्वयं

तत्पक्षे स्वरसं सूचयन्ति **अस्मिन्निति**। **विशेषः** आधिक्यमित्यर्थः। क्वचिद्देहयोगः क्वचिदिच्छेति नात्राभिप्रेतमित्याहुः **न त्विति**। व्याख्यानान्तरमाहुः **कश्चिदिति**। **परशब्देनेति**। पराभिध्यानादिति पूर्वसूत्रे परशब्देनेत्यर्थः। **देहादिमिति**। देहारम्भककर्मादिमित्यर्थः। दूषयन्ति **तदेति**। **अभिध्यानयोगयोरिति**। पूर्वसूत्र अभिध्यानपदस्यास्मिन्सूत्रे योगपदस्येत्यर्थः। **आकस्मिकता** निर्हेतुकता। तथा च परात्तु तिरोहितं, देहाद्वा सोपीत्येवं सूत्रद्वयं कर्तव्यं स्यादित्यर्थः। नन्वस्तु तथा सूत्रद्वयं, लाघवं भविष्यतीत्यत आहुः **सर्वस्येति**। कर्माधीनत्व ईश्वराधीनत्वाभावात् श्रुतिविरोध इत्यर्थः। **शंकराचार्य**मतमाहुः **कश्चिदिति**। श्वेताश्वतरोपनिषत्स्थं वाक्यमाहुः **तस्येति**। "ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः। तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः॥" इति। अस्यार्थः। देवज्ञानात्सर्वपाशानामपहानिः, प्रहाणिः जन्ममृत्युप्रवाहहानिः, देहभेदे देहनिवृत्तौ विश्वैश्वर्यं ब्रह्मलोकसंबन्ध्यैश्वर्यं भवेदित्यर्थः। तदनन्तरं ब्रह्मभूत आप्तकामः केवलो भवतीति। **श्रुत्यनुरोधेनेति**। श्रुतौ सूत्रे च पराभिध्यानपदं समानमित्यनुरोधेनेत्यर्थः। **मत्वेति**। सौत्रत्वेन विचार्येत्यर्थः। **अतिरोहितमिति**। पूर्वं तिरोहितं ज्ञानादतिरोहितमित्यर्थः। पराज्ञानज्ञानाभ्यां बन्धमोक्षाविति

योजयति । तद् ब्रह्मवादाज्ञानादसङ्गतेश्च साधनोपदेशस्य भ्रान्तोक्त-मित्युपेक्ष्यम् । निद्राया विवेकज्ञानाभावावसरत्वाद्यथाव्याख्यात एवार्थः ॥ ६ ॥ १ ॥

इति तृतीयाध्याये द्वितीयपादे प्रथमं सन्ध्याधिकरणम् ॥१॥

प्रसङ्गाज्जीवस्याज्ञानं निरूप्य सुषुप्तौ केवलमज्ञानं निरूपयितुं स्थानस्वप्नाभावौ निरूपयति । एवं श्रूयते नाडीरनुक्रम्य " तासु तदा भवति यदा सुप्तः स्वप्नं न कश्चन पश्यति अथास्मिन्प्राण एवैकधा भवति " (कौ. ६. १९.) इति, तथा " प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम् " (बृ. ४. ३. २१) इति । तत्र संशयः । स्वप्नवत्प्रपञ्चसृष्टिं मायिकीमपि भगवान्करोति न वेति संशयः । तत्र " य एष सुप्तेषु जागर्ति " (कठ. ५. ८.) इत्यत्र जीवस्वापमात्रे भगवत्सृष्टेरुक्तत्वात् " स्वप्नं न कश्चन पश्यति " (कौ. ४. १९.) इत्यत्रापि दर्शनमात्रनिषेधात् " न बाह्यं किञ्चन वेद नान्तरम् " (बृ. ४. ३. २१) इति च जागरणस्वप्नप्रपञ्चयोरविशेषेणादर्शनकथनात्सुषुप्तावपि प्रपञ्च-निर्माणमस्तीत्यवगन्तव्यम् । ततश्च कस्यामप्यवस्थायां प्रपञ्चव्यति-

---

तद्दूषयन्ति **तदिति** । तथा चानेन जीवेनैव करिष्यामीतीश्वरेच्छायाः कारणत्वं स्वीकृतम् । तच्च जीवस्य शरीरसत्त्व एव घटते । एवं च देहयोगसूत्रं न सिद्ध्येतेति भावः । दूषणान्तरमाहुः **असंगतेश्चेति** । अस्मिन्स्वप्नावस्था-प्रकरणे ब्रह्मध्यानस्य साधनत्वोपदेशस्यासंगतेरित्यर्थः । स्वोक्तव्याख्यानस्य सामञ्जस्यमाहुः **निद्राया** इति । स्वप्नावस्था च निद्राप्रकरणं, तस्यां

रेकाभावान्मुक्तावपि स्यात् । स्वाप्ययसम्पत्त्योरज्ञानमात्रविशेषात्, " सति सम्पद्य न विदुः सति सम्पद्यामहे " (छा. ६. ९. २.) इति । तस्माद्ब्रह्मसत्सम्पदोर्विद्यमानयोरपि यथाज्ञानाभावादग्रहणमेवं प्रपञ्चस्यापीत्येवं प्राप्त उच्यते

तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥

तदभावो नाडीषु । तस्य स्वप्नस्याभावो नाडीषु तथात्मनि च । कुतः । तच्छ्रुतेः प्रपञ्चाभावश्रुतेः । कामनया हि प्रपञ्चः । सुषुप्तावस्थाया अकामरूपत्वश्रुतेः, " तद्वा अस्यैतदात्मकाममाप्तकामम-

---

विवेकज्ञानाभावस्यावसरत्वादज्ञानतिरोभावस्यैव बोधो युक्त इत्यर्थः ॥६॥१॥

सुषुप्त्यवस्था निरूपयितुं तदभावाधिकरणमाहुः **तदभावो नाडीषु तच्छ्रुतेरात्मनि च** । प्रसंगसंगतिमुत्तराधिकरणे सूचयन्ति **प्रसंगादिति** । **अज्ञानमिति** । विपर्ययजनकमज्ञानमित्यर्थः । **स्थानमिति** । अज्ञानाधिकरणमित्यर्थः । विषयवाक्यमाहुः **एवं श्रूयते** इति । **तासु तदे**त्यारभ्य **भवती**त्यन्तं कौषीतकीस्थं, **प्राज्ञे**नेत्यारभ्य **नान्तर**मित्येतदन्तं बृहदारण्ये ज्योतिर्ब्राह्मणस्थं, वाक्यद्वयं श्रूयत इत्यर्थः । संशयमाहुः **तत्रेति** । पूर्वपक्षमाहुः **तत्रे**ति । **उक्तत्वादि**ति तथा च स्वप्नावस्थायामस्ति सुषुप्त्यवस्थायां नास्तीत्यनुक्त्वा निद्रावस्थामात्रग्रहणात्किं ज्ञायते सुषुप्त्यवस्थायामपि सृष्टिरस्तीति पूर्वपक्षाशय इति भावः । नन्वस्ति चेद्दर्शनं कुतो न जायत इत्यत आहुः **स्वप्न**मिति । **अवगन्तव्यमिति** । तथा च श्रुतिद्वयेनादर्शनमुच्यते न तु सुषुप्तौ प्रपञ्चो नास्तीत्युच्यत इतिभावः । ननु दर्शनसत्त्वे प्रपञ्चसत्त्वं, तदभावे तदभाव इत्यन्वयव्यतिरेकव्याप्त्या प्रपञ्चसत्त्वं, तदभावे तदभाव इत्यन्वयव्यतिरेकव्याप्त्या प्रपञ्चासत्त्वं सिद्ध्यतीत्यत आहुः **ततश्चे**ति । **व्यतिरेकाभावादिति** ।

कामं रूपम् ” (बृह. ६. ३. २१.) इति । **नाडीषु आत्मनि** चेतिग्रहणात् सुषुप्तिर्द्विविधेति सूचयति । तथाहि “ हिता नाम नाड्यः ” पुरीतत्यन्ता हृदयदेशाद्बाह्याः, आभ्यन्तरः परमात्मा, हृदयदेशस्तु जीवस्य, इन्द्रियाणां च स एव देशः । तत्र निद्रया भगवच्छक्त्या बहिर्दृष्ट्याच्छादने भगवल्लीलायां तां पश्यति । तत्राप्याच्छादने गाढसुप्तो ज्ञानरहितः क्रियाशक्त्यान्तर्भगवन्तं वा प्रविशति वहिर्नाडीषु वा समायाति । अत एव बृहदारण्यकषष्ठे “ यत्र सुप्तो न कञ्चन कामं कामयते ” (बृ. ४. ३. १९.) इति वारद्वयमाह “ ता वा अस्यैता हिता नाम नाड्यः ” (बृ. ४. ३. २०.) “ तद्वा अस्यैतदात्मकामंम् ” (बृ. ४. ३. २१.)

प्रपञ्चाभावाभावात् । ननु मुक्त्यवस्थायां प्रपञ्चाभावोस्तीति कथमिदमुच्यत इत्यत आहुः **मुक्तावपीति** । तत्रापि प्रपञ्चः स्यादित्येतदर्थम् । तत्रापि स्वाप्ययसंपदोरज्ञानमात्र विशेषेणोच्यत इत्यर्थः । यत्रोच्यते तां श्रुतिमाह **सतीति** । तथा च दर्शनव्याप्तिरनया श्रुत्या बाध्यत इति सर्वावस्थासु प्रपञ्चसत्त्वमिति **पूर्वः पक्षः** । समाधानमाहुः **उच्यत** इति । **स्वप्नस्येति** । मायामयप्रपञ्चस्येत्यर्थः । प्रपञ्चस्य मूलं हि कामना साच सुषुप्तौ नास्तीत्यत्र श्रुतिमाहुः **तद्वेति** । बृहदारण्यकस्थं वाक्यम् । सुषुप्तिस्थानद्वैविध्येन द्वैविध्यं श्रुतिप्रतिपाद्यमित्याहुः **नाडीष्विति** । श्रुतिप्रतिपाद्यसुषुप्तिसिद्ध्येपि कामनाया अभावात् प्रपञ्चाभाव इति प्रतिपादयन्ति **तथा हीत्यादिना** । हृदयदेशाद्बहिर्देशे पुरीतति नाडीं प्राप्य हिता नाम नाड्यः सन्ति, हृदये जीवः, अभ्यन्तरे भगवान् । तत्र स्वप्नादिप्रकारमाहुः **तत्रेति** । **निद्रयेति** । भगवच्छक्तिरूपया निद्रयेत्यर्थः । **तामिति** । स्वप्निकीं सृष्टिं **पश्यति** । **तत्रापीति** । निद्रयेति शेषः । तथा च स्थानभेदेन सुषुप्तिद्वैविध्यमित्यर्थः । तत्र प्रमाणमाहुः

इति भेदेन। सुषुप्तिस्तूभयत्र। ज्ञानशक्तेः सर्वथातिरोधानात्। तस्मात् सुषुप्तौ न प्रपञ्चसृष्टिः॥ ७ ॥ २ ॥

इति तृतीयाध्याये द्वितीयपादे द्वितीयं तदभावो नाडीष्वित्यधिकरणम् ॥ २ ॥

प्रबोधे सन्देहः। "प्रतियोन्याद्रवति बुद्धान्तायैव" (बृ ४. ३. १५) इति जीवसमानधर्मब्रह्मप्रकरणे निरूपितम्। ततो नाडीभ्यः पुनर्हृदयदेशं गत्वा भगवतो वा समागत्य जागर्तीति, आहोस्विद्यत्र स्थितस्तत एव जागर्तीति। तत्र श्रुत्यनुरोधाद् हृदयदेशमागत्य जागर्तीत्येवं प्राप्त उच्यते

अतः प्रबोधोऽस्मात् ॥ ८ ॥

अतो नाडीभ्य एव प्रबोधः। गर्तपतितस्य प्रबोधे हि ततो गमनं, प्रतियोन्याद्रवणं तु भगवत इति। किञ्च प्रबोधोऽस्मात्।

अत एवेति। **आहेति**। श्रुतिरितिशेषः। **भेदेनेति**। **आहेति** पूर्वेणान्वयः। ननूभयत्रापि, सुषुप्तिरित्यत्र को वा हेतुरित्यत आहुः **सुषुप्तिस्त्विति** ॥७॥ २॥

प्रसंगात् प्रबोधाधिकरणं रचयांचक्रुः **अतः प्रबोधोऽस्मात्**। संदेहनिरासाय विचारं कर्तुं विषयवाक्यं बृहदारण्यकीयज्योतिर्ब्राह्मणस्थमाहुः **प्रतियोनीति**। स एष एतस्मिन्संप्रसादे रत्वा चरित्वेत्युद क्रम्योक्तं **प्रतियोनीति**। तत्र संप्रसादेषु सुखमनुभूय ततो नाडीषु स्वाप्निकं सुखदुःखादिकमनुभूय तदनन्तरं यतः सुषुप्तिं गतस्तत्स्थानं योनिः। तां प्रति आगच्छति **बुद्धान्ताय** जागरणायेत्यर्थः। **जीवेति**। जीवब्राह्मणसमानधर्मत्वं यस्मिन्प्रकरण इत्यर्थः। इदं च प्रथमाध्याये तृतीयपादान्ते सुषुप्त्युत्क्रान्त्यधिकरणे निरूपितम्। तत्र संशयाकारमाहुः **तत इति**। **गत्वेति**। **जागर्तीत्यनेनान्वयः**। **भगवत**

अस्मदात्मनः सकाशादेव प्रबोधः । " प्रिययेव सम्परिष्वक्त "स्य बोधाभावे कथमागमनम् । अत एव " सम्परिष्वक्तः " (बृ. ४. ३. २१) निबिडनिद्रः । तस्माद्यत्रैव तिष्ठति तत एव प्रबोध इति सिद्धम् ॥ ८ ॥

किञ्चिदाशङ्क्य परिहरति

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥

ननु प्रिययेव प्राज्ञेनात्मना परिष्वक्तस्य ब्रह्मलोकं गतस्य प्रबोधेन ज्ञाने मुक्त एव भवेन्न तु पुनरागच्छेदतो भगवदिच्छया देहनिर्वाहाय तत्स्थाने नियुक्तोऽन्य एव जीवः समायातु । अन्यतः

इति । हृदयदेशमागत्येत्यर्थः । पूर्वपक्षमाहुः **तत्रेति** । **श्रुत्यनुरोधादिति** । **चरित्वे**त्यनुरोधादित्यर्थः । तथा च चरित्वेत्यस्य गमनार्थकत्वं स्वीकृत्येदमित्यर्थः । सिद्धान्तमाहुः **उच्यत** इति । **अत** इति । प्रतिकूलागमनरूपाजागरणलिङ्गादित्यर्थः । तथा च श्रुतौ आगमनार्थकं प्रतिन्यायमाद्रवणमुक्तं तच्च जागरणं विना न संभवतीति तत्र स्थित एव जागर्तीतिभावः । अत्र लौकिकदृष्टान्तमाहुः **गर्तपतितस्ये**ति । तादृशपुरुषस्य जागरणं विना गमनं न संभवतीत्यर्थः । तथा च **चरित्वेति** न गमनार्थकं किन्तु चर गतिक्षणयोरित्यनेनानन्दभोगार्थकमितिभावः । ननु प्रबोधानन्तरं **स्वस्थान** एवागमनमत्र को वा हेतुरत आहुः **प्रतियोनी**ति । हृदयरूपस्थान आद्रवणं तु प्रेरकभगवतः सकाशात्कृतमित्यर्थः । सौत्र**मतः**पदं व्याख्याय **भगवतो वा समागत्य जागर्तीति** सौत्रमपरं पक्षमाहुः **किंचेति** । अत्र हेतुलौंकिकदृष्टान्तेनाहुः **प्रिययेवे**ति । **तत एवे**ति । एवकारेण हृदयदेश आगमानन्तरं प्रबोधो व्यावर्त्यते ॥ ८ ॥

नेदमाधिकरणान्तरमिति सूचयितुमाहुः **किंचिदिति** । सूत्रेण समाधानांशं व्याकर्तुं पूर्वं पूर्वं पक्षमाहुः **नन्विति** । शङ्कायां पक्षद्वयं, **समायात्वि-**

प्रबोधे तु स एव । व्यवहारस्तु तावता सेत्स्यति । मुक्त्यर्थं प्रयत्नस्तु न कर्तव्य इत्याशङ्क्य परिहरति तुशब्दः । अस्मादपि प्रबोधे स एव । कुतः। **कर्मानुस्मृतिशब्दविधिभ्यः**। चत्वारो हेतवः, लौकिकवैदिकयोर्ज्ञानकर्मभेदात् । तत्र लौकिके कर्मणि सामिकृतकर्मणः शेषसमापनात् । न हि कश्चिदपि सुप्तप्रतिबुद्धः सामिकृतं न समापयतीति क्वचित् सिद्धम् । तथानुस्मृतिः । न हि पूर्वदृष्टं न स्मरतीति क्वचित् सिद्धम् । शब्दाश्च "पुण्यः पुण्येन कर्मणा भवति पापः पापेन" (बृ. ४. ४. ५.), "क्वैष तदाभूत्कुत एतदागात् (बृ. २. १. १६.) इति, तथा "सति सम्पद्य" (छा. ६. ९. २.) इत्यादयश्च। विधयश्च, "श्वोभूते ब्रह्माणं वृणीते" (आप. श्रौत. ४. ४. १.), "श्वोभूते शेषं समाप्नुयात्" (आप. श्रौत. १५. २. ३.), "एक एव यजेत" (तै. सं. ७. २. १०. ३.),

---

त्यन्तमेकः, **अन्यत** इत्यारभ्य द्वितीयः । **प्रियये**ति । यथा प्रियया स्त्रिया संपरिष्वक्त एवं प्राज्ञेनात्मना संपरिष्वक्तः, तस्येत्यर्थः । **ब्रह्मलोकं गतस्य** सुषुप्तौ ब्रह्मसंपत्तौ सत्यामित्यर्थः । **ज्ञाने**ति । तदनन्तरं प्रबोधेन ज्ञानं जायत इत्यर्थः । **अन्य एवे**ति । तथा च शय्यायां पतितस्य देहस्य व्यवहारार्थमन्य एव जीवः प्रविशतु तत्र कारणं भगवदिच्छेतिभावः । पक्षान्तरमाहुः **अन्यत** इति । अन्यस्मिन्पक्षे । **स एवे**ति । **समायान्विति** पूर्वेणान्वयः । अत्रेच्छायाः कारणत्वकल्पनं नास्तीत्याहुः **व्यवहारस्त्वि**ति । लाघवमाहुः **मुक्त्यर्थ**मिति । निद्रया कार्यसिद्धेरितिभावः । समाधानमाहुः **अस्मादि**ति । सूत्रोक्तात्तुशब्दादित्यर्थः । हेतुं व्याकुर्वन्ति **चत्वार** इति । **लौकिकं** द्वयं कर्मणि-ज्ञाने, **वैदिकं** द्वयं कर्मणि ज्ञाने इति चत्वार इत्यर्थः । लौकिकमाहुः **तत्रे**ति

“ द्वादश रात्रीर्दीक्षितः स्यात् ” (तै. सं. ७. २. १०. ३.) इत्यादि, “ यः कामयेत वीरो मे आजायेत ” (तै. ब्रा. २. २. ३. ५) इत्यादयः। भगवतैव मर्यादारक्षार्थं तथाकरणात्। पूर्वपक्षयुक्तयो दुर्बलाः। तस्मात् स एव प्रतिबुध्यते ॥ ९ ॥

किञ्चिदाशङ्क्य परिहरति। ननु यत्र कर्मानुस्मृतयो न सन्ति तत्रान्यो भविष्यति। क्वचिन्मूर्च्छादिविशेषे सर्वस्मृतिनाशेन मुग्धभाव-

---

सामिकृतेति। अर्धकृतेत्यर्थः। ज्ञान आहुः **तथेति**। वैदिकं द्वयमाहुः **शब्दाश्चेति**। कर्मण्याहुः **पुण्य** इति। तथा च सुषुप्तौ मुक्तौ सत्यमिदं वाक्यं न संगच्छत इत्यर्थः। पुनर्वाक्यविरोधमाहुः **क्वैष** इति। अस्मिन्वाक्ये एषपदेन सुप्तमागतमेकमेव वदति श्रुतिः। पुनः श्रुत्यसंगतिमाहुः **तथेति**। अस्मिन्वाक्ये सर्वजीवानां सुषुप्तावज्ञानमुच्यते। मुक्तावज्ञानोक्तिरसंगतेत्यर्थः। शब्दानन्तरं विधय आहुः **विधयश्चेति**। **इत्यादय** इति। येन पूर्वदिवसे संकल्पः क्रियते तस्यैवापरस्मिन् दिने ब्रह्मवरणं विधीयत इत्यादि विरुध्यत इत्यर्थः। एवमुत्तरत्रापि। किं च मुक्त्यनन्तरं कामनाभावेनापि विरोधमाहुः यः **कामयेतेति**। ननु भगवतः सकाशात् प्रबोधे मुक्तिः कुतो न जायत अत आहुः **भगवतैवेति**। **मर्यादेति**। वरणरूपसाधनद्वारैव भगवत्प्राप्तिरिति नायमात्मेति वेदोक्ता मर्यादेत्यर्थः ॥ ९ ॥

सूत्रप्रयोजनं वदन्ति **किञ्चिदिति**। सूत्रे परिहारस्योक्तत्वादतः पूर्वं शङ्कामाहुः **नन्विति**। **न सन्तीति**। तथा च यत्र कर्मादिहेतवः सन्ति तत्र गत्यभावात् स एव जीवो भवतु नाम, परं तु यत्र न सन्ति तत्रान्यसत्त्वे किं बाधकमित्यर्थः। ननु कुत्र न सन्तीत्यत आहुः **क्वचिन्मूर्च्छादिविशेषेति**। मूर्च्छानिवृत्त्यनन्तरमतिमुग्धे इत्यर्थः। अत्र **दृष्टान्तपुरःसरमुप-**

दर्शनात्। तत्र यथा लौकिकवैदिकव्यवहारास्तथान्यत्रापि भविष्यन्ति। **अनुस्मरणादयश्च** बुद्धिवृत्तयः। गङ्गाप्रवाहजलस्य गङ्गावत्। य एव चिदंशस्तत्रायाति स एव तथा भवतु। किं स एवेतिनिर्बन्धेने-त्याशङ्क्य परिहरति

मुग्धेऽर्धसम्पत्तिः परिशेषात् ॥ १० ॥

मुग्धे मुग्धभावे अर्धसम्पत्तिरेव, न सर्वा। न हि मुग्धस्य यज्ञादावधिकारोऽस्ति। पूर्ववृत्तानि तु जीवनाधिकारात् क्रियन्ते। लौकिकव्यवहारोऽपि नापूर्वः सिध्यति। पूर्वोक्तहेतुसद्भावे तु न कोपि

पादयन्ति **तत्र यथेति**। अमरुनामके मुग्धे सति देहे शंकराचार्यजीवप्रवेशे यथा तथा लौकिकेपीत्यर्थः। युक्त्यन्तरमप्याहुः **अनुस्मरणादय** इति। **बुद्धिवृत्तय** इत्येनेन जाग्रत्कालेपि तासामनेकभावः सूचितः। एवं चेत्किमत आहुः **गङ्गे**ति। **जलस्य** गङ्गाप्रवाहे पतितस्य जलान्तरस्येत्यर्थः। **तथेति**। बुध्यैक्यमादाय बुद्धिवृत्तिप्रवाहस्य तत्रापि सत्त्वेन पूर्वं कर्मसमापनकर्ता स एव भवत्वित्यर्थः। तथा च कर्तृत्वं बुद्धिवृत्तावुपाधौ गतमितिहृदयम्। **किं स एवे**ति। पूर्व एवेत्यर्थः। परिहारं व्याकुर्वन्ति **मुग्धेति**। **मुग्धभावे**ति। मूर्च्छानन्तरं जीवत एव मुग्ध जायत इति भावः। **अर्धसंपत्तिरि**ति। एकतर-निश्चायिका बुद्धिर्न भवतीत्यर्धत्वमित्यर्थः। संपत्तौ कथमर्धत्वमत आहुः **न हीति**। **पूर्ववृत्तानीति**। अग्निहोत्रादीनीत्यर्थः। **अधिकारादिति**। यावज्जीवमग्निहोत्रं जुहुयादित्यधिकारादित्यर्थः। तथा चार्थी समर्थो विद्वानिति वचनात् न कर्तृत्वमुपाधिगतमिति भावः। **नापूर्व** इति। लोके अमरुशरीरे पश्चाल्लोकानामयं वान्यो वेति संदेहे जाते व्यवहारसिद्धिर्न जातेति लौकिक-व्यवहारः पूर्वं जीव एव सिध्यतीत्यतस्तस्य व्यवहारस्य पूर्वत्वम्। तथा **च**

दोषः । अतो मुग्धेऽर्धसम्पत्तिः पूर्वैव नोत्तरा । कुत एतत् । परिशेषात् । स एव वा न वेति निश्चयप्रमाणानामभावादर्थात् सन्देहोऽवशिष्यते । तस्मात् सन्देहान्मुग्धेऽर्धप्रतिपत्तिः । न तत्र प्राणापनयविघातकृता मूर्छा विचार्यते । तस्याः प्राणधर्मत्वात् । यथा बाल्यं शरीरधर्मः । व्यर्थश्च विचारः । जीवावस्था एव हि विचार्यन्ते ।

न पूर्वभिन्नः सिध्यतीत्यर्थः । मुग्धभावानन्तरं कर्मानुस्मृत्यादिकं यत्र जातं तत्राहुः **पूर्वोक्ते**ति । तत्र तु स एव इति निश्चयान्न कोपि शब्दादिविरोध-दोष इत्यर्थः । यत्र तु अनुस्मृत्यादीनामभावस्तत्राहुः **अत** इति । **अतः** उक्त-दोषात् हेतूनां पूर्वैव संपत्तिर्नोत्तरेत्यर्धैवेत्यर्थः । **कुत एतदि**ति । **एतत्** अर्धं कुत इत्यर्थः । अर्धस्य सत्त्वे सौत्रं हेतुं विवृण्वन्ति **स एव वे**ति । **निश्चये**ति । निश्चयजनकप्रमाणानामित्यर्थः । **अवशिष्यते**ति । सन्देहः परिशेषपद-वाच्य इत्यर्थः । पञ्चम्यन्तपरिशेषः । पदस्यार्थमाहुः **तस्मादि**ति । अर्ध-**प्रतिपत्तिः** अर्धं ज्ञानं विचारकस्येतिशेषः । किं च अत्र प्रतिपत्तिपदं विहाय संपत्तिपदमुक्तं तेन मूर्च्छिते दुःखाभावमात्रं न तु सुषुप्तिवत् सुखमपि । अत एव कालियनागस्य मूर्च्छानन्तरमिन्द्रियाणां पुनरागमनमर्धसंपत्त्येतिबोध्यम् । अत एव पूर्वा संपत्तिर्न तु निश्चयादतः कारणात् मुग्धदृष्टान्तो न संगच्छत इत्यर्थः । **केचिदियं** मूर्च्छा जाग्रदाद्यवस्थात्रयं मरणावस्था चेतिचतुष्टयाद्भि-न्नेति सात्र विचार्यत इति वदन्ति तद्दूषयन्ति **न तत्रे**ति । **प्राणापनये**ति । प्राणस्यापनयः स्थानपरित्यागः, तज्जनको यो विघातः मुशलाभिघातः, तज्जन्ये-त्यर्थः । ननु प्राणधर्मस्य विचारे को दोष इत्यत आहुः **व्यर्थश्चे**ति ।

ननु सुषुप्त्याद्यवस्थाविचारः किमर्थमत आहुः **जीवे**ति । जीवस्य जाग्र-दाद्यवस्थासाक्षित्वेन ता एव विचार्या इत्यर्थः । ब्रह्मवादे तस्या विचारे

केवलसाक्षिवादस्तु न ब्रह्मवादः । तस्मादेक एक जीवः स्वप्नादि-दोषसम्बन्धरहितस्तादृशजन्मयुक्तो भगवज्ज्ञानरहितो ज्ञानाधिकारीति सिद्धम् ॥ १० ॥ ३ ॥

॥ इति तृतीयाध्याये द्वितीयपादे तृतीयमतःप्रबोध इत्यधिकरणम् ॥ ३ ॥

इदानीं विषयनिर्धारार्थं ब्रह्मस्वरूपं विचार्यते । तत्र प्रथम-मन्योन्यविरुद्धवाक्यानां निर्णयः क्रियते । तदर्थमेतावत् सिद्धं समन्वयाविरोधाभ्यामेकमेव ब्रह्म प्रतिपाद्यत इति । तत्र यथा कार्य-

---

को दोष इत्यत आहुः केवलेति । केवलसाक्षिवादो भिन्नो ब्रह्मवादात् । इदं चोभयोरैक्यं सुषुप्त्युत्क्रान्त्योर्भेदेनेत्यस्मिन् सूत्रे निवारितम् । सिद्धमाहुः **तस्मादिति** । **एक एवे**ति । य एव सुप्तः स प्रतिबुद्ध इत्यर्थः । **स्वप्नादी**ति । तस्य मिथ्यात्वादित्यर्थः । **तादृशे**ति । पूर्वपादोक्तयोग्यशरीरावाप्तियुक्त इत्यर्थः ॥ १० ॥ ३ ।

पूर्वग्रन्थस्योत्तरग्रन्थे संगतिं प्रयोजनं चाहुः **इदानीमिति** । पूर्वं ब्रह्म-ज्ञानाधिकारिनिर्णयः कृतः । स च तादृशज्ञानविषयब्रह्मस्वरूपनिर्णयं विना न संभवतीति तदर्थमेतत्सूत्रादारभ्य तृतीयपादपर्यन्तमिदं विचार्यत इत्यर्थः । एतेन अवसरसंगतिः प्रयोजनं चोक्तम् । नन्वेवं चेत्स्वरूपनिर्णय एव कर्तव्यः किमर्थं वाक्यविचारः क्रियत इत्यत आहुः **तत्रेति** । ब्रह्म सधर्मकं निर्धर्मकं वेति संशयनिराकरणं स्वरूपनिर्द्धारं विना न संभवति । स चोभय-विधबोधकवाक्यानां निर्णयं विना न संभवतीति प्रथमं तस्यारम्भ इत्यर्थः । एतेन अधिकरणप्रयोजनं दर्शितम् । ननु पूर्वाध्यायद्वयेनेदं निर्णीतमेवेति किमर्थमयमारंभ इत्यत आहुः **तदर्थमिति** । स्वरूपनिश्चयार्थमित्यर्थः । तथा चाध्यायद्वयेनोपनि-षत्सु ब्रह्मणि एकत्वे प्रतिपादिते तदनन्तरं स्वरूपनिर्णयः संभवतीतिभावः । **तत्रेति** ।

विरोधः परिहृत एवं ब्रह्मधर्मविरोधोपि परिहरणीयः। अन्यथा बोधकता न स्यात्। तत्र स्वगतधर्माणामविरुद्धानामग्रिमपादे विचारः। जडजीवधर्मत्वेन प्रतीतानामत्र विचारः क्रियते। तत्र क्वचिज्जडजीवधर्मा भगवति बोध्यन्ते, क्वचिन्निषिध्यन्ते। यथा "सर्वकर्मा सर्वकामः" (छा. ३. १४. २.)। न चैते जीवधर्मा एव न भवन्तीति वाच्यम्। उच्चावचकर्मणां कामानाञ्च जीवगतत्वप्रतीतेः। "नेतरोनुपपत्तेः" (ब्र. सू. १. १. १५.) इति सर्वत्र वैलक्षण्यस्योक्तत्वात्। कार्यविशेषधर्माणां कारणे वक्तुमशक्यत्वात्। न च कारणधर्मा एव सर्वे कार्यंशे वा प्रतीयन्त इति वाच्यम्।

पूर्वाध्यायद्वयेत्यर्थः। **कार्यविरोध** इति। कार्ये जगति अन्यजन्यत्वकृतो विरोधः परिहरणीय इति ब्रह्मस्वरूपनिर्धारार्थमितिशेषः। **स्यादि**ति। सधर्मकत्वाधर्मकत्वोभयविधवाक्यानां संशयादबोधकता स्यादित्यर्थः। अस्मिन्पादेऽग्रिमपादे च यो विषयस्तं विभजन्ते **तत्रे**ति। तत्र विचारावश्यकत्वे प्रतिपाद्ये इदानीं प्रकृताधिकरणविषयमाहुः **तत्रे**ति। **निषिध्यन्ते** अस्थूलादिवाक्येष्विति शेषः। वाक्यमाहुः **यथे**ति। एतेनेदं जीवलिङ्गं ब्रह्मलिङ्गं वेति संशयो बोधितः।

पूर्वपक्षमाहुः **न चे**ति। हेतुमाहुः **उच्चावचे**ति। **प्रतीते**रिति। प्रत्यक्षादित्यर्थः। ननु प्रत्यक्षस्य भ्रान्तत्वं श्रुतौ इदं वाक्यं ब्रह्मप्रकरणे पठितमिति तस्य प्रबलत्वादित्यत आहुः **नेतरे**ति। **वैलक्षण्यस्य** जीववैलक्षण्यस्य। तथा चास्य ब्रह्मधर्मत्वे जीवसमानधर्मत्वं ब्रह्मणि नास्तीतिसूत्रे प्रतिपादितमिति सूत्रविरोध इति भावः। दूषणान्तरमाहुः **कार्ये**ति। **वक्तुमशक्यत्वा**दिति। कार्यकारणव्यवहारभङ्गापत्तिरूपदोषेण वक्तुमशक्यत्वादित्यर्थः। अत्र शङ्कते **न चे**ति। उत्तरयन्ति **अस्थूले**ति। **उक्तत्वा**दिति। एवं च श्रुतेः

"अस्थूलमनणु" (बृ. ३. ८. ८.) इत्यादिवाक्यैः प्रापञ्चिकसर्वधर्मवैलक्षण्यस्योक्तत्वात्। अत्र केचिदविरोधमेवमाहुः—सर्वत्र कारणत्वाद्भगवानस्ति ततश्चास्थूलेऽस्थूलोऽनणावनणुरुच्चावचकर्तर्युच्चावचकर्तोच्चावचकाम उच्चावचकामः पृथिव्यां सर्वगन्धो जलादावगन्धः, एवं रसादिषु, एवं स्थानतः परस्योभयलिङ्गमुपपद्यते। अथवा कारण एव रूपमरूपञ्चावच्छेदभेदेनाचिन्त्यसामर्थ्याद्वा। अन्यथा असतः सज्जननप्रसङ्ग इति अपिना सङ्गृहीत इति।

न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥ ११ ॥

प्रबलत्वान्नैवमिति। समाधानसूत्रं विवृण्वन्ति **अत्र केचिदिति**। केचित् ऋषयः **अविरोधमुभयलिङ्गाविरोधमेवं** वक्ष्यमाणरीत्या। **सर्वत्रेति**। कार्येत्यर्थः। रीतिमाहुः **ततश्चेति**। **स्थानत** इति। यथा पृथिवीघटपटादिषु तत्तद्रूपतां धत्ते एवं स्थानतः अस्थूले अस्थूल इत्येतवंरीत्या परस्य ब्रह्मणः उभयलिङ्गमुपपद्यत इत्यर्थः। मतान्तरमाहुः **अथवेति**। **अवच्छेदभेदेनेति** वृक्षे मूलावच्छेदेन कपिसंयोगः अग्रावच्छेन तदभावः, एवमत्रापि। ब्रह्मणि प्रदेशानङ्गीकारे तु हेत्वन्तरमाहुः **अचिन्त्येति**। विरुद्धोभयधर्मवत्त्वमचिन्त्य सामर्थ्यादित्यर्थः। पूर्वमत अस्वरसमाहुः **अन्यथेति**। अचिन्त्येतिहेत्वनङ्गीकारे **असत** इति। स्थाने कार्ये तत्तद्धर्मवत्त्वं कुत आगतमिति विचारे क्रियमाणे ब्रह्मणः सकाशादागतमिति वक्तव्यम्। तच्च न संभवति तत्र तु स्थानत एव संभवदिति कार्ये तस्य असत्त्वात् सत्त्वप्रतीतिः स्वीकर्तव्या स्यादितिभावः। **अपिनेति**। **स्थानतोपीति** पदद्वयम्। तत्र पूर्वपदेन पूर्वमतोक्ताविरोधः संगृहीतः, उत्तरपदेनोत्तर इत्यर्थः। **संगृहीत** इति। अविरोध इति शेषः।

एतदुभयमपि न । कुतः । सर्वत्र हि सर्वत्र तादृशं रूपं भगवत उपदिश्यते । हि युक्तोयमर्थः । भगवत्स्वरूपप्रतिपादकानि ह्येतानि वाक्यानि, न त्वनुवादकानि, वैयर्थ्यापत्तेः । अचिन्त्यत्वे ज्ञानानुदयः । "तमेव विदित्वातिमृत्युमेति" (श्वे. ३. ८.) "भक्त्या मामभिजानाति यावान् यश्चास्मि यादृशः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्" ॥ (भ. गी. १८. ५५.) इति ज्ञानानन्तरमेव सायुज्यप्राप्तेः । न च "यस्यामतं तस्य मतं मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातमविजानताम्"॥ (केन.

मतद्वयं निषेधति **नेति** । **सर्वत्रेति** । सर्वोपनिषत्सु । **एतादृश**मस्थूलमनणु एतादृशमित्यर्थः । सौत्रहिपदस्यार्थमाहुः **हि युक्त** इति । **एतानीति** । सर्वकर्मत्वास्थूलत्वबोधकानीत्यर्थः । **न त्वनुवादकानि** । प्रमाणान्तरेणावगतं यद् ब्रह्मस्वरूपं तत्प्रतिपादकानि अनुवादकानि, एतादृशानि न भवन्तीत्यर्थः । ननु प्रत्यक्षादिप्रमाणेनावगतो यः स्थानगतोऽस्थूलत्वादिधर्मस्तस्य ब्रह्मधर्मत्वेन प्रतिपादने को दोष इत्यत आहुः **वैयर्थ्यापत्तेरि**ति । औपाधिकधर्मवत्त्वेन ब्रह्मज्ञाने जाते मुक्तिर्न जायते, किंतु वास्तविकधर्मवत्त्वेन ज्ञाने । एवं च मुक्त्यभावाच्छास्त्रवैयर्थ्यमितिभावः । अस्थूलत्वादिवाक्ये अन्ते ज्यायानाकाशादित्युक्तम् । आकाशाज्ज्यायो लोके नास्त्येव स्थानं तद्गतधर्मो ब्रह्मणि अनूद्येततस्मादिदं वाक्यमनुवादकमेव न भवतीतिहृदयम् । एवं पूर्वमतं दूषयित्वा परमतं दूषयन्ति **अचिन्त्यत्वेति** । सामर्थ्यस्याचिन्त्यत्वे तद्वतो ब्रह्मणोऽप्यचिन्त्यत्वेन ज्ञानाभावात्तमेव विदित्वेतिसाधनोपदेशो व्यर्थः स्यादित्यर्थः । एवमचिन्त्यत्वाद् भक्तेरपि ज्ञानसाधनत्वं नायातीत्याहुः **भक्त्येति** । शङ्कते **न चेति** । तथा चास्मिन्वाक्येऽचिन्त्यत्वेनामतत्वेऽपि मतत्वं श्रूयतेऽतो ज्ञानं भविष्यतीत्यर्थः ।

२.११.) इति वाच्यम् । शास्त्रानारम्भप्रसङ्गात् । अयञ्च विरोधः परिहरणीयः । सर्वे हि विरोधा अत्र चिन्त्यन्ते । नापि तत्तदुपादानभूतप्रदेशविशेषणाविरोधः । अनुवादकत्वेन वैयर्थ्यापत्तेः । न च भगवति भेदोस्ति । प्रत्यारम्भम् " एकमेवाद्वितीयम् " (छा. ६.२१.) इतिवचनात् । अल्पकल्पनायामपि श्रुतिविरोधः सिद्धः । श्रुत्यविरोधार्थमेव हि प्रवृत्तेः । तस्मान्न मतान्तरानुसारेण जडजीवधर्माणां सत्त्वासत्त्वे परिहर्तुं शक्ये ॥ ११ ॥

परिहरन्ति **शास्त्रे**ति । एव सति विचारेऽप्रवृत्तानामपि ज्ञानोदयेन शास्त्रारम्भो व्यर्थ इत्यर्थः । **अय**मिति । यस्यामतं तन्मतं कथमित्ययं विरोधोऽपि परिहरणीयः । नो चेत्तद्वाक्यबोधकता न स्यादित्यर्थः । ननु कुतः परिहरणीय इत्यत आहुः **सर्वे**ति । यथा वृक्षमूलाग्ररूपांशभेदेन संयोगतदभावयोरेकत्र सत्त्वमेवमत्रापीतिशङ्कते **नापी**ति । **तत्त**दिति । स्थूलत्वास्थूलत्वेत्यर्थः । उत्तरयन्ति **अनुवादकत्वेने**ति । प्रदेशस्य पृथिव्यादौ सत्त्वाल्लोकसिद्धानुवादकत्वेनेत्यर्थः । ननु पृथिव्यादावंशाः सन्तीति तत्र तथात्वं ब्रह्मणि तु तदभावात्प्रदेश एव नास्तीति नानुवादकत्वमित्याशङ्क्य निषेधन्ति **न चे**ति । **भेदोऽस्ती**ति । प्रदेशभेदोऽस्तीत्यर्थः । ननु कुतो नास्तीत्यत आहुः **प्रत्यारम्भक**मिति । यत्र यत्र ब्रह्मनिरूपणमारभ्यते तत्र तत्र एकमेवाद्वितीयमिति कथनादेकरूपता सर्वत्र तस्य स्वीकर्तव्येत्यर्थः । अस्थूलादिवाक्यप्रामाण्याद् ब्रह्मणोऽल्पत्वं कल्प्यत इत्यत आहुः **अल्पे**ति । **श्रुतिविरोधः** । ब्रह्मण एकत्वान्महतो महीयानितिश्रुतिविरोधः । ननु श्रुतेरेवायमपराधः विरुद्धार्थकथनं करोतीत्यत आहुः । **श्रुती**ति । **प्रवृत्ते**रिति । व्यासस्येतिशेषः । तथा च बोधाभावात् श्रोतुरेवापराध इतिभावः । सिद्धमाहुः **तस्मा**दिति । देशभेदेनांशभेदेनेति मतान्तरानुसारेणेत्यर्थः ॥ ११ ॥

प्रकारान्तरेण समाधानमाशङ्क्य परिहरति

न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥

न भवदुक्तो विरोधः सम्भवति। भेदात् कारणकार्येषु सर्वत्र भेदाङ्गीकारात्। प्रपञ्चविलक्षणं ब्रह्म भिन्नं, प्रपञ्चधर्मवद्ब्रह्म भिन्नं तथाज्ञातं ज्ञातञ्च। एकस्य भेदस्याङ्गीकारे सर्वमुपपद्यत इति। प्रत्येकमतद्वचनात् अभेदवचनात्। "इयं पृथिवी सर्वेषां भूतानां मधु" (बृ २. ५. १.) इतिब्राह्मणे "अयमेव स योयम्" (बृ. २. ५. १.) इति सर्वत्राभेदवचनात् कार्यकारणरूप-प्रकाराणां भेदनिषेधात्। तस्मान्न भेदाङ्गीकारेण श्रुतयो योजयितुं शक्याः ॥ १२ ॥

भेदाङ्गीकारे बाधकमाह

अपि चैवमेके ॥ १३ ॥

सूत्रमवतारयन्ति **प्रकारान्तरेणेति**। उभयलिङ्गमिति वर्तते, तस्य नेत्यनेनान्वयः। तथा च भवता उक्तो यः उभयलिङ्गपदेन विरोधः स नेत्यर्थः। कुतः। **भेदात्**। एतस्यैव विवरणमाहुः **कारणेति**। सर्वत्र लोके वेदे च तथाऽज्ञातं ब्रह्म भिन्नं ज्ञातं भिन्नम्। सिद्धान्तमाहु **न प्रत्येक-मिति**। **अतदिति**। न तत् भेदवचनं **अतत्**। **अभेदवचनात्**। कुत्र वचन-मित्याकाङ्क्षायां बृहदारण्ये मधुब्राह्मणस्थानि (बृ. २. ५.) वाक्यान्युदाहरन्ति **इयमिति**। इयं पृथिवी सर्वेषां भूतानां मधु अस्यै पृथिव्यै सर्वाणि भूतानि **मधु यश्चायमस्यां तेजोमयोऽमृतमयः पुरुष इत्युपक्रम्य अयमेव** सोऽयमात्मे-दममृतमिदं ब्रह्मेदं सर्वमित्यादीनि चतुर्दशवाक्यानि। तेषु सर्वत्रायमेव स इत्युक्त्याभेदवचनादित्यर्थः। तथा च यत्सिद्धं तदाहुः **कार्येति** ॥ १२ ॥

अपि च एवमेव अभेदमेव भेदनिषेधेन एके शाखिनो वदन्ति। "मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।" (कठ. ४. ११.) इति भेददर्शननिन्दावचनात्। तस्मान्न भेदाङ्गीकारः कर्तुं शक्यः। "इव" शब्दो "बहु स्याम्" (तै. उ. २. ६. १.) इति व्यावृत्त्यर्थः। तस्मादुपनिषत्सु सर्वप्रकारोऽविरोधः सिद्धः॥ १३॥ ४॥

॥ इति तृतीयाध्याये द्वितीयपादे
चतुर्थमुभयलिङ्गमधिकरणम्॥ ४॥

एकदेशिमतेन समाधानमाह

अरूपवदेव हि तत्प्रधानत्वात्॥ १४॥

कथमत्र सन्देहो विरोधो वा। जडजीवधर्माणां विधिनिषेधयोर्जडजीवयोर्हि जडजीवधर्मा भवन्ति। अन्यत्र तूपदिश्यमाना

भेदबोधकवेदस्योच्छिन्नत्वेन नित्यानुमेयवेदमूलत्वं भेदस्य स्वीक्रियत इत्यत आहुः **भेदेति**। बृहदारण्यान्तर्गतशारीरब्राह्मणस्थं वाक्यमाहुः **मनसैवेति**। तथा च निन्दाश्रवणान्न नित्यानुमेयवेदमूलकभेदस्य सिद्धिः। घटपटादिवद्दर्शननिषेधः, न तु वैलक्षण्येनैकस्यैव नानादर्शननिषेध इत्याहुः **इवेति**। **तस्मादिति**। भेदाभावेन यस्मादुभयलिङ्गबोधकश्रुतीनां विरोधादबोधकत्वं प्राप्तं तस्मादित्यर्थः॥ १३॥ इति चतुर्थाधिकरणम्।

एकदेशिमतेनेति। ज्ञानाकारस्य ब्रह्मणः प्रपञ्चे प्रतिबिम्बेन लौकिकधर्मकत्वमेकदेशी स्वीकरोति, तन्मतेनेत्यर्थः। पूर्वाधिकरणसंदेहमाक्षिपति **कथमिति**। उभयलिङ्गवाक्यश्रवणाद्वा उत जडजीवधर्माणां विधिनिषेधयोर्विरोधे वा संदेह इतिकथमित्यर्थः। तत्र **जडजीवयोरिति**। द्वितीयहेतुं निरस्यति

उपासनार्था भवन्ति । ननूक्तो भेदाभावः । सत्यं, तथापि कार्यकारणांशभावकृतस्य भगवद्विहारार्थं जातस्य भेदस्य निषेद्धुमशक्यत्वात् । तस्माद्ब्रह्मणि जडजीवधर्माणां निषेधो युक्तः । उपचारात्तु सर्वकर्मादयः । विपरीतं किं न स्यात् । अत आह **अरूपवदेव** । रूप्यते निरूप्यते व्यवह्रियत इति **रूपं** सर्वव्यवहारविषयत्वं, तद्युक्तं **रूपवद्विश्वम्** । ब्रह्म तु तद्विलक्षणम् । कार्यकारणांशांशिनोर्वैलक्षण्यस्य युक्तत्वात् । नन्ववैलक्षण्यमपि युक्तं कारणत्वादत आह **तत्प्रधानत्वात्** । तस्य ब्रह्मणः **प्रधानत्वात्** मुख्यत्वात् । यत्र हि यत् प्रतिपाद्यते तत्र तस्य मुख्यत्वं, नान्यधर्माणाम् । यथा प्रशासनस्य मुख्यत्वं तथा "सर्वकर्मा" इति लौकिककर्मानुवादेन भगवत्सम्बन्धे स्पष्टमेवामुख्यत्वम् । विशिष्टबोधनेऽपि सर्वशब्दस्य प्रसिद्धा-

---

जडजीवयोरिति । **भवन्ती**ति । तथा च विरोधो नास्तीत्यर्थः । विरोधस्तु भेदनिश्चयात् । स च नास्तीति पूर्वाधिकरणोक्तसिद्धान्तमाक्षिपति **नन्वि**ति । **तथापी**ति । अभेदस्योक्तत्वेऽपीत्यर्थः । **भगवद्विहारार्थमि**ति । स वै नैव रेमे बहु स्यामितिश्रुत्या क्रीडार्थं जातस्येत्यर्थः । एवं च संदेह एव न भविष्यतीति भावः । (अत्र विवरणे पत्रमेकं लुप्तम्, अत उपरितनग्रन्थ आरभ्यते ।)

भगवत्संबन्ध इति । उपासनार्थं भगवत्संबन्ध इत्यर्थः । ननु यत्र वाक्यानां कर्मत्वादिविशिष्टब्रह्मबोधनं तत्र मुख्यत्वमस्तीत्यत आहुः **विशिष्टबोधनेऽपी**ति । सर्वेषामिव कर्माणि यस्येति समासेन विशिष्टबोधनं वक्तव्यं तच्च न संभवतीत्याहुः **सर्वशब्दस्ये**ति । तर्हि कथं विशिष्टबोधनमत आहुः **यथाकथञ्चिदि**ति । उपचारेणेत्यर्थः । **विशिष्टबोधनमि**ति । लक्षणया विशिष्टबोधनमित्यर्थः । नन्वेवं सति सर्वकर्मादिधर्मः भगवति नास्तीति

नुवादकत्वादतिरिक्तकल्पनायां गौरवात् प्रमाणाभावाच्च। यथाकथञ्चिद्धर्मवत्त्वेन ज्ञानस्यैवोपयोगाल्लोकधर्मानेवानूद्य शिष्टबोधनमुचितम्। अरूपमितिवक्तव्ये अरूपवदितिवचनं भिन्नधर्माणामेवैवं निर्णयो न तु प्रशासनवद्भगवद्धर्माणाम्। तस्मात् कार्यवत्तद्धर्माणामपि कार्यत्वाद्भगवत्त्वं न भगवद्धर्मत्वमिति सिद्धम्॥ १४॥

ननु सर्वव्यवहारातीते शास्त्रवैफल्यं, "मनसैवतदाप्तव्यम्" (कठ. ४. ११.) इतिविरोधश्च न परिहृतः। "तं त्वौपनिषदं पुरुषं पृच्छामि" (बृ. ३. ९. २६) "यतो वाचो निवर्तन्ते" (तै. उ. २. ९. १.) इति चेत्यत आह

प्रकाशवच्चावैयर्थ्यात्॥ १५॥

प्रकाशवत्। यथा सौरप्रकाशो व्यवहार्योऽव्यवहार्यश्च न हि स्वतः सम्पादयितुं शक्यते स्थापयितुं वा। आगते तु सूर्ये मेघाद्यभावे

तन्मते सिद्धं, एवं च सर्वव्यवहारातीतत्वादरूपमिति सूत्रकृता कुतो नोक्तमत आहुः **अरूपमिति**। **निर्णय** इति। लाक्षणिकत्वनिर्णय इत्यर्थः। **भगवद्धर्माणामिति निर्णय** इति पूर्वेणान्वयः। उपसंहरति **तस्मादिति**। **कार्यवदिति**। प्रपञ्चवदित्यर्थः। **भगवत्त्वं** भगवद्रूपत्वं **न भगवद्धर्मत्वमिति**। नित्यभगवद्धर्मत्वं नेत्यर्थः॥ १४॥

सूत्रावतरणमाहुः **नन्विति**। ननु सर्वव्यवहारातीते ब्रह्मणि स्वीकृते सति को दोष इत्यत आहुः **शास्त्रेति**। शास्त्रजन्यज्ञानविषयत्वाभावादिति भावः। शास्त्रविरोधमप्याहुः **मनसेति**। सर्वान्तःपातिमानसिकव्यवहारस्योक्तत्वादिति भावः। वाक्यविरोधमप्याहुः **तं त्विति**। **च**कारेणासीनो दूरं व्रजतीत्यादिवाक्यानां संग्रहः। सूत्रार्थमाहुः **प्रकाशवदिति**। अत्र न मतुप् किंतु

च सान्निध्यमात्रेण व्यवहारः कर्तुं शक्यते, तथा लौकिकवाङ्मनोभिर्न शक्यते व्यवहर्तुं, ईश्वरसन्निधाने तु शक्यत इति द्वयमाह श्रुतिः। कुत एतदवगम्यते। तत्राह अवैयर्थ्यात्। अन्यथा शास्त्रं व्यर्थं स्यात्। चकाराद्धर्माणां तथात्वविरोधः परिहृतः। "आसीनो दूरं व्रजति" (कठ. २. २०.), "अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः (श्वे. ३. १९.)" इत्यादावलौकिका भगवद्धर्मा उच्यन्ते। अकारणककार्यवचनाद्धर्माणाञ्चाकार्यत्वं बोधयति। तस्मादव्यवहार्येऽपि न शास्त्रवैफल्यम् ॥ १५ ॥

किञ्चिदाशङ्क्य परिहरति। नन्वलौकिकानीन्द्रियाणि विरोधाभावाय कथं न कल्प्यन्ते। अन्यथा अकारणककार्यत्वं तस्य च

तृतीयान्तात् तुल्यार्थे वतिः। पूर्वसूत्रात् तत्पदमनुवर्तते। तथा च ब्रह्मप्रकाशेन तुल्यमित्यर्थः। कथं तुल्यमित्यत आहुः **यथेति**। प्रकाशस्याव्यवहार्यत्वमुक्त्वा व्यवहार्यत्वमाहुः **आगते त्विति**। दार्ष्टान्तिके घटयन्ति **तथेति**। चार्थमाहुः **चकारादिति**। **तथात्वविरोधः** लौकिकत्वविरोधः। परिहारं व्याकुर्वन्ति **आसीन इति**। अलौकिकत्वं व्युत्पादयन्ति **अकारणकेति** तथा च कारणं विनापि दूरव्रजनमुच्यते, चक्षुर्विनापि दर्शनकर्तृत्वमुच्यते। तेन च धर्माणामलौकिकत्वं सूचितम्। अतो लौकिकत्वविरोधो नास्ति। कारणं विनापि कार्यत्वबोधनेनाकार्यत्वं नित्यत्वरूपमुक्तमित्यर्थः ॥ १५ ॥

आशङ्कामाहुः **नन्विति**। लौकिकेन्द्रियकल्पनायां लाघवमाहुः **अन्यथेति**। तथा चेन्द्रियकल्पनापेक्षया पूर्वकल्पनायां लाघवमिति भावः। पूर्वकल्पना-

नित्यत्वमलौकिकत्वं, ततश्च " पश्यत्यचक्षुः " (श्वे. ३. १९.) इति विरोध इत्याशङ्क्य परिहरति

आह च तन्मात्रम् ॥ १६ ॥

आह च श्रुतिः स्वयमेव तन्मात्रं प्रज्ञानघनमात्रं " स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वा अरे अयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव " (बृ. ४. ५. १३.) इति स्वरूपातिरिक्तानामिन्द्रियाणामभावात्। न च क्रियाभावोऽपि। वेदविरोधेन तथा कल्पयितुमशक्यत्वात्, वेदनिःश्वासायनभूतसमुत्थानादेरुक्तत्वाच्च। अतो नेन्द्रियाणां परिकल्पना, किन्तु सर्वाकारस्वरूपं तादृशमिति मन्तव्यं, "कृत्स्न" वचनात्। चकारात् " सर्वेन्द्रियविवर्जितं " (भ. गी. १३. १४.) इतिस्मृतिरपि। तस्मान्नेन्द्रियकल्पनया विरोधः ॥ १६ ॥

स्वीकारे दोषमाहुः **ततश्चेति**। सूत्रार्थमाहुः **आह चेति**। श्रुतिः कथमाहेत्यत आहुः **स यथेति**। दार्ष्टान्तिके श्रुतिमाहुः **एवमिति**। तथा च ब्रह्मणो ज्ञानस्वरूपत्वेन परिहरन्ति **स्वरूपेति**। अत्र शङ्कते **न चेति**। **अपिना** यथेन्द्रियाभावस्तथायमपीति सूचितम्। परिहरन्ति **वेदेति**। दूरं व्रजतीति क्रियाबोधकवेदविरोधेनेत्यर्थः। नन्वियं श्रुतिः शरीरविशिष्टबोधेनपरेत्यतः परिहारान्तरमाहुः **वेदेति**। वेद(निः)श्वासः श्वासोच्छ्वासः। **अयनं** जगत्स्थापनं **भूतसमुत्थानं** भूतानां पञ्चमहाभूतानां समुत्थानमुत्पादनम्। **आदि**शब्देन तेषां विनाशनम्। एतेषां क्रियारूपाणामुक्तत्वादित्यर्थः। श्रुतौ कृत्स्नपदस्य सूत्रे चकारस्य च स्वारस्यमाहुः **कृत्स्नेति** ॥ १६ ॥

पुनः प्रकारान्तरेण विरोधमाशङ्क्य परिहरति। ननु ब्रह्म जगत्कारणमिति सिद्धं तच्च समवायि निमित्तञ्चेति च। कारणधर्मा एव हि कार्ये भवन्ति। असम्भावनायान्त्वन्यथाकल्पनम्। कामादयो धर्माश्च श्रुतौ विहिताः। ते ब्रह्मण एव भवितुं युक्ताः। निषेधिकापि श्रुतिः। न हि वेदवादिनामणुमात्रमप्यन्यथाकल्पनमुचितमित्याशङ्क्य परिहरति

दर्शयति चाथोऽपि स्मर्यते ॥ १७ ॥

दर्शयति श्रुतिरेव जडजीवधर्माणां भगवत्यभाव इति। "द्वे वाव ब्रह्मणो रूपे" (बृ. २. ३. १.) इत्युपक्रम्य द्वेधा पञ्चभूतान्युक्त्वा "अथात आदेशो नेति नेति" (बृ. २. ३. ६.) इत्याह। इतिशब्दः प्रकारवाची। ब्रह्म पञ्चमहाभूतानि भवति, नत्वेवम्प्रकारकं, तत् साधयति, "न" भवत्येव ब्रह्म

आशङ्कामाहुः **नन्विति**। **चेति चेति सिद्धमिति**पूर्वेणान्वयः। **असंभावनायामिति**। कारणधर्माणां कार्ये संभवो न स्वीक्रियते चेदित्यर्थः। **अन्यथाकल्पनमिति**। असतः पदार्थस्य सत्यकल्पनं स्यादित्यर्थः। तदेवाहुः **कामादय इति**। जीवनिष्ठा इति शेषः। **निषेधिकेति**। अकाम इत्यनेनेति-शेषः। सूत्रार्थमुपन्यस्य परिहारं व्याकुर्वन्ति **दर्शयतीति**। अत्र बृहदारण्यकीय-मूर्तामूर्तब्राह्मणस्थं विषयवाक्यमुदाहरन्ति **द्वे वावेति**। **द्वेधा** आधिदैवि-काध्यात्मभेदेनेत्यर्थः। **इत्याहेति**। श्रुतिरिति शेषः। **नेति नेती**त्यस्य व्याख्यानमाहुः **इतिशब्द इति**। अत्र नञ्द्वयार्थं विवृण्वन्ति **ब्रह्मेति**। प्रथमनञर्थमाहुः **नत्वेवं प्रकारमिति**। द्वितीयनञर्थमवतारयन्ति

तादृशम् । हि युक्तोऽयमर्थः । एतस्माज्जातमिति । न हि कार्यकारणयोरेकः प्रकारो भवति । अतो "नेति" (बृ. २. ३. ६.) इति प्रकारनिषेधोपसंहारः । न तु समवायित्वमात्रं किन्त्वन्यत् परमस्तीति रूपं निरूप्य नाम निरूपयति "सत्यस्य सत्यम्" (बृ. २. ३. ६.) इति । तेन प्रपञ्चातिरिक्तब्रह्मणो विद्यमानत्वात् प्रपञ्चधर्मवचनं तस्मिन्नौपचारिकमेव युक्तं, श्रुत्यैव तथाप्रतिपादनात् । चकारः पूर्वयुक्त्यनुसन्धानार्थः । अथो इति प्रक्रमभेदोऽपि, "अथात आदेशः" (बृ. २. ३. ६.) इति भिन्नप्रक्रमेणाह । श्रुतेरन्यार्थतानिराकारणायाह अपि स्मर्यते, "अनादिमत्परम्ब्रह्म न सत्तन्नासदुच्यते" (भ. गी. १३. १२) इति । सदसतोः क्षेत्रत्वात् । ज्ञेयत्वेन निरूपणे निषेधः । प्रपञ्चधर्मा

तत्साधयति नेति । द्वितीयनञर्थमाहुः **न भवत्येवेति** । **तादृशमिति** । तादृशप्रकारकमित्यर्थः । एतेन पूर्वोक्तार्थसाधनं नञा बोध्यत इति सूचितम् । तथा च द्वौ नञौ प्रकृतार्थं गमयत इति द्वयोः प्रकारयोः स्थापनं बोध्यत इत्ययमर्थो न भवतीति भावः । इदानीमथात आदेश इत्यत्र **अथ** अनन्तरं, **अतः** ताभ्यां रूपाभ्यां कृत्वा शाप्यस्य ब्रह्मण **आदेशः** उपदेशः **नेतिनेतीति** । एवं चान्यत् परमस्तीति बोध्यते । निषेधस्तु प्रकारैतावत्त्वयोरेव, सर्वनिषेधे प्रतिपादनवैयर्थ्यं स्यादित्यमुमर्थं विशदयन्ति **हि युक्तोऽयमर्थ** इति । **जातमिति** । जगत् **एतस्माज्जातमित्येव** श्रुत्योच्यत इत्यर्थः । ननु कारणगुणाः कार्यगुणानारभन्त इति न्यायावसर इत्यत आहुः **नहीति** । श्रुत्या तथा नोक्तमितिकृत्वा । एकं प्रकारकत्वं न हीत्यर्थः । **उपसंहार** इति । न तु द्वयमेव नास्तीत्यर्थः । सत्यस्येति श्रुतिमवतारयन्ति **न त्विति** । प्रपञ्चधर्मेत्यर्थः । **चकारः** सौत्रश्चकारः । **अथो** इति । सूत्रोक्तमथो इति ।

भगवत्युच्यन्ते वेदादौ, न तु तद्धर्मा भवन्तीति ज्ञापयति । तस्माच्छ्रुतिस्मृतिभ्यामेव तथानिर्णयः ॥ १७ ॥

प्रपञ्चधर्मा भगवत्युपचारादुच्यन्त इत्यत्र निदर्शनान्तरमाह

अत एव चोपमा सूर्यकादिवत् ॥ १८ ॥

अत एव इममेव निर्णयमाश्रित्य "समः प्लुषिणा समो नागेन समो मशकेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण" (बृ. १. ३. २२.) इत्यस्य भगवतो यदुपमानं तत् तद्धर्मसम्बन्धात् । न चात्र स्वतन्त्रतादृशधर्मवत्त्वं ब्रह्मणो वक्तुं युक्तम् । नन्विदमपि विरुद्धमित्याशङ्क्य दृष्टान्तमाह सूर्यकादिवत् । सूर्येण सहितं जलं सूर्यकम् । "यथा ह्ययं ज्योतिरात्मा विवस्वान् अपो भिन्ना बहुधैकोऽनुगच्छन्", "एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" (ब्र. बि. १२) इति यथेतरसंश्लिष्टस्योपमानत्वमेवं "समः प्लुषिणा"

ननु कथमिदं ज्ञायत इत्यत आहुः **अथात** इति । **आहे**ति । श्रुतिरितिशेषः । नन्वयमेव श्रुतेरर्थ इति कथं ज्ञायत इत्यत आहुः **श्रुते**रिति ॥ १७ ॥

सूत्रप्रयोजनमाहुः **प्रपञ्चे**ति । **तत तद्धर्मसंबन्धा**दिति । औपचारिकप्रपञ्चधर्मसंबन्धात् । दृष्टान्तप्रयोजनमाहुः **नन्वि**ति । **विरुद्ध**मिति । श्रुत्या समो मशकेनेति, न तत्सम इति च प्रतिपाद्यते इति विरुद्धमित्यर्थः । श्रुत्यर्थमाहुः **यथेतरे**ति । यथा ह्ययं ज्योतिरितिवाक्ये किरणद्वारा जलादिसंश्लिष्टस्य सूर्यादेर्ब्रह्मोपमानत्वमेवं समः प्लुषिणेति वाक्येऽपि प्लुष्यादिसंश्लिष्टस्य तदुपमेयत्वमुच्यत इति न विरोध इत्यर्थः । तथा चोपमारूपं निदर्शनं निश्चायकमितिभावः ।

(बृ. १. ३. २२.) इत्यपि। चकारस्तु विरोधाभावो वक्तव्योऽधिकरणञ्च सम्पूर्णमेकदेशिन इति सूचयति। तस्माज्जडजीवधर्माणां भगवत्युपचारः, निषेधस्तु मुख्य इति ॥ १८ ॥ ५ ॥

॥ इति तृतीयाध्याये द्वितीयपादे पञ्चममरूपवदेव हीत्यधिकरणम् ॥ ५ ॥

मुख्यसिद्धान्तं वक्तुमेकदेशिनं दूषयति

अम्बुवदग्रहणात्तु न तथात्वम् ॥ १९ ॥

तुशब्दः तथासिद्धान्तं व्यावर्तयति। **तथात्वं समवायातिरिक्तस्य तद्धर्मयोगाज्जडजीवधर्मयोगात्** सर्वकामत्वादयो **न** भवन्ति। कुतः। **अम्बुवदग्रहणात्**। सर्वपरस्य हि प्रतिबिम्बेऽधिकरणधर्मवत्त्वं, तत्र

एवस्मिन्नधिकरण एकदेशिमते स्थानतो जडजीवधर्मवत्त्वं ब्रह्मणः सिद्धम्। वस्तुतस्तद्रहितमिति **चकारेण** सूचितम् ॥ १८ ॥ ५ ॥

॥ इति पञ्चमाधिकरणम् ॥

एकदेशिमतं दूषयितुमम्बुवदधिकरणं व्याकुर्वन्ति **मुख्येति**। **कथं तु**-शब्दो व्यावर्तयतीत्यत आहुः **तथात्वमिति**। **समवायातिरिक्तस्य** तेजोबन्नानामिति त्रिवृत्कृतजलसमवायिव्यतिरिक्तस्य तेजोरूपस्य सूर्यादेः **तद्धर्मयोगात्** जलधर्मकम्पादियोगात् तथात्वं कम्पनादिमत्त्वमिति पूर्वेणान्वयः। तथा च यथा वास्तविकं कम्पादिमत्त्वं सूर्ये नास्ति, एवं सर्वकामत्वादिकं ब्रह्मणि नास्तीत्येकदेशिमतं **तु**शब्दो व्यावर्तयतीत्याहुः **जडजीवेति**। तथा च सर्वकामत्वादयो जडजीवधर्मयोगाद् ब्रह्मणि न भवन्ति किन्तु वास्तविका एवेति भावः। ब्रह्मणि कुतो न भवन्तीत्यत्र **अम्बुवदिति**। हेतुं व्याकुर्वन्ति **सर्वेति**। **अधिकरणधर्मवत्त्वमिति**। एकदेशिना सिद्धान्तितमितिशेषः।

रूपरहितं तत्र विद्यमानञ्च न प्रतिबिम्बत इति वक्तव्यम् । तथापि स्वमतविरोधादम्बुवद्ग्रहणमिति । स्वच्छमम्बु प्रतिबिम्बं गृह्णाति । न हि तथा धर्मा ग्रहीतुं शक्नुवन्ति । धर्मत्वाच्च । सर्वाधारत्वेन तथोच्यमाने वैयर्थ्यमिति पूर्वमवोचाम । न च भ्रमात्कल्पनं वेदेनोच्यते ।

तत्र तन्मतनिराकर्तव्ये सतीत्यर्थः । निराकरणप्रकारो द्विविधः स्वासंमतः स्वसंमतश्च । तत्र प्रथममाहुः **रूपेति** । **तत्रेति** । यत्र **प्रति** इति । **वक्तव्यमिति** । उभयमपि न प्रतिबिम्बत इति लोकप्रसिद्ध्या वक्तव्यमित्यर्थः । प्रथमे स्वासंमति दर्शयन्ति **स्वमतेति** । स्वमते विरुद्धधर्माश्रयत्वस्वीकारात् । अरूपं **तत्र विद्यमानमपि प्रतिबिम्बत** इति । **स्वमतविरोधा**दित्यर्थः । सूत्रकाराः स्वमतदूषणमाहुः **अम्बुवद्ग्रहणमिति** । प्रतिबिम्बाधिकरणस्वभावमादाय दूषणं व्युत्पादयन्ति **स्वच्छमिति** । अधिकरणस्वरूपमुक्तम् । दूषणमाहुः **न हीति** । **तथा धर्मा** इति । यथा कपाले समवेतो धर्मो घटादिकार्यं, तथात्रापि धर्मपदेन कार्याणि । तथा च मनोमयः प्राणशरीरनेतेति श्रुतिप्रतिपाद्यमनःप्रभृतीनि कार्याणि प्रतिबिम्बं ग्रहीतुं न शक्नुवन्तीत्यर्थः । तथा च धर्मे कार्येण धर्मिणः प्रतिबिम्बो लोकविरुद्ध इति भावः ।

ननु प्रथमाध्याये तृतीयपादारम्भे द्युभ्वाद्यधिकरणे सर्वाधारत्वं ब्रह्मणः प्रतिपादितम् । तथा च मनःप्रभृतीनां सर्वकामत्वादिधर्माणां च तत्रव प्रतिबिम्बे औपचारिकत्वमस्तीत्यत आहुः **सर्वेति** । **तथोच्यमान** इति । धर्माणां प्रतिबिम्बत्वेनौपचारिकत्व उच्यमान इत्यर्थः । **वैयर्थ्यमिति** । ब्रह्मणोऽन्यधर्मत्वेन उपासनया कार्यसिद्ध्यभावाद्वैयर्थ्यमित्यर्थः । **पूर्वम्** – अरूपवत्सूत्रभाष्ये । ननु सर्वथा ब्रह्मणो बिम्बप्रतिबिम्बभावो नास्तीति चेत् कथं जलचन्द्रदृष्टान्तः श्रुतावुक्त इति चेन्न । एकस्यैव ब्रह्मण उपाधिभेदेन नानात्वभानादयं दृष्टान्त इति हृदयम् । ननु सर्वकामत्वादिधर्माणां कल्पितत्वेनौपचारिकत्वं स्वीक्रियत इत्यत आहुः **न चेति** । तदभाववति तत्कल्पनं भ्रमः । कुत इत्यत

अप्रतारकत्वात्सर्वज्ञत्वाच्च । विप्लववादिन एवैवं वचनं न वैदिकस्य । "पृथिव्यां तिष्ठन्" (बृ. ३. ७. ३.) इत्यादिविरोधश्च । तस्माद्ब्रह्मधर्मा एव सर्वकामादयो न तूपाधिसम्बन्धादौपचारिका इति ॥ १९ ॥

सिद्धान्तेन विरोधपरिहारमाह

वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॥२०॥

विरोधो हि परिहरणीयो लोकवेदाभ्यां तदनुसारेण । महानवकाशोऽल्पोऽवकाशो "यथावकाशं दश चमसान्" (आप. श्रौत. १२. २. १०) इति लौकिकवैदिकव्यवहारो वस्तुधर्म-

---

आहुः **अप्रतारकत्वादिति** । स्वयं सम्यग् ज्ञात्वा अन्यं प्रति आरोप्य ब्रूयात् स एव प्रतारकः । वेदस्तु तथा नास्तीति **भ्रमात्कल्पन**मित्येवं वचनं युक्तमित्यर्थः । ननु ब्रह्मणः ग्रहिलत्वेन भ्रमात्कल्पनं स्वीक्रियत इत्यत आहुः **पृथिव्यामिति** । पृथिव्यां तिष्ठन्पृथिवीमन्तरो यमयति यं पृथिवी न वेदेति । इदं च बृहदारण्ये अन्तर्यामिब्राह्मणस्थं वाक्यम् । पृथिव्यादिसर्वप्रपञ्चस्याविद्याकल्पितत्वे स्वीक्रियमाणे शुक्तिरजततुल्ये प्रपञ्चे निरवद्यस्येश्वरस्य स्थित्ययोगाच्छ्रुतिविरोध इत्यर्थः । उपसंहरन्ति **तस्मादिति** ॥ १९ ॥

एकदेशिमते विरोधपरिहारस्याभावादशक्यत्वं परिहारस्य स्यादित्यत आहुः **सिद्धान्तेनेति** । **तदनुसारेणेति** । लोकवेदयोर्व्यवहारानुसारेणेत्यर्थः । तथा च परिहारे साक्षाल्लोकवेदयोर्वचनं तयोर्व्यवहारो वेत्युपायत्रयमित्यर्थः । तदनुसारेण परिहारमाहुः **महानित्यादिना** **ब्रह्माप्येवमित्यन्तेन** । **महानवकाश** इति लोकव्यवहारस्य, **यथावकाशमिति** वैदिकव्यवहारस्योदाहरणम् । **वस्तुधर्म** इति । आकाशस्य यो **वस्तुधर्मः** स्वाभाविको धर्मो विभुत्वं,

विरुद्धो दृश्यते । व्यापकत्वं वृद्धिह्रासौ चाकाशस्यैव । तत्र यथा करके प्रविष्ट आकाशस्तथा व्यपदिश्यते । तथा सत्युभयसामञ्जस्यं भवति अन्यथान्यतरबाधो भवति । एवं तत्तदनुप्रवेशाद्ब्रह्माप्येवम् । न त्वौपाधिकत्वं जपाकुसुमलौहित्यवदन्यधर्मत्वाभावात् । अन्यानुविधायित्वेऽपि स्वधर्मा एव ते कारणत्वादिवत् । न त्वागन्तुकत्वात्तद्धर्मा एव न भवन्तीति वाच्यम् । अन्यधर्मत्वे प्रमाणाभावात् । तद्गतत्वप्रतीतेश्च दृष्टत्वाच्चाविरोधः । अविरोधप्रकारोऽयम् । यथोभयसामञ्जस्यं भवति प्रकारोपि तस्यैव तथा वक्तव्यः । तस्माद्यथाकाशस्य वृद्धिह्रासभाक्त्वं करकादिष्वन्तर्भावात् तथैवोभयसामञ्जस्यादेवं

तद्विरुद्धो धर्मोऽल्पत्वं, तद् **दृश्यते** इत्यर्थः । तदेवाहुः **व्यापकत्वमिति** । सर्वत्र विद्यमानत्वमित्यर्थः । **वृद्धीति** । वृद्धिः मठाकाशे, ह्रासः करके इति बोध्यम् । दृष्टान्ते योजयन्ति **तत्रेति** । **तथेति** अल्प इत्यर्थः । एवं वेदे **यथाऽऽकाश** मित्यत्राकाशस्याल्पत्वं च समपरिमाणत्वं व्यपदिश्यते । ननु ब्रह्मण्यस्तु नाम विरुद्धधर्माश्रयत्वं, आकाशस्य पुनः किमर्थमिदमित्यत आहुः **तथा सतीति** । एवं स्वीकृते सतीत्यर्थः । उभयसामञ्जस्यं विभुत्वाल्पत्वयोरेकत्र वृत्तित्वरूप सामञ्जस्यमित्यर्थः । ननूभयसामञ्जस्याभावे को दोष इत्यत आहुः **अन्यथेति** । दार्ष्टान्तिके योजयन्ति **एवमिति** । **तत्तदिति** । नागमशकादिशरीररूपतत्तदुपाध्य**नुप्रवेशा दि**त्यर्थः । **एवमिति** । सर्वकामादिधर्मवद्वक्तव्यमित्यर्थः । ननु सर्वकामादीनामौपाधिकत्वं, तथा चौपचारिकत्वे मन्मतप्रवेश इत्यत आहुः **न त्विति** । **जपेति** । अल्पधर्मस्यान्यस्मिन्नारोपे औपचारिकत्वं, तथा प्रकृते नास्तीत्यर्थः । तदेवाहुः **अन्येति** । यत्रापाततो विरोधो दृश्यते तत्र । सामान्यतोऽविरोधप्रकारं दर्शयन्ति **अविरोधप्रकारेति** । सूत्रार्थं सूचयन्तः सिद्धमाहुः **तस्मादिति** । **वृद्धिह्रासभाक्त्वमिति** ।

ब्रह्मापि । वृद्धिह्रासपदेन शरीर आकाशजीवयोरेकमुदाहरणं बोधयति ॥ २० ॥

हेत्वन्तरमाह

दर्शनाच्च ॥ २१ ॥

भगवति सर्वे विरुद्धधर्मा दृश्यन्ते । न हि दृष्टेऽनुपपन्नं नाम । व्याघातात् । तादृशमेव तद्वस्त्विति त्वध्यवसायः प्रामाणिकः । चकारादुलूखलबन्धनादिषु प्रत्यक्षमेवोभयसाधकं दृष्टमिति "अथोमुष्यैव ममार्भकस्य (भाग. १०. ८. ४०) इति च । तस्माच्छ्रुतिस्मृतिप्रत्यक्षैः सर्वविरुद्धधर्माश्रयत्वेन ब्रह्मप्रतीतेर्न विरोधः ॥ २१ ॥

विभुत्वाल्पत्वधर्माश्रयत्वमित्यर्थः । अनेन प्रसंगेन जीवन्मुक्तजीवस्य धर्मविचारमाहुः **वृद्धिह्रासपदेनेति** । **शरीरे** जीवन्मुक्तशरीरे । **एकमुदाहरणमिति** । तच्छरीरप्रविष्ट आकाशेऽल्पत्वं वास्तविकं विभुत्वं, एवं जीवन्मुक्तदशायामानन्दाविर्भावेन व्यापकत्वं, क्षुद्राः विस्फुलिङ्गा इति श्रुतिप्रामाण्याद् वास्तविकमणुत्वमित्येकमुदाहरणमित्यर्थः ॥ २० ॥

दृश्यन्ते इति । गोवर्धनोद्धारणादीनि कर्माणि दृश्यन्ते । एवं च सप्तहायनबालकार्यं न भवतीति विरुद्धम् । **न हीति** । दृष्टे पदार्थेऽनुपपन्नं न किंचिद्वक्तव्यं, तथा सति **नामव्याघातः** गोवर्धनोद्धारक इति नामव्याघातः स्यादित्यर्थः । **तादृशमिति** । अतो हेतोः तादृशमेव विरुद्धधर्माश्रयमेवेत्यर्थः । **अध्यवसायः** निश्चयः । **उलूखलेति** । तत्र बहुदामभिः स्वरूपवेष्टनाभावः स्वरूपं चाल्पमिति विरुद्धमिति भावः । मृद्भक्षणलीलायामप्याहुः **अथो** इति । **तस्मादिति** । आसीनो दूरं व्रजतीत्यादयः श्रुतयः । श्रुतदेवजनकयोर्गृहे एककालावच्छेदेन गमनं स्मृत्या बोध्यते, उलूखलबंधनादिलीलाया प्रत्यक्षमित्येतैः प्रमाणैस्तादृशमेव ब्रह्मेति न विरोध इत्यर्थः ॥ २१ ॥

परमार्थतो विरोधं परिहृत्य युक्त्यापि प्रतिषेधति ।

ननु सर्वविशेषधर्माणामस्थूलादिवाक्यैर्निषेधात्कथमविरोधः प्रत्येतव्य इति चेत्तत्राह

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २२ ॥

प्रकृतैतावत्त्वं हि प्रतिषेधति । **प्रकृते** यदेतावत्परिदृश्यमाना यावन्तः पदार्था लौकिकास्तेषामेव धर्मान्निषेधति । प्रतीतस्यैव हि निषेधात् । अतो जगद्वैलक्षण्यमेवास्थूलादिवाक्यैः प्रतिपाद्यते । न तु वेदोक्ता धर्मा निषेद्धुं शक्यन्ते । कुत एतदवगम्यते । तत्राह **ततो ब्रवीति च भूयः ।** यत्रैव वाक्ये पूर्वं निषेधति तस्मिन्नेव वाक्ये पुनस्तमेव विधत्ते “ यतो वाचो निवर्तन्ते अप्राप्य मनसा सह आनन्दं ब्रह्मणो विद्वान् ” (तै. उ. २. ९.) इति । तथास्थूलवा-

सूत्रप्रयोजनमाहुः **परमार्थतः** इति । वस्तुविचारादित्यर्थः । कदाचिदद्भुतप्रदर्शकत्वाल्लीलाया न तु वस्तुस्वभाव इति मन्यमानं प्रति युक्तिं बोधयितुं सूत्रांशमवतारयन्ति **नन्विति** । तथा च धर्मे सति विरोधः, स एव नास्तीति भावः । **प्रकृते** इति । गार्गीप्रश्ने बृहदारण्ये विधिनिषेधयोरेकाधिकरणीभूतवाक्यान्युदाहरन्ति **यतो वाचः** इति । **यत** इतिवाक्ये वागगोचरत्वेन कारणाभावाद् ज्ञानं निषिध्यते । **आनन्दमि**ति वाक्ये ज्ञानं विधीयते, **अस्थूलवाक्येऽपी**ति, **एतस्यैवे**ति विधानत्रयं बोध्यम् । **अस्थूल**वाक्ये (बृ. ३. ८.८) **अवाक् अमनः अमुख**मित्यनेन प्रशासनकारणाभावात् तन्निषिध्यते । पुनः तस्मिन्नेव वाक्ये एतस्यैव प्रशासने द्यावापृथिव्यौ तिष्ठतः इत्यनेन प्रशासनं विधत्ते । एवमस्थूलवाक्ये सर्वे धर्मा निषिध्यन्ते । पुनः **एतद्वि**दित्वेत्यादिना वेद्यत्वं विधत्ते । एवमस्थूलवाक्ये न तदश्नोति कंचनेत्यादिना व्याप्तिं

क्येऽपि " एतस्यैव प्रशासने " (बृ. ३. ८. ९.) " एतस्यैव विदित्वा " (बृ. ३. ८. १०.) " आकाश ओतश्च प्रोतश्च " (बृ. ३. ८. ११.) इति । चकारादेकवाक्योपाख्यानभेदौ सङ्गृहीतौ । सर्वत्र लौकिकं प्रतिषेधत्यलौकिकं विधत्त इति युक्त्या निर्णयः । तस्माद्युक्त्याप्यविरोधः ॥ २२ ॥ ६ ॥

॥ इति तृतीयाध्याये द्वितीयपादे षष्ठमम्बुवद्ग्रहणादित्यधिकरणम् ॥ ६ ॥

शब्दबलविचारेण विरोधं परिहृत्य अर्थबलविचारेणाविरोधप्रतिपादनायाधिकरणमारभते । सर्वाणि विरुद्धवाक्यान्युदाहृत्य

निषिध्य पुनः आकाश ओतश्चेत्यादिना व्याप्तिं विधत्ते इत्यखण्डार्थः । चार्थमाहुः **चकारादि**ति, एतस्मिन्वाक्ये न तदश्नाति, द्वयोरप्युपाख्यानयोर्विरोधो नास्तीत्यर्थः । **सर्वत्रे**ति । ये वस्तुस्वभावेन विरुद्धधर्माश्रयत्वं स्वीकुर्वन्ति तान्प्रति सर्वत्र लौकिकस्य प्रतिषेधः, अलौकिकविधान**युक्त्या निर्णय** इत्यर्थः । **युक्त्यापी**ति । **अपि**ना वस्तुस्वभावसंग्रहः । एवं च ब्रह्मणि सर्वकामत्वादयोऽलौकिका एव सन्ति न त्वन्यधर्मत्वेनौपचारिका इति हृदयम् । एतेन निर्धर्मकत्वं ब्रह्मण इति मन्यमानाः परास्ताः ॥ २२ ॥ ६ ॥

इति षष्ठाधिकरणम् ॥

अधिकरणप्रयोजनं दर्शयन्ति । **शब्दबले**ति । **अर्थबले**ति । अन्यऋषिस्वीकृतार्थबलेत्यर्थः । तथा चार्थबलविचारनिराकरणार्थमयमारम्भ इति भावः । **सर्वाणी**ति । तथा च शब्दबलविचारे उक्तानि यानि विरोधवाक्यानि **तानि** अन्यान्यपि सर्वाणीत्यर्थः । तेषु वाक्येषु मध्ये प्रथमं प्रमाणाग्राह्यत्व-

चिन्त्यते। " न चक्षुषा गृह्यते " (मुण्ड. ३. १. ८.) " कश्चिद्धीरः प्रत्यगात्मानमैक्षत् " (कठ. ४. १.) " नापि वाचा " (मुण्ड. ३. १. ८.) " सर्वे वेदा यत्पदमामनन्ति " (कठ. २. १५.) " अप्राप्य मनसा सह " (तै. उ. २. ९.) " मनसैवैतदाप्तव्यम् " (कठ. ४. ११) " अस्पर्शमगन्धमरसम् (कठ. ३. १५.) " सर्वरूपः सर्वगन्धः सर्वरसः " (छा. ३. १४. २.) " अपाणिपादः " इत्यादि (श्वे. ३. १९.) " विश्वतश्चक्षुः " इत्यादि (तै. सं. ४. ६. २. ४.) "निर्गुणश्च" (श्वे. ६. ११.) " यः सर्वज्ञः सर्वशक्तिः " (छा. ३. १४. २.) इत्यादिविरुद्धवाक्यानि । न हि वस्तु द्विरूपं सम्भवति । वाक्यद्वयमपि प्रमाणम् । तथा सति प्रमाणान्तरानुरोधेनैकस्य स्वार्थे प्रामाण्यमन्यस्योपचरितार्थत्वमिति युक्तम् । तत्र प्रत्यक्षानुरोधेन निर्णयो विचार्यते । तत्र पूर्वपक्षमाह

तदव्यक्तमाह हि ॥ २३ ॥

तद्ग्राह्यत्वयोर्बोधकान्याहुः **न चक्षुषेति** । धर्मराहित्यतद्वत्त्वयोराहुः **अस्पर्शेति** । साकारनिराकारयोर्बोधकमाहुः **अपाणिपादेति** । निर्गुणसगुणबोधकवाक्यद्वयमाहुः **निर्गुणश्चेति** । संशयमाहुः **न हीति** । कदाचित् वस्तु द्विरूपं न हि स्यादित्युत्कटकोटिकोऽयं संशयः । एतादृशसंशये बीजमाहुः **वाक्यद्वयमिति** । शब्दस्यार्थसापेक्षत्वादर्थस्य प्राबल्यमिति तदनुसारेण निर्णयमाहुः **तथा सतीति** । पूर्वपक्षे प्राबल्यं दर्शयति **तत्रेति** । शेषं स्पष्टम् ॥ २३ ॥

तदव्यक्तं तद्ब्रह्म अव्यक्तमेव भवितुमर्हति । कुतः । आह हि । श्रुतिप्रत्यक्षाभ्यां "नेतिनेत्यात्मा अग्राह्यो न हि गृह्यते" (बृ. ३. ९. २६.) इति । "न हि गृह्यते" (बृ. ३. ९. २६.) इत्यनुभवसाक्षिकं प्रमाणं श्रुतिराह । न हि केनचिदपि चक्षुषा मनसा वा ब्रह्म दृष्टमस्ति । सर्वरूपत्वे तु सर्वैरेव द्रष्टुं शक्येत । तस्मात्सर्वधर्मवत्त्वेन प्रतिपादकान्युपचरितार्थान्येव । अनुभवविरोधात् इत्येवं प्राप्तम् ॥ २३ ॥

अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ २४ ॥

अपीति पूर्वपक्षगर्हायाम् । सर्वथा मूर्खः पूर्वपक्षवादी, यतः संर[ाधने] सम्यक्सेवायां भगवत्तोषे जाते दृश्यते । "श्रद्धाभक्तिज्ञानयोगादवेहि" (कैव. २.) "यमेवैष वृणुते तेन लभ्यः" (कठ. २. २३.) "भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुञ्च परन्तप" (भ. गी. ११.

सूत्रार्थमाहुः **अपीति** । भगवतः सर्वरूपत्वे सर्वैरेव द्रष्टुं शक्येतेत्यत्र गर्हा बोध्या । कथं गर्हेत्यत आहुः **यतः** इति । तथा च साधनसिद्धचक्षुरेवैतादृशालौकिकप्रत्यक्षे कारणमिति त्वया न ज्ञायत इति गर्हेति भावः । संराधकप्रत्यक्षानुमानाभ्यां दृश्यत इत्यत्र प्रमाणमाहुः **श्रद्धेति** । इयं कैवल्योपनिषत्स्था श्रुतिः **श्रीपुरुषोत्तमैः प्रकाशे** परमेष्ठिना आश्वलायनं प्रति एतेन साधनेन जानीहि इत्यत्रोपदिष्टं ज्ञानविषयं च ब्रह्म सर्वदेवतामयं शिवाकारं चोपदिष्टमिति व्याख्याता । यमेवैष इति श्रुतिः काठके । तत्र वरणेतरसाधनासाध्यत्वं दर्शितम् । तत्रैवासीनो दूरं व्रजतीत्यनेन साकारमशरीरमित्यनेन निराकारत्वं दर्शितमित्युक्तम् । श्रीगीतावाक्यं स्मृतिरूपं प्रमाणमाहुः

५४.) इति । द्विविधमपि रूपं दृश्यते । " ततस्तु तं पश्यत निष्कलं ध्यायमानः " (मुण्ड. ३. १. ८.) " अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोनन्तरूपम् " (भ. गी. ११. १६.) इति । संराधकस्य स्वानुभवो ध्रुवादीनामनुमापकत्वञ्च । तस्मात् प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्यां च ब्रह्म साकारमनन्तगणपरिपूर्णञ्चेति नाव्यक्तमेवेतिनिश्चयः । अतो लौकिकालौकिकप्रत्यक्षविषयत्वादुभयवाक्यार्थरूपमपि ब्रह्म ॥ २४ ॥ ७ ॥

॥ इति तृतीयाध्याये द्वितीयपादे
सप्तमं तदव्यक्तमाह हीत्यधिकरणम् ॥ ७ ॥

पुनः प्रकारान्तरेण पूर्वोक्तमेव स्थिरीकर्तुमधिकरणान्तरमारभते । तत्र सूत्रद्वयेन पूर्वपक्षद्वयमाह ।

प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥ २५ ॥

ननु प्रत्यक्षानुरोधेनोभयविधवाक्यसमाधानं नोपपद्यते । वस्तुशक्त्यैव निर्णय उचितः, न तु श्रुतिप्रत्यक्षाभ्याम् । यथा प्रकाश-

---

भक्त्येति । **द्विविधमिति** । तथा च संराधकप्रत्यक्षेण स्मृत्या च साकारं सिद्ध्यतीर्थः । सिद्धमाहुः **तस्मादिति** । **अत** इति । शुद्धमनःसंयोगजं **लौकिकं** दिव्यदृष्टिज**मलौकिक**मित्यर्थः । एवं चार्थबलविचारेणापि केवलमव्यक्तत्वं न सिद्ध्यतीतिभावः ॥ २४ ॥ ७ ॥ इति सप्तमाधिकरणम् ।

ननु किमर्थमिदमधिकरणमत आहुः **पुनरिति** । **पूर्वोक्तं** स्वरूपबलेनोभयरूपत्वम् । अत्र ब्रह्मस्वभावः संराधकप्रत्यक्षेणाकलितुं शक्यो वा न वेतिसंशय ऊहनीयः । **नन्विति** । इत आरभ्य **ब्रह्मे**त्येवंप्राप्तमित्यन्तं सूत्रद्वयोक्तः पूर्वपक्षग्रन्थः । **वस्तुशक्त्यैवेति** । स्वरूपशक्त्यैवेत्यर्थः । वस्तु-

जलसुवर्णादीनामनेकविधत्वं नाङ्गीक्रियते । सूर्यचन्द्रमणिप्रकाशादिषूष्णशीतानुभयरूपस्पर्शाः प्रतीयन्ते । न हि तेजसि तावन्तः स्पर्शा अङ्गीक्रियन्ते । जले च हिमतप्तकुण्डादिषु । तथा सुवर्णे वर्णभेदाः । न हि सर्वे स्वाभाविकाः । तेजस्त्वादिस्वभावहानिप्रसङ्गात् । तथा ब्रह्मणोऽपि अवैशेष्यमङ्गीकर्तव्यम् । निर्विशेषं हि ब्रह्मेति सर्वप्रसिद्धिः । चकारादेवंसाधकाः “ अग्राह्यो न हि गृह्यते ” (बृ. ३. ९. २६) इत्येवमादयः । ननूक्तं तस्य तथासाक्षात्काराच्चादृशश्रुतेश्च नैकविधत्वमङ्गीकर्तुं शक्यत इति । नैष दोषः । प्रकाशश्च कर्मणि तपःप्रणिधानादिकर्मणि भगवतः प्रकाशः । तत्र यथा तेषां कामस्तथा प्रकटीभवति । चकारादप्रकाशान्यथाप्रकाशौ । तत्र हेतुरभ्यासादावृत्तेः । यद्येकवारं प्रकटः स्यात् तदा तद्रूपत्वम ी-क्रियेतापि । प्रतिभक्तं प्रतिकर्म चाविर्भावः । अतः प्रकाशोऽपि कृत्रिम एव दीपप्रकाशवत् । अन्यथा सर्वदा स्यात् । तस्मान्न भक्तप्रत्यक्षेण निर्णयः ॥ २५ ॥

शक्त्यैवेत्यत्र सूत्रोक्तं दृष्टान्तं विशदयन्ति **यथेति** । **प्रकाशे**त्यत्र द्वन्द्वः । एतस्यैवार्थमाहुः **सूर्ये**त्यादि । प्रथमो दृष्टान्तः । प्रकाशे दृष्टान्तं घटयन्ति **सूर्यचन्द्रे**ति । सूर्यकान्तमणिश्चन्द्रकान्तमणिः प्रकाशश्च तेषु । **न हि तेजसि** इति । तेषां तेजोरूपत्वादित्यर्थः । जले दृष्टान्तं घटयन्ति **जले चे**ति । **तथे**ति । शीतोष्णस्पर्शौ प्रतीयेते । न हि तौ जले अङ्गीक्रियेते । सुवर्णे घटयन्ति **सुवर्णे** इति । दार्ष्टान्तिकं घटयन्ति **तथे**ति । सौत्रचार्थमाहुः **चकारा**दिति । **एवं साधकाः** इति । निर्विशेषत्वसाधका इत्यर्थः । सूत्रांशमवतारयन्ति **नन्वि**ति । **तादृशश्रुते**रिति । निर्विशेषश्रुतेरित्यर्थः । सूत्रांशं व्याकुर्वन्ति **तपःप्रणिधाने**ति । शेषं स्फुटम् ॥ २५ ॥

फलितमाह

अतोऽनन्तेन तथा हि लिङ्गम् ॥ २६ ॥

अतः अभ्यासादनन्तेन अनन्तरूपेणाविर्भावः। न ह्येकं वस्तु प्रतिक्षणमन्यादृशं भवति निमित्तभेदव्यतिरेकेण। क्वचिद्भक्तकामश्च निमित्तत्वेन प्रतीयते। न हि निमित्तभेदेन जायमानं वस्तु भवति, किन्तु तथा सति लिङ्गं विग्रह एव भवति। युक्तश्चायमर्थः। "यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाय" (भाग. ३. ९. ११) इति। अतः श्रुत्या प्रत्यक्षेण वा तथानिर्णयः कर्तुं शक्यः। तस्मात् सर्वागोचरमेव ब्रह्म। इत्येवं प्राप्तम् ॥ २६ ॥

उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ २७ ॥

तुशब्दः पक्षं व्यावर्तयति। नैवं केवलयुक्त्या लोकदृष्टान्तेन निर्णयः शक्यते कर्तुं, अन्यथेदं शास्त्रं व्यर्थमेव स्यात्। अत्र हि वेदादेव ब्रह्मस्वरूपज्ञानं, तत् कथं स्वरूपशक्त्या निर्णयः। ब्रह्म

प्रत्यक्षेण निर्णयाभावं पूर्वपक्षयित्वा श्रुत्या तदभावं वक्तुं द्वितीयसूत्रमाहुः। सूत्रार्थमाहुः **अतः** इति। सौत्रं **तथाहीति**पदं व्याकुर्वन्ति **क्वचिदिति**। **तथा हीत्यस्य** तथा सतीत्यर्थः। भक्तकामनया शरीरमेव जायते न तु वस्तु तथा भवतीत्यमुमर्थं द्रढयति **युक्तश्चेति**। **तस्मादिति**। निर्विशेषरूपत्वादित्यर्थः ॥ २६ ॥

पक्षं पूर्वपक्षम् तदेवाहुः **नैवमिति**। **वेदादेवेति**। इदं च जन्माद्यधिकरणे निर्णीतम्। **स्वरूपशक्त्येति**। तथा च वेदमन्तरेण भगवत्स्वरूपस्य

तूभयरूपं, उभयव्यपदेशात्, उभयरूपेण निर्गुणत्वेनानन्तगुणत्वेन सर्वविरुद्धधर्मेण रूपेण व्यपदेशात्। तर्हि कथमेकं वस्त्वनेकधा भासते। तत्राह अहिकुण्डलवत्। यथा सर्प ऋजुरनेकाकारः कुण्डलश्च भवति तथा ब्रह्मस्वरूपं सर्वप्रकारं भक्तेच्छया तथा स्फुरति। कल्पनाशास्त्रे हीदं बाधकं, अनेककल्पनागौरवञ्चेति। न तु केवलं श्रुत्येकसमधिगम्ये। न च शास्त्रवैफल्यं, एवं साधनार्थत्वात्। अत्रैव सूरिव्यामोहादन्यशास्त्रोत्पत्तिः। अतः सर्वविरुद्धधर्माणामाश्रयो भगवान्। न हि प्रमाणश्रुतदृष्टेऽनुपपत्तिरस्ति यदर्थं

तच्छक्तेश्च ज्ञानाभावात्कथं निर्णय इत्यर्थः। सूत्रांशं व्याकुर्वन्ति **ब्रह्मेति**। न केवलं स्वरूपशक्त्या निर्णयः किंतु वेदोपष्टब्धयेत्यतो हेतो हेतुं व्याकुर्वन्ति **उभयेति**। **उभयेन** विरुद्धधर्मेणो**पदेशः** तस्मात्। तथा चोभयवाक्ययोः समानत्वादुभयरूपं ब्रह्मेतिभावः। सूत्रोक्तं दृष्टान्तमवतारयन्ति **तर्हीति**। तथा चोभयलिङ्गमेव ब्रह्म चेत्साधनसिद्धानां सर्वेषामेकरूपमेव भासेत इतिशङ्कायां दृष्टान्तेन निराकुर्वन्ति **यथेति**। **भक्तेच्छयेति**। तथा च सर्पः **कालभेदेन तथा भवति, ब्रह्म तु एकस्मिन्नेव काले भक्तेच्छयेति** भावः। **कल्पनेति**। तथा च न्यायशास्त्रे एवं विरुद्धधर्मविचारः बाधक इत्यर्थः। **न चेति**। यथा श्रुत्या उच्यते तथा ज्ञातव्यमित्येवं चेद्विचारशास्त्रवैफल्यमित्याशङ्कितुराशयः। समाधानमाहुः **एवमिति**। **अत्रैवेति**। श्रुतौ विरुद्धधर्मकथनमस्तीति सूरिव्यामोहः इतिभावः। **उत्पत्तिरिति**। विरुद्धश्रुतिनिवारणं शास्त्रस्य प्रयोजनमित्यर्थः। **प्रमाणश्रुतदृष्टेति**। प्रमाणाभ्यां श्रुतिसाधकदृष्टिरूपप्रमाणाभ्यां श्रुते दृष्टे चेत्यर्थः। ऋजुकुण्डलभावः सर्पस्य एककालावच्छेदेन नास्तीत्यतः **प्रभुचरणैः** स्वकीयं लौकिकदृष्टान्तमुच्यते

युक्त्यपेक्षा । लोकेऽपि शरीरान्तःकरणदीनि परस्परविरुद्धदयामारकत्वादीनि विषयभेदेनैकस्मिन्नपि क्षणे प्रतीयन्ते । तस्मात् सकलविरुद्धधर्मा भगवत्येव वर्तन्त इति न कापि श्रुतिरुपचरितार्थेति सिद्धम् ॥ २७ ॥ ८ ॥

॥ इति तृतीयाध्याये द्वितीयपादेऽष्टमं प्रकाशादिवच्चेत्यधिकरणम् ॥ ८ ॥

धर्मस्वरूपविचारेण पूर्वोक्तपक्षद्वयं स्थापयितुमधिकरणारम्भः । ननु धर्मा नाम के । ब्रह्मणो भिन्नास्तत्कार्यरूपा आहोस्विद्ब्रह्मैवेति संशयः । तत्र लोके कार्यस्यैव पटरूपादेस्तद्धर्मत्वात्समवेतत्वात्तन्नित्यतायां प्रमाणाभावात्स्वाभाविकत्वमात्रेण नित्यत्वकल्पनायां

लोकेपीति । तथा च विषयभेदेन शरीरादेर्यथा तथा भक्तभेदेनैककालावच्छेदेन भगवतोपीति भावः । **अस्मिन् सूत्रे** यदुच्यते तदेव श्रुतेस्तु शब्दमूलत्वात् लोकवत्तु लीलाकैवल्यमित्यत्राप्युक्तम् । एवं च तत्तद्वपुः प्रणयसे इत्यत्र चक्षुर्मनोविषये प्रापणं न तु करणमित्यर्थो बोध्यः ॥२७॥८॥ इति अष्टमाधिकरणम् ॥

पूर्वोक्तमिति । कल्पनारहितं ब्रह्म पश्चाद्धर्मयुक्तं भवतीत्येक**:**, विरुद्धधर्माश्रयं ब्रह्म तत्तत्फलदित्सया तं तं प्रति आविर्भवतीत्य**पर:**, एवं पक्षद्वयमित्यर्थः । धर्मस्वरूपं विषयमाहुः **धर्मा नाम के** इति । **संशयः** इति । **कार्यरूपा** वा न वा **ब्रह्मरूपा** वा न वेति चतुष्कोटिकोऽयं संशयः । पूर्वपक्षमाहुः **तत्रेति** । **तन्नित्यतायामिति** । ब्रह्मधर्माणां नित्यत्वे प्रमाणाभावादित्यर्थः । तथा च तद्धर्माणां नित्यत्वे वैदिक**प्रमाणाभावा**त्कार्यत्वलिङ्गकानुमानं वक्तव्यम् । तच्च न सम्भवति कार्यत्वस्य पटरूपादौ सत्त्वात्तत्र नित्यत्वाभावाद् दृष्टान्ताभावादिति भावः । ननु मास्तु कार्यत्वं हेतुः किंतु स्वाभाविकत्वमेव ।

गौरवापत्तेः " एकमेवाद्वितीयम्" (छा. ६. २. १.) इतिश्रुतिविरोधाच्च । धर्माः प्रपञ्चवत्कार्याः । तथा सति ब्रह्म सर्वकल्पनारहितमेव सेत्स्यतीत्येवं प्राप्त इदमुच्यते

प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २८ ॥

प्रकाशाश्रयवद्वा । वाशब्दः पक्षं व्यावर्तयति । यथा प्रकाशाश्रयाः सूर्यादयः प्रकाशेन न भिन्नाः पृथक्स्थित्यभावात्समवेतत्वाच्च मूलाविच्छेदरूपेण तदाधारतया स्थितत्वाच्च । नापि सूर्य एव, भिन्नप्रतीतेर्विद्यमानत्वाच्च । तादृशमेव तद्वस्तूत्पत्तिसिद्धमिति मन्तव्यम् । कल्पनायामपि यथा सूर्यप्रकाशयोः कल्पनैवं ब्रह्मधर्मयोरपि । न ह्यन्यथा वेदप्रवृत्तिर्निषेधशेषता सत्यज्ञानानन्ता-

---

तथा च ब्रह्मधर्मा नित्याः स्वाभाविकत्वात्, आकाशवदिति दृष्टान्तः संभवतीति लौकिकमनुमानमेव प्रमाणमस्त्वित्यत आहुः **तथा सतीति** । एवं सति निर्विशेषमेव ब्रह्मेत्यर्थः । सिद्धान्तमाहुः **इदमिति** । **पक्षं** ब्रह्मधर्माणां कार्यत्वपक्षम् । **तादृशमेवेति** । स्वाश्रयाद्भिन्नमेवेत्यर्थः । **मन्तव्यमिति** । यथा अविद्येत्यत्र न विद्याभावः किंतु विद्याविरुद्धं भावरूपमज्ञानं, तथा सूर्यप्रकाशयोरभेदोऽपि न भेदाभावः किंतु भावरूपत्वे सति सूर्यं विहायावर्तमानत्वम् । एवं रीत्या युक्तिभिरनुचिन्तनीयमित्यर्थः । एवं कल्पना आवश्यकीत्याहुः **कल्पनायामपीति** । ननु सूर्यप्रकाशयोर्दृश्यत्वादन्यथानुपपत्त्या तथा कल्पनीयं ब्रह्मणि त्वन्यथानुपपत्त्यभावात्किमर्थं तथा कल्पते इत्यत आहुः **नहीति** ।

अन्यथानुपपत्तिमेवाहुः **वेदप्रवृत्तिरिति** । अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेद इति श्रुत्या प्रतिपादितायाः चेतनधर्मरूपाया वेद-

नन्दपदानां सामानाधिकरण्यं वा सम्भवति। लक्षणायां तु सुतरामेव धर्मापेक्षा। अतो विशिष्टपदार्थ एव तादृशो वेदसिद्ध इति मन्तव्यम्। तत्र हेतुः तेजस्त्वात् तेजःशब्दवाच्यत्वात्। बहुदूरव्याप्त्यर्थमेव

प्रवृत्तेरभावादनुपपत्तेरित्यर्थः। **निषेधेति**। नेति नेति श्रुतिप्रतिपाद्यं निषेधशेषत्वं धर्म एवेत्यनुपपत्तिरित्यर्थः। तृतीयमाहुः **सत्येति**। सत्यं ज्ञानमिति विज्ञानमानन्दमिति श्रुतौ चैकार्थवाचकत्वरूपं सामानाधिकरण्यं सत्यादिपदानां सत्यत्वरूपधर्मविशिष्टवाचकत्वान्न संभवतीत्यर्थः। ननु सत्यादिपदानां ब्रह्मणि लक्षणा स्वीक्रियत इत्यत आहुः **लक्षणायां त्विति**। **सुतरामिति**। शक्यसंबंधस्य धर्मरूपत्वेन सुतरामित्यर्थः। **विशिष्टेति**। धर्मविशिष्टेत्यर्थः। **पदार्थः** निर्धर्मकः **तादृशः** विरुद्धधर्माश्रयः। सौत्रहेतुं व्याकुर्वन्ति **तेजःशब्देति** तेजोवाचकशब्दवाच्यत्वादित्यर्थः। तथा च 'अथ यदतः परो दिवो ज्योतिर्दीप्यते' इत्यत्र, अथ च 'तस्य भासा सर्वमिदं विभाति' इत्यत्र ब्रह्मतद्धर्मयोस्तेजःशब्दवाच्यत्वाद्धर्मधर्मिणोरभेदः सिध्यतीति भावः।

ननु ब्रह्मधर्मयोर्भिन्नाभिन्नत्वं तु प्रकाशाश्रयवद्वेतिदृष्टान्तेनैव सिद्धं पुनर्हेतूपादानं व्यर्थमत आहुः **बहुदूरेति**। यथादृश्यस्य वह्नेर्व्याप्तिर्धूमेऽस्ति तथा सृष्ट्यादाववतारदशायां बहुदूरब्रह्मनिरूपिता व्याप्तिस्तेजस्त्वरूपहेतावस्तीति यस्य भासा सर्वमिदं विभातीतिश्रुत्युक्तभारूपप्रकाशेन तद्व्यापनार्थं हेतुरुक्त इत्यर्थः। तेजोवाचकशब्दमाहुः **आतपादेरिति**। **आदिना** ज्योत्स्नापरिग्रहः। **विष्णुपुराणेऽप्युक्तं** 'एकदेशस्थितस्येन्दोर्ज्योत्स्नाविस्तारिणी यथा। परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत्। तत्राप्यासन्नदूरत्वबहुत्वस्वल्पतामयः। ज्योत्स्नाभेदोऽस्ति तच्छक्तिस्तद्वन्मैत्रेय वर्तते' इति। एवं चानेन धर्मिधर्मयोरभेदः, धर्मयोः परस्परमविरुद्धत्वमितिबोध्यम्। ननु सूर्यप्रकाशयोः प्रत्यक्षगम्यत्वात्तथात्वं वक्तुमुचितं

हेतुरुक्तः । आतपादेर्धर्मत्वेन धर्मित्वेन च प्रतीतेः । अपूर्ववदेव दृष्टत्वाच्छ्रुतत्वाच्च न धर्मेष्वपि युक्त्यपेक्षा । तस्मात् सिद्धं यथाश्रुतमेव ब्रह्मेति ॥ २८ ॥

एकदेशिमतेनापि सर्वसमाधानमाह ।

पूर्ववद्वा ॥ २९ ॥

अथवा "अरूपवदेव हि" (ब्र. सू. ३. २. १४.) इत्यादिपञ्चसूत्र्या यः सिद्धान्तः कथितस्तादृशं वा ब्रह्म प्रतिपत्तव्यम् । अयमाशयः । वेदस्थापनार्थं हि प्रवृत्तिः । तत्र यथाक्षरमात्र-

---

ब्रह्मणस्तद्धर्मस्य च तथात्वाभावात् कथमिदमित्यत आहुः **अपूर्ववदिति** । कश्चिद्धीरः प्रत्यगात्मनमैक्षदिति श्रुत्या कस्यचिद्भक्तस्यापि प्रत्यक्षं जायत इति ज्ञायत इत्यर्थः । कस्यचित् लोकोत्तरपदार्थस्य दर्शने तस्य पूर्वमसत्त्वादपूर्वं दर्शनमित्युच्यते ब्रह्मणस्तु पूर्वं सत्त्वादपूर्ववदित्युक्तम् । **श्रुतत्वादिति** । नेह नानास्ति, एकमेवाद्वितीयमित्यादिश्रुत्या श्रुतत्वादित्यर्थः ॥ २८ ॥

सूत्रप्रयोजनमाहुः **एकदेशिमतेनेति** । सूत्रस्थवाशब्दस्य पक्षान्तरत्वमाहुः **अथवेति** । **तादृशं वेति** । चिन्मात्रमित्यर्थः । जडजीवधर्मास्तत्रौपचारिकाः । यदा तस्याविर्भावस्तदा व्यवहार्यं भवतीति बोध्यम् । नन्वेकदेशिमतानुसरणं किमर्थमत आहुः **अयमिति** । अङ्गीकृतेति । सधर्मकं निर्धर्मकमित्येतादृशाङ्गीकारे वेदस्याक्षरमात्रस्य बाधो न भविष्यतीत्यक्षरबाधासहनमुभयपक्षे बीजमित्यर्थः । एतदर्थमेव तन्मतानुसरणमितिभावः । पञ्चसूत्र्या सिद्धो योऽर्थः सोऽपि प्रकृते संमत इत्याहुः **तत्रेति** । एकदेशिमते धर्माणामनित्यत्वमुक्तं, तच्च स्वमते नास्तीत्येतावान् यो विशेषः स एवोपपद्यते इत्याहुः

स्यापि बाधो न भवति तथा वक्तव्यम् । यदर्थमुभयरूपताङ्गीकृता तत्र धर्माणां स्वरूपनिर्वाहार्थमवश्यं ब्रह्मवैलक्षण्यमङ्गीकर्तव्यम् । तथा सति "एकमेवाद्वितीयम्" (छा. ८. २. १.) इति बाधः प्रसज्येत । तथा चोत्पत्त्या विचारे निर्धर्मकमेव पूर्वं ब्रह्मेति प्रतिपत्तव्यम् । उपपत्त्यापि विचारः पूर्वानुरोधेनैव कर्तव्यः । तत्र धर्माणामपि ब्रह्मत्वे एकविज्ञानेन सर्वविज्ञानमुत्पद्यते, नान्यथा । ततश्च प्रथमं ब्रह्म स्वधर्मरूपेण भवति, तदनु क्रियादिरूपेण प्रपञ्चरूपेण च । तावतैव सर्ववेदार्थसिद्धेः । न च लौकिकी युक्तिस्तत्रापेक्ष्यते

धर्माणामिति । **स्वरूपनिर्वाहार्थमिति** । वृत्तिमत्त्वं हि धर्मस्वरूपं, तस्य ब्रह्मणि सत्त्वे एव निर्वाहो भविष्यतीत्येतदर्थमित्यर्थः । **वैलक्षण्यमिति** । सविशेषकं निर्विशेषकमिति विलक्षणत्वं ब्रह्मणि स्वीकर्तव्यमित्यर्थः ।

तथा सतीति । तथा स्वीकारे सतीत्यर्थः । नन्वेवं चेत्कथं श्रुत्युपपत्तिः कर्तव्येत्यत आहुः **तथा चेति** । **उत्पत्त्येति** । कारणीभूतब्रह्मसकाशाज्जगदुत्पत्त्येत्यर्थः । तथा च यदा मृदि घटोऽव्यक्तः तदनन्तरं व्यक्तः । पूर्वं तु शुद्धा मृदेव । एवमुत्पत्त्या विचार इत्याशयः । पश्चात्सधर्मकब्रह्म स्वीकर्तव्यमित्याहुः **उपपत्त्येति** । अहिकुण्डलवत्सधर्मकमधर्मकं चेत्युभयरूपम् । धर्माश्च प्रकाशाश्रयवद्भिन्नाभिन्ना इत्युपपत्त्येत्यर्थः । **पूर्वानुरोधेनैवेति** । कारणस्वरूपानुरोधेनैव । कथं कर्तव्य इत्यत आहुः **तत्रेति** । **ब्रह्मत्वेति** । ब्रह्मरूपत्वमित्यर्थः । तथा चौपचारिकत्वमनित्यत्वं धर्मेषु न स्वीकर्तव्यमितिभावः । एवं स्वीक्रियमाणे वेदार्थसिद्धिमाहुः **ततश्चेति** । ननु निधर्मकस्वधर्मरूपेण भवनं लोकविरुद्धमत आहुः **न चेति** । तथा च वेदगम्ये लोकापेक्षा नास्तीतिभावः ।

येन तादृशस्य कथं सर्वभाव इतिपर्यनुयोगो भवेत्। धर्मकल्पनायामपि "नैषा तर्केण मतिरापनेया" (कठ. २. ९.) इति समानम्। उत्पत्त्या चोपपत्त्या च विचारद्वयम्। उपपत्त्या पूर्वनयनं स्वसिद्धान्तः। एकदेशिनस्तद्विपरीतम्। उभयमपि सूत्रकारस्य सम्मतमिति ॥ २९ ॥

एकदेशिमत उपपत्त्यन्तरमाह

प्रतिषेधाच्च ॥ ३० ॥

ननु विरुद्धधर्माश्रयत्वमतादरणं किमर्थम्, इदमेवास्त्वित्यत आहुः **धर्मकल्पनायामपी**ति। विरुद्धधर्माश्रयत्वरूपधर्मकल्पनायामित्यर्थः। **समानमि**ति। उभयत्र लौकिकयुक्तितर्कयोः प्रसरो नास्तीति समानमित्यर्थः। अत एवोभयादरणमित्यर्थः। इदानीमस्मिन्विचारद्वये सूत्रकारसंमतिमाहुः **उत्पत्त्ये**ति। पूर्वं ब्रह्म निर्धर्मकं पश्चात्सधर्मकं, अपाणिपादेत्यादिविरुद्धश्रुतीनां पूर्वमपाणिपादः पश्चाज्जवन इत्यविरोधः उत्पत्त्या विचारे एतत्सूत्रव्याख्यारूपः। **उपपत्त्या पूर्वनयनमि**ति। पूर्वसूत्रव्याख्यारूपः विरुद्धधर्माश्रयत्वस्वीकाररूपो विचारः। **इदं च श्रीप्रभुचरणानां मतमित्यर्थः**। **एके**ति। एकदेशिमते उत्पत्त्या उपपत्त्यापि विचारो नास्तीति विपरीतमित्यर्थः। तन्मते धर्माणामौपचारिकत्वकथनादितिभावः। **उभयमि**ति। एतदुभयमपि। एतदधिकरणोक्तं **व्यासचरणानां** संमतमित्यर्थः। तैत्तिरीयोपनिषदि यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात्। परस्तादित्यनेन प्रपञ्चातीतस्यापि एकत्वादिधर्मवत्त्वमुक्तम्। यथेदानीं तथाचाग्रे पश्चादप्येतदीदृशमिति **तृतीयस्कन्धे**ऽप्युक्तम्। तदेतदक्षयं नित्यं जगन्मुनिवराखिलम्। आविर्भावतिरोभावजन्मनाशविकल्पवदिति **विष्णुपुराणे** प्रथमेंऽशे। अधिकं तु **प्रकाशाद**नुसंधेयम् ॥ २९ ॥

"एकमेव" (छा. ८. २. १.) इत्युक्त्वा पुनः "अद्वितीयं" (छा. ८. २. १.) इति द्वितीयं प्रतिषेधति। स एवकारेणैव सिद्धो व्यर्थः सन् धर्मनिषेधमपि सूचयति। "ऐक्षत" (छा. ८. २. १.) इतिवचनात्तदुत्पत्तिः। चकारादेकविज्ञानेन सर्वविज्ञानोपक्रमः परिगृहीतः। तस्मान्न ब्रह्मणि कश्चिद्विरोध इति सिद्धम् ॥ ३० ॥ ९ ॥

इति तृतीयाध्याये द्वितीयपादे नवमं
प्रकाशाश्रयवद्वेत्यधिकरणम् ॥ ९ ॥

धर्मिधर्मविरोधः परिहृतः। धर्म्यन्तरविरोधपरिहारार्थमधिकरणमारभते। तत्र पूर्वपक्षमाह

परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॥ ३१ ॥

यत्किंचिद्दोषसत्वेऽप्यनादरो न कर्तव्य इत्यत आहुः **एकदेशी**ति। **स** इति निषेधः। **एवकारेणे**ति तस्यान्ययोगव्यवच्छेदार्थकत्वादितिभावः। **व्यर्थः** सन्निति। व्यर्थः सन् ज्ञापयतीतिवचनात् धर्मनिषेधः ज्ञापयतीत्यर्थः। **तदुत्पत्तिः** धर्मोत्पत्तिः। **एकविज्ञानेने**ति। एकस्य विज्ञानेनेत्यर्थः। **उपक्रम** इति। न तु प्रतिज्ञेत्यर्थः। तथा चैतन्मतं स्पष्टं, तस्मादन्यन्नास्तीत्यत्र तात्पर्यं बोध्यम्। अत्र बहूक्तं **प्रकाशे**। विस्तरभयाद्विरम्यते ॥ ३० ॥ ९ ॥ इति नवमाधिकरणम् ॥

अधिकरणप्रयोजनमाहुः **धर्मे**त्यादिना। सर्वधर्मशून्यत्वाद्ब्रह्मधर्मो न भवत्येवंरूपो **धर्मिविरोधः**, धर्मा ब्रह्मभिन्नाः जन्याः घ्नतः परस्परविरुद्धाश्चेति **धर्मविरोध** इत्यर्थः। **परिहृत** इति। अधिकरणचतुष्टयेनेतिशेषः। अनेन प्रसंगसंगतिः सूचिता। **धर्म्यन्तरविरोध** इति। ब्रह्मान्तरप्रतिपादकशास्त्र-

परमतः। अतोऽपि ब्रह्मणः परमन्ययुत्कृष्टं फलमस्ति। तत्र वैदिकहेतवः सेतून्मानसम्बन्धभेद्व्यपदेशेभ्यः। यद्यपि समन्वय एवैते दोषाः परिहृतास्तथापि स्वरूपविरोधपरिहाराय प्रस्तावात् पुनरुच्यन्ते। सर्ववाक्यप्रतिपाद्यमेकमेवेत्यपि न सिद्धम्। एतैर्हेतुभिः परिच्छेदेन धर्मिभेदे सिद्धे न पूर्वाधिकरणसिद्धान्तविरोधः। ननु समन्वयेन ब्रह्मत्वमुत्तरपादेनैक्यं पूर्वाधिकरणेनाविरोध इति व्यर्थ-

---

विरोधमाशंक्य तन्निवृत्त्यर्थः। तत्र ब्रह्मविदाप्नोति परमितिवाक्ये ज्ञानविषयीभूतब्रह्मणः परं फलरूपं ब्रह्मास्तीति ज्ञायते। अतः अस्मिन्नधिकरणे अस्मादपि परब्रह्मास्ति वा न वेति संशयः। एतद्बीजं तु पूर्वपक्षादेवावगम्यते इति संशयमनुक्त्वा पूर्वपक्षं सूत्रकार एव वदतीत्याहुः तत्रेति। सूत्रांशं व्याकुर्वन्ति अतोऽपीति। कथमस्तीत्यत्रसौत्रं हेतुवाक्यं प्रदर्शयन्ति तत्रेति। सेतून्मानेति। सेतुश्च उन्मानं संबन्धश्चेति द्वन्द्वः। द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसंबध्यते इति वाक्याद् व्यपदेशपदस्य प्रत्येकमन्वयः। यद्यपीति। समन्वयेति। प्रथमाध्याये दोषाः सेत्वादिपदोक्ताः अवान्तरवर्तित्वादयः। तथापीति। स्वरूपेति।परस्वरूपेत्यर्थः। न सिद्धमिति। तत्तद्वाक्येषु तत्तद्रूपाणां प्रतिपादनार्थं न सिद्धमित्यर्थः। ननु न सिद्धं चेत् पूर्वाधिकरणे ब्रह्मणः परत्वमद्वितीयत्वं च कथं सिद्धान्तितमिति विरोध इत्यत आहुः एतैरिति। परिच्छेदेन ब्रह्मणो अवान्तरत्वनिश्चयेन न विरोध इति। तस्मिन्नेव ब्रह्मणि परत्वमद्वितीयत्वमायास्यतीति न विरोध इत्यर्थः। धर्म्यन्तरविरोधपरिहारकमिदमधिकरणं न कर्तव्यमिति शङ्कते नन्विति। ब्रह्मत्वमिति। सर्वेषां वेदान्तवाक्यानां ब्रह्मणि तात्पर्यात् प्रथमाध्याये ब्रह्मत्वं सिद्धमित्यर्थः। उत्तरपादेति। गुणोपसंहारपादे इत्यर्थः। ऐक्यमिति। एकमेवाद्वितीयं ब्रह्मेतिसिद्धमित्यर्थः। अविरोध इति। अद्वितीयमितिपदेन द्वितीयस्य प्रतिषेधः।

मिदमधिकरणमितिचेन्न । अर्थबलविचारोऽयम् । समन्वये चोत्तर-पादे च शब्दबलविचारः । धर्मिविचारान्न पूर्वेण गतार्थत्वम् ।

फलतः साधनतश्च प्रमेयाच्च प्रमाणतः ।
विचारेणाबृहत्तच्चेत् कोऽन्यः साधयितुं क्षमः ॥

अतो हेतून् बाधकानाह । एकदेशबाधकत्वात् । तत्र फलतो बाधहेतुमाह सेतुव्यपदेशात् । " अथ य आत्मा स सेतुर्विधृतिः " (छा. ८. ४. १.) इति " दहर उत्तरेभ्यः " (ब्र. सू. १. ३. १४) इत्यत्र ब्रह्मत्वमस्य सिद्धम् । " अथ य इहात्मानमनुविद्य व्रजन्ति " (छा. ८. ५. २.) इत्युपक्रम्य " सर्वेषु लोकेषु

तेन च धर्म्यन्तरनिषेधः । एवं रीत्या स्वरूपाविरोधः पूर्वाधिकरणेन प्रतिपादित इत्यर्थः । उत्तरमाहुः **अर्थबले**ति । **धर्मिविचारा**दिति । ब्रह्मणः सकाशाद्धर्मभेदो निवारितः पूर्वाधिकरणे चार्थबलेन धर्म्यन्तरं नास्तीतिविचार इत्यर्थः ।

इदानीं सूत्रे हेतुचतुष्टयमुक्तं तत्प्रयोजनं कारिकया वदन्ति **फलतः** फलमनुसंधायेत्यर्थः । ल्यब्लोपे पञ्चमी । एवं **साधनतः** इत्यत्रापि बोध्यम् । **तत्** पूर्वाधिकरणैर्विचारितं ब्रह्म फलानुसन्धानसहित**विचारेण** हेतुना **अबृहच्चेत्** ब्रह्म न सिद्धं चेत् **कः** फलादिव्यतिरिक्तः ब्रह्मत्वं **साधयितुं समर्थ** इत्यर्थः । **अत** इति । येन साधकाः न सन्ति । अतः **बाधकान्** हेतूनाहेत्यर्थः । फलतः बाधहेतौ कारणमाहुः **एकदेशे**ति । ब्रह्मविदाप्नोति परमित्यस्मिन्वाक्ये फलत्वाद् ब्रह्मणि परब्रह्मत्वमुक्तम् । तत्र वाक्यान्तरे तस्य सेतुत्वोक्त्या परत्वं न संभवति सेतोः परापेक्षयार्वाचीनत्वादित्येकदेशस्य परत्वस्य बाध इत्यर्थः । **तत्रे**ति । बाधकहेतूनां मध्ये । व्याकुर्वन्ति **अथे**ति । **अस्ये**ति ।

भवति ” (छा. ८. ५. ४.) इत्युक्त्वा कामानुपपाद्याज्ञानव्यवधानं ज्ञानप्रशंसार्थमुक्त्वा ज्ञानानन्तरं संसारसम्बन्धाभावाय सेतुत्वं वदति । पापछिधतरणार्थं यश्च तरति तद्गताश्च दोषा गच्छन्ति इति च । अतः संसारफलयोर्मध्ये विद्यमानत्वात्तीर्णस्यैव फलश्रवणात् फलरूपं वस्तु किञ्चिदन्यदस्तीति ज्ञायते । निधित्वेन फलवचनमवान्तरफलपरं भविष्यति । “ एतमानन्दमयमात्मानमुपसंक्रम्य ” (तै. २. ५.) इत्यप्यत्रोदाहरणम् । तथोन्मानव्यपदेशात् । तत्रैव “ यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः ” (छा. ८. १. ३.) इति साधनयुक्तिप्रश्न उन्मानेन परिच्छेदं

सेतोरित्यर्थः । कथं सिद्धमत आहुः **अथेति** । **किंचिदिति** । तथा च फलतो बाधकमितिभावः । ननु किमिदमुच्यते, अस्माद्वाक्यात्पूर्वं हिरण्यनिधि निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तोऽपि न विन्देयुरितिवाक्यं श्रूयते । तत्र निधिदृष्टान्तेन फलत्वमपि श्रूयते इत्यतः फलतो बाधकत्वं नास्तीत्यत आहुः **निधित्वेनेति** । **भविष्यतीति** । ननु परब्रह्मरूपफलपरमित्यर्थः । अवान्तरफल उदाहरणमाहुः **एतमिति** । पूर्वपक्षिमते आनन्दमयस्य परत्वं नास्ति किंतु ब्रह्म पुच्छं प्रतिष्ठेतिवाक्यात्पुच्छस्यैवेति भावः । फलतो बाधकमुक्त्वा साधनतो बाधकहेतुं व्याकुर्वन्ति **तथेति** । **तत्रैव** दहराधिकरणे एव । **साधनयुक्तीति** । दहराकाशान्तर्गतस्य ज्ञानार्थं यदन्वेषणरूपं **साधनं** तस्य या **युक्तिः** योजनं, तदर्थके तच्चेद्ब्रूयुरित्यादिना कृते प्रश्ने इत्यर्थः ।

उन्मानेति । यावान्वा आकाश इत्यादिना दहराकाशस्य **परिच्छेदं** निरूपयतीत्यर्थः । तथा च परिच्छेदवाचकयावत्पदेन देशतः परिच्छेदाभावे आकाशस्य स्वमते अनित्यत्वात्कालतः परिच्छेदसंभवेन दार्ष्टान्तिके दहराका-

निरूपयति । दृष्टान्तदार्ष्टान्तिकत्वेन ज्ञानं साधनम् । तत्र बहिराकाशज्ञानमपि साधनं भवति । चतुष्पाच्च ब्रह्म । भूतादिपादाश्च ज्ञातव्याः । तथा **सम्बन्धव्यपदेशात्** । तत्रैव प्रमेयनिरूपणप्रस्ताव "उभावप्यस्मिन्" (छा. ८. १. ३) इत्यादिना आधाराधेयसम्बन्धो निरूपितः । अत्र च वस्तुपरिच्छेदो निरूपितः । "प्राज्ञेनात्मना सम्परिष्वक्तः" (बृ. ४. ३. २१) इति च । तथा **भेदव्यपदेशात्** । "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते" (छा. १. ६. ७) "य एषोन्तरक्षिणि पुरुषो दृश्यते" (छा. १. ७. ५) इत्यत्र स्थानद्वयस्थितयोः पुरुषयोः परस्परं धर्मातिदेशमाह । अक्षिस्थितनिरूपकमतिदेशः प्रमाणमिति । धर्म्यभेदेन

शेऽपि परिच्छेदः । एवं चोन्मानेन परत्वस्य बाध इति भावः । इमं भावं ध्वनयन्ति **दृष्टान्ते**ति । अन्यदुदाहरण वदन्ति **चतुष्पा**दिति । भूतादीनां पादानां नित्यत्वादित्यर्थः । तृतीयं हेतुमाहुः **तत्रे**ति । दहराधिकरणे । **निरूपित** इति । आधारत्वेन प्रमेयत्वं न तु सर्वोत्कृष्टत्वेनेति **परिच्छेदः** । अत्रैवोदाहरणान्तरमाहुः **प्राज्ञेने**ति । संपरिष्वक्त इत्यनेन परिच्छेदो बोध्यते । चतुर्थं हेतुं व्युत्पादन्ति **य एष** इति । **परस्पर**मिति । अक्षिस्थित पुरुषवत् आदित्यस्थितपुरुषः आदित्यस्थितपुरुषवत् अक्षिस्थितपुरुषः इति परस्परम् । **पुरुषनिष्ठा** ये प्रज्ञानघनत्वादयो धर्मास्तेषा**मतिदेशं** श्रुतिराहेत्यर्थः ।

प्रमाणमिति । तस्यैतस्य देवरूपमितिश्रुतिः **अतिदेशप्रमाण**मित्यर्थः । तथा च पूर्वतन्त्रे यथा प्रकृतिवद्विकृतिः कर्तव्येत्यतिदेशः । दर्शपूर्णमासेष्टिः प्रकृतिः सौर्येष्टिः विकृतिः । तत्र प्रकृतौ ये उक्ता निर्वापादयो धर्मास्ते विकृतौ अतिदिश्यन्ते, तथाऽक्षिस्थितिनिरूपके पुरुष आदित्यस्थित

तु स एवायमिति वदेत्। अतो देशकालवस्तुस्वरूपपरिच्छेदरहितमन्यत् किञ्चिदस्तीति प्रतिपत्तव्यमित्येवं प्राप्तम् ॥ ३१ ॥

सामान्यात्तु ॥ ३२ ॥

तुशब्दः पक्षं व्यावर्तयति। समानस्य भावः **सामान्यम्**। सेत्वाकाशादिशब्दास्तद्धर्मातिदेशार्थमुच्यन्ते, न तु तद्गतं दोषमपि कल्पयन्ति। संसारसागरोत्तरणोपायत्वात् सेतुत्वं, निर्लेपायाकाशत्वं, कामाभिदोहाय चतुष्पात्त्वं, अमृतत्वाय षोडशकलत्वं, अदुर्लभत्वाय सम्बन्धः, दिव्यत्वाय धर्मातिदेशः। कुण्डपायिनामयने मासाग्निहोत्रवद्गुणार्थमेव वचनं न दोषार्थमिति न ततोन्यशङ्कोत्पादनीया। तस्मान्न पूर्वोक्ता दोषाः ॥ ३२ ॥

अन्यसमानधर्मवत्त्वं कुत्रोपयुज्यत इत्यत आह

बुद्ध्यर्थः पादवत् ॥ ३३ ॥

पुरुषधर्मा अतिदिश्यन्ते। तथा चोभयोः प्रकृतिविकृतिवद्भेदो व्यपदिश्यत इत्यर्थः। ननु ब्रह्मरूपधर्म्युभयत्राप्येक एवेत्यत आहुः **धर्मभेद** इति ॥३१॥

सिद्धान्तसूत्रं व्यकुर्वन्ति **समानस्ये**ति। **कल्पयन्ती**ति। पूर्वाधिकरणे अभेदस्य प्रतिपादितत्वात्, भेदरूपं दोषं न कल्पयन्तीत्यर्थः। ननु गुणार्थमेव सामान्यशब्दार्थाना धर्मातिदेशकत्वमित्युक्तं, तत्कथमित्यत आहुः **संसा**रेति। ननु गुणार्थमतिदेशः कुत्र दृष्ट इत्यत आहुः **कुण्डपायिनामयने** इति। पूर्वतन्त्रे उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोतीतिवाक्यं श्रूयते। तत्राग्निहोत्रनाम्ना तद्गुणा अतिदिश्यन्ते, एवमत्र बोध्यमित्यर्थः ॥ ३२ ॥

बुद्ध्यर्थः तथाऽव्यपदेशो बुद्ध्यर्थः, बुद्धिरेव प्रयोजनं यस्य। तथोपासनार्थमयुक्तमित्याशङ्क्य दृष्टान्तमाह। यथा भूतादीनां पादत्वज्ञानमुपासनार्थं तथा तत्तद्गुणवत्त्वेन ज्ञानार्थं स्वधर्मप्रशंसार्थमेवमुच्यते॥ ३३ ॥

(अत्र पर्यन्तं श्रीवल्लभाचार्यचरणानां कृतिः। अतः परं श्रीविट्ठलनाथगोस्वामिनाम्।)

ननु स एवायमित्यतिदेशेऽपि तथाबुद्धिः सम्पद्येतैवेति व्यर्थो धर्मातिदेश इत्याशङ्क्य तथोक्तेऽपि समानधर्मत्वज्ञानाभावे हेतुमाह

स्थानविशेषात् प्रकाशादिवत् ॥ ३४ ॥

स्थानविशेषादिति। धर्म्यैक्येऽपि स्थानविशेषप्राप्त्या न समानधर्मत्व दृश्यते। अन्यत्रेत्यत्रापि न तथात्वमायास्यतीत्यतिदेशो धर्माणामपि कृत इत्यर्थः। अस्मिन्नर्थे दृष्टान्तमाह **प्रकाशादिवदिति**। "यदादित्यगतं तेजः" (भ. गी. १५. १२) इतिवाक्यादादित्यचन्द्राग्निगततेजसामैक्येऽपि न समानप्रकाशत्वं यथा तथात्रापीति-

---

सूत्रमवतारयन्ति **अन्येति**। **बुद्धिरेवेति**। ज्ञानमेवेत्यर्थः। दृष्टान्तमवतारयन्ति **तथेति**। **अयुक्तमिति**। उत्तमस्य ब्रह्मणः अल्पसेतुत्वादिना ज्ञानमुपासनार्थमितिकथनमयुक्तमित्यर्थः। **एवमुच्यत** इति। अन्यसमानधर्मत्वमुच्यत इत्यर्थः। एवं च ज्ञानार्थमेव कथनं, न तूपासनार्थमित्यर्थः ॥३३॥

सूत्रमवतारयन्ति **नन्वित्यादि**। **तथोक्तेऽपीति**। स एवायमिति प्रत्यभिज्ञया ऐक्यकथनेऽपि। **अन्यत्रेति**। स्फटिकहीरकादिस्थले। **अत्र**

ज्ञानसम्भवादित्यर्थः । आदिपदादेकस्यैव कालस्य यथोपाधिविशेष-सम्बन्धादुत्तरायणात्वाद्युत्तमधर्मवत्त्वं तद्विपरीतधर्मवत्त्वं तथेत्यत्रापि सङ्गृह्यते ॥ ३४ ॥

किञ्च

उपपत्तेश्च ॥ ३५ ॥

सत्यज्ञानाद्युक्तधर्मविशिष्टब्रह्मणोऽन्य उत्तमोस्तीति वदता तत्रेत उत्कृष्टधर्मवत्त्वं वाच्यम् । तच्चाशक्यं, प्रमाणाभावात् । साम्येऽपि तथा विशेषाभावोऽद्वैतश्रुतिविरोधश्च । तस्मादितः परस्यानुपपन्नत्वा-दुक्तरूपमेव परमकाष्ठापन्नं वस्त्वित्युपपद्यत इत्यर्थः ॥ ३५ ॥

तथान्यप्रतिषेधात् ॥ ३६ ॥

यथा सेत्वादयः श्रुत्युक्तास्तथैव " न तत्समश्चाभ्यधिकश्च दृश्यते " (श्वे. ६. ८) इति श्रुत्यैव ततोऽधिकस्य **प्रतिषेधात्** त्वयाप्यस्मदुक्त एव मार्गोऽनुसर्तव्य इत्यर्थः । अवतारकाले पूर्वं स्वशक्त्याविर्भावमकृत्वा पश्चात्तदाविर्भावे कृते लोकानां पूर्वावस्थातो भगवत्येवाधिक्यमिव प्रतीतं भवतीत्यभिप्रायेणान्यपदोपादानम् ॥३६

प्रकाशकृद्भिरित आरभ्य प्रभूणामुक्तिरितिप्रतिभातीत्युक्तम् । शेषं सुगमम् ॥ ३४ ॥

सूत्रद्वयेन अस्माद्ब्रह्मणः सकाशादुत्कृष्टं ब्रह्म नास्तीत्याहुः **किंचेति** ॥३५॥

सूत्रार्थमाहुः **यथेति** । निषेधिकां श्रुतिमाहुः **न तदिति** । ननु पूर्वसूत्रेणैव सिद्धमतः सूत्रकथने प्रयोजनमाहुः **अवतारेति** । **आधिक्यमिवेति** । तथा चाधिकं यद्ब्रह्म तत्कृतमाधिक्यमिति शङ्का न कर्तव्येत्यर्थः ॥ ३६ ॥

प्रकरणमुपसंहरन् फलितमर्थमाह

अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३७ ॥

अनेन सेत्वादिव्यपदेशानां मुख्यार्थकत्वनिराकरणेन व्यापकत्वं ब्रह्मणः सिद्धमित्यर्थ इति केचित्। तन्न। "जन्माद्यस्य यतः" (ब्र. सू. १. १. २) इत्यादिना सर्वदेशगतकार्यकर्तृत्वमुक्तमिति तेनैव व्यापकत्वस्य सिद्धत्वात्। न चाविरोधसाधनप्रकरणत्वात् पूर्वसिद्धं सर्वगतत्वमनेनोक्तग्रन्थेन कृत्वा सेत्वादिवाक्यैः सममविरुद्धमित्यर्थ इति वाच्यमितिचेदग्रिमपदवैयर्थ्यापत्तेः। अत्रैवं ज्ञेयम्। नोक्तकर्तृत्वेन व्यापकत्वमेकान्ततो ब्रह्मणि रोद्धुं शक्नोति। योगसिद्धदूरश्रवणादिवत् परिच्छिन्नेनाप्यनेकदेशगतकार्यकरणसामर्थ्यविशेषस्य वक्तुं शक्यत्वात्। अन्यथा पूर्वसिद्धव्यापकत्वविरोधेन सेत्वादिव्यपदेशैः परिच्छिन्नत्वेन ब्रह्मणोऽन्यस्य परत्वं न शङ्केत। विरोधपरिहाराय तु सामान्यात्त्वविरोध इति वदेत्। तस्मादेवं सूत्रार्थो ज्ञेयः। अनेन ब्रह्मणोऽन्यस्य परत्वनिरासेन

प्रकरणमित्यर्थः। **आहेति** सूत्रेणाहेत्यर्थः। एकदेशिव्याख्यानमाहुः **अनेनेति**। दूषयन्ति **तन्नेति**।

एकदेशी अर्थभेदं कृत्वा शङ्कते **न चेति**। उत्तरयन्ति **अग्रिमेति**। **चेदित्यनेन** मुख्यः पक्षो न भवतीति सूचितम्। वैयर्थ्यमेवोपपादयन्ति **अत्रैवमिति**।। **शक्नोतीति**। सूत्रकार इति शेषः। **न शक्नोतीत्यत्र** गमकमाहुः **अन्यथेति**। ननु विरोधपरिहारः कथमित्यत आहुः **विरोधेति**। एकदेशिमतसिद्धसूत्रार्थं निराकृत्य स्वयं सूत्रार्थमाहुः **तस्मादिति**। आयाम-

आयामशब्दादिभ्यः व्यापकत्ववाचकश्रुतिवाक्यादिभ्यः साक्षात्सर्वगतत्वप्रतिपादकेभ्य एव सर्वगतत्वं सिध्यति। न तु गौतमीयानामिव कर्तृत्वाद्यनुपपत्त्येत्यर्थ। ते च शब्दाः "आकाशवत् सर्वगतश्च नित्यः" "ज्यायान् दिवो ज्यायानाकाशात्" (छा. ३. १४. ३.) "वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्" (तै. आ. १०. १०. ३.) इत्यादयः। आदिपदात् "सर्वतः पाणिपादान्तं सर्वतोऽक्षिशिरोमुखं सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति" (भ. गी. १२. १३.) इत्यादिस्मृतयः सङ्गृह्यन्ते। एतेन ब्रह्मणि श्रुतिरेव मुख्यं प्रमाणं, अनुमानं तु विलम्बोपस्थितिकत्वेन साध्यसिद्धिपराहतमपीच्छाविशेषेण जननीयं चेदभ्युच्चयत्वमात्रं पर्यवसिष्यतीतिभावः ॥ ३७ ॥ १० ॥

इति तृतीयाध्याये द्वितीयपादे दशमं
परमतः सेतून्मानेत्यधिकरणम् ॥ १० ॥

शब्दस्य व्यापकतार्थकत्वं मनसि निधायाहुः **व्यापकत्वेति** नैयायिकमतं खण्डयति **साक्षादिति**। समाने विषये शाब्दसामग्र्याः प्रबलत्वादाहुः **सिद्ध्यतीति**। तथा च पर्वते यावत्पर्यन्तं वह्न्यनुमितिं करोति ततः पूर्वं केनचिदाप्तेनोक्तं पर्वतोवह्निमानिति, तदा शाब्दबोध एव जायते न त्वनुमितिरितिभावः। व्यापकत्ववाचकश्रुतिवाक्यान्याहुः **तच्चेति**। ननु वह्न्यनुमितिर्मे जायतामितिवदिच्छाधरितसामग्रीसत्त्वेऽनुमितिरेव जायते इत्यत आहुः **अभ्युच्चयत्वमात्रमिति**। तथा चेच्छासत्त्वेऽनुमितिस्तदभाव इति कादाचित्कानुमानस्यापि संग्रह इतिभावः ॥ ३७ ॥ १० ॥

इति दशमाधिकरणम्।

एवं सर्वोत्तमत्वनिरूपणेनोत्तमाधिकारिणां भजनीयत्वप्रयोजकं रूपमुक्त्वा तदितराधिकारिणां तदाह । ते हि फलप्रेप्सव एव भजिष्यन्ति । तच्च फलदातृत्व एव सम्भवतीति तदाह

फलमत उपपत्तेः ॥ ३८ ॥

अत ईश्वरादेव फलं भवति यत्किञ्चिदैहिकं पारलौकिकं वा । कुतः । उपपत्तेः । "सर्वस्य वशी सर्वस्येशानः" (बृ. ४. ४. २२.) इतिश्रुतिर्वस्तुमात्रशितृत्वमसङ्कुचितमाह । नह्यन्यस्य वस्त्वन्यो दातुं समर्थोऽतो भगवानेव तथेत्यर्थः ।

केचित्त्वत्रैव कर्मणस्तत्कार्यापूर्वस्य च फलदातृत्वमाशङ्क्य तत्रानुपपत्तिमत्रोपपत्तित्वेन व्याकुर्वन्ति । तत्त्वग्रे जैमिनिमतोपन्यासस्वमतोपन्यासाभ्यां व्यास एव व्यक्तीकरिष्यतीत्यधुनैवाप्राप्तनिराकरणमग्रिमसूत्रद्वयवैयर्थ्यं च स्यादिति चिन्त्यम् ॥ ३८ ॥

इदानीमीश्वरादेव फलमिति सूचयितुं फलोपपत्त्यधिकरणमाहुः **फलमत उपपत्तेः** । **एवमिति** अनेन प्रकारेणाविरोधनिरूपणे कृते सर्वोत्तमसिद्धौ सत्यामित्यर्थः । **तदितरेति** । मध्यमाधिकारिणामित्यर्थः । **तदाहेति** । भजनीयप्रयोजकं यद्रूपं फलदातृत्वं तदाहेत्यर्थः । ननु किमर्थमिदमुच्यते इत्यत आहुः **ते हीति** । मध्यमा इत्यर्थः । सूत्रं व्याकुर्वन्ति **अत** इति । अस्मिन्नधिकरणे फलमीश्वराद्वा तत्कर्मणि तत्तद्देवताभ्यो वेति संशयः । कर्माङ्गदेवताभ्य इति पूर्वपक्षः । ईश्वरादेव फलमित्याहुः **सर्वस्येति** । एकदेशिमतमाहुः **केचित्त्विति** । **अत्रैव** अस्मिन् सूत्रे एव । **तत्कार्येति** । कर्मजन्यापूर्वस्येत्यर्थः । निराकुर्वन्ति **तत्त्विति** ॥ ३८ ॥

श्रुतत्वाच्च ॥ ३९ ॥

पूर्वसूत्रेण श्रुतमीशितृत्वं फलदान उपपत्तित्वेन निरूपितम् । इह तु साक्षाच्छ्रुतिमेव फलदातृत्ववाचिकां प्रमाणयति । सा च " स वा एष महानज आत्मान्नादो वसुदानः " (बृ. ४. ४. २४.) इत्यादिरूपा । चकारात् " सुखं दुःखं भवो भावः " (भ. गी. १०. ४.) इत्युपक्रम्य " भवन्ति भावा भूतानां मत्त एव पृथग्विधाः " (भ. गी. १०. ५.) इत्यादिरूपा स्मृतिः सङ्गृह्यते ॥ ३९ ॥

अत्र कर्मवादी प्रत्यवतिष्ठते ।

धर्मं जैमिनिरत एव ॥ ४० ॥

ननु कर्मण एव फलमितिपक्षेऽप्युपपत्तिश्रवणे तुल्ये । तथा हि । ईश्वरवादिनापि कर्मनिरपेक्षेण तेन फलमिति न वक्तुं शक्यम् । विधिवैयर्थ्यप्रवृत्त्यनुपपत्तिप्रसङ्गाभ्याम् । तत्सापेक्षत्वे तदेवास्तु, कृतं तत्सापेक्षेण तेन । न चाचेतनं चेतनाधिष्ठितमेव कार्यक्षममिति केवलेन तेन न फलं सम्भवतीति वाच्यम् । कर्मस्वरूपं स्वर्गादिकञ्च न लोकसिद्धं

श्रुतमिति । श्रुतिवाक्यजन्यशाब्दबोधविषयीभूतम् ॥ ३९ ॥

अत एव उपपत्तिश्रवणाभ्यामेव । फलकारणं धर्मं मन्यते जैमिनिरिति सूत्रार्थः । कथं तुल्येत्यत आहुः **तथा ही**ति । **प्रवृत्ती**ति । विधिवैयर्थ्यप्रवृत्त्यनुपपत्तिप्रसङ्गाभ्या तत्सापेक्षत्वे तदेवास्तु कृतं सापेक्षेण तेन । न चाचेतनं चेतनाधिष्ठितमेव कार्यक्षममिति केवलेन तेन फलसंभव इति वाच्यम् । उत्तरयन्ति **कर्मस्वरूप**मिति । वाक्यान्याहुः **अग्निष्टोमेने**ति । **स चे**ति स्वर्गादिश्चेत्यर्थः । **अन्यथे**ति । राज्ञः सकाशात्फलप्राप्तिर्जातेति

किन्तु श्रुतिसिद्धम् । तत्र च स्वर्गादिफलसाधकत्वेनैवोत्पत्तिवाक्ये-ष्वर्थवादेषु च “ अग्निष्टोमेन स्वर्गकामो यजेत ” (आप. श्रौ. १०. २. १.) “ अग्निहोत्रं जुहोति प्रजाकामः ” (तै. सं. १. ५. ९. १. १८.) इत्यादि, “ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत ” (तै. ब्रा. ५. २०. ८०. ८१.) “ परमेष्ठिनो वा एष यज्ञोग्र आसीत्तेन स परमां काष्ठामगच्छत् ” (तै. सं. १. ६. ८.) इत्यादिषु कर्म श्रूयते । स च तत्साध्यत्वेनैव । एवं सति लोकेऽन्यथादर्शनऽपि धर्मिग्राहकप्रमाणेन तथैव सिद्धत्वान्नात्र काचन शङ्का। ईश्वरवादिनो नित्यज्ञानादिमत्त्व इव आमुष्मिकफलत्वेन तत्प्रतिबन्धकापगमे भवतीत्यावयोस्तुल्यम् । तस्याशुतरविनाशित्वेऽपि श्रुतिसिद्धकारणतानिर्वाहाय तद्व्यापारोऽपूर्वं कल्प्यते । अविषमादीश्वराद्विषमफलोत्पत्त्यनुपपत्तिर्वैषम्यनैर्घृण्ये च स्याताम् । अतः कर्मण एव फलमिति जैमिनिर्मनुते ॥ ४० ॥

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४१ ॥

तुशब्दः पूर्वपक्षव्युदासार्थः । बादरायणस्त्वाचार्य इतः पूर्वोक्तमीश्वरमेव फलदत्वेन मनुते । कुतः । हेतुव्यपदेशात् । हेतुत्वेन श्रुतौ व्यपदेशादित्यर्थः । “ एष उ एव साधु कर्म कारयति तं

दर्शनेऽपीत्यर्थः । **अत्र** वेदबोधितेऽर्थे । **नित्यज्ञानादिमत्त्वे** इति । तथा च धर्मिग्राहकप्रामाण्येन नित्यज्ञानादिमत्त्वं यथा ईश्वरस्य स्वीक्रियते तथा कर्मणः स्वर्गादिफलजनकत्वं तेनैव प्रमाणेन स्वीकर्तव्यमितिभावः । नन्वेवं चेद्व्यवहितोत्तरं फलं कुतो न जायत इत्यत आहुः **आमुष्मिके**ति । तौल्येऽपि जैमिनिः स्वमत आधिक्यं सूचयति **अविषमादि**ति ॥ ४० ॥

कस्यां श्रुतौ व्यपदेश इत्यतस्तादृशीं श्रुतिमाहुः **एष उ एवे**ति । अत्र

यमेभ्यो लोकेभ्य उन्निनीषते, एष उ एवासाधु कर्म कारयति यमधो निनीषते " (कौशी. ३. ९) इति श्रुतौ न केवलं कर्मकारयितृत्वमुच्यतेऽपि तु फलदित्सया तथात्वम् । अतः फलदत्वमीश्वरस्यैव व्यपदिष्टं भवतीति नानुपपत्तिः काचित् । " नन्वीश्वरस्य स्वतः फलदाने समर्थस्य फलदित्सायां सत्यां कर्मकारणे को हेतुः ? कार्यवैचित्र्यञ्च कथम् ? " इत्यादि चोद्यं " कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः " (ब्र. सू. २. ३. ४२.) इत्यत्र निरस्तं, विद्वन्मण्डने श्रीविट्ठलेन च । अतः सकामैरपि स एव भजनीय इति सिद्धम् ॥ ४१ ॥ ११ ॥

इति तृतीयाध्याये द्वितीयपाद एकादशं फलमत इत्यधिकरणम् ॥ ११ ॥

॥ इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते श्रीमद्-ब्रह्मसूत्राणुभाष्ये तृतीयाध्यायस्य द्वितीयः पादः ॥

दूषणमाहुः **नन्विति** । समाधानमाहुः **कृतप्रयत्नेति** । अस्मिन् सूत्रे मया पूर्वमेव निरस्तम् । **विद्वन्मण्डने** चेत्युक्त्या **प्रभुचरणानामिय-मुक्तिरिति प्रतिभाति** ॥ ११ ॥

तृतीये द्वितीय पादः ॥ २ ॥

इति श्रीमन्मुकुन्दरायसहजमाधुरीपरमानिर्वचनीयसरसवदनतामरसरससुधाह्रदावगाहिश्रीमदाचार्यपदाब्जकृपापारसारश्रीमत्प्रभुचरणात्मजमहाराजयदुनाथकुलोद्भवगोस्वामिश्रीगोपालात्मज**गिरिधर**विरचिते **अणुभाष्यविवरणे तृतीयाध्यास्य द्वितीयः पादः** समाप्तिमफाणीत् ॥

अथ तृतीयाध्यायस्य तृतीयः पादः ।

पूर्वपादे जडजीवधर्मनिराकरणेन शुद्धसच्चिदानन्दविग्रहरूपत्वं ब्रह्मणो निरूपितम् । इह तु ब्रह्मगता एव धर्मा विचार्यन्ते । ते चेदेकस्मिन् वाक्य एव सर्वे पठिता भवेयुस्तदा न विचारणीया भवेयुर्विरोधाभावात् । पठिताश्च तत्तदुपासनप्रकरणेषु । क्वचित् त एव । क्वचिद्भिन्नाः । यथा वाजसनेयिनः पञ्चाग्निविद्यां प्रस्तुत्य षष्ठमन्यमग्निं पठन्ति "तस्याग्निरेवाग्निः" (बृ. ६. २. १४) इति । छन्दोगास्तु पञ्चसङ्ख्यैवोदाहरन्ति "अथ य एतानेवं पञ्चाग्नीन् वेद" (छा. ५. १०. १०) इति । तथा प्राणसंवादे मुख्यप्राणादन्यांश्चतुरः प्राणान् वाक्चक्षुःश्रोत्रमनांसि पठन्ति ।

विवरणम्

पूर्वपादनिरूपितमस्मिन्पादे संगतिबोधयितुमाहुः **पूर्वपाद** इति । **निरूपितमिति** । तथा चैतादृशं ब्रह्मोपनिषद्वाक्यैर्बोध्यमिति भावः । **इह तु** अस्मिन्पादे तु । **विचार्यन्त** इति । उपासनाङ्गत्वेनोपसंहारार्थं विचार्यन्त इत्यर्थः । एवं चोपजीव्योपजीवकभावसंगतिर्बोध्या । ननु साधनाङ्गत्वेन तेषां धर्माणां विचारे प्रयोजनाभाव इत्यत आहुः **ते चेदि**ति । विचारणीयत्वे बीजमाहुः **पठिताश्चे**ति । कुत्र पठिता इत्यत आहुः **यथे**ति । **षष्ठमन्यमि**ति । तथा च पञ्चाग्नयस्तु छान्दोग्योक्ता एव षष्ठमन्यमित्यर्थः ।

ननु केन वाक्येन पठन्तीत्यत आहुः **तस्याग्निरि**ति । इदं वाक्यं बृहदारण्यके पञ्चमप्रपाठके । अथ य एतानिति वाक्यं छान्दोग्ये सप्तमे प्रपाठके पठितम् । **तथे**ति । छान्दोग्ये सप्तमे प्रपाठके प्राणसंवादः । **वाजसनेयिन** इति । बृहदारण्यके पञ्चमे प्रपाठके तमपि पञ्चमं पठन्तीत्यर्थः । एतदधिकरण-

वाजसनेयिनस्तु तमपि पञ्चमं पठन्ति । अपरञ्च । अथर्वोपनिषत्सु क्वचिद्गोकुलवृन्दाकाननसञ्चरद्गोपरूपमनल्पकल्पद्रुमप्रसूनविरचितविचित्रस्थलीककालिन्दीसलिलकल्लोलसङ्गिमृदुतरपवनचलदलकविराजमानगण्डमण्डलद्युतिमण्डितकुण्डलप्रभानुभावितवामांसमिलन्मूर्धन्यमहामणिकमुरलिकामुखावलीमिलदतितरलकरकमलयुगलाङ्गुलीवशंवदविविधस्वरमूर्च्छनामोहितव्रजवरनितम्बिनीकदम्बकटाक्षकुवलयार्चितं, क्वचित् कोदण्डमण्डितभुजदण्डखण्डितप्रचण्डदशमुण्डमतिविचित्रचरित्राभिरामं रामस्वरूपं, क्वचिदतिकरालवदनवित्रासितकमलाकमलासनवृषभासनादिकं नृकेसरिरूपं, क्वचिदुरुक्रमादिरूपं च निरूप्यते । तथा च द्रव्यदेवताभेदाद्यागभेदवद्धर्माणामावापोद्वापाभ्यां दृष्टादृष्टफलभेदाच्च

विषयमाहुः **अपरंचेति** । **अथर्वोपनिषदिति** । **गोकुलेत्यादिकुवलयार्चितमित्यनेन** श्रीकृष्णस्वरूपं, **क्वचिदि**त्यादिना **रामस्वरूप**मित्यन्तेन श्रीरामं, **क्वचिदि**त्यादिना **नृकेसरिरूपं, उरुक्रमादिरूप**मिति विष्णोर्नु कमिति मन्त्रोक्तमिति शेषः । आदिपदग्राह्यं श्वेताश्वतरोक्तनारायणरूप शिवादिरूपं च गृह्यते । चकारेण विभूतीयं संगृह्यते ।

एवं विषयमुक्त्वा संशयमाहुः **तथा चेति** । **यागभेदवदिति** । पूर्वमीमांसायामामिक्षाधिकरणे वैश्वदेव्यामिक्षा भवति । वाजिभ्यो वाजिनमित्यत्र यथा आमिक्षा वाजिनं च **द्रव्य**द्वयं विश्वदेवा •वाजिनश्चेति देवताद्वयं श्रूयते इति द्रव्यदेवताभेदाद् यागभेदः तथात्रापीत्यर्थः । **धर्माणामिति** । मुरलीकोदण्डधरत्वादिप्रापञ्चिकानां तद्विलक्षणानां सदेकरसत्वादिरूपधर्माणामित्यर्थः । **आवापोद्वापाभ्यामिति** । प्रापञ्चिकाना**मावापेन** संग्रहेण **दृष्टं** तत्पदप्राप्तिरूपं फलं सदेकरसत्वादीना**मुद्वापेन** त्यागेना**दृष्टं** ब्रह्मभावरूपं फलं

वेद्यभेदे प्राप्ते ब्रह्मानेकत्वापत्तौ श्रुतिविरोधाद्विनिगमकाभावात् सर्वेषामुपासनाविषयाणामब्रह्मत्वमापतितम्। ननूपासनाविषयाणामौपाधिकत्वात्तेषाञ्चाविद्याकल्पितत्वात्तद्विशिष्टानां तथात्वं युक्तमेव । न चैवं तन्निरूपकाणां वेदान्तानामब्रह्मपरत्वप्रसङ्गः । शुद्धस्य ब्रह्मणो दुर्ज्ञेयत्वेनोपाधिविशिष्टोपासनया चित्तशुद्धौ सत्यां स्वत एव तज्ज्ञानं भविष्यतीत्येतत्तात्पर्यकत्वादितिचेत्, मैवम् । समन्वयविरोधापत्तेः, तासां ब्रह्मविद्यात्वहानेश्च, श्रुतेः प्रतारकत्वापत्तेश्च । अपरञ्च । " योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चौरेणात्मापहारिणा " (महा. १२. २२१. २७) इत्यन्यथाज्ञानं निन्दन्ती श्रुतिः कथं फलसाधक-

---

जायत इति फलभेदाद्‌ज्ञेयभेदे प्राप्त इत्यर्थः । नन्वस्तु किं तावतेत्यत: प्राहुः **ब्रह्मानेकत्वेति** । **श्रुतिविरोधादिति** । एकमेवाद्वितीयमिति श्रुतिविरोधादित्यर्थः । **विनिगमकेति** । उपास्यरूपेषु किं ब्रह्म किन्नेति विनिगमकाभावादित्यर्थः । तथा च सर्वेषामब्रह्मत्वं कि वा यागवद् ब्रह्मभेदः अथवा एकमेवेति संशयः ।

पूर्वपक्षमाहुः **नन्विति** । उपासना च शास्त्रप्राप्ता चिन्तापरपर्याया सविषयकज्ञानरूपा मनोवृत्तिस्त**द्विषयाणां** नानाधर्माणामौपाधिकत्वेनाविद्याकल्पितत्वमतस्तद्विशिष्टस्याब्रह्मत्वं युक्तमित्यर्थः । नन्वेवं चेद्वेदान्तानां ब्रह्मपरत्वं त्वन्मते न स्यादितिपूर्वपक्षिणमाक्षिपति **न चेति**। पूर्वपक्षी निवारयति **शुद्धस्येति। मैवमिति** । सर्वे वेदा यत्पदमामनन्तीति श्रुतिप्रामाण्यात् सर्वेषां वेदान्तवाक्यानामस्थूलमनणु इत्यादीनां विरुद्धधर्माश्रयब्रह्मणि तात्पर्यात् तद्विरोधापत्तेः । **तासामिति** । उपासनाविषयाणां ब्रह्मपरत्वाभावे ब्रह्मविद्यात्वहानेश्चेत्यर्थः । **श्रुतेरिति** । प्रतारकत्वमेवाहुः **अपरंचेति** । तत **उपासना-**

त्वेन तत्तदुपासनां वदेत् । स्पष्टार्थानां श्रुतिवाक्यानां निर्णयमकृत्वा सन्दिग्धार्थानां ज्योतिराकाशादिशब्दानां तद्वाचकत्वं न निर्णये-द्भगवान् व्यासः । एवञ्च सत्युक्तरीत्या यागवत्तेषां परस्परं भेदश्चा-वश्यक इत्युभयतःपाशारज्जुरिति प्राप्ते अभिधीयते

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥१॥ (३.३.१)

सर्ववेदान्तप्रत्ययम् । अनेकरूपनिरूपकैः सर्ववेदान्तैः प्रत्ययो ज्ञानं यस्य तत्तथा । ब्रह्मणोऽनन्तरूपत्वेपि यानि रूपाणि विविधै-र्जीवैरुपासितुं शक्यानि तानि तानि रूपाणि तैस्तैर्वेदान्तैर्निरूप्यन्त इति तावद्रूपात्मकमेव ब्रह्मेत्यर्थः । तत्र हेतुः **चोदनाद्यविशेषादिति** । चोद्यते कर्तव्यत्वेन बोध्यतेऽनेनेति चोदना विधिवाक्यमितियावत् । तस्याविशेषादित्यर्थः । यथैकस्मिन्नग्निष्टोमे शाखाभेदेऽपि चोदना तथैव भवति "अग्निष्टोमेन यजेत" (आप. श्रौत. १०. २. १) इति तथेहापि सर्वेषु वेदान्तेषु ब्रह्मत्वेनैवोपासना विधीयत इति तथा ।

मिति । उपाधिविशिष्टोपासनामित्यर्थः । अन्यदप्याहुः **स्पष्टार्थानामिति** । **तद्वाचकत्व** ब्रह्मवाचकत्वम् स्वकीयं मतमाहुः **एवं चेति** । **यागवदिति** । आमिक्षावाजिनयागवदित्यर्थः । **उभयत** इति । भेदस्यावश्यकत्वेऽभेदश्रुति-विरोधः । अनावश्यकत्व एकदेशमतवद्रूपाणामविद्याकल्पितत्वापत्त्या उभय-थापि दोष इत्यर्थः । समाधानमाहुः **अभिधीयत** इति । **अनेकेति** व्यधि-करणपदो बहुव्रीहिः । **प्रत्यय** इति । विश्वासजनकं ज्ञानमित्यर्थः ।

इदमेव विशदयन्ति **ब्रह्मण** इति । हेतुं व्याकुर्वन्ति **चोद्यत** इति । **यथेति** । **इहापीत्यस्याभिप्रायं** कथयन्ति **सर्वेष्विति** । आदिपदग्राह्यं

आदिपदात् साक्षात्परम्पराभेदेन मोक्षफलकत्वकथनमप्युपासनानामविशिष्टमिति प्रयोजनसंयोगः सङ्गृह्यते ॥ १ ॥

भेदान्नेति चेदेकस्यामपि ॥ २ ॥

ननु द्रव्यदेवताभेदाद्यागभेदवदुपास्यानां धर्मभेदेन मिथोभेदादुक्तहेत्वसिद्धिं **भेदान्नेति चे**दित्यनेनाशङ्क्य तत्परिहारमाह सूत्रकार **एकस्यामपी**तिसूत्रावयवेन । यथैकस्यामपि गृहीतषोडशिकायामतिरात्रव्यक्तावगृहीतषोडशिकायाः सकाशाद्गुणाधिक्येऽपि नातिरात्रभिन्नयागत्वम् । अतिरात्रलक्षणकर्मैवाधिकृत्य तत्तद्ग्रहणाग्रहणयोर्विधानात् । एवमिहापि ब्रह्मैवाधिकृत्य तत्तद्धर्मवैशिष्ट्यावैशिष्ट्ययोरुक्तत्वान्न ब्रह्मोपासनभिन्नत्वमुपासनासु । तथा च ब्रह्मधर्मत्वेनाभेदस्य विवक्षितत्वात्त्वदुक्तहेत्वसिद्धिः । एवं सति यत्रैकस्मिन्नुपास्ये

विशदयन्ति **आदिपदादि**ति । तथा च चोदना च आदिश्च तत्समाहारश्चोदनादिः, तस्याः **अविशेषः** समानत्वं चोदनाद्यविशेषः तस्मादित्यर्थः ॥ १ ॥

भेदान्नेति चेदेकस्यामपीति पाठान्तरम् । (०चेन्नैक० इति विवरणसूत्रपाठः) । सूत्रं व्याकुर्वन्ति **नन्विति** । आग्नेयोऽष्टाकपालः पुरोडाशो भवति । **यागवदि**ति । सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः इत्यादौ पुरोडाशचरुभेदाद् अग्निसूर्यरूपदेवताभेदाच्च यागभेदवदित्यर्थः । **हेत्वसिद्धिमि**ति । रूपभेदाद् हेतोरेकदेशाभावस्वरूपासिद्धिमित्यर्थः । **एवमिहापी**ति । अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीत्यादौ उभयथा अतिरात्रो एक एवमिहापीत्यर्थः । सिद्धमाहुः **तथा चे**ति । वेद्याभेदस्य । तथा च क्वचित् शङ्खचक्रादिधरं क्वचिद्वेणुधरं ध्यायेदित्यत्र धर्मभेदेऽपि धर्म्यैक्यमितिभावः ।

त्वदुक्तेति । त्वदुक्तस्य भेदरूपहेतोरित्यर्थः । एवं च गुणोपसंहारे पर्यवसानमाहुः **एवं सती**ति । बोधैक्ये सतीत्यर्थः । **उपसंहार** इति । उप समीपे

रूपे अन्यस्माद्रूपादधिका गुणा उच्यन्ते तत्र तेषामुपसंहार उचित इतिभावः। अत्रायं विशेषो ज्ञेयः। उपासनाविषयेष्वखिलेष्वविशिष्टं ब्रह्मत्वं ज्ञात्वा तेष्वेकतरं रूपं य उपास्ते तस्य तत्र सर्वे गुणा उपसंहर्तुमुचिताः। यस्त्वनन्तेषु विभूतिरूपेषु ओमित्यक्षरादिषु "ओमित्येतदक्षरं ब्रह्म" (कठ. २. १५. १६.) इति ज्ञात्वोपास्ते तस्य शाखान्तरीया अप्येतदक्षरोपासनप्रकरणोक्ता एवोपसंहर्तव्या नान्ये। तद्रूपमधिकृत्यैव तेषां गुणानां कथनात्। अन्यथा-

---

संहारः संहरणम्। तथा च तत्र प्रोक्ताना धर्माणां हेतुबलादावाप इत्यर्थः। आवापो नाम तत्तद्वाक्योक्ताना गुणानामेतद्वाक्योक्ते विषये सत्तामनुसंधाय विषयीकरणम्। एतच्चाग्रे न वा विशेषादित्यत्र वक्ष्यते। नन्वेवं चेत् प्राणविद्यायां ब्रह्मत्वेनोपासनाया अभावेन वेद्यस्यैक्याभावात् कथं निर्णय इत्यतः सर्वत्रैवायं निर्णय इत्याशयेनाहुः **अत्रेति**। **अत्र** गुणोपसंहारे **विशेषः** वक्ष्यमाणरूपो **ज्ञेयः**, प्रयोजकभेदबलादिति शेषः। **अखिलेषु** अवतारूपेषु। **अविशिष्टं** तुल्यमित्यर्थः। **ज्ञात्वा** वेदान्तवाक्यैरवधार्य वस्त्वित्यर्थः। **अन्यथेति**। प्रकरणास्वीकारे प्रकरणविरोधप्रसंगादित्यर्थः। ननु उपासनावत् ब्रह्मप्राप्तिसाधनत्वेन विवक्षितभक्तिनिर्णयोऽप्यपेक्षित इत्यत आहुः **भक्तीति**। **अग्रे** न वा प्रकरणभेदादित्यस्य द्वितीयव्याख्याने। अत एव गोपालतापनीये भक्तिरस्य भजनं, तच्चेहामुत्रोपाधिनैराश्येनामुष्मिन् सेवया मनःकल्पनं, इदमेव नैष्कर्म्यमित्युच्यते। तं ध्यायेत्तं रसेत्तं भजेदिति समाप्तौ कथनेन ध्यानरूपोपासनातो भक्तिविधानस्य भिन्नत्वेनोक्तम्। श्रुतौ एकस्मिन्नेव प्रकरणे माहात्म्यं प्रियत्वं चोक्तम्। तेन च माहात्म्यज्ञानपूर्वकसुदृढस्नेहरूपभक्तावेव तस्यास्तात्पर्यमित्यवगम्यते। न चेह विहिताविहितभेदाद्भक्तेर्द्वैविध्यमुक्तमिति

तिप्रसङ्गात् । इयं तूपासनामार्गीया व्यवस्थोक्ता । भक्तिमार्गीया त्वेतद्विलक्षणा । साग्रे वाच्येति ॥ २ ॥

नन्वग्निष्टोममेवोद्दिश्य यावन्तो धर्मास्तैत्तिरीयके पठ्यन्ते न तावन्तो वाजसनेयके । तथा च त्वदुक्तरीत्या वाजसनेयिनां तद्धर्मोपसंहारोऽपि न्याय्यो भवेत् । न त्वेवं सः । शिष्टाचारादिविरोधात् । पञ्चाग्निविद्यामेवाधिकृत्योक्तोऽपि षष्ठोऽग्निर्न छन्दोगैः शक्यत उपसंहर्तुम् । तथैवाथर्वणिकैर्नैकस्मिन् रूपे रूपान्तरधर्मा इति प्राप्त उत्तरं पठति

स्वाध्यायस्य तथात्वेन समाचारोऽधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥

स्वाध्यायो वेदः । स एकमेव कर्म शाखाभेदेन भिन्नभिन्नप्रकारकं बोधयतीति तत्प्रयुक्तः सम्यग्भूतेऽग्निष्टोमादिलक्षण आचारे तत्तदङ्गाचारनियमोऽन्यूनानधिककरणलक्षण इत्यर्थः । तावद्भिरेवा-

---

कस्य व्यवस्था उच्यत इतिवाच्यम् । नन्दादीनामविहितभक्त्यापि सिद्धिकथनेनोभयोरपि व्यवस्थेतिहृदयम् ॥ २ ॥

अग्रिमं सूत्रमवतारयन्ति **नन्विति**। **त्वदुक्तरीत्येति** । एकस्मिन्नुपास्ये अधिकगुणोपसंहाररीत्या । **तद्धर्मोपसंहारोपीति** । तैत्तिरीयशाखोक्तधर्मोपसंहारोपीत्यर्थः । स्थलान्तरेप्याहुः **तथेति** । तथा च रूपान्तरस्य धर्मोपसंहार उचितो न भवतीति भावः । **उत्तरमिति** । उपसंहारे शिष्टाचारविरोधः, तदभावे वैदिकसाधन न संभवतीतिशङ्कायामुत्तरं पठन्तीत्यर्थः । सूत्रार्थमाहुः **स्वाध्याय** इति । **तत्प्रयुक्त** इति । **नियम** इत्यग्रेणान्वयः ।

ङ्गैर्योगसम्पत्तेरधिककरणस्याप्रयोजकत्वात्तावतामेवाङ्गानां करणम्। ननूक्तं तद्धर्माणामप्युपसंहारस्त्वदुक्तरीत्या सम्भवतीत्यत आह अधिकारादिति। सर्वेषां शाखिनां स्वस्वशाखोक्तकर्मण्येवाधिकारो न परशाखोक्तेऽप्यतोऽपि तथा नियमः। चकारात् स्वशाखोक्तात् कर्मणोऽतिरिक्ततत्करणे च "यदस्य कर्मणः" (आप. श्रौत. ३. १२. १.) इत्यादिप्रायश्चित्तश्रवणमपि तन्नियमे हेतुः समुच्चीयते। अत एव क्वचित् परशाखोक्तमपि व्यवस्थितविकल्पविषयत्वेन कल्पसूत्र उच्यते। विकल्पे तूभयस्याशास्त्रार्थत्वमुपसंहारे तूभयस्यापि शास्त्रार्थत्वमतोऽपि नात्रोपसंहारशङ्का। अत्र दृष्टान्तमाह सववदिति। यथा सवा होमाः सप्तसूर्यादयः शतौदनपर्यन्ता वेदान्तरोदितत्रेताग्न्यनभिसम्बन्धादाथर्वणोदितैकाग्निसम्बन्धाच्चाथर्वणिकानामेव कार्यत्वेन नियम्यन्ते, तथा तत्तच्छाखायास्तथात्वात् तत्तदुक्त एव कर्मणि तत्तच्छाखिनामधिकाराच्च स्वस्वशाखोक्तादन्यूनानतिरिक्तकर्मकरणनियम इत्यर्थः। प्रकृतेऽपि यद्रूपोपासनाप्रकरणे यावन्तो

नियमे बीजमाहुः तावद्भिरिति। अत्रोपष्टम्भकमाहुः अत एवेति। व्यवस्थितेति। उदिते जुहोति अनुदिते जुहोतीतिवाक्यद्वयं तैत्तिरीयशाखोक्तम्। तथा चादितहोमिभिरनुदिते सूर्ये होमो न कर्तव्यः। एवमपरैरपीत्येव व्यवस्था कल्पसूत्र उच्यत इत्यर्थः। ननु प्रकृते किमायातमत आहुः विकल्पेति। अशास्त्रार्थत्वमिति। विकल्पस्याष्टदोषग्रस्तत्वादिति भावः। शास्त्रार्थत्वमिति। उपसंहारे उभयस्य शास्त्रार्थत्वेपि कर्तुं न शक्यत इति भावः। सवशब्दस्य होमवाचकत्वं स्वीकृत्याहुः होमा इति। अनेन कर्मणि उपसंहारबाधकमुक्त्वा उपासनायामपि ग्राजयति प्रकृतेपीत्यादिना।

धर्मा उक्तास्तस्मिन् रूपे तावद्धर्मवत्त्वेनैवोपासना कार्या, तद्बोधकप्रमाणानुरोधाद्, न तु रूपान्तरोपासनप्रकरणोक्ता साधारणधर्मत्वेनापि। तथा सति मत्स्योपासकस्य चापशरादिकमपि भावनीयं स्यात्। पुरुषरूपोपासकस्य च लक्षयोजनायामशृङ्गादिकम्। नन्वाथर्वणोपनिषत्सु श्रीरामोपासनायां "यो वै ये मत्स्यकूर्माद्यवतारा भूर्भुवःसुवस्तस्मै वै नमो नमः" (रामता. ५.) इतिवाक्येन तदितरावताररूपत्वमुच्यते। तेन तद्धर्मवत्त्वमप्याक्षिप्यते। सत्यमाक्षिप्यते तद्धर्मवत्त्वम्। तत्रायमभिसन्धिः। परमकाष्ठापन्नं ब्रह्मस्वरूपमिदमिति ज्ञात्वा ह्युपासना कार्या। तेनैतस्यैवान्येऽवतारास्तत्तद्रूपेण तानि तानि कर्माण्ययमेव कृतवानिति ज्ञेयं परम्। न तु तस्मिन्नेव रूपेऽन्यावतारधर्मवत्त्वमपीति। तथा च तस्मिंस्तस्मिन्नवतारे तत्तद्धर्मवानिति श्रुत्या बोध्यते न तु सर्वत्रेति। तत्र बाधकमुक्तमेव। प्राणाद्युपासनास्वेतावान् विशेषः। यथा कर्मण्यतिरेके प्रायश्चित्तश्रवणं

तथा सतीति। रूपान्तरासाधारणधर्मोपसंहारे स्वीकृते सति। **चापेति**। श्रीरामचन्द्रधर्ममितिशेषः। **शृङ्गादिकमिति**। श्रीमत्स्यावतारधर्ममित्यर्थः। तत्तद्धर्मविशिष्टस्यैवोपासने त्वयं नियमो न स्वीकर्तव्य इति शङ्कते **नन्विति**। समाधानमाहुः **सत्यमिति**। **कार्येति**। विधिविहितत्वादितिशेषः। अन्यावतारधर्माभावनहेतुमाहुः **तथा चेति**। **श्रुत्येति**। अथर्वणवेदेनेत्यर्थः। सर्वत्र तत्राभावे श्रुत्येति क्रमस्तुक्त एव। अन्यदपि बाधकमाहुः **तत्रेति**। कर्मकाण्डे अग्निष्टोमादिषु तच्छाखीयेतिकर्तव्यतानियमभङ्गरूपवाचकभिया तथा स्वीक्रियते, एवमुपासनायामपि तथा स्वीकार्यमित्यर्थः। ननु शाखान्तरोक्तगुणानामन्यशाखोक्ते कर्मणि उपासनायामुपसंहाराभावे

बाधकं श्रीरामस्वरूपाद्युपासनासु च तेनावतारेणाकृतकर्मणस्तत्र भावनेऽपराधो बाधको, "योऽन्यथा सन्तमात्मानम्" (महा. १२. २२१. २७.) इत्यादिवाक्यं च। न तथा प्राणाद्युपासनास्वधिकगुणस्येतरत्रोपसंहारे किञ्चिद्बाधकं दृश्यत इति स कर्तुं शक्यत इति। ननु पुरुषादिरूपस्य विग्रहस्यैव शुद्धब्रह्मत्वादयमेवावतारान्तरेष्वपि लीलाकर्तेतिज्ञानमनुपपन्नमिति चेत्, मैवम्। धर्मिग्राहकमानेनैकस्यैव शुद्धस्यैवानन्तरूपत्वेन सिद्धत्वात्। वस्तुन एव तथात्वान्न काचिच्छङ्का। यथैकस्यैवान्योन्याभावस्यानन्तभावप्रतियोगिकतद्रूपत्वं तावत्प्रतियोगिकात्यन्ताभावरूपत्वं चाभावप्रतियोगिकान्योन्याभावात्यन्ताभावरूप-

---

प्राणाद्युपासने शाखान्तरोक्तगुणोपसंहारो न स्यादित्यत आहुः **प्राणादी**ति। यथा कर्मणि अतिरेकः, उपासनायां चान्यथाभावं न बाधकं तथा प्राणादौ बाधकाभावात् अधिकंत्वित्यादिन्यायेन उपसंहारः कर्तव्य इत्यर्थः। शङ्कते **नन्वि**ति। **अवतारान्तरेष्वि**ति। मत्स्याद्यवतारान्तरेष्वित्यर्थः। **अनुपपन्नमि**ति। योन्यथासंतमितिवाक्यादिबाधकसत्त्वादित्यर्थः। समादधते **मैवमि**ति। **धर्मी**ति। यदेकमव्यक्तमनन्तरूपमिति धर्मिग्राहकमानेनेत्यर्थः। **तथात्वादि**ति। विरुद्धधर्माश्रयत्वेन सर्वाकारत्वादित्यर्थः।

अत्र दृष्टान्तमाहुः **यथे**ति। **तद्रूपत्वमि**ति। अनन्तानां घटान्योन्याभावादीनामन्योन्याभावरूपत्वमित्यर्थः। **तावत्प्रतियोगिके**ति। घटप्रतियोगिकात्यन्ताभावाघटप्रतियोगिकात्यन्ताभावेषु अत्यन्ताभावो घटो नेति प्रतिपाद्य प्रतियोगिकान्योन्याभावसत्त्वात्। मीमांसकानां मते अभावस्याधिकरणरूपत्वेन नैयायिकानां मते च अभावाधिकरणकाभावस्याधिकरणस्वरूपत्वेन च घटादिप्रतियोगिकात्यन्ताभावस्वरूपत्वमन्योन्याभावस्य निर्विचारमित्यर्थः। **भावप्रतियोगिके**ति। भावो घटस्तत्प्रतियोगिको योऽन्योन्याभावस्तद्रूपत्व-

त्वं च भावरूपत्वेप्यभावरूपत्वमेव चाङ्गीक्रियते तथेहाप्यस्तु। अभावत्वस्याप्रयोजकत्वात्। धर्मिग्राहकमानस्यैव तथात्वात्। तच्च तैत्तिरीयोपनिषत्सु "अतः परं नान्यदणीयस ऌहि परात् परं यन्महतो महान्तं। यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात्॥" (तैत्ति. महा. १. ५.) इत्यादिश्रुतिरूपं प्रसिद्धमेव। अपरञ्च। सर्वासामुपासनानां हि ब्रह्मविज्ञानसाधनत्वेन श्रुतौ निरूपणं क्रियते। यत्प्रकारिकोपासना विज्ञानहेतुः स प्रकारश्च निरूप्यते। एवं सत्येकस्यां शाखायां कतिपयगुणनिरूपणं तदितरस्यां शाखायां तदतिरिक्तानामपि गुणानामित्यत्र को हेतुरिति पृच्छामः। उपसंहारेण प्राप्तिमनिरूपणे हेतुं चेद्ब्रवीषि तत्र वदामः। एवं सति

मन्योन्याभावस्येति पूर्वेणान्वयः। एव च घटभेदाभावरूपत्वमन्योन्याभावस्य बोधः। ननु घटभेदाभावस्य घटत्वस्वरूपत्वेन तत्र विद्यमानस्य अन्योन्याभावस्य न तत्स्वरूपत्वमभावाधिकरणकत्वाभावादत आहुः **भावाभावेति**। भावो घटत्वतद्रूपो योऽन्योन्याभावः। **तद्रूपत्वेपि** घटरूपत्वेपीति यावत्।

एवं घटत्वं घटो नेति प्रतीत्यान्योन्याभावस्य घटत्ववृत्तित्वेपि न घटत्वरूपत्वमभावाधिकरणकाभावस्यैवाधिकरणस्वरूपादत आहुः **अभावरूपत्वमेवेति**। तथा च घटान्योन्याभावाभावस्यातिरिक्तमेव मीमांसकानां मते। एवं च तद्वृत्तिघटान्योन्याभावस्य तत्स्वरूपत्वमेव अभावप्रतियोगिकाभावाधिकरणकाभावादिकरणस्वरूपत्वादित्यर्थः। एवं चान्योन्याभावस्य घटान्योन्याभावाभावस्वरूपत्वं बोध्यम्। ननु रूपान्तरेणायमेव लीलाकर्तेतिज्ञाने अयमेव रूपान्तरधर्मवानितिज्ञाने को दोष इत्याशङ्काया सर्वं विशदयन्ति **अपरं चेति**। **विज्ञानहेतुरिति**। विज्ञानहेतुरित्यर्थः। **निरूप्यते** तत्तच्छाखायामितिशेषः। **पृच्छाम** इत्यत्र **उपसंहारेणेति**।

न्यूनगुणनिरूपिका श्रुतिः स्वोक्तानपि गुणान् न वदेत् । तथा हि । उपासनानां ब्रह्मविज्ञानफलकत्वस्य निर्णीतत्वात्तस्य चैकजातीयत्वाद् घटवत्क्लृप्ताशेषसाधनसाध्यत्वादशेषतन्निरूपिकैव श्रुतिर्निरूपयेत् । अन्या तूपासनाया नामोक्त्वा 'उपासीत' इत्येतावदेव वदेत् । गुणानाक्षेपलभ्यत्वान्न वदेत् । उपसंहार्यानपि वा वदेत् । निरूपयति च गुणान्, नोपसंहार्यान् । न च स्वस्वशाखामात्राध्येतॄणामुपासनासिद्ध्यर्थं सर्वशाखासूपासनप्रकारोक्तिरिति वाच्यम् । परशाखाऽज्ञानेन तदुक्तगुणोपसंहारस्याप्यसम्भवेनोपासनाया एवासम्भवापातात् । तस्मात् स्वस्वशाखोक्तप्रकारिकोपासनायामेव सर्वेषामधिकारात्तयैव ब्रह्मविज्ञानं भवति । तैत्तिरीयाणां वाजसनेयिप्रभृतीनां चाग्निष्टोमसम्पत्त्या स्वर्ग इव ब्रह्मैक्यात्तत्तद्विज्ञानं ब्रह्मविज्ञानमेव । न

उत्तरं समीचीनं न भवतीत्याशयेनाहुः **तत्र वदाम** इति । **गुणानिति** । न्यूनगुणानित्यर्थः । इदमेव विशदयन्ति **तथा हीति** । **तस्य चेति** । ब्रह्मज्ञानस्य सर्वगुणोपसंहारेणैकजातीयत्वादित्यर्थः । **घटवदिति** । यथा सर्वसाधनसत्त्वे एव घटोत्पत्तिः, एवं सर्वगुणानुसधाने एव ज्ञानोत्पत्तिरित्यर्थः । **तन्निरूपिकैवेति** । गुणनिरूपकैवेत्यर्थः । **निरूपयेदिति** । ता तामुपासनां निरूपयेदित्यर्थः । **अन्या त्विति** । न्यूनगुणनिरूपिका श्रुतिरित्यर्थः । **आक्षेपेति** । गुणैर्विना उपासनाया असिद्धेरित्यनुपपत्त्या आक्षेप इत्यर्थः । आक्षेपानङ्गीकारे त्वाहुः **उपसंहार्यानिति** । श्रुतितात्पर्यान्तरमाशङ्कते **न चेति** । **मात्र**पदेन शाखान्तराध्ययनव्यवच्छेदः ।

उत्तरमाहुः **परेति** । सर्वशाखोक्तगुणोपसंहार एवोपासनाप्रयोजकमितितव मतमितिभावः । उपसहरन्ति **तस्मादिति** । अत्र दृष्टान्तमाह **तैत्तिरीयाणामिति** । **संपत्त्येति** । स्वस्वशाखोक्तकर्मणा यागसंपत्त्या यथा स्वर्गस्तथोपास-

हि रूपरसगन्धादिमत्यां भुवि पुरुषभेदेनैकस्यैव चैकैकप्रकारकं यद्भूज्ञानं न तद्भूज्ञानम्। एतेनानन्तधर्मवत्त्वं ब्रह्मणि ज्ञापितम्। तदुक्तं "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" (श्वे. ६. ८.) इति। अत्र "स्वाभाविकी" इतिविशेषणादविद्याकल्पितत्वं शक्तीनां निरस्तम्।

केचित्त्वाथर्वणिकानां विद्यां प्रति शिरोव्रतापेक्षणादन्येषां तदनपेक्षणाद्विद्याभेद इति प्राप्त उच्यते स्वाध्यायस्यैव धर्मो न विद्यायाः। कथमिदमवगम्यते। यतस्तथात्वेन स्वाध्यायधर्मत्वेन **समाचारे** वेदव्रतोपदेशनपरे ग्रन्थ आथर्वणिका इदमपि वेदव्रतत्वेन समामनन्ति। "नैतदचीर्णव्रतोऽधीते" (मुण्ड. ३. २.

नाया ब्रह्मज्ञानमित्यर्थः। **तत्तद्विज्ञानमिति**। स्वस्वशाखोक्तगुणविशिष्टताज्ञानमित्यर्थः। अत्र दृष्टान्तमाहुः **नहीति**। **न तद्भूज्ञानमिति**। न हीतिपूर्वेणान्वयः। एवं च भूज्ञानमस्तीति भावः। **एतेनेति**। तथा च गुणानामनन्तत्वात् सर्वोपसंहारेण ज्ञानाभावादुपासना न सिद्ध्येदित्येतदर्थं तत्तच्छाखोक्तं गुणविशिष्टोपासनायाः फलेन भविष्यतीतिभावः। भगवतोऽनन्तगुणसत्त्वे प्रमाणमाहुः **तदुक्तमिति**।

स्वोक्तसूत्रव्याख्याने संशयं दूरीकर्तुं परोक्तं व्याख्यानं खण्डयितुमनुवदन्ति **केचित्त्विति** सूत्रार्थं वदन्तीत्यन्तेन। **शिरोव्रतेति**। तैत्तिरीये द्वितीयाष्टके अनुवाकचतुष्टयं कारीरीयागविधायकमस्ति। तत्रत्यकारीरीवाक्यान्यधीयानास्तैत्तिरीया भूमौ भोजनमाचरन्ति नान्ये इत्याद्यनेकं विद्याभेदसाधकमित्यर्थः। **उच्यत** इति। सूत्रकार (रैः) इतिशेषः। स्वाध्यायस्य अध्ययनस्य विद्यायाः, न कर्मविधायकविद्यायाः। **अत्रोपष्टम्भमाहुः**

११.) इति च'धिकृतविषयाद् 'एतद्' शब्दाद् 'अध्ययन' शब्दाच्च स्वोपनिषदध्ययनधर्म एवैष इति निर्धार्यते । तस्मादनवद्यं विद्यैकत्वमितिसूत्रार्थं वदन्ति ।

स चिन्त्यते । नह्यस्य विद्याधर्मभेदकम् । उक्तन्यायेनान्यत्रापि तदुपसंहारस्य वक्तुं शक्यत्वात् । न चानुपसंहारार्थमेवातद्धर्मत्वं बोध्यत इति वाच्यम् । उपक्रमोपसंहाराभ्यां विद्यैकत्वनिर्णयस्यैव दृश्यमानत्वादुपेक्ष्य इव भाति । ननु तदुक्तिर्यथा तथास्तु, अतद्धर्मत्वबोधनस्यानुपसंहारार्थकत्वे कानुपपत्तिरिति चेत्, उच्यते । सूत्रस्य तदुक्तार्थकत्वे हि तत्तात्पर्यकल्पना । स एव च न साधीयान् ।

कथमिति । **विद्यैकत्वमिति** । विद्याया अध्ययने व्रतभेदः कर्मविधायकविद्याभेदसूचको न भवतीति भावः ।

अयं सूत्रकाराभिप्रायो न भवतीत्याहुः **स चिन्त्यत** इति । **हि** यस्मात्कारणात् अतः शिरोव्रतस्य विद्याभेदकं नेतिपूर्वेणान्वयः । तथा च विद्याभेदक चेत् इदं व्रतं अध्ययनस्य तु विद्याया इति वक्तव्यम् । तदेव नास्तीतिभावः । **उक्तन्यायेनेति** । चोदनाद्यविशेषादितिसूत्रेण ब्रह्मविद्याया एकत्वं तु सिद्धमेव । तत्र शिरोव्रतस्य प्राणाद्युपासनायां रेतःप्रभृते अधिकं तु प्रविष्टमिति न्यायेनेव ब्रह्मविद्यासु उपसंहारस्य वक्तुं शक्यत्वादित्यर्थः । तथा विद्याभेदकत्वं तस्य नास्तीति भावः । पुनराशङ्कते **न चेति** । तथा चोपसंहार एव नास्तीतिभावः । समाधानमाहुः **उपक्रमेति** । अधिकरणस्येतिशेषः । तथा च विद्याभेदस्तु नास्त्येव । अयं विचारस्तु अजागलस्तनायमान इव भातीति भावः । पुनः शङ्कते **नन्विति** । **बोधनस्येति** । शिरोव्रतमध्ययनधर्मः, न तु विद्याधर्म इति बोधनस्य इत्यर्थः । समाधानमाहुः **उच्यते** इति । **तात्पर्यकल्पना** शिरोव्रतोपदेशतात्पर्यकल्पना । **सूत्रस्य** तथा अर्थ एव न भवतीति भावः ।

तथा हि " स्वाध्यायोऽध्येतव्यः " (तै. आर. २. १५.) इत्यादिषु स्वाध्यायशब्दस्य वेदवाचकत्वं प्रसिद्धम् । समाचारशब्दस्य विहितक्रियावाचकत्वं च । तत्रोभयोरपि मुख्योऽर्थो बाध्यते । तस्मिन् सम्भवति तद्बाधस्त्वयुक्तः । किञ्चैवं " नन्वग्निष्टोममेवोद्दिश्य " इत्यादिनोक्ताशङ्काया अनिवृत्तिरिति ।

नन्वाथर्वणोपनिषत्सु पठ्यते " स होवाचाब्जयोनिः योऽवताराणां मध्ये श्रेष्ठोवतारः को भविता येन लोकास्तुष्टा देवास्तुष्टा भवन्ति, यं स्मृत्वा मुक्ता अस्मात् संसाराद्भवन्ति, कथं चास्यावतारस्य ब्रह्मता भवति स होवाच तꣳहि नारायणो देवः " (गोपाल. ता. १.) इत्युपक्रम्य मथुरास्वरूपं निरूप्य निगद्यते " यत्रासौ संस्थितः कृष्णः स्त्रीभिः शक्त्या समाहितः " (गोपाल. ता. २.) इति । तेनास्यावतारस्याशेषावताराणां मध्ये श्रैष्ठ्यं निरूप्यते । श्रीभागवतेऽपि च " एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् " (भाग. १. ३. २८.) इति गीयते । पूर्वोक्तरीत्या

तदेव विशदयन्ति **तथा** **ही**त्यादिना । दूषणान्तरमाहुः **किञ्चे**ति । **अनिवृत्तिरि**ति । उक्तरीत्या । उपसंहारस्यावश्यकत्वे शाखान्तरीये कर्मणि विद्यायां च शाखान्तरीयतद्धर्मस्य अवतारान्तरे धर्मस्य प्राप्तिरित्याशङ्कायाः पूर्वोक्ताया **अनिवृत्तिरि**त्यर्थः । एतावता रूपान्तरगुणानुपसंहारे रूपभेदस्य नियामकत्वमुक्तम् । इदानीं रूपभेदनार्थं तत्तद्भेदरूपं निरूपयितुं पूर्वपक्षमाहुः **नन्विति** । स्पष्टार्थेयमुपनिषत् ।

पुराणवाक्यमुदाहरन्ति **श्रीभागवते**ति । पूर्वपक्षयाशयमाहुः **पूर्वोक्ते**ति । यदेकमव्यक्तमनन्तरूपमितिरीत्येत्यर्थः । तथा चोपनिषदि श्रीकृष्णस्य श्रैष्ठ्यं

तु सर्वतुल्यता प्रतीयत इति नैकतरनिर्धारः सम्भवति। किञ्च, ब्रह्मणो निरवयवत्वेनैकस्यांशित्वमन्येषां तदंशत्वमित्यपि वक्तुमशक्यमिति प्राप्ते अभिधीयते।

" सत्त्वं यस्य प्रिया मूर्तिः " (भाग. १०. ८६. १५.) " विशुद्धसत्त्वं तव धाम शान्तम् " (भाग. १०. २४. ४.) इत्यादिवाक्यैरप्राकृतो भगवत्स्थानभूतः सत्त्वनामा भगवद्धर्मरूप एव कश्चनास्ति। यादृशेन रूपेण भगवान् कार्यं कर्तुमिच्छति तादृग्रूपं तं प्रकटीकृत्य तस्मिन् स्वयमाविर्भूयायःपिण्डे वह्निवत् तत्तत्कार्याणि करोति यस्मिन् यस्मिन्नवतारे स सोंऽश इत्युच्यते। तत्र हि विग्रहस्तत्राविर्भूतं ब्रह्मस्वरूपं च प्रतीयते। विग्रहस्य सत्त्वात्मकत्वेन धर्मरूपत्वात् तत्राविर्भूतस्यैव ब्रह्मत्वात् समुदितस्यावतार-

---

यदेकमितिश्रुतौ अनन्तरूपत्वं प्रतिपादितमितिविशेषः। ब्रह्मणः निष्कलत्वेन निरवयत्वेनाशांशिभावोऽपि न संगच्छते इति एकतरनिर्द्धारासंभवात् तद्धर्मोपसंहारचिन्ताया अनुपयोगात् पूर्वोक्तपूर्वपक्षस्य भवन्मतेऽपि तादवस्थ्यान्मतान्तरीयं व्याख्यानं समीचीनमिति पूर्वपक्ष्याशयः।

समाधानमाहुः **अभिधीयते** इति। **अप्राकृत** इति। सत्त्वरजस्तमसां प्रकृतिगुणानां मध्ये यः सत्त्वगुणः तदन्यत इत्यर्थः। **सत्त्वनामेति**। इदमेव विशुद्ध सत्त्वमित्युच्युते। तच्च द्रव्यस्वरूपं स्वसत्ताभासकं द्रव्यं त्रिगुणाद्विलक्षणमित्युक्तम् सत्वरूपधर्मेणाशान् साधयन्ति **यादृशेनेति**। ननु अयःपिण्डवह्निरेव तत्त्वं सत्यमितियधमत्रांशत्वत आहुः **तत्र हीति**। यतो देवाशत्वमिति यः विग्रहः स सत्त्वं तत्राविर्भूतं ब्रह्म तस्यैवाशत्वमुच्यत इत्यर्थः। सत्त्वात्मके शरीरे अलौकिकतेजसः सर्वदा संक्रमः अवतारः। कार्यकाले संक्रमः आवेशः

त्वेन गणनात् तत्रैकस्यैवांशस्य तद्रूपत्वं यत् तदेवांशत्वं, यत्राधिष्ठानमनपेक्ष्य स्वयमेव शुद्धं साकारं ब्रह्माविर्भवति भक्तार्थं स स्वयं पूर्णो भगवानुच्यते। एतदेव च 'श्रैष्ठ्यम्' अत एव सर्वतः पाणिपादान्तत्वं स्वस्मिन् स्फुटं ज्ञापयितुं तोकादिभावेनाविर्बभूव। तेन यादृग्यादृग्लीलाविशिष्टं यद्यद्बाल्यपौगण्डाद्यवस्थाविशिष्टं तत्तद्रूपं नित्यमेवेति वयं जानीमः। न चैवं सच्चिदानन्दविग्रहोक्तिः सर्वं विरुद्धा भवेदिति वाच्यम्। सत्त्वस्यापि भगवद्धर्मत्वेन सच्चिदानन्दरूपत्वादविरोधात्। मन्त्राद्यधिष्ठानरूपाणि तु विभूतिरूपाणि। एतच्च यथा तथा भक्तिहंसे प्रपञ्चितम्। तत्त्वं च "प्रकाशाश्रयवद्वा तेजस्त्वात्" (ब्रह्म. सू. ३. २. २८) इतिन्यायेन भगवद्धर्माणामपि सच्चिदानन्दरूपत्वाद्धीनाधिकारिणामप्युपासकानां फलप्रेप्सूनां तत्तत्फलदानार्थमैश्वर्यादिरूपेण तत्र तत्र स्थितत्वमेव। नन्वेकस्यैव

इति **निबन्धे** स्पष्टम्। श्रेष्ठत्वबोधनार्थं केवलं ब्रह्मस्वरूपमाहुः **यत्राधिष्ठान**मिति। **अत एवे**ति। आविर्भूतस्य साकारब्रह्मत्वादेव तोकादितिवत्सापहरणे रासे एकमौहूर्तिकनानास्त्रीवाहे नारदपरीक्षाया च तोकप्रौढराजभावेन बहुधा प्राकट्यादिदमेव मूले रूपतत्त्वमिति ज्ञायत इत्यर्थः। सिद्धमाहुः **तेने**ति। तोकादिभावे जृम्भाव्यादानादिलीलाप्रदर्शनेन।

आशङ्कते **न चे**ति। एवं सत्याधिष्ठानत्वे **सर्वत्र** सर्वावतारेषु। समाधानमाहुः **सत्त्वस्यापी**ति। तथा च अधिष्ठानस्यापि सच्चिदानन्दस्वरूपत्वादितिभावः। विभूतीनां व्यवस्थामाहुः **मन्त्रादी**ति। **प्रपञ्चितमि**ति। श्रीगोस्वामिकृत**भक्तिहंसविवरणेपि** प्रपञ्चितं ज्ञेयम्। विभूतीनां स्वरूपमाहुः **तत्त्वमि**ति। **तत्र तत्र** उद्गीथादिरूपेषु। एवं रूपत्रयविभागे शङ्कते **नन्वि**ति।

शुद्धस्यैवानन्तरूपत्वं भवतैवोक्तमतो मत्स्यादिरूपेष्वपि नाधिष्ठानत्वेन सत्त्वं वक्तुं शक्यम्, किञ्चैवं निराकारस्वभावत्वं ब्रह्मणः सिध्यतीति सत्त्वाव्यवहितप्राकट्योक्तिरप्यनुपपन्नेति चेत्, मैवम्। सत्त्वाधिष्ठानत्वस्य प्रमाणसिद्धत्वेनानपोद्यत्वात्। तच्चोक्तं "यदेकमव्यक्तम्" (महाना. उ. १. ५) इत्यादि। प्राकट्यं हि भक्तिनिमित्तकम्। सा तु बहुविधेति तदनुरूपं प्राकट्यमपि तथा। सर्गादिकार्येष्वधिकृतानां भक्तानामितरासक्तिरप्यस्तीत्युपाध्यन्तरितस्नेहवत्त्वाच्चानन्तरूपत्वेन मत्स्यादिरूपोऽपि तदर्थं तव्द्यवहित एव प्रकटीभवति। ये तु भगवत्स्वरूपमात्रासक्तास्तदर्थं स्वयमेवातव्द्यवधानेन प्रादुर्भवति। एतेनैव निराकारत्वशङ्कापि निरस्ता। एतेन सोपधिस्नेहवदर्थमेव मत्स्यादिरूपप्राकट्यस्य प्रमाणसिद्धत्वान्निरुपधितद्वदर्थमेव श्रीव्रजनाथप्राकट्यस्यापि तथात्वात् सोपधिस्नेहवत्स्वपि पुरुषार्थदान-

---

किञ्चैवमिति। एवं सत्त्वस्याधिष्ठानत्वेन साकारत्वे। **सत्त्वाव्यवहितेति**। सत्वाधिष्ठानत्वेत्यर्थः। समाधानमाहुः **मैवमिति**। प्रमाणमाहुः **तच्चोक्तमिति**। कुत्र कथं प्राकट्यमित्याशङ्कायामाहुः **प्राकट्ये हीति**। तथा च भक्तिप्रभेदाद्रूपभेद इति भावः।

ननु भक्तिभेदः कथं ज्ञातव्य इत्यत आहुः **सर्गेत्यादि प्रादुर्भवतीत्यन्तेन**। **एतेनैवेति**। तथा च प्रपंञ्चवैलक्षण्यस्य पूर्वपादान्ते उक्तत्वात् लौकिकाकाराराहित्येनैव निराकारत्वं न तु यथावदाकारशून्यत्वं ब्रह्मण इत्यवगन्तव्यम्। इदानीं श्रीकृष्णे श्रैष्ठ्यमन्यत्र तदभावं चाहुः **एतेन सोपधीति**। **अवसीयते** इत्येनेनान्वयः। **तथात्वादिति**। गोपालतापनीयप्रमाणसिद्धत्वात्। ननु कृष्णे सोपधिस्नेहवतां कथमित्यत आहुः **सोपधिस्नेहवत्स्विति**। अवन्तीमथुराद्वारकास्थेष्वित्यर्थः। निरुपाधिस्नेहवतामाहुः

स्यानुषङ्गिकत्वात् " पुरुषविधः " (तै.) इतिश्रुतेश्चैतदेव रूपम् । " रसो वै सः " (तै. २. ७) इत्यादिश्रुतिप्रतिपाद्यं निरूपधिस्नेहवतां विषयः । इदमेव च श्रेष्ठ्यम् । मत्स्यादिरूपं तु सोपधितद्वतामेव तथा । तादृक्तद्वतामर्थ एव प्राकट्यादित्यवसीयते । एवं सति गुणभेदस्याप्रयोजकत्वात् सर्ववेदान्तप्रत्ययत्वं ब्रह्मणो निष्प्रत्यूहम् ॥ ३ ॥

दर्शयति च ॥ ४ ॥

वेद्यैकत्वेन विद्यानामेकत्वं श्रुतिर्दर्शयति " सर्वे वेदा यत्पदमामनन्ति " (कठ. २. १५.) इत्यादिना । उपासनाप्रकारभेदेनोपास्यभेददर्शने दोषं च दर्शयति " यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते; अथ तस्य भयं भवति " (तै. २. ७. १.) इति । 'उत्' इत्यव्ययमप्यर्थकम् । तथा च 'अरम्' अल्पमपि 'अन्तरं कुरुते' इत्यर्थः ॥ ४ ॥

पुरुषेति । तैत्तिरीय आनन्दमयनिरूपणे स वा एष पुरुषविध एवेत्यादिनोक्तम् । **इदमेवे**ति । अधिष्ठानव्यवहितकेवलानन्दमयतया मुख्याधिकारिप्रश्नविषयत्वमित्यर्थः । **अवसीयते** श्रुतिस्मृतिपुराणेषु तथाविधोक्त्या निश्चीयते । सिद्धमाहुः **गुणभेदस्ये**ति । तत्तद्रूपगुणभेदस्य वेद्यभेदाप्रयोजकत्वादित्यर्थः ॥३॥

अधिकरणान्तरमाहुः **दर्शयति चे**ति । सूत्रार्थमाहुः **वेद्यैकत्वेने**ति । प्रमाणमाहुः **सर्वे**ति । दोषे तैत्तिरीयवाक्यं सप्रमाणमाहुः **यदे**ति । **उदि**ति । **एतस्मिन्नुदर**मित्यत्र उत् अरमितिपदच्छेदः । **उदि**ति अव्ययमप्यर्थकं, **अर**मित्यल्पार्थकम् । तथा चार्थमाहुः **तथा चे**ति । अत्र शंकराचार्यरामानुजमतविचारः प्रकाशेऽनुसंधेयः । विस्तरभयाद्विरम्यते ॥ ४ ॥

ननु पूर्वसूत्रोक्तरीत्या गुणोपसंहारो न क्वचिदपि प्राप्तावसर इति सिद्धम् । दृश्यते चोपसंहारः श्रीरामोपनिषत्सु " यो वै ये मत्स्यकूर्माद्यवताराः " (रामो. ता. ५.) इत्यादिनोक्तावतार-रूपत्वस्य श्रीरामे " नमस्ते रघुवर्याय रावणान्तकराय च " (भाग. ४०. २०) इत्यादिषु 'ते' इति युष्मच्छब्दविषये श्रीव्रजनाथे रघुवर्यत्वादेरित्याशङ्क्य तत्प्रयोजकं रूपमाह उपसंहार इत्यादिना ।

उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॥ ५ ॥

उक्तस्थलादिषु य **उपसंहारः** स त्वर्थस्य पदार्थस्य भगवल्लक्षणस्योभयत्राप्य**भेदा**दित्यर्थः । नन्वेवं सति मत्स्ये शरचापादिकं पुरुषे च शृङ्गादिकं भावनीयं स्यादिति चेत् तत्राह **विधिशेष-**

सूत्रमवतारयन्ति **नन्विति** । **उक्तरीत्येति** । कर्मकाण्डे अग्निष्टोमादौ तैत्तिरीयाणां वाजसनेयिकर्मधर्मोपसंहारो नास्ति । एवमुपासनाकाण्ड एकस्मिन् रूपे रूपान्तरधर्मोपसंहारो नास्तीतिरीत्येत्यर्थः । पूर्वपक्षी वदति **दृश्यते** इति । **रघुवर्यत्वादेरिति** । **दृश्यते** इति । **उपनिषत्सु** तापनीये । **उक्तावतार-रूपत्वस्य** मत्स्यावताररूपत्वस्य **श्रीरामे**नुपसंहारो दृश्यते इतिपूर्वेणान्वयः । एवं श्रुतौ उक्त्वा पुराणे श्रीभागवते अक्रूरस्तुतावप्याह **नमस्ते** । **रघुवर्यत्वादेरिति** पूर्वेणान्वयः । **आशङ्क्य** पूर्वसूत्रोक्तसङ्ग्रह न भवतीत्याशङ्क्येत्यर्थः । **तत्प्रयोजकमिति** । उपसंहारप्रयोजकमित्यर्थः । **उक्तस्थलेति** । रामतापनीये अभेदादितिस्तुत्यारम्भे अक्रूरस्य भगवति परब्रह्मत्वेन ज्ञानमुक्तम् । तथा चोभयत्राप्यभेदज्ञानादुपसंहारः कार्य इत्यर्थः ।

अत्र पूर्वोक्तमाशङ्कते **नन्विति** । **भावनीयमिति** । इदमुपलक्षणम् । अग्निहोत्रादिषु सर्वशाखोक्तधर्मकरणापत्तिः स्यादिति सूत्रांशव्याख्यानेना-

वदिति । यथा विधिशेषाणामग्निहोत्रत्वादिलक्षणे धर्मे समानेपि सति स्वस्वशाखोक्तप्रकारकस्यैव करणं नान्यशाखोक्तधर्मोपसंहारः, एवमिहापि तत्तदवतारोपासकस्य तत्तदसाधारणधर्मवत्त्वेनैवोपासनं नान्यावतारधर्मत्वेनापीत्यर्थः । यद्वा मत्वर्थीयो वत्प्रत्ययोऽत्र । तथा च विधिशेषोऽर्थवादस्तद्वत्समानं च भवति यत्तत्र चोपसंहार इत्यर्थः । अत्रैवं ज्ञेयम् । एकस्यां श्रुतौ यस्य कर्मणो यत् फलमुच्यत तदितरस्यां तस्यां तस्यैव कर्मणस्तदितरत् फलमुच्यते । एवं सति द्वितीयश्रुत्युक्तफलकामनयापि तदेव कर्म कर्तव्यं भवतीति तत्फलसाधकत्वस्योपसंहारः । यथा " यद् वैश्वदेवेन यजते प्रजा एव तद् यजमानः सृजते "

शङ्कां निवर्तयन्ति यथेति । अग्निहोत्रं जुहुयात्स्वर्गकाम इतिविधिः । तस्यशेषाणा विद्युदसीत्यारभ्य वृष्टिरसीत्यन्तानामपि होत्रादीनां कर्मणामित्यर्थः । समानेऽपीति । अग्निहोत्रत्वं सर्वशाखोक्ताग्निहोत्रहोमे वर्तते इति भावः । परं त्वाचरणं भिन्नभिन्नमित्याहुः स्वस्वेति । एवमिहापि उपासानामपीत्यर्थः । तथा च श्रीरामे तत्तदवतारत्वमस्तु परंतु उदासकैर्यत्कर्तव्यं तदाहुः तत्तदिति । सुबोधिनीमाश्रित्य व्याख्यानान्तरमाहुः यद्वेति । मत्वर्थीय इति । विधिशेषवानित्यर्थः । सर्वार्थवाद इत्याहुः तथाचेति ।

इदमेव विशदयन्ति अत्रैवमित्यादिना । तत्फलसाधकत्वस्येति । इतरश्रुत्युक्तफलान्तरसाधकत्वस्य पूर्वश्रुत्युक्तकर्मणि उपसंहारः कार्य इत्यर्थः । अत्रोदाहरणमाहुः यथेति । इदं श्रुतिद्वयं तैत्तिरीयब्राह्मणप्रथमकाण्डे पठितम् । तत्र चातुर्मास्यनामकयागे प्रथमपर्व वैश्वदेवाख्यं कर्म तस्य फलद्वयं बोधितं, तत्रोत्तरफलस्याप्युपसंहारो विहितो यथा तथा उपासायामपि यत्र

(तै. ब्रा. १. ४. ११.) इत्येका श्रुतिरस्य यागस्य प्रजाफलकत्वमाह । " यद् वैश्वदेवेन यजते अग्निमेव तत् संवत्सरमाप्नोति तस्माद्वैश्वदेवेन यजमानः संवत्सरीणाꣳ स्वस्तिमाशास्त इत्याशासीत " (तै. ब्रा. १. ४. ११.) इति द्वितीया श्रुतिराह तत्रोक्तरीतिरिति ।

यत्तु विधिशेषाणामग्निहोत्रादिधर्माणां तदेवैकमग्निहोत्रादिकर्म सर्वत्रेत्यर्थाभेदादुपसंहार इति, तन्न साधु । अग्निहोत्रादेस्तत्तच्छाखिनां स्वस्वशाखोक्तप्रकारस्यैव करणादतिरेके प्रायश्चित्तश्रवणान्नान्यशाखोक्तधर्मोपसंहारः शक्यवचनः । प्राणाद्युपासनास्वधिकगुणस्येतरत्रोपसंहारे न किञ्चिद्बाधकं दृश्यत इति तत्र स कर्तुं शक्यत इति चकारेण तदादयः सङ्गृह्यन्ते । वस्तुतस्तु पूर्वसमुच्चयार्थश्चकारः । शाखान्तरोक्तधर्मोपसंहारप्रयोजनाभावस्य " स्वाध्यायस्य तथात्वेन "

फलद्वयं श्रूयते **तत्रोक्तरीति**रित्यर्थः । वस्त्वभेदेऽपि ब्रह्मरूपेण भावेन निरूपणप्रकारो बाधक इति उक्तशङ्कानिवृत्तिः । तत्तद्रूपेण भावेनानुपसंहारो नास्ति । फलद्वयेप्युपसंहारः कार्य इति सर्वं सुस्थम् ।

परोक्तं व्याख्यानमाहुः **यत्त्विति** । दूषयन्ति **तन्नसाध्विति** । स तु प्राणादिविद्यासु पञ्चमस्येतरतः षष्ठस्याग्रे उपसंहारो न स्यादत आहुः **प्राणादीति** । न **किञ्चिदिति** । प्रायश्चित्तश्रवणादिकमित्यर्थः । **वस्तुतस्त्विति** । **पूर्वसमुच्चयार्थ** इति । पूर्वोक्तस्यार्थभेदस्यैव समुच्चयार्थ इत्यर्थः । तथा चेतादृश्या आशङ्कायाः ससमाचारसूत्रविचारादेव निवृत्तिरितिभावः । ननु पूर्वपादे

(ब्र. सू. ३. ३. ३.) इत्यत्र निरूपितत्वादुपसंहारबीजमनेन सूत्रेणोक्तम् ॥ ५ ॥

अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ६ ॥

ननूपासनासूक्तन्यायेन गुणोपसंहारो ह्युपास्यानां ब्रह्मत्वेनैक्ये सति भवति। मिथोविरुद्धानां गुणानां शान्तत्वक्रूरत्वतपोभोगादीनामुपसंहारे क्रियमाणे स्वरूपाणामन्यथात्वमब्रह्मत्वं स्यादित्यर्थः। तत्र हेतुः शब्दादिति। एकत्वैकरसत्वादिधर्मनिरूपकश्रुतेरित्यर्थः। समाधत्ते **नाविशेषादिति**। एकरसत्वं यथा श्रुतिबलान्निर्णीयते तथा विरुद्धधर्मवत्त्वमपि तत **एव** तथेत्यर्थः। तेन वस्त्वेव तत् तादृङ्मन्तव्यमितिभावः ॥ ६ ॥

पूर्वसूत्रोक्ताशङ्कानिराकरणं वा विकल्पेन पूर्वोक्तात् प्रकारान्तरेण कर्तव्यमित्याह **न वेति**।

ब्रह्माभेदस्य सिद्धत्वान्न तत्साधकोपसंहारः स्यादत आहुः **शाखेति**। **बीजमिति**। उपसंहारे हेतुभूतं बाधकाभाववैशिष्ट्यं बीजमित्यर्थः ॥ ५ ॥

सूत्रांशेन बाधकमाशङ्कय परिहरति **नन्विति**। **क्रियमाणे इति**। **विरुद्ध**गुणोपसंहारे क्रियमाणे इत्यर्थः। **अन्यथात्वमिति**। एकरसनिवृत्तिरूपमन्यथात्वमित्यर्थः। तथा चार्थभेदरूपहेतोरभावादुपसंहारो न स्यादितिभावः। समाधानं व्याकुर्वन्ति **एकेति**। **तेनेति**। शब्दादेकत्वं शब्दादेव स्वेच्छया-बहुत्वमिति वस्त्वेव तादृगित्यर्थः। तथा च नोपसंहार इति भावः ॥ ६ ॥

पूर्वसूत्रेति। अन्यथात्वं शब्दादितिसूत्रोक्तेत्यर्थः। **वा** इत्यस्य **विवरणं** **विकल्पेनेति**। तस्यापि विवरणमाहुः **पूर्वोक्तादिति**। तथाचान्यथात्वं

न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् ॥ ७ ॥

तमेवाह **प्रकरणभेदादिति** । अत्रायं भावः । श्रुतिप्रामाण्याद्यावत्तदुक्तधर्मवद्ब्रह्मेति मन्तव्यम् । एवं सति यादृशोधिकारिणो यादृग् वेद्यं रूपं तादृशस्य तस्य तादृक् तन्निरूपयति प्रकरणभेदेन । तथा च ज्ञानप्रकरणे ज्ञानाधिकारिणो यादृग्रूपं ज्ञेयं तादृक् तस्मै निरूपयति " अदृश्यमग्राह्यम् " (मुण्ड. १. १. ६.) इत्यादिरूपा श्रुतिः । भक्तिप्रकरणे तु भक्तेर्बहुविधत्वाद् यादृग्यादृग्भक्तानां यादृग् यादृक् तदनुभवविषयस्तादृक्तादृक् तन्निरूपयत्याथर्वणोपनिषदिति । अत्र दृष्टान्तमाह **परोवरीयस्त्वादिवदिति** । " अस्मिन् मे लोकेर्द्धुकं स्यात् " (तै. सं. ६. २. ३.) इति कामवत आराग्रावान्तरदीक्षा पूर्वमुक्ता । तदग्रे " परोवरीयसीमवान्तरदीक्षा-

---

प्रकरणभेदाद्वा नेतिसूत्रे योजना । सूत्रस्थहेतुं व्याकुर्वन्ति **अत्रेति** । **उपनिषदित्यन्तेन** । **तथा चेति** । अपि संराधने इति सूत्रे ज्ञानप्रसादेनेति श्रुत्या अदृश्येति निष्कलदर्शनं ज्ञानाधिकारिणां, अर्जुनादीनां भक्तानां तु अनेकबाहूदरेतिस्मृत्या तद्दर्शनं निरूप(य)तीत्यर्थः । **अत्रेति** । विनिगमकं दृष्टान्तमाहेत्यर्थः । **अस्मिन्मे** लोकेति । इदं वाक्यं षष्ठाष्टके तैत्तिरीयद्वितीये प्रपाठके तृतीयानुवाके पठितम् । तथा हि । आराग्रामवान्तरदीक्षामुपेयाद्यः कामयेतास्मिन् मे लोकेर्धुकं स्यादित्येकमग्रेथ द्वावथ त्रीनथ चतुर एषा वा आराग्रावान्तरदीक्षाऽस्मिन्नेवास्मै लोकेर्धुकं भवति ।

एतदग्रे यत्पठितं वाक्यं तदाहुः **परोवरीयसीति**। अत्र **विद्यारण्यभाष्यं**–बलीवर्दप्रतोदनं लोहमारं तद्वदल्पं मुखं यस्याः सा आराग्रा । एतादृशी अवान्तरदीक्षा प्रथमदिने एकस्तनपयःपानं, एवं रीत्या दिनचतुष्टयेन वृद्धिः।

मुपेयाद्यः कामयेतामुष्मिन् मे लोकेर्द्धुकं स्यादिति चतुरोऽग्रेऽथ त्रीनथ द्वावथैकमेषा वै परोवरीयस्यवान्तरदीक्षा " (तै. सं. ६. २. ३.) इति पठितम् । अस्य दीक्षाप्रकरणे पठितत्वाद्दीक्षां विनोक्तरीत्या व्रते तु न परोवरीयस्त्वमेवं भक्तिप्रकरणीयानामाथर्वणोपनिषदाद्युक्तरूपाणां न भक्तिरहितोपास्यत्वम् । ज्ञानसाधानत्वेन विष्णुस्मरणादावपि क्रियमाणे भक्तित्वं नेति ।

अथवा पूर्वसूत्रेण सर्वरूपेषु मिथः सर्वधर्माणामुपसंहारः प्राप्तः । स चैकान्तिकभक्तानुभवविरुद्ध इत्यत्र व्यवस्थितविकल्पमाह न वेत्यादिना । सर्वेष्ववतारेषु भगवदवतारत्वेन साधारणी भक्तिर्यस्य स सर्वत्रोपसंहारं करोतु नाम । यस्य त्वेकान्ती तस्य स्नेहोत्कर्षेणान्तःकरणमेकस्मिन्नेव रूपे पर्यवसितमिति रूपान्तरमन्तःकरणारूढं न भवत्येवेति नोपसंहारसम्भावनापीति तदेतदुच्यते न वेत्यनेन । तत्र हेतुः **प्रकरणभेदादिति** । श्रुत्यादिषु तत्तदधिकारिणमुद्दिश्य

अत्रास्मिन् लोके आर्धुकं समृद्धिशीलं, अग्रे परोवरीयसि तत्र प्रथमदिने चत्वारः स्तनाः, अग्रे न्यूनाः, परः श्रेष्ठ उपक्रमो दशमो यस्याः सा परोवरीयसीत्येवं श्रुत्यर्थः । अस्याः श्रुतेः प्रकृते योजनां कुर्वन्ति **अस्येति । अस्य व्रतस्य । पठितत्वादिति** । ज्योतिष्टोमे दीक्षाप्रकरणे पठितत्वादित्यर्थः । **उक्तरीत्येति** । प्रथमदिने एकस्तनपयःपानमितिरीत्येत्यर्थः ।

पूर्वसूत्रेणाशङ्कानिवृत्तिर्जायत इति सूत्रव्यर्थता स्यादित्येतदर्थं व्याख्यानान्तरमाहुः **अथवेति** । व्यवस्थामाहुः **सर्वेष्ववतारेष्विति । तदेतदिति** । एतद् व्यवस्थितं विकल्पनं तत्र व्यवस्थायामुत्कृष्टोधिकारोऽनुपसंहारे हेतुरिति ।

तत्तत्प्रकरणमुक्तम् । तेनात्र प्रकरणभेदेनाधिकार उच्यते । एवं सत्युपासकादिभ्य उत्करीत्योत्कृष्टाधिकारादित्यर्थः सम्पद्यते । **परोवरीयस्त्वादिवदिति** । परस्मात् परश्च वराच्च वरीयानिति परोवरीयानुद्गीथः । तथा चाक्ष्यादित्यादिगतहिरण्यश्मश्रुत्वादिगुणविशिष्टोपासनाया अप्युद्गीथोपासनत्वेन साम्येपि सर्वोत्कृष्टत्वेनात्रोद्गीथो भासत इति न हिरण्यश्मश्रुत्वादिगुणोपसंहारः परोवरीयस्त्वगुणविशिष्टोद्गीथोपासनायामेवं प्रकृतेपीति ॥ ७ ॥

संज्ञातश्चेत् तदुक्तमस्ति तु तदपि ॥ ८ ॥

एकान्त्यनेकान्तिनोरपि श्रीरामोपासकत्वादिसंज्ञा त्वविशिष्टेत्येकान्तिनोप्युपसंहारो युक्त इत्याशङ्कोत्तरं तु "न वा प्रकरणभेदात्" (ब्र. सू. ३. ३. ७.) इत्यनेनैवोक्तम् । संज्ञा तु लौकिकी, अधिकारस्त्वान्तरः, स एव बलीयानिति । संज्ञैकत्वस्य हेतोरन्वयव्य-

---

ज्ञापनाय दृष्टान्तं व्याकुर्वन्ति **परस्मादिति** । **उद्गीथ** इति । छान्दोग्यप्रथमप्रपाठके प्रवाहणेनोक्तं 'आकाशो ह्येवैभ्यो ज्यायान्' इति । **तथा चाक्ष्यात्येतदिति** उद्गीथोपासनायामेवाक्ष्यादित्यप्रतीकोपासनाप्युक्ता भासत इति । केवलोद्गीथोपासकस्येतिशेषः । **एवं प्रकृतेपीति** । एकान्तभक्तस्य स्वोपास्ये रूपान्तरगुणसत्त्वेपि ते उत्कृष्टा न भवन्तीति ज्ञानान्नोपसंहार इति प्रकृते मन्तव्यम् ॥ ७ ॥

पूर्वसूत्रोक्तां व्यवस्थां द्रढयितुं व्याकुर्वन्ति **एकान्तीति** । **संज्ञैकत्वस्येति** । रामोपासकत्वसंज्ञैकत्वस्येत्यर्थः । **प्रमितेति** । छान्दोग्योक्त-ओमित्येतदक्षरमुद्गीथमुपासीतेत्याद्यनेकभेदेष्वित्यर्थः । तथा चोपसंहारे क्रियमाणे

·भिचारमाह अस्ति तु तदपीति । प्रमितभेदेष्वप्युपासनेषु परोवरीयस्त्वादिषु संज्ञैकत्वमुद्गीथोपासनेष्यतीत्यर्थः ॥ ८ ॥

अथेदं विचार्यते । उपास्येषु रूपेषु बाल्यपौगण्डादिकमप्युच्यते । तथा सति विग्रहे न्यूनाधिकभाव आपततीति तत्रोक्तं सच्चिदानन्दत्वमनुपपन्नं स्यात् तेषां सदैकरूपत्वात् । प्राकृतत्वे च सर्वमसमञ्जसं स्यादिति प्राप्त आह व्याप्तेरिति ।

व्याप्तेश्च समञ्जसम् ॥ ९ ॥

" सर्वतः पाणिपादान्तम् " (श्वे. ३. ३६.) इत्यादिश्रुतेः साकारमेव व्यापकमिति । चकारात् " सर्वरसः " (छा. ३. १४. २.) इतिश्रुत्या रसात्मकत्वेन भक्तानां यादृग्रूपेण लीलारसानुभवस्तादृग्रूपं क्रमेण योगमायापसारणेन प्रकटीकरोतीति बाल्यादिभावोपपत्तेः सर्वमुपपन्नमित्यर्थः । तेन यावदुक्तधर्मवद्ब्रह्मेति सिद्धम् ॥ ९ ॥

विद्यायां वेद्यस्य चाभेदो नास्तीति । तत्रोपसंहार इति व्यवस्था(वि)भागो न भवतीति भावः । एतावता चतुःसूत्र्या उपसंहारोनुपसंहारौ निर्णीतौ ॥ ८ ॥

इदानीं ब्रह्मगतानेव धर्मान् विचारयतीति सूत्रमवतारयन्ति **अथेति** । **तेषां** सच्चिदानन्दानाम् । **प्राकृतत्वेति** । विग्रहस्येति । सूत्रार्थमाहुः **सर्वत** इत्यादिना । **योगमायेति** । सच्चिदानन्दावरणभूतयोगामायापसारणेनेत्यर्थः । गीतायामप्युक्तं " नाहं प्रकाशः सर्वस्य योगमायासमावृतः " इत्यादिना । **तेनेति** । बाल्यादिधर्मवच्छुद्धं **ब्रह्मेति सिद्धमित्यर्थः** ॥ ९ ॥

ननु ब्रह्मधर्मत्वेन ते सर्वे नित्या वाच्याः ते च तत्तद्भक्तविशिष्टाः तत्र चैकस्यैव भक्तस्य पौर्वापर्येणानेकलीलासम्बन्धित्वं श्रूयते। तथा च पूर्वलीलाया नित्यत्वेन तत्सम्बन्धिभक्तस्यापि तथात्वं वाच्यम्। एवं सति तस्यैवाग्रिमलीलासम्बन्धोशक्यवचनः। तथावचने तु पूर्वलीलाया नित्यत्वं भज्येत। नित्यत्वे त्वग्रिमलीलासम्बन्धिनो भिन्नत्वं स्यात्। तच्चानुभवतदावेदकमानविरुद्धमित्यत उत्तरं पठति

सर्वाभेदादन्यत्रेमे ॥ १० ॥

लीलामध्यपातिनां सर्वेषां पदार्थानां ब्रह्मणा सहाभेदाद्ब्रह्मणश्चैकत्वात् पूर्वलीलातोन्यत्रोत्तरलीलायामपीमे पूर्वलीलासम्बन्धिन

अग्रिमं सूत्रमवतारयन्ति **नन्विति**। **ते सर्वे** बाल्यादयः। **भक्तविशिष्टा** इति। तत्तद्भक्तानुभावनार्थत्वात्तत्क्रीडोपयोगिभक्तविशिष्टा इत्यर्थः। **तत्र** कृष्णोपनिषदीति। **श्रूयते**। सोवतीर्णो महीतले, वने वृन्दावने क्रीडन् गोपगोपीसुरैः सहेति तैः सह क्रीडाकथनात् श्रूयते इत्यर्थः। **तथात्वं** नित्यत्वम्। **एवं सति** लीलाभक्तयोर्नित्यत्वे सति। **तथा वचने** तु तस्यैवाग्रिमलीलासंबंधवचने तु। **भज्येतेति**। विरुद्धलीलाद्वयानुभवो युगपन्न संभवतीति अग्रिमानुरोधेन पूर्वलीलाया नित्यत्वं भज्येत इत्येवेर्थः। **नित्यत्वे** पूर्वस्या नित्यत्वे **संबन्धिन** इति। भक्तस्येतिशेषः। **तच्चेति**। **अनुभवविरुद्ध**मनेकलीलानुभवकर्तृभक्तैक्यावेदयन्मानं कृष्णोपनिषत्स्थ श्रुतिः, तद्विरुद्धमित्यर्थः।

सूत्रं व्याकुर्वन्ति **अभेदादिति**। कृष्णोपनिषत्सु श्रुतात् तस्मान्न भिन्ना एतास्ता आभिर्भिन्नो न वै विभुः। भूमावुत्तारितं सर्वं वैकुण्ठं स्वर्गवासिनाम्। इति वाक्यादभेदादित्यर्थः। ननु तथापि पूर्वाशङ्कानिवृत्तिर्न जातेत्यत **आहुः**

एव त इत्यर्थः । अत्रेदमाकूतम् । "रसो वै सः" (तै. २. ७.) इतिश्रुत्या "सर्वरसः" (छा. ३. १४. २.) इतिश्रुत्या च सर्वरसात्मकत्वं ब्रह्मणो निर्णीतम् । तथा च यस्य रसस्य ये विभावानुभावादिरूपास्तैः स रसः सम्पद्यते, आतानवितानात्मकतन्तुभिः पट इव । अतस्तत्तादात्म्यं रसस्येति सर्वाभेदो निःष्प्रत्यूह इति । ननु विरुद्धदिक्कयोरेकजातीयभाववतोर्भक्त्योरतिशयेन युगपदेकजातीयलीलासहितभगवत्प्रादुर्भावे भगवतो व्यापकत्वेनैवम्प्रादुर्भावस्योपपन्नत्वेपि लीलापदार्थानामव्यापकत्वाद्युगपदाविर्भावोनुपपन्नः । भक्तयोः समानत्वाद्भक्तिमार्गविरोधापाताद्विनिगमकाभावाच्चैकत्र मायया प्रदर्शयतीति च वक्तुं न युक्तमितिशङ्काप्येताभ्यां निरस्तेति ज्ञेयम् । ब्रह्मणो व्यापकत्वाल्लीलायाश्च तेन सहाभेदात् तथात्वादेकस्मै भक्ताय यथा ब्रह्मणा सह लीलापदार्था आविर्भवन्ति तथैव तदैवान्यत्रापि भक्तसमानदेश आविर्भवन्तीति सर्वसामञ्जस्यात् ॥ १० ॥

अत्रेदमिति । निर्णीतमिति । श्रुत्येति शेषः । अधिकं तु **प्रकाशाद**नुसन्धेयम् । तथा सर्वरसात्मकत्वे च **विभावा** इति । यमालम्ब्य रस उत्पद्यते स आलम्बनविभावः भक्ताः ये रसमुद्दीपयन्ति ते उद्दीपनविभावाः वसन्तादयः । अनुभावाः कटाक्षवेणुवादनादय इत्यर्थः । **तत्तादात्म्य**मिति ।तेषां विभावनादीनां तादात्म्यमित्यर्थः ।

अत्राशङ्कते **नन्वि**ति । **विरुद्धे**ति । **विरुद्धदिक्क**योः तौ विरुद्धदिक्कौ तयोः । **प्रादुर्भात्र** इति । विचार्यमाण इति । **शङ्का**लीलापदार्थनामव्यापकताशंका । **तथात्वा**दिति व्यापकत्वादित्यर्थः ॥ १० ॥

ननु व्यापकत्ववत् पूर्णानन्दैश्वर्यवीर्यादयोपि धर्मास्तेषु प्रतीता भवेयुः । न चैवमस्ति, दुःखसम्भावनायां प्रभुमेव प्रार्थयन्ति यतः । एवं सति व्यापकत्वमपि न वक्तुं शक्यं, तुल्यत्वात् । अत उत्तरं पठति

आनन्दादयः प्रधानस्य ॥ ११ ॥

पूर्णानन्दैश्वर्यादयः प्रधानस्य धर्मिणो ब्रह्मण एव धर्माः । लीलापदार्थास्तु ब्रह्मधर्मत्वेन व्यापका उच्यन्ते । व्यापकस्य धर्मिणोनागन्तुकधर्मस्य व्यापकत्वनियमात् । न हि धर्मेषु पूर्णानन्दत्वादयः सम्भवन्ति । धर्मित्वापत्त्या धर्मत्वव्याहतेः । **अत एवात्र प्रधानपद**मुपात्तं गुणभावेन लीलापदार्थानामाविर्भाव इति ज्ञापयितुम् ॥ ११ ॥

ननूपासकस्य प्रियत्वादिप्रकारकज्ञानक्रममादाय प्रियत्वादि-

उत्तरसूत्रमवतारयन्ति **नन्विति** । सूत्रं व्याकुर्वन्ति **पूर्णे**त्यादिना । **नियमादि**ति । आकाशस्य नित्यत्वात्तत्परिमाणरूपधर्मस्यापि नित्यत्वमिति रीत्या अन्यत्रापि स्पष्टं प्रतीयतेऽयं नियम इति मन्तव्यम् । स्वकीयार्थे व्यासाशयत्वं प्रकटयन्ति **अत एवे**ति । तथा च भक्तेषु गुणभावनिवृत्तिर्न जायते । कुतः । भगवद्दानेन तद्धर्मांशभूतानां भजनानन्दैश्वर्यादीनां तेषु प्राकट्यादिति मन्तव्यम् । इदं च **पुष्टिप्रवाहमर्यादायां** स्वरूपेणावतारेणेतिकारिकायां स्पष्टम् । एवं सूत्रत्रयेण भक्तिप्रकरणस्थभगवद्धर्मा विचारिताः ॥ ११ ॥

सूत्रमवतारयन्ति **नन्विति** । **उपासकस्ये**ति । ज्ञानमार्गीयस्येतिशेषः । **ज्ञानक्रममि**ति । श्रुतिवाक्यजन्यमन्नमयादारभ्यानन्दमयपर्यन्तज्ञानक्रम-

धर्माणां शिरस्त्वादिरूपत्वमानन्दमयाधिकरणे निरूपितमिति लीलास्थानामपि प्रियत्वादिज्ञानस्य सत्त्वादत्रापि स्वरूपोपासकस्य प्रियशिरस्त्वादिधर्माणामुपसंहारः कार्य इत्याशङ्क्य परिहरति प्रियशिरस्त्वाद्यप्राप्तिरिति ।

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥

चित्तशुद्धितारतम्यहेतुकप्रियत्वादिज्ञानं लीलास्थानां चित्तशुद्ध्यपेक्षाभावान्न सम्भवतीति न तेषामत्रोपसंहारः कार्य इत्यर्थः ।

अथवा नन्वानन्दमयोपासनामाथर्वणोपनिषदुक्तपञ्चरात्राद्यागमोक्तप्रकारेण कुर्वतः पुरुषरूपे पक्षाद्युपसंहारस्यायुक्तत्वादानन्दमयाधिकरणे तद्रूपस्यैवोक्तत्वात् पुरुषरूपः कथमानन्दमयः ? तथात्वे

मित्यर्थः । **निरूपितमिति** । केवलोपासकस्येतिशेषः । **स्वरूपोपासकस्येति** । भक्तिमार्गीयोपासकस्येत्यर्थः । **कार्य** इति । अधिकस्य तस्य श्रौतत्वे भावनाया दोषाभावात्कार्य इत्यर्थः । सूत्रं व्याकुर्वन्ति **चित्तशुद्धीति** । सूत्रार्थस्तु प्रधानपदं पूर्वसूत्रादनुवर्तते । एवं च चित्तशुद्धितारतम्येन भासमाने प्रधानस्थे **भेदे हि** यस्माद् **उपचयौ** मोदप्रमोदरूपौ आनन्दोपचयापचयौ इति । लीलास्थानां भक्तानां तु विशेषमाहुः **चित्तशुद्धिरिति** । पूर्वाधिकरणे तेषां ब्रह्मतादात्म्यप्रतिपादितत्वापेक्षाभावादित्यर्थः । सौत्राप्राप्तिपदस्यार्थमाहुः **न संभवतीति** । प्रियशिरस्त्वादीना प्राप्तिरेव न संभवतीत्यर्थः ।

उक्तपक्ष उपासनामार्गोक्तप्रकारः सम्यक्तया न निर्णीत इति प्रकारान्तरेणावतारयन्ति **अथवेति** । **कुर्वत** इति । उपासकस्येति शेषः । **उक्तत्वादिति** । पक्षरूपस्यैवोक्तत्वादित्यर्थः । तथा च तत्र पुरुषविध इत्युक्तं स्त्रीत्वनिराकरणार्थम् । अत एवंविधमित्युक्तमितिभावः । **तथात्वे** पक्षिरूपत्वे ।

वा कथं नोक्तोपसंहारः ? अपरञ्च । मोदप्रमोदयोरुपचितानुपचितानन्दरूपयोर्युगपत्सत्त्वेन देशभेदेन भिन्नत्वान्नित्यानन्दैकरसे ब्रह्मणि तादृग्रूपकथनमनुपपन्नमित्याशङ्क्य परिहरति **प्रियशिरस्त्वादीति**। यद्याथर्वणोपास्यात् प्रियशिरस्त्वादिविशिष्टस्य भेदः स्यात् तदा तदप्राप्तिः स्यात् न च तथेति प्रियशिरस्त्वादिकमुपासनामार्गीयस्याप्याथर्वणिकादेरुपसंहार्यमेवेत्यर्थः। चित्तशुद्धितारतम्यहेतुकं प्रियत्वादिज्ञानमितिपक्षे परोक्षवादपक्षेपि तत्र भेदाभावान्मोदप्रमोदयोर्न त्वदुक्तरूपत्वमित्यर्थः। ब्रह्मधर्मा एव भिन्ना इत्युपासनार्थं तानादाय शिरःपाण्यादि निरूप्यत इति तत्रैव निरूपितमस्माभिः। यद्यप्यानन्दमयाधिकरण एवास्यार्थस्योक्तत्वान्नेयं शङ्का सम्भवति तथापि

नोक्तेति पक्षादीत्यर्थः। अन्यामाशङ्कामाहुः **अपरं चेति**। **देशभेदेन** दक्षिणोत्तरभेदेन।

सूत्रार्थमाहुः **यदीति**। **न च तथेति**। न भेद इत्यर्थः। तथा च विरुद्धधर्माश्रयत्वे पुरुषरूपत्वस्य पक्षिरूपत्वस्य च सत्त्वात् पुरुषरूपे पक्षाद्युपसंहारो युक्त इति भावः। ननु मोदप्रमोदयोरुपचयापचयरूपत्वे भेदो वर्त्तत एवेत्यत आहुः **चित्तेति**। **प्रियत्वादिज्ञानमिति पक्षे** इति। मोदप्रमोदयोः परिनिष्ठितानन्दपक्षे इत्यर्थः। तथा चित्तशुद्धितारतम्यहेतुकत्वाद् ब्रह्मणि भेदो नास्तीतिभावः। आनन्दमयाधिकरणे वस्तुतस्त्वित्यादिनाभिहितपक्षमाहुः **परोक्षवादेति**। तत्र निरुपाधिप्रीतिरेव मुख्येतिनिरूपिते पक्ष इत्यर्थः। तथाष्टरसात्मके रूपे रसात्मका एव भावा हृदि स्फुरन्तीति मोदप्रमोदयोः रसरूपे ब्रह्मणि भेदाभावात् नोपचयापचयरूपत्वमिति। ननु तथापि प्रियादीनां शिरस्त्वादिभावनं विरुद्धमित्यनुपसंहार्यमित्यत आहुः **ब्रह्मेति**। **निरूपितमिति**। पुरश्चक्रे द्विपद इति श्रुतिविचारे

गुणोपसंहारप्रसङ्गे मिथ्यावादिन आपाततः शङ्का सम्भवतीत्याचार्येणोक्त्वा निरस्ता ।। १२ ॥

ननूपास्यरूपस्याविरुद्धा एव गुणा उपसंहर्तव्या न तु विरुद्धाः तथा च पुरुषरूपे पक्षादि विरुद्धमिति न तदुपसंहार्यमित्याशङ्क्याह

इतरे त्वर्थसामान्यात् ॥ १३ ॥

इतरे पुरुषरूपे विरुद्धत्वेन ये भासमाना धर्मास्तेऽप्युपसंहर्तव्याः। तत्र विरोधव्यवच्छेदज्ञापनाय तुशब्दः। तत्र हेतुरर्थसामान्यादिति। अर्थः पदार्थ आनन्दमयत्वलक्षणस्तस्य समानत्वादेकत्वादित्यर्थः ॥ १३ ॥

अथानन्दमयाधिकरण उक्तप्रकारेण ये प्रियत्वादिधर्मास्तेषामेवोपसंहारः कार्यो न तु पुरुषरूपे पक्षादीनामपीत्यग्रिमं पठति

आध्यानाय प्रयोजनाभावात् ॥ १४ ॥

आनन्दस्वरूपस्य यावन्तो धर्मा भक्तिमार्गीयाः परोक्षवादेनोच्यन्ते प्रियत्वप्राधान्यादयस्तेषां सर्वेषामाध्यानमासमन्ताद्ध्यानं

तस्मिन्नेव वर्णके निरूपितम्। एवं यथाधिकारं प्रियादिरूपेण भानात् ते अवयवा उपासनार्थमुपसंहार्याः, भक्तिमार्गेषु भेदज्ञानात्ते न तत्रोपसंहार्या इति मन्तव्यम्। **यद्यपीति**। **नेयमिति**। मोदादिविषयिणी ॥ १२ ॥

भक्तिमार्गे अनुपसंहारपक्षे हेतु वदन्ति इत्याशयेनावतारयन्ति **नन्विति**। सूत्रं व्याकुर्वन्ति **इतरे** इति। **तत्र** परस्वरूपे। **तत्र** उपसंहारे ॥ १३ ॥

भक्तिमार्गे परस्यैवोपास्यत्वेनोपसंहारस्यावश्यकत्वात् कुतो नोपसंहार इत्यत्र हेतुं वदन्तीत्याशयेनावतारणमाहुः **अथेति**। **उक्तेति**। पक्षोपपक्षवादप्रकरण-

तदर्थं ये धर्मा उपयुक्तास्त एवोपसंहर्तव्या नान्ये। तत्र हेतुः प्रयोजनाभावादिति। ध्यानपदार्थस्य तावद्भिरेव सिद्धेरधिकोपसंहारे तथात्वादित्यर्थः ॥ १४ ॥

अन्येषामुपसंहारे हेत्वन्तरमप्याह

आत्मशब्दाच्च ॥ १५ ॥

"प्रियमेव" (तै. २. ५.) इत्यादिना परोक्षवादेनोक्तानां प्रियप्राधान्यादीनामेव भावना कार्या न तु यथाश्रुतानां शिरःपक्षादीनां, तेषामविवक्षितत्वात्। अत्र हेतुरात्मशब्दादिति। "आनन्द आत्मा" (तै. २. ५.) इत्यनेन पूर्वोक्तानां प्रियप्राधान्यादीनां रसात्मकानामात्मा स्वरूपमानन्द इत्युक्तम्। अग्रे "रसो वै सः" (तै. २. ७.) इति वक्ष्यमाणत्वात् तस्य च स्थायिभावात्मकत्वात् तस्यैवानन्दमयत्वाच्च प्रियविषयकलीलामध्यपातिभक्तज्ञानप्रकाराणा-

---

कार्यं इत्यनेनान्वयः। सूत्रं व्याकुर्वन्ति **आनन्देति**। **ध्यानपदार्थस्य** इति। भक्तिमार्गः परोक्षवादेनेतिशेषः ॥ १४ ॥

सूत्रमवतारयन्ति **अन्येषामिति**। पक्षादीनामित्यर्थः। आत्मशब्दस्याकारे तात्पर्यं नास्ति किंत्वानन्द इत्यत्र किं प्रमाणमत आहुः **अग्र** इति। आनन्दमियविवरणे। **वक्ष्यमाणत्वादिति**। आत्मानं स्वयमकुरुतेत्यादिनेति। **तस्य** च रसस्य। **स्थायीति**। निरुपाख्यस्थायिभावात्मकरूपेत्यर्थः।

ननु श्रुतौ पक्षादिकथनं किमर्थमत आहुः **प्रियविषयेति**। मध्यपाती यो भक्तस्तस्य ज्ञाने इत्यर्थः। **तेषां** ज्ञानमार्गीयाणाम् **भाववती** तात्पर्यवती।

मपि रसात्मकत्वेनानन्दरूपत्वात् तेषामुपासना तूत्तमाधिकाराभावात् शिरःपक्षादिरूपेण कार्येतिभाववती श्रुतिस्तथा न्यरूपयत् । एतेन यत्परम्परासम्बन्धेप्युपास्यत्वं तदस्य महत्त्वं कियदवधि वाच्यमिति ज्ञाप्यते । एवं सत्युपासनामार्गीयोपास्यं विभूतिरूपं न तु मूलरूपं "यन्न योगेन" (भाग. ११. १२. ९.) इतिवाक्यादिति ज्ञेयम् ॥ १५ ॥ १ ॥

इति तृतीयाध्याये तृतीयपादे प्रथमं सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥

तैत्तिरीयकेऽन्नमयादिनिरूपणे पुरुषविधित्वं तेषां निरूप्य "तस्यैष एव शारीर आत्मा यः पूर्वस्य" (तै. २. ३.) इति सर्वत्र निगद्यते । तत्रानन्दमयपर्यन्तं शारीरात्मत्वकथनाद्भवति संशयः शरीराभिमानी जीव एव कश्चिदुत ब्रह्मैव । तत्र शारीर-

---

ननूभयोर्ब्रह्मपरत्वे तुल्ये अधिकारभेदः कथमित्यत आहुः **एतेनेति** । आनन्द-मयस्वरूपे एवात्मपदस्य तात्पर्येणेत्यर्थः । **परम्परासंबन्धेप्येति** । पक्षादि-विशिष्टानन्दमयस्योपास्यत्वं तस्य संबन्धिन इत्यर्थः । **ज्ञाप्यते** यतो वाचो-निवर्तन्ते इति श्रुत्या ज्ञाप्यते इत्यर्थः । **वाक्यादित्यर्थः** । तत्रैव रसभाववतामेव प्रशंसाप्युक्तेतिवैलक्षण्यं बोध्यम् ॥ १५ ॥

पूर्वाधिकरणे आनन्द आत्मेत्यात्मशब्दप्रयोगो भक्तिमार्गीयाणां प्रियशिरस्त्वा-द्यनुपसंहारे हेतुरुक्तः । तत्प्रसङ्गेन तत्रत्यात्मशब्दयुक्तवाक्यान्तरं विचारयितुमा-त्मगृहीत्यधिकरणमाहुः **आत्मेति** ।

तत्रत्यविषयमाहुः **तैत्तिरीयकेति** । संशयमुक्त्वा पूर्वपक्षमाहुः **तत्रेति** । **तथा सतीति** । तस्य जीवस्यानन्दमयस्याप्यभिमानित्वे सति । ननु मास्तु

पदाज्जीव एव भवितुमर्हति । तथा सत्यानन्दमयस्यापि ब्रह्मत्वं नोपपद्यते । उच्यते च भार्गव्यां विद्यायां " अन्नं ब्रह्मेति व्यजानात् " (तै. ३. २.) इत्यारभ्यानन्दमयपर्यन्तम् "आनन्दो ब्रह्मेति व्यजनात्" (तै. ३. ६.) इत्यन्तया श्रुत्या ब्रह्मत्वमित्युभयतः पाशारज्जुरिति प्राप्त आह

आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥ (३. ३. २.)

इतरवत् जीववत् आत्मगृहीतिः आत्मग्रहणम् । " तस्यैष एव शारीर आत्मा " (तै. २. ३.) इति यत् तदुत्तरात् । "यः पूर्वस्य " (तै. २.) इति सर्वत्रोक्तत्वात् सर्वेभ्य उत्तर आनन्दमयस्तस्माद्धेतोरित्यर्थः । अन्नमयादिषु सर्वेष्वानन्दमयस्यैवोक्ततत्तच्छरीराभिमानित्वात् तथा । एतद्यथा तथानन्दमयाधिकरणे प्रपञ्चितमस्माभिः ।

अथवा " अन्योन्तर आत्मा " (तै. २.) इत्यन्नमयादन्यत्र

ब्रह्मत्वमित्यत आहुः **उच्यते चे**ति । **इति प्राप्ते आहे**ति । सिद्धान्तमाहेत्यर्थः । **इतरवदि**ति । जीवतुल्यः । शारीरपदसमभिव्याहारादित्यर्थः । एवं चोपक्रमोपसंहाराभ्यां ब्रह्मैवेत्याहुः **तस्यैवे**ति । **यः पूर्वस्ये**ति । एवं च सर्वस्मात्पूर्वप्रकाशजनकः पर उक्तः सर्वस्योत्तरः आनन्दमय इत्युपक्रमोपसंहाराभ्यां ब्रह्मैवात्मत्वेन ग्राह्यं न तु शारीरपदेनेतरदित्यर्थः । अभिमानित्वेन जीवो नास्तीतिसर्वं प्रपञ्चितमित्यर्थः ।

ननु सूत्रे आत्मगृहीतिपदमन्योऽन्तर इति, अस्य शारीर आत्मेति । आत्मा । कीदृश आत्मा इत्यत्र विनिगमनाभावात्पक्षान्तरमाहुः **अथवे**ति । **यः** प्राणम-

सर्वत्रोक्तत्वात् पूर्वपूर्वनिरूपितो यः स इतर इत्युच्यते। तथा च "यः पूर्वस्य" इतिश्रुत्येतरवत् पूर्वनिरूपितवत् प्रकृतस्याप्यात्मग्रहणकथनं यत्तदुत्तरादिति पूर्ववत् ॥ १६ ॥

अन्वयादिति चेत् स्यादवधारणात् ॥ १७ ॥

ननु सर्वत्र "अन्योन्तर आत्मा" (तै. २) इतिश्रुत्या प्रत्येकमन्नमयादीनां भेदनिरूपणाच्छारीरपदाच्च भिन्नो भिन्नो जीव एवात्मा शरीराभिमानी सर्वत्रोच्यते। आनन्दमयेपि तथोक्तिर्या सा त्वानन्दमयस्य ब्रह्मत्वेन व्यापकत्वेन सर्वत्रान्वयात् सर्वेषु शरीरेषु सम्बन्धादित्याशङ्क्य तन्निरासायोक्तेर्थं उपपत्तिमाह स्यादित्यादिना। स्यात् आनन्दमये एवोक्तसर्वशरीराभिमानी भवतीत्यर्थः। तत्र हेतुरवधारणादिति। "एष एव" (तै. २.) इत्येवकारेणेतरनिषेधपूर्वकमानन्दमयस्यैवात्मत्वनिर्धारादित्यर्थः ॥ १७ ॥ २ ॥

इति तृतीयाध्याये तृतीयपादे द्वितीयमात्मगृहीत्यधिकरणम् ॥ २ ॥

याद्यारभ्य विज्ञानमयपर्यन्तं यः स इत्यर्थः। सिद्धमाहुः **तथा चेति**। **पूर्वनिरूपितवदिति**। पूर्वनिरूपितानां प्राणमयादीनामिव। **प्रकृतस्येति**। आनन्दमयस्येत्यर्थः। **पूर्ववत्** पूर्वव्युत्पादितरीत्यानन्दमय इत्यर्थः। तथा चानन्दमय एव सर्वत्र शारीर आत्मेति मन्तव्यम् ॥ १६ ॥

इत्याशङ्क्येति। सौत्राशङ्कायामित्यर्थः। सर्वभूतस्थितमेकं विचिन्तयेदिति बोधितम्। श्रद्धाख्यकला च बाधिता इति ॥ १७ ॥ २ ॥

तत्तिरीयके पठ्यते "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" (तै. २. १.) इत्युपक्रम्य महाभूतसृष्टिमुक्त्वाम्नायते " पृथिव्या ओषधय ओषधीभ्योऽन्नमन्नात् पुरुषः स वा एष पुरुषोऽन्नरसमयः " (तै. २. १.) इति । एतदग्रेऽन्नस्योत्पत्तिस्थितिलयहेतुत्वमुक्त्वा " येऽन्नं ब्रह्मोपासते " (तै. २. १.) इत्युच्यते । भृगुवरुणसंवादे च " अन्नं ब्रह्मेति व्यजानात् " (तै. ३. २.) इत्युच्यते । तत्र " स वा एष पुरुषोऽन्नरसमयः " (तै. २. १.) इत्यनेन पूर्वोक्त एव पुरुष उच्यत उत तद्भिन्न इति भवति संशयः । किमत्र युक्तम् ? पूर्वोक्त एवेति । यतः पूर्वोक्तस्यैव " स वा एषः " (तै. २.) इत्येनन प्रत्यभिज्ञानं प्रतीयते । तत्र ब्रह्मत्वेनोपासना कार्येत्यभिप्रायेण ब्रह्मत्वेन स्तूयत इति प्राप्त आह **कार्याख्यानादपूर्वमिति** ।

कार्याख्यानादपूर्वम् ॥ १८ ॥ (३. ३, ३.)

पूर्वस्यान्नकार्यस्य पुरुषस्याख्यानात् " स वा एषः " (तै. २.) इत्यनेनाग्रिमश्रुतिभिर्ब्रह्मत्वेन प्रतिपिपादयिषितमन्नरूपमेवोच्यते न तु पूर्वमित्यर्थः । " स वा एषः " इति प्रत्यभिज्ञानमिति यदुक्तं

प्रसङ्गसंगत्या अन्नमयादीनां कोशातिरिक्तत्वं बोधयितुमाहुः **कार्याख्यानादपूर्वम्** । विषयवाक्यमाहुः **तैत्तिरीयक** इति । **एतदग्रे** इति । अन्नाद्वै प्रजाः प्रजायन्त इत्यादौ । **तत्र स चेत्यादिना** संशयं वदन्ति । **पूर्वोक्त एवेति** । अन्नजन्य एव । **भिन्न** एकविभूतिरूप इति **संशयमित्यर्थः** । पूर्वपक्षमाहुः **पूर्वोक्त एवेति** । सिद्धान्तसूत्रं विशदयन्ति **पूर्वमिति** । अग्रे उच्यमानमतिरिक्तं न तु तत् इति सूत्रार्थः ।

तन्न। "अन्नात् पुरुषः" (तै. २.) इत्यन्तेनाधिभौतिकतन्निरूपणात् "स वा एषः" इत्यनेनाध्यात्मिकतन्निरूपणादुभयोश्च भेदात्। अत एव संशयाभावायाह। वै निश्चयेन। एषः वक्ष्यमाणः पुरुषः। सः आध्यात्मिकत्वेन प्रसिद्धोन्नरसमय इति। अन्यथा ब्रह्मात्मकतपोलक्षणसाधनेनाधिकारे सम्पन्ने "अन्नं ब्रह्मेति व्यजनात्" (तै. ३. २.) इति न वदेत्। न च तदपि तत् तथात्वेन स्तूयत इति वाच्यम्। श्रुतेः प्रतारकत्वापत्तेः। आनन्दमयान्तमेवमेव निरूपणाच्च। अत एवास्याप्यात्माग्रे निरूपितो "यः पूर्वस्य" इति (तै. २. ३.)। स त्वाधिदैविक आनन्दमयः।

अथवा वाजसनेयिशाखायाम् "आत्मेत्येवोपासीत" (बृ. १. ४. ७.) इत्युपक्रम्य "तदेतत् प्रेयः पुत्रात् प्रेयोन्यस्मात् सर्वस्मादन्तरतरं यदयमात्मा" (बृ. १. ४. ७.) इत्युपक्रम्य

आध्यात्मिकाधिभौतिकभेदादित्याहुः **स वेति**। अस्मिन्नर्थे उपष्टम्भकमाहुः **अत एवेति**। **अन्यथा** एतादृशाभिप्रायाभावे **न वदेदिति**। भृगुप्रपाठके स तपोऽतप्यतेत्यनन्तरमन्यस्य ब्रह्मत्वेन ज्ञानं वक्ति। तेन आध्यात्मिक इति ज्ञाप्यते। **न चेति**। **तदिति**। आधिभौतिकमन्नमपीत्यर्थः। **तथात्वेन** ब्रह्मत्वेन। **श्रुतेः** ब्रह्मज्ञानार्थं प्रवृत्तश्रुतेः ब्रह्मत्वेनान्नज्ञाने **प्रतारकत्वापत्तेरित्यर्थः। निरूपणादिति**। तथा चानन्दमयस्य ब्रह्मत्वे संदेह एव नास्तीत्यतः अन्नमयेपि तथात्र व्यक्तमितिभावः। एतेनान्नमयादयः कोशातिरिक्ता विभूतित्वेनोपास्याः। आनन्दमयः पुरुषोत्तमस्तु विभूतिमत्त्वेनोपास्य इति बोधितम्।

व्याख्याने प्रकारान्तमाहुः **अथवेति**। **शाखायामिति**। बृहदारण्यके

" तदेतत् प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मात् सर्वस्मादन्तरतरं यदयमात्मा" (बृ. १. ४. ८.) इत्येतदग्रेऽन्यस्य प्रियत्वं निराकृत्य " ईश्वरो हि तथा स्यादात्मानमेव प्रियमुपासीत " (बृ. १. ४. ८.) इति पठ्यते । अत्रात्मौपाधिकत्वात् सर्वत्र प्रियत्वस्यात्मपदेन जीवात्मन एव प्रियत्वेनोपासना विधीयत उतेश्वरपदात् परमात्मन इति भवति संशयः । किमत्र युक्तम् । जीवात्मन एवेति । कुतः । यथा पुत्रादेरात्मौपाधिकप्रियत्वोक्त्या जीवात्मन एव प्रियत्वमुच्यतेऽन्यत्र श्रुतौ तथेहापि " प्रेयः पुत्रात् " (बृ. १. ४. ८.) इत्यादिकथनाज्जीवात्मैव भवितुमर्हतीति प्राप्ते

आह कार्याख्यानादपूर्वमिति । इतः पूर्वमाम्नायते " प्राणन्नेव प्राणो नाम भवति वदन् वाक् पश्यंश्चक्षुः शृण्वञ्श्रोत्रं मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येव " (बृ. १. ४. ७.) इति । तथा च प्राणनवदनादिकार्यैः कृत्वा प्राणवागादित्वेनैकस्यैवात्मन आख्यानात् कथनादपूर्वम् पूर्वं तु पुत्रवित्ताद्यभिमानदशायां " न वा अरे पत्युः कामाय पतिः प्रियो भवति " (बृ. २. ४. ५.) इत्यादिना यत् प्रियत्वेनोच्यते तस्माद्भिन्नमात्मशब्दवाच्यम-

---

पुरुषविधब्राह्मणे । शेषं वाक्यमुक्त्वा पूर्वपक्षमाहुः **किमत्रेत्यादिना** । **अन्यत्र श्रुताविति** । मैत्रेयीब्राह्मणे । अन्यमपि हेतुमाहुः **आनन्देति** । सूत्रे कार्येणेति तृतीयामभिप्रेत्य सिद्धान्तमाहुः **इतः पूर्वमिति** । अपूर्वमित्यस्यार्थमाहुः **पूर्वमिति** । यत् जीवात्मरूपं वस्तु । **आत्मशब्देति** । आत्मानं प्रियमुपासीतेतिवाक्ये शेषः ।

त्रेत्यर्थः । लोके हि प्राणवायुवागिन्द्रियादीनामेव तत्तच्छब्दवाच्यता न तु जीवस्य । अत एवाग्रे श्रुतिराह " ईश्वरो हि तथा स्यात् " (बृ. १. ४. ८) इति । अत एव " प्रेयोन्यस्मात् सर्वस्माद-न्तरतरं यदयमात्मा " (बृ. १. ४. ८.) इत्याह । अन्तरो जीवात्मा ततोप्यतिशयेनान्तरमन्तरतरं पुरुषोत्तमस्वरूपमेव भवितुम-र्हतीति । एतेन विग्रहस्यैवात्मरूपत्वं सिध्यति । तेनाविकृतत्वपरमा-नन्दत्वादयोपि धर्मा उपसंहर्तव्याः ॥ १८ ॥

ननु विग्रहे चक्षुःश्रोत्रादीनां वैलक्षण्यप्रतीतेरात्मनश्चैकरसत्वा-दुक्तकर्मनामवत्त्वं ब्रह्मण्यनुपपन्नमित्याशङ्कयोत्तरं पठति

समान एवं चाभेदात् ॥ १९ ॥

चोप्यर्थः । तथा चैवमपि सति श्रोत्रचक्षुरादिवैलक्षण्यप्रती-तावपि सति **समान** एकरूप एव न तु विषमः । तत्र हेतुर-**भेदा**दिति । चक्षुरादीनां ब्रह्मत्वेन परस्परमभेदादित्यर्थः ।

ननु कार्याख्यानमात्रेण जीवभिन्न आत्मा उच्यते इत्यत्र किं प्रमाणमत आहुः **लोके**ति । **अत एव** जीवाभिन्नत्वादेव । **अत एव** ईश्वरत्वादेव । श्रुत्यर्थमाहुः **अन्तर** इति । इदानीं तद्विचारस्य प्रयोजनमाहुः **एतेने**त्यादि । **उपसंहर्तव्या** इति । अवतीर्णे स्वरूपे उपसंहर्तव्या इत्यर्थः ॥ १८ ॥

सूत्रमवतारयन्ति **नन्वि**ति । **पठन्ती**ति । तरुभिन्नः कुसुमं भिन्नमितिवत् भेदप्रतीतौ **उत्तरं पठन्ति** इत्यर्थः । व्याकुर्वन्ति **चोप्यर्थ** इति । अभेदमेव

अत्रेदमाकूतम् । " तं त्वौपनिषदं पुरुषं पृच्छामि " (बृ. ३. ९. २६.) इति श्रुतेरुपनिषद्वेद्यमेव ब्रह्मस्वरूपम् । ताश्च " प्राणन्नेव प्राणो भवति वदन् वाक् (बृ. ३. ४. ७.) इत्यादिरूपाः प्रतिनियतेन्द्रियग्राह्यानर्थान् स्वरूपेणैव गृह्णद्ब्रह्म तत्तच्छब्दवाच्यं भवतीति वदन्ति । तद्वाच्यता च व्यवहार्यत्वे । स च " तदेतत्प्रेयः पुत्रात् " इत्यादिवाक्यैकवाक्यतया निरुपधिस्नेहवतामेव व्यवहार्य इति ज्ञाप्यते । स चाविर्भूतेवताररूप एव सम्भवति । एवं सति तत्र भक्तैर्भगवद्विग्रहे तत्तदवयवेषु भेदेन यथा यथा व्यवह्रियते तथा तथैव तदेकमेवाखण्डसच्चिदानन्दरूपं ब्रह्मेत्यर्थः सम्पद्यते । एवंविधो लोके न प्रसिद्ध इत्यसम्भावना स्यात् । तदभावायाग्रे श्रुतिराह " ईश्वरो हि तथा स्यात् " (बृ. १. ४. ८.) इति । एतेनाविर्भूतरूपे व्यापकत्वैकरसत्वसच्चिदानन्दत्वादयो धर्मा उपसंहर्तव्या अनाविर्भूतेपीति स्थितम् । एवं सत्याविर्भावेनावि-

---

व्यवस्थापयन्ति **अत्रेति** । **ताश्चेति** । श्रुतयश्चेत्यर्थः । **स चेति** । उपनिषद्वेद्यः पुरुषश्च । **स चेति** । व्यवहार्यश्चेत्यर्थः । तथा चातीतपादे **आह च तन्मात्रं प्रकाशवच्चावैयर्थ्यादि**ति सूत्रद्वयेनोपपादनादप्रामाणिकत्वं व्यवहारस्य नास्तीतिभावः । **एवं सतीति** । अत्र लौकिकयुक्तः प्रसरो नास्तीत्याहुः **एवंविध** इति । **तथा स्यादिति** । तथा चावतार ईश्वरो वेति सूचितम् । सिद्धमाहुः **एतेनेति** ।

एतादृशं श्रुत्यभिप्रायमादाय प्रकारान्तरेण सूत्रार्थमाहुः **एवं सतीति** । एवं चाजोपि सन्नव्ययात्मेतिगीतावाक्यात्, विश्वतश्चक्षुः यदेकमव्यक्तमितिश्रुत्यापि

र्भावेपीश्वरः **समानः** । न ह्याविर्भावे कांश्चनागन्तुकान् धर्मानादायाविर्भवतीति वक्तुं शक्यम् । अनाविर्भूतस्याप्यवेमाविर्भूतप्रकारेणैवाभेदादित्यपि सूत्रार्थः सूत्रकाराभिमत इति ज्ञातव्यम् । चकारेण विरुद्धसर्वधर्माश्रयत्वं समुच्चीयते । एवं साक्षादाविर्भूतभगवद्रूपे पूर्णानन्तधर्मास्तदुपासकेनोपसंहर्तव्या इति सिद्धम् ॥ १९ ॥

अथ यत्र कार्यचिकीर्षया जीवे स्वयमाविशति तदावेशात्तद्धर्मा अपि केचित् तस्मिन्नाविर्भवन्ति । तत्रोपासकेनाखिलब्रह्मधर्मोपसंहारः कर्तव्यो न वेति शङ्कासमाधानं विकल्पेनाह सूत्राभ्याम् । तत्रादौ विधिपक्षमाह

सम्बन्धादेवमन्यत्रापि ॥ २० ॥

अन्यत्रापि जीवेप्येवं ब्रह्मणीवोपासना कार्या । तत्र हेतुः **सम्बन्धादिति** । अयोगोलके वह्नेरिव तस्मिन्नावेशलक्षणः सम्बन्धोस्तीति तत्त्वेन व्यपदेशाच्च तथेत्यर्थः । अत्रैवं ज्ञेयम् । अयं तु

स्वाभाविक एवाकारः पर्यवस्यतीति बोध्यम् । अत एव पूर्वोक्तार्थस्य चकारस्यान्यार्थकत्वमाहुः **चकारेणेति** । **साक्षादिति** । सत्त्वाद्यधिष्ठानमनपेक्ष्येत्यर्थः ॥ १९ ॥

विचारयन्ति **अथेति** । **जीव** इति । इन्द्रप्रतर्दनसंवादे इन्द्रे । इन्द्रप्रतिमायामप्युपलक्षकम् । यस्य देवे परा भक्तिरित्यादिना गुरौ । **विकल्पेनेति** । मार्गभेदव्यवस्थितविकल्पेनेत्यर्थः । **तत्र** प्रतिमादौ गुरौ च ।

सूत्रं व्याकुर्वन्ति **अन्यत्रापीति** । प्रतिमायामाहुः **तत्त्वेनेति** । अत एव “ शिलाबुद्धिर्न कार्या च तत्र नारद कर्हिचित् । ज्ञानानन्दात्मको विष्णुर्यत्र

जीवोत्राविष्टं भगवन्तमहमुपास इति जानाति चेत् तदा न सा जीवगामिन्युपासना किन्तु ब्रह्मगामिन्येव । तत्राखिलधर्मोपसंहारे न किञ्चिद्बाधकम् । यत्र ब्रह्मत्वेनैव ज्ञात्वोपास्ते तत्रापि “ तं यथा यथोपासते तथैव भवति तद्धैतान् भूत्वावति ” (मुद्गलो. ९. ३.) इतिश्रुतेर्गुर्वादौ जीवत्वबुद्धिनिषेधाच्च तथा । तत्र यादृगुपासकस्तदुपासनासिद्ध्यर्थं तत्फलदानार्थं च तादृग्रूपो भगवानाविशतीति च तथा ॥ २० ॥

यस्त्वन्तरङ्गं भगवद्भक्तं हृद्याविर्भूतभगवत्कं ज्ञात्वैतद्भजनेनाहं भगवन्तं प्राप्स्यामीति ज्ञात्वा तमेव भजते स भक्तिमार्गीय इति भक्तहृद्याविर्भूते रूप उपसंहारो धर्माणां तेन न कार्य इत्यग्रिमं पठति

न वाविशेषात् ॥ २१ ॥

अनुपसंहारे हेतुरविशेषादिति । अस्य भक्तभक्तत्वेन तद्भ-

तिष्ठत्यचिन्त्यकृत् ॥” इति **पाण्डुरङ्गमाहात्म्ये स्कन्द** उक्तम् । उपासनायां व्यवस्थितविधिपक्षबीजं दर्शयन्ति **अत्रैवमिति** । **एवं** प्रकाराभ्याम् । **गुर्वादाविति** । **निषेधादिति** । **आचार्यं मामिति** जानीयादितिशेषः । यथा भक्तिस्तथोपासनापीत्येकादशस्कन्धे “एवं गुरूपासनयाशितेन” इत्युक्ता । एवं प्रकारद्वये ब्रह्मावेशः प्रयोजक इति ज्ञापनायाहुः **तत्रेति** । **आविशतीति** । आवेशस्त्वनुभवेन ज्ञेयः । **श्रीजगन्नाथादौ** तथावगन्तव्यम् ॥ २० ॥

भक्तिमार्गे निषेधपक्ष इतिज्ञापनार्थमुत्तरसूत्रमवतारयन्ति **यस्त्वन्तरङ्गमिति** । श्वेताश्वतरोक्तप्रेमविश्वासयोरुत्कर्षादाहुः **स भक्तिमार्गीय** इति । व्याकुर्वन्ति **अनुपसंहार** इति । तदेव विशदयन्ति **अस्येति** । **भक्तभक्तत्वेनेति** ।

जनरसास्वादनेन विस्मृततदाविष्टभगवत्कत्वेन तन्निरपेक्षत्वेन वा तदाविष्टभगवति गुणोपसंहारेनुपसंहारे वा भक्तोपासनाया **विशेषा**-भावादित्यर्थः। अनुपसंहारस्यात्र बाधकत्वाभावज्ञापनाय वाशब्दः। **विशेषादिति वा**। पूर्वं विहितत्वेन भगवदाकारादिषु भजनं कुर्वन्नप्युक्तरूपभक्तसङ्गेन तद्भजनेन च पूर्वस्माद्विशिष्टं रसमनुभूतवानिति रसास्वादे **विशेषाद्**गुणोपसंहारं स न करोतीत्यनुवादः। विहितत्वेन गुणोपसंहारपूर्वकोपासनायां नीरसत्वेनानादरज्ञापनाय वाशब्दः। भगवदवताररूपोपि बादरायणः प्रासङ्गिकेपि भक्तिमार्गस्मरणे तदीयरसावेशपरवशस्तद्भावस्वभावमनूक्तवान्॥ २१॥

अपि च। उपसंहारो हि तत्रानुक्तानामन्यत्रोक्तानां गुणानां तत्र सत्त्वेन ज्ञानमात्रम्। उक्तरूपभक्ताय तु तद्भजनीये भक्त एवालौकिकानुभावान् भगवान् प्रत्यक्षं दर्शयतीति न तत्रोपसंहारापेक्षागन्धोपीति यथायोग्यमुत्तरं पठति

दर्शयति च॥ २२॥

भजनशीलभक्तत्वेनेत्यर्थः। अत एव नवमस्कन्धे "तत्प्रसङ्गानुभावेन रन्तिदेवानुवर्तिनः। अभवन् योगिनः सर्वे नारायणपरायणाः॥" इत्युक्तम्। प्रकारान्तरेण हेतुं व्याकुर्वन्ति **विशेषादिति**। **वाशब्द** इत्यन्तम्। **तद्भजनेनेति**। भगवदाकृतिभजनेन। अनुवादप्रयोजनमाहुः **भगवदवतारेति**। **अनूक्तवानिति**। तदुत्कर्षबोधनायेतिशेषः॥ २१॥

सूत्रमवतारयन्ति **अपि चेति**। अत्र भाष्यं स्फुटम्॥ २२॥

ननु भक्तभक्तः स्वसेव्येऽत्यलौकिकं वीर्यं दृष्ट्वा तदाविष्टे भगवति तत्सम्भारकत्वस्येन्द्रादीनामपि तदाज्ञापेक्षित्वं दृष्ट्वा द्युलोकव्यापकत्वस्योपसंहारं करिष्यतीत्याशङ्कयाह

सम्भृतिद्युव्याप्त्यपि चातः ॥ २३ ॥ (३. ३. ४.)

राणायनीयानां खिलेषु पठ्यते " ब्रह्मज्येष्ठा वीर्या सम्भृतानि ब्रह्माग्रे ज्येष्ठं दिवामाततान । ब्रह्म भूतानां प्रथमं तु जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कः ॥" (तै. ब्रा. २. ४. ६.) इति । अस्यार्थस्तु अन्यैर्हि पुरुषैः सहायानपेक्ष्य विक्रमाः सम्भ्रियन्ते । तेन तत्पराक्रमाणां त एव नियतपूर्वभावित्वरूपकारणत्वेन ज्येष्ठाः । ब्रह्मधर्माणां तु **ब्रह्मैव** ज्येष्ठमनन्यापेक्षं सृष्ट्यादि करोतीत्यर्थः । एवं सति ब्रह्म ज्येष्ठं येषां तानि **ब्रह्मज्येष्ठानि वीर्याणि** । अत्र छन्दसि बहुवचनस्य डादेशः । किञ्च । अन्येषां वीर्याणां बलवद्भिर्मध्ये भङ्गोपि भवति । तेन ते स्ववीर्याणि न सम्बिभ्रति । ब्रह्मवीर्याणि तु ब्रह्मणा **सम्भृतानि** निःप्रत्यूहं सम्भृतानीत्यर्थः । तच्च **ज्येष्ठं ब्रह्माग्रे** इन्द्रादिजन्मनः प्रागेव **दिवं** स्वर्ग**माततान** व्याप्नुवन्नित्यमेव विश्वव्यापकमित्यर्थः । देशतोपरिच्छेदमुक्त्वा कालतोपि तमाह **ब्रह्मेति** । **भूतानामा**काशादीनां पूर्वमेव **जज्ञे** आविर्बभूवेत्यर्थः । एतेन वीर्यसम्भृतिद्युव्याप्तिप्रभृतिमाहात्म्यमुक्तं भवति । तथा च

उत्तरसूत्रमवतारयन्ति **ननु भक्तेति** । **अलौकिकं** लोकरीतिमतिक्रम्येत्यर्थः । **तदिति** । वीर्यसंभारेत्यर्थः । **उपसंहारमिति** । ऐहिकपारलौकिकार्थमितिशेषः । सूत्रं व्याख्यातुं विषयवाक्यमाहुः **राणायनीये**त्यादिना । वाक्यमुक्त्वा तस्यार्थमाहुः **अन्यैर्हि**त्यादिना **उक्त भवती**त्यन्तेन । सूत्रार्थ-

सम्भृतिश्च द्युव्याप्तिश्च तयोः समाहारस्तथा। एतावत्यपि सति तत्र नोपसंहरति। तत्र हेतुः "न वाविशेषात्" (ब्र. सू. ३. ३. २१.) इतिसूत्रोक्त एवेत्यतिदिशत्यत एवेति। एतद्यथा तथा तत्रैवोक्तम्। विषयवाक्योत्तरार्धोक्तधर्मानुद्देशेनैवं ज्ञायते भक्तस्यैहिकपारलौकिकोपयोगिधर्मोपलक्षणार्थं द्वयोरेवोद्देशः कृत इति। चकारेण दर्शनमप्युक्तं समुच्चीयते। अन्यच्च। स्पर्धाकृतिसम्भावनायां हि तद्योग्यतानिषेधः सम्भवति। सा चाविर्भूत एव भगवति सम्भवतीत्यखिलशक्त्याविर्भावपूर्वकमाविर्भूतस्य तस्यैतया श्रुत्या माहात्म्यमुच्यत इति गम्यते। एवं सत्येतद्वाक्योक्तधर्मयोरेगानुपसंहार्यत्वेन यत् कथनं तत्तु भक्तहृद्याविर्भूतं ब्रह्माप्येवम्भूतमेवेतिज्ञापनायातो युक्त एवानुपसंहारः॥ २३ ॥ ३ ॥

इति तृतीयाध्याये तृतीयपादे तृतीयं
कार्याख्यानादित्यधिकरणम् ॥ ३ ॥

माहुः **तथा चेति**। **तत्रैवोक्तमिति**। अस्य भक्तत्वेनेत्यादिना। त्वया इदं कथं ज्ञायत इत्यत्र गमकमाहुः **विषयेति**। तथायमेव सूत्रकाराशयः। चकारप्रयोजनमाहुः **चकारेणेति**। पूर्वोक्तसूत्रकाराशये शङ्कानिवृत्त्यर्थमाहुः **अन्यच्चेति**। **सा चेति**। संभावना चेत्यर्थः। **गम्यते** व्यासाशयो निश्चीयते। तथा च प्रकरणमप्राप्य विहितानां नोपसंहारः, अनुपयुक्तत्वादितिभावः॥ २३ ॥ ३ ॥

तैत्तिरीयके " सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम् पुरुष एवेद्ँ सर्वं यद्भूतं यच्च भव्यम् ।" (तै. ३. १२. १.) इत्यादिना पुरुषविद्या निरूप्यते । तत्रैव " ब्रह्मविदाप्नोति परम्" (तै. ३. १.) इतिप्रश्ने " स वा एष पुरुषोन्नरसमयः " (तै. ३. २.) इत्यारभ्य प्राणमयमनोमयविज्ञानमयानन्दमयात्मकं ब्रह्मस्वरूपं निरूप्यते । तत्र सर्वत्र " स च पुरुषविध एव " (तै. ३. २) इति च पठ्यते । अत्रान्नमयादिषु पुरुषसूक्ते च पुरुषपदश्रवणादन्नमयादिषु सहस्रशीर्षवत्त्वाद्युपसंहारः कर्तव्यो न वेति भवति संशयः । किमत्र युक्तम् । उपसंहर्तव्यमेवेति । कुतः । सर्वत्र ब्रह्मण एवोपास्यत्वादत्राप्युपासनोक्तेर्ब्रह्मत्वपुरुषत्वयोरविशेषाद्विद्यैक्यादिति प्राप्त उच्यते **पुरुषविद्यायामिवेति** ।

पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥ २४ ॥
(३. ३. ४.)

एतावता प्रकरणमध्येऽप्यविहितानां धर्माणां भक्तिमार्गेनुपसंहारः उक्तः । उपासनामार्गे उत्तमाधिकारिणां परब्रह्मोपासना विहिता, न तु विभूतिरूपस्यैति बोधयितुं पुरुषाधिकरणमाहुः **पुरुषेति**। तत्रानुपसंहारं वक्तुं विषयमाहुः **तैत्तिरीयकेति**। **प्रश्ने** प्रपाठके। **अविशेषादिति**। भृगुप्रपाठके ब्रह्मत्वं पुरुषसूक्ते पुरुषत्वं तयोरित्यर्थः । तथाचाविशेषादेव विद्यैक्यमित्यर्थः ।

अन्नमयादिषु सहस्रशीर्षवत्त्वादिकं नोपसंहर्तव्यम् । कुतः । पुरुषविद्यायां यथा पुरुषस्वरूपं निरूप्यते न तथेतरेषामन्नमयादीनां विज्ञानमयान्तानां स्वरूपं तत्प्रकरणे निरूप्यते । तत्र हि पुरुषत्वमुच्यते । सहस्रपदमनेकत्वोपलक्षकम् । अन्यथाक्ष्णां शिरोभ्यो द्वैगुण्यं वदेत् । तेन साकारव्यापकत्वमुक्तं भवति । तत्र पुरुषविधत्वम् । स चाध्यात्मिकरूपः । तच्छरीराभिमान्यात्मा चान्य आधिदैविक उच्यते । न तथात्र । किञ्च । "पुरुष एवेदꣳ सर्वम्" (तै. सं. ३. १२. १.) इत्यादिना प्रपञ्चात्मकत्वं मुक्तिदातृत्वं चोक्त्वा नैतावन्मात्रमस्य माहात्म्यमितोपि महन्माहात्म्यमस्तीति प्रपञ्चरूपं तद्विभूतिरूपमिति "एतावनस्य महिमा" (तै. सं. ३. १२. १.) इत्यनेनोक्त्वा तत आधिक्यमाह "अतो ज्यायाꣳश्च पूरुषः" (तै. सं. ३. १२. १.) इति । एवमतिवैलक्षण्यात् पुरुषपदमात्रसाधर्म्येण नैकविधत्वं वक्तुं शक्यं न वोपसंहार इति । चकारात् "अम्भस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयान्" (तै. नारा. ५. १. १.) इत्यादिश्रुतयः । "सर्वतः पाणिपादान्तम्" (गीता १३. १३.) इत्यादिस्मृतयश्च सङ्गृह्यन्ते ।

सूत्रार्थमाहुः **अन्नमयादिष्विति** । **निरूप्यते** सहस्रशीर्षा इति सूक्तेनेत्यर्थः । **तत्प्रकरण** इति । अन्नमयादिनिरूपणप्रकरणे । **तत्र हि** पुरुषसूक्ते हि । **अन्यथा** सहस्रसङ्ख्यापरत्वे । **शिरोभ्य** इति । तथा च शिरसो द्विगुणत्वमक्ष्णामस्तीति । तथा नोक्तमतः अनन्तत्वं बोध्यम् । अन्यदपि वैल-

एतेन यत्किञ्चिद्धर्मसाम्येपि न मूलभूतब्रह्मरूपमत एव न तत्रोपास्यता तथात्वेनेति ज्ञापितम् । अत एव भृगूपाख्यानेन्नमयादिब्रह्मज्ञानेपि जिज्ञासैवोक्ता । भृगोरानन्दरूपपरब्रह्मज्ञाने तु नोक्ता । तेनाशेषगुणपूर्णं ब्रह्मेत्युक्तं भवति । अत उत्तमाधिकारिभिस्तदेवोपासनीयं न विभूतिरूपमिति ज्ञापितम् ॥ २४ ॥ ४ ॥

इति तृतीयाध्याये तृतीयपादे चतुर्थं पुरुषविद्यायामित्यधिकरणम् ॥ ४ ॥

अथ निर्दोषत्वं ज्ञात्वा भजनीयमिति ज्ञापयितुमधिकरणान्तरमारभते । वाजसनेयिशाखायां " द्वया ह प्राजापत्याः " (बृ. ३. १.) इत्युपक्रम्य तेषां मिथःस्पर्धामुक्त्वोच्यते " ते ह देवानूचुर्हन्तासुरान् यज्ञ उद्गीथेनात्ययामेति ते ह वाचमूचुस्त्वं न उद्गायेति तेभ्यो वागुदगायद्यो वाचि भोगस्तं देवेभ्य आगायद्यत् कल्याणं वदति तदात्मने ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यत् स यः स पाप्मा यदेवेदमप्रतिरूपं वदति स एव पाप्मा " (बृ. १. ३. १.) इति । एवमेव प्राणचक्षुःश्रोत्रप्रभृतिषु पापवेधमुक्त्वोच्यते " अथैनमासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एव प्राण उदगायत्ते विदुरनेन वै न उद्गा-

---

क्षण्यं वदन्ति **किञ्चेति** । सिद्धमाहुः **एवमिति** । ननु वैलक्षण्यबोधनं किमर्थमत आहुः **एतेनेति** । **तथात्वेनेति** । मूलभूतब्रह्मत्वेनेत्यर्थः ॥ २४ ॥ ४ ॥

अवतारयन्ति **अथेति** । विषयमाहुः **वाजसनेयीति** । **आसन्य** इति ।

त्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यत् स यथाश्मानमृत्वा लोष्ठो विध्वंसेतैवꣳ ह वै विध्वंसमाना विष्वञ्चो विनेशुः " (बृ. १ ३.३.) इति। छान्दोग्येपि प्राणादिष्वेवमेव पाप्मवेधमुक्त्वासन्येन तथेत्युच्यते। एतावान् परं विशेषः। वाजसनेयिनां गानकर्तृत्वं सामगानामुद्गीथत्वेनोपास्यत्वमुच्यते वाक्प्राणादीनामिति। अत्र देहसम्बन्धित्वगानकर्तृत्वयोरुपास्यत्वस्य चाविशेषेपि वागादिषु पाप्मवेध आसन्यप्राणे कुतो नेति भवति जिज्ञासा। न चासन्योपासनाया विधेयत्वात् तत्स्तुत्यर्थमन्येषु पाप्मवेध उच्यतेस्मिन्नेति वाच्यम्। नहि प्रयोजनायासन्तमप्यर्थं बोधयति श्रुतिरिति वक्तुं शक्यं, प्रमाणत्वव्याहतिप्रसङ्गात्। एकत्र प्रतारकत्वे सर्वत्रापि तच्छङ्कया तदुक्ते कोपि न प्रवर्तेतापि। साक्षात्क्रियार्थत्वाभावेपि नासन्निरूपकत्वमर्थवादानाम्। वस्तुतस्तु " यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवति " (छा. १. १. १०.) इतिश्रुतेः, " ज्ञात्वाज्ञात्वा च

आसन्ये प्राणे **न तथा** न पाप्मवेध इत्यर्थः। संशयमाहुः **अत्रेति**। **जिज्ञासेति**। तथा च वेधः सत्यो वा न वेतिसंशयः। अत्र शङ्कते **न चेति**। अत्र बाधकमाहुः **न हीति**। तथा च पाप्मवेधो वागादिषु नास्ति। अन्यत्र स्तुत्यर्थं तत्रवदेदिति चेत् प्रमाणत्वव्याहतिरित्यर्थः। नन्वर्थवादे स्वार्थे प्रामाण्यं च नास्ति इत्यतश्चाहुः **साक्षादिति**। तथा च क्रियार्थत्व नास्तीत्यत आहुः **साक्षादिति**। तथा च क्रियार्थत्वं नास्तीति कृत्वा स्वार्थे प्रामाण्यं नास्तीति वक्तव्यमितिभावः। अधिकं **प्रकाशे**नुसंधेयं, विस्तरभयाद्विरम्यते। उत्तरकाण्डे साक्षादेवार्थवादानां क्रियार्थत्वमाहुः **वस्तुत**स्त्विति। **य एवं**

कर्माणि जनोयमनुतिष्ठति । विदुषः कर्मसिद्धिः स्यात् तथा नाविदुषो भवेत् ॥" (भाग. १०. २१. ६.) इत्यादिवाक्यैः " य एवं वेद " (तै. २.) इतिवाक्यैश्चार्थवादोक्तस्वरूपं ज्ञात्वा कर्मकरणे पूर्णं फलमन्यथा नेत्यर्थवादानां फलोपकार्यङ्गनिरूपकत्वान्नानर्थक्यमत उक्तेऽर्थे हेतुं न पश्याम इति प्राप्ते तमेवाह वेधादीति ।

वेधाद्यर्थभेदात् ॥ २५ ॥ (३. ३. ५.)

वाक्प्राणादिषु यः पाप्मवेधः, आदिपदात् दुष्टविषयसम्बन्धश्च, तत्र हेतुरर्थभेदः । अर्थो भगवांस्तस्माद्भेदादित्यर्थः । आसन्यस्तु " य एवायं मुख्यः प्राणस्तमुद्गीथमुपासीत " (छा. १. २. ९.) इति छान्दोग्य उपास्यत्वेनोक्तः । " सर्ववेदान्तप्रत्ययम् " (ब्र. . ३. ३. १.) इतिन्यायाद्वेदान्तेषूपास्यं ब्रह्मातिरिक्तं नोच्यत इत्यासन्यो ब्रह्माभिन्नोत एव " अपहतपाप्मा ह्येषः" (छा. १. २. ९.) इति सामगैः पठ्यते । अतस्तत्र न पाप्मवेध इतिभावः । ब्रह्मणः स्वतन्त्रपुरुषार्थत्वज्ञानायार्थपदेनोक्तिः । एतेन विभूतिरूपेपि यत्रैवं तत्र मूलभूतब्रह्मणि निर्दोषत्वे किं वाच्यमिति ज्ञापितम् ।

वेदेति । य एवं वेद स वीर्यैरेव छन्दोभिरर्चति य इत्यादिवाक्यैरित्यर्थः । **न पश्याम** इति । तथाचान्येषा पाप्मवेधकारणं न पश्याम इति **प्राप्ते तमेव** निर्णयमेवाह सूत्रकारः । हेतुं व्याकुर्वन्ति **वाक्प्राणादिष्विति** ।

ननु आसन्येप्ययं वेधो वर्तत एव इत्यत आहुः **आसन्यस्त्विति** । ननु सूत्रेऽर्थभेदादिति किमर्थमुक्तमत आहुः **ब्रह्मण** इति । अर्थपदेन ब्रह्मण उक्तिरित्यन्वयः । कैमुतिकन्यायेनाहुः **एतेनेति** ।

अथवा अर्थः प्रयोजनं विषय इति यावत् । तद्भेदादित्यर्थः ।

अत्रेदमाकूतम् । देवा हि स्वस्यासुरजयाय गानार्थं वागादीनूचुः "त्व न उद्गाय" (बृ. १. ३. १.) इति । गानानतरं "यो वाचि भोगस्तं देवेभ्य आगायत्" (बृ. १. ३. १.) इत्युच्यते । एवमेव प्राणादिष्वपि स्वस्वभोगं "देवेभ्य आगायत्" इति । एव सति देवार्थमेवैतद्गानं न तु भगवदर्थम् । यद्यप्यासन्येप्येवमुच्यते "तेभ्य एष प्राण उदगायत्" (बृ. १. ३. ३.) इति तथापि यथा वागादिषु स्वनिष्ठभोगं "देवेभ्य आगायत्" (बृ. १. ३. १.) इत्युक्तं तथा नासन्ये । तेनोक्तमानैर्ब्रह्मात्मकत्वेनासुरजयहेतुभगवत्सम्बन्ध एवेति ज्ञात्वा तथैवागायदासन्य इति ज्ञायते । अत एवान्यत्र वेध उक्तोत्र तत्करणेच्छायामप्यासुराणां नाश उक्तः । अग्रे च "भवत्यात्मना परास्य द्विषन् भ्रातृव्यो भवति य एवं वेद" (बृ. १. ३, ७.) इति पठ्यते । तेन परब्रह्म निर्दोषमिति किमु वाच्यम् ? यत्र तद्विभूतिरूपासन्यस्योक्तरूपतां यो वेति सोपि गुणयुक्तो दोषरहितश्च भवतीति कैमुतिकन्यायः सूचितो भवति । एतेन लोके दोषत्वेन ये धर्माः प्रतीयन्ते त एव धर्मा भगवति निरूप्यमाणा न दोषत्वेन ज्ञेयाः किन्तु गुणत्वेनैव । वस्तुन एव तथात्वादितिभावो ज्ञाप्यते ॥२५॥

प्रकारान्तरेणाहुः अथवेति । **विषय** इति । वागादीना विषय इत्यर्थः । **अत्रेदमिति** । **उच्यते** बृहदारण्यक इतिशेषः । **उक्तमानैरिति** । आसुरजयहेतुभूतं यदर्थज्ञानं पाप्मवेधराहित्यमथ चोनुपास्यत्वं, एतैरुक्तमानैरित्यर्थः । अत्र युक्तिमाहुः **अत एवेति** । एतादृशार्थकथने फलमाहुः **एतेनेति** । अन्यत् स्पष्टम् ॥ २५ ॥

एवं भगवत्सम्बन्धाभावे दोषसम्बन्धमुक्त्वा तथा सति गुणहानिं च वदंस्तत्र विशेषमाह

हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दःस्तुत्युपगानवत्तत् तदुक्तम् ॥ २६ ॥

"तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" (मुण्ड. ३. ३. ३.) इत्याथर्वणिकैः पठ्यते। **परमपदेन** ब्रह्मोच्यते। तथा च सकार्याविद्यारहितः "परममुपैति" तदनन्तरं "साम्यमुपैति" इतियोजना। तत्रेदं विचार्यते। **साम्यं** हि समानजातीयधर्मवत्त्वम्। तच्च कतिपयधर्मैरशेषतन्निष्ठधर्मैर्वा भवति। तत्रान्त्यः पक्षो ब्रह्मणा समं न सम्भवति। "न तत्सम-श्चाभ्यधिकश्च दृश्यते" (श्वेता. ६. ८.) इतिश्रुतिविरोधात्। अत आद्य एव पक्षोनुसर्तव्यः। तत्र कैर्धर्मैः साम्यमिहोच्यत इत्यकाङ्क्षायामाह **हानाविति**। ब्रह्मणः सकाशाद्विभागो जीवस्य **हानि**शब्देनोच्यते। तथा च तस्यां सत्यां ये धर्मा जीवनिष्ठा

सूत्रमवतारयन्ति **एवमिति**। **विशेषमाहेति**। गुणप्राप्तिरूपं विशेषमित्यर्थः। श्रुतिमाहुः **तदेति**। एतत्पूर्वार्धा "यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्" इतिबोध्यम्। **पठ्यते** मुण्डक इतिशेषः। श्रुत्यर्थमाहुः **परमपदेनेति**। **निरञ्जनः** अविद्यारहितः।

सौत्रविचारमाहुः **तत्रेदमिति**। समानत्वमित्यर्थः। **आहेति**। तान् धर्मानाहेत्यर्थः। सूत्रार्थमाहुः **ब्रह्मण इति**। **तस्यामिति**। तादृशहानौ

आनन्दांशैश्वर्यादयो भगवदिच्छया तिरोहितास्ते ब्रह्मसम्बन्धे सति पुनराविर्भूता इति तैरेव तथेत्यर्थः। भगवदानन्दादीनां पूर्णत्वाज्जीवानन्दादीनामल्पत्वात् नात्रैव समैर्धर्मैः कृत्वा ब्रह्मसाम्यं जीव उपचर्यते "साम्यमुपैति" इति। वस्तुतस्तु नैतैरपि धर्मैः साम्यमितिभावः। अत एव "न तत्समः" इति श्रुतिरविरुद्धा। अत एव सूत्रकृता "साम्यमुपैति" इति साम्योपायनशब्दमात्रं न तु साम्यपदार्थः स्वारसिकोत्रास्तीतिभावप्रकटनाय शब्दशब्द उक्तः।

ननु तैरेव धर्मैः साम्यं नेतरैरित्यत्र को हेतुरित्याकाङ्क्षायामाह **उपायनशब्दशेषत्वादिति**। "परममुपैति" इति य उपायनशब्दस्तच्छेषत्वात् साम्योपायनस्येत्यर्थः। ब्रह्मसम्बन्धहेतुकत्वादानन्दांशाद्याविर्भावस्य तदैव साम्योपायनकथनात्तैरेव धर्मैः साम्यमभिप्रेतमितिभावः। नन्वानन्दादीनां ब्रह्मधर्मत्वात् तैस्तत्साम्यकथनं तदभेदमेव गमयतीत्याशङ्क्य तद्धर्मवत्त्वमात्रस्य न तदभेदसाधकत्वमित्यत्र दृष्टान्तमाह **कुशेत्यादि**। **कुशा** औदुम्बर्यः समिधः। ता

सत्यामित्यर्थः। **ब्रह्मसंबन्ध** इति। **उपायनं** ब्रह्मप्राप्तिस्तद्वाचकः शब्दः उपैतिशब्दः तच्छेषत्व साम्यशब्दस्येत्यर्थः। **तैरेव तथेति**। तैरेव साम्यमित्यर्थः। नन्वेवं चेत् 'न तत्समो नाभ्यधिकश्च' इतिश्रुतिविरोध इत्यत आहुः **भगवदिति**। सौत्रमुपष्टम्भकमाहुः **अत एवेति**।

हेतुमवतारयन्ति **नन्विति**। **तदा** ब्रह्मसंबन्धे। एतस्मादेव हेतोरुक्तैरेव धर्मैः साम्यमुपैतीति सूत्रार्थः। **नन्विति**। व्याकुर्वन्ति **कुशा** इति। इदं च ज्योतिष्टोमे उद्गातृत्वप्रयोगे स्पष्टम्। प्रस्तोत्रादौ ओवाद्धाभुभाभिभेत्यादि-

अग्निष्टोमादियागेषु प्रस्तोत्रा स्थाप्यन्ते, तदा तत्सम्बन्धि यच्छन्दः-स्तुत्युपगानं तद्वदित्यर्थः । तत्र " अभि त्वा शूर नोनुमो दुग्धा इव धेनवः " (ऋ. सं. ५. ३. २१.) इत्यृचि ये वर्णास्तेषामच एवोपसंहृत्य भकारेणैव गानं क्रियते । न हि तदार्चिकवर्णधर्माणामचामुपसंहारोस्तीति तद्गात्मकत्वं भकारस्य सम्भवति । एवं प्रकृतेपि ब्रह्मधर्मप्राकट्येन न तदात्मकत्वं जीवस्य सम्भवति । ननु " तत्त्वमसि " (छा. ६. ८. ७.) आदिवाक्यैरत्राभेदबोधनादस्तु तथेति चेत् तत्राह तदुक्तमिति । जीवब्रह्माभेदबोधनतात्पर्य-

---

मन्त्रेण कुशासादनं क्रियते । तत्रायं दृष्टान्तः **यागेष्विति** । तेषु सुत्यायां माध्यन्दिनसवनेषु **स्थाप्यन्त** इति । स तिसृभिः रस एकयेत्यादिरीत्या स्थाप्यन्त इत्यर्थः ।

तदेति । स्थापनकाले यः कुशसंबन्धि छन्दःस्तस्य यत **उपगानं** भकारेणोपगानं **तद्वदि**त्यर्थः । एतदेव विशदयन्ति । **तत्रायं प्रयोगः** । अथ पृष्ठानि रथन्तरं अभि त्वा शूरनोनुभावा ओमादुग्धा इवधेनूईशानभस्य जगतः सुवा २३ ईशां आईशानमा २३ पिडाश्सूस्प्यू २३४ षानुवाअस इति ऋक् । अत्र ओमादुग्धा इवेत्यत्र यः अच् आ इति तत्रभिभभेभभभोभो· भमभः सुवा २३ ईशामित्याद्युपगानं क्रियते । दृष्टान्तं विशदयन्ति **न हीति** । **तदर्चिकेति** । आदुग्धा इवेतिऋक्सबन्धिनो ये वर्णास्तेषा धर्माः ये अचः तेषामुपसंहारो ग्रहणमस्तीत्यतो हेतोः तद्गात्मकत्वं आदुग्धा इवेतिऋगात्मकत्वं भकारओवाभाइत्यस्य न हि संभवति । एवं प्रकृतेपि यत्किंचिद्धर्मप्राकट्येन कृष्णात्मकत्वं जीवस्येत्यर्थः । अत्राशङ्कते **नन्विति** ।

सौत्रं **तदुक्तमि**ति पदं व्याकुर्वन्ति **जीवेति** । ननु गतिसामान्यसूत्रे ब्रह्मैक्यमेव प्रतिपाद्यत इति चेन्न सामान्यपदतुल्यार्थत्वं तत्रैवोक्तमिति । **अन्य**

मुक्तमित्यर्थः । "तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्" (ब्र. सू. २. ३. २९.) इतिसूत्रेणेतिशेषः। अपि च श्रुतौ ब्रह्मोपायनस्य साम्योपायनहेतुत्वोक्त्या तदनुपायनस्य साम्यानुपायनहेतुत्वमिति ज्ञाप्यते। तथा च "पराभिध्यानात् तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ" (ब्र. सू. ३. २. ५.) इतिसूत्रे जीवस्य ब्रह्मांशत्वेनानन्दैश्वर्यादिब्रह्मधर्मवत्त्वाद्ब्रह्मणः सकाशाद्विभागे सति तदिच्छया तद्धर्मतिरोधानस्य संसारित्वे हेतुत्वमुक्तं यत्तदपि तदुक्तमित्यनेन स्मर्यत इति न विस्मर्तव्यम्। यथान्यशाखोक्तधर्मा अप्येकस्यां विद्यायामुपसंह्रियन्त एवं ब्रह्मनिष्ठा धर्मा जीवेऽप्येतया श्रुत्या बोध्यन्त इत्येतावत्साम्यमस्तीत्युपसंहारप्रकरण एतस्य निरूपणं कृतम् ॥ २६ ॥ ५ ॥

इति तृतीयाध्याये तृतीयपादे पञ्चमं वेधाद्यधिकरणम् ॥ ५ ॥

वाजसनेयिशाखायां "स एष नेति नेतीत्यात्मा" (बृ. ३. ९. २६.) इत्युपक्रम्य "न व्यथते" (बृ. ३. ९. २६.)

दप्याहुः अपि चेति। नन्विदं तु वक्तुं न शक्यते गुणोपसंहारे धर्मतुल्यताविचार एव नास्तीत्यत आहुः तथेति। यथा विद्याया एकत्वेन छान्दोग्योक्तायां पञ्चाग्निविद्यायां कारणोक्तषष्ठाग्नेरुपसंहारो क्रियते तथात्र वेदे परमसाम्यनिरूपणादेकत्वभ्रान्त्या ब्रह्मगतधर्माणामुपसंहारो जीवे स्यादिति भ्रमनिराकरणार्थमिदमुक्तमितिभावः। एतेन ब्रह्मभूतेन भजनं कर्तव्यं न तु विभूतीच्छा कर्तव्येतिज्ञापितम् ॥ २६ ॥ ५ ॥

इदानीं साधनभूतयोर्भक्तिज्ञानयोर्मध्ये कस्याधिक्यमिति बोधनायाधिकरणमारभते **संपरायेति**। सूत्रस्थतर्तव्याभावलिङ्गकश्रुतिद्वयं विषयः। तत्राद्या श्रुतिर्विषयत्वेनाहुः **वाजसनेयीति**। बृहदारण्यके शारीरब्राह्मणे।

इत्यन्तेन ब्रह्मस्वरूपमुक्त्वा एतादृग्ब्रह्मज्ञातस्तद्विदपि विवक्षितरूप इत्यभिप्रायेणाग्रे पठ्यते " अतः पापमकरवमतः कल्याणमकरवमित्युभे ह्येष एते तरत्यमृतः " (बृ. ४. ४. २२.) इत्यादिनाग्रिमया " एष नित्यो महिमा ब्राह्मणस्य " (तै. ३. १२. ९. ७.) इत्यृचा च ब्रह्मविदो माहात्म्यमुक्त्वा पठ्यते " तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत् सर्वमेनं पश्यति सर्वोस्यात्मा भवति सर्वस्यात्मा भवति सर्वं पाप्मानं तरति नैनं पाप्मा तरति " (बृ. ४. ४. २३.) इत्याद्युक्त्वान्ते पठ्यते " य एवं वेद " (बृ. ४. ४. २५.) इति। अत्र हि पाप्मतरणादिरूपं ब्रह्मज्ञानमाहात्म्यमुच्यते ज्ञानस्य संसारमुक्तिहेतुत्वात्। अथर्वणोपनिषदादिषु तु भगवद्भक्तेर्मुक्तिहेतुत्वमुच्यते " परं ब्रह्मैतद्यो धारयति " (गो. पू. १.) इत्युपक्रम्य " भजति सोमृतो भवति " (गो. पू. १.) इति। अग्रेपि " मुक्तो भवति

ब्रह्मस्वरूपमिति। जडविलक्षणं ब्रह्मस्वरूपमित्यर्थः। **विवक्षितरूप** इति। साध्वसाधुविहितकर्म इत्यर्थः। **उभे** इति। साध्वसाधुनी इत्यर्थः। **उभे हि** इति। निश्चयेन यो ब्रह्मवित् अमृतो जीवन्नेव भवति। **एष नित्ये**ति। एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान् तस्यैव स्यात्पदवित् तं विदित्वा न कर्मणा लिप्यते पापकेनेति सर्ववाक्यस्य तात्पर्यमाहुः **अत्र ही**ति। **ब्रह्मज्ञाने**ति। अक्षरब्रह्मज्ञानेत्यर्थः।

अपरां भक्तिहेतुत्वबोधिकां श्रुतिमाहुः **अथर्वणे**ति। **परं ब्रह्मे**ति। इदं गोपालतापनीयस्थं वाक्यम्। इदानीं संशयं स्फुटीकर्तुमाहुः **एतदि**ति। **पुरैवे**ति।

संसृतेः ” (गो. पू. १.) इति । एतद्विषयव्यवस्था तु पुरैवोक्तेति नात्रोच्यते । एतावान् परं सन्देहः “ य एवं वेद स पाप्मानं तरति ” (बृ. ४. २३.) इतिवचनाज्ज्ञानदशायामपि पापसत्त्वं वाच्यम् । अन्यथा तरणासम्भवापत्तेः । एवं सति भक्तिदशायाममप्येवमेव न वेति संशयः । तत्र श्रुतावविशेषेण पापनाशावश्यम्भावात् “ एकत्र निर्णीतः शास्त्रार्थोपरत्रापि तथा ” इतिन्यायेन भक्त्या पापनाशादत्रापि तथैवेति प्राप्त आह सम्पराय इत्यादि ।

सम्पराये तर्तव्याभावात् तथा ह्यन्ये ॥ २७ ॥ (३.३.६.)

सम्परायः परलोकस्तस्मिन् प्राप्तव्ये सतीत्यर्थः । अथवा परः पुरुषोत्तमस्तस्यायो ज्ञानम् । तथा च सम्यग्भूतं पुरुषोत्तमज्ञानं येन स सम्परायो भक्तिमार्ग इतियावत् । अथवा परे पुरुषोत्तमे अयनमयो गमनं प्रवेश इतियावत् । तथा च सम्यक् परायो येन स तथा भक्तिमार्ग इत्यर्थः । ज्ञानमार्गेक्षरप्राप्त्या भक्तिमार्गे पुरुषोत्तमप्राप्त्या तस्माद्विशेषमत्र ज्ञापयितुमेवंकथनमतो भक्तेः पूर्वमेव पाप-

---

न वा प्रकरणभेदादितिसूत्र इत्यर्थः । सदेहविषयमाहुः **एतावानिति**। पूर्वपक्षमाहुः **तत्रेति** । **तथैवेति** । पापसत्त्वमेव । सिद्धान्तसूत्रं व्याकुर्वन्ति **संपराये** इति । यथाश्रुत्यर्थे भक्तिमार्गबोधकपदाध्याहाराभिप्राय इत्यर्थान्तरमाहुः **अथवेति** । तथा च पुरुषोत्तमप्राप्तिः तज्ज्ञानत्वं च भक्त्यैवेति ज्ञापिते न सदेहो भवतीतिभावः ।

ननु योगापेक्षया रूढेर्बलवत्तरत्वादिदं न युक्तमत आहुः **ज्ञानमार्ग** इति । **तस्मात्** ज्ञानमार्गात् । **एवमिति** । योगिकपदमित्यर्थः । तथा चाध्याहारापेक्षया योगादरस्य लघुत्वादेवमाशयकथनं युक्तम् । ननु ज्ञानमार्गापेक्षया

नाशो युक्त इतिभावः । ब्रह्मभूतस्य भक्तिलाभानन्तरं " भक्त्या मामभिजानाति " (भ. गी. १८. ५५.) इति भगवद्वाक्यात् पुरुषोत्तमस्वरूपज्ञानस्य भक्त्यैकसाध्यत्वात् तथा । एवं सति " मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ॥ " (भाग. ६. १४. ५.), " मुक्तोपसृप्यव्यपदेशात् " (ब्र. सू. १. २. ३.), " जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥ " (पा. गी. ४०.) " जन्मान्तरसहस्रेषु समाराध्य वृषध्वजम् । वैष्णवत्वं लभेत् कश्चित् सर्वपापक्षयादिह ॥ " (वारा. पु. प्र. मा.) इत्यादिवाक्यैः पापनाशानन्तरमेव भक्तिसम्भवाद्भक्तस्य तत्तव्यपापादेरभावान्न ज्ञानमार्गीयतुल्यतेत्यर्थः । ननु " य एवं वेद " (बृ. ४. ४. २३) इतिसामान्यवचनात् पुरुषोत्तमविदोप्येवमेवेति चेत् **तथा ह्यन्ये । तथा** ज्ञानानन्तरमपि पापवन्तोन्ये भक्तिमार्गीयेभ्योन्य इत्यर्थः । उक्तवचनरूपोपपत्तिर्हिशब्देन ज्ञाप्यते ॥ २७ ॥

ननु भक्तिमार्गीयाणामपि गोपस्त्रीणां " दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः । ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमङ्गलाः ॥ "

भक्तिमार्गस्योत्कर्षत्व एवं वदेत् । तथा तु नास्तीत्यत आहुः **ब्रह्मेति** । ननु भक्तिमार्गे तत्तव्याभाव इत्यत आहु **एवं सतीति** । **मुक्तानामिति** । षष्ठस्कन्धे चतुर्दशाध्याये । **नराणामिति** । पाण्डवगीतायाम् सूत्रशेषावतारमाहुः **नन्विति** । **उक्तेति** । हिशब्दाल्लभ्यते । इत्यर्थः ॥ २७ ॥

सूत्रमवतारयन्ति **ननु भक्तीति** । **पूर्वोक्तेति** । पापभाववचनैरित्यर्थः ।

(भाग. १०. २६. १०) इतिवचनेन दुष्कृतसुकृतयोरपि हानिश्रवणात् पूर्वोक्तवचनैर्विरोध इत्याशङ्कायामुत्तरं पठति

छन्दत उभयाविरोधात् ॥ २८ ॥

छन्द इच्छा । तथा च भक्तिमार्गीयाणामपि पूर्वं पापनाशो यः स भगवदिच्छाविशेषतोतो भक्तेः पूर्वमेव पापनाशनिरूपकात तन्नाशनिरूपकवचनयोरविरोधाद्धेतोर्भक्तेः पूर्वमेव पापनाश आवश्यक इत्यर्थः । एवं सति भक्तेः पूर्वमेव तन्नाश औत्सर्गिकः । स क्वचिद्विशेषेच्छयापनोद्यत इतिभावो ज्ञापितो भवति । अत्रेच्छाविशेषे वक्तव्यबहुत्वेपि किञ्चिदुच्यते । चिकीर्षितलीलामध्यपातिभक्ता न सोपधिस्नेहवत्यो न सगुणविग्रहा न वा सुकृतादियुक्ता इति ज्ञापयितुं कतिपयगोपीस्तद्विपरीतधर्मयुक्ताः कृत्वा तस्यां दशायां स्वप्राप्तौ प्रतिबन्धं कारयित्वा स्वयमेव तां दशां नाशयित्वा स्वलीलामध्यपातिनीः कृतवानिति । न ह्येतावता सार्वदिक एवायं भावो भवति । न हि मन्त्रप्रतिबद्धशक्तिरग्निरदाहक इति तत्स्वभावत्वमेव तस्य सार्वदिकमिति वक्तुं शक्यम् । एतच्च श्रीभागवतदशमस्कन्धविवृतौ प्रपञ्चितमस्माभिः ॥ २८ ॥ ६ ॥

इति तृतीयाध्याये तृतीयपादे षष्ठं सम्परायाधिकरणम् ॥ ६ ॥

सूत्रार्थमाहुः **छन्द** इति । **एवं सति** पापाभावस्य सिद्धत्वे सतीत्यर्थः । **ज्ञापित** इति । इच्छाया अविरोधकथनेनेतिशेषः । ननु इच्छाज्ञानं कथं जायत इत्यत आहुः **अत्रे**ति । विस्तरभिया नात्रोपपादितम् । अधिकं तु **प्रकाशे** ज्ञेयम् ॥ २८ ॥ ६ ॥

ननु "सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन्" (तै. २. १.) इति "तमेवं विद्वानमृत इह भवति नान्यः पन्था विद्यतेयनाय" (तै. आ. ३. १२. ७.) इत्यादिश्रुतिभिरुक्तरूपब्रह्मज्ञाने सत्येव मोक्ष इत्युच्यते। "यमेवैष वृणुते तेन लभ्यः" (कठ. २. २२.) इतिश्रुत्यात्मीयत्वेनाङ्गीकारात्मकवरणस्य भक्तिमार्गीयत्वात् तस्मिन् सति भक्तिमार्गे प्रवेशाद्भक्त्यैव स इत्युच्यते। किञ्च 'भक्त्या मामभिजानाति' (भ. गी. १८. ५५.) इत्युक्त्वा "ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्" (भ. गी. १८. ५५.) इति भगवतोक्तमिति भक्तिमार्गेपि पुरुषोत्तमज्ञानेनैव मोक्ष उच्यते। ज्ञानमार्गे त्वक्षरज्ञानेनेतिविशेषः। "तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः। न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह॥" (भाग. ११. २०. ३१.) इतिवचनेन भक्तिमार्गीयस्य ज्ञाननैरपेक्ष्यमप्युच्यते। तथा चैवं मिथः श्रुत्योः स्मृत्योश्च विरोधान्नैकतरनिर्धारः सम्भवति। न च ज्ञानेनैव मोक्षः, उभयत्रापि

इदानीं भक्तेरुत्कर्षहेतुबोधनेनोत्कर्षं दृढीकर्तुं गत्यधिकरणमवतारयन्ति नन्विति। तमेवमिति वाक्यं तैत्तिरीये नारायणे। तत्रैव पूर्वं वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तादिति पठितम्। अत्र श्रुतिर्वदति अह वेदेति। तमस अज्ञानात् आदित्यवर्णं श्यामावदातवर्णं, आदित्यस्येव प्रकाशज्योतिरूपं, श्यामाच्छबलं शबलाच्छ्यामिति छान्दोग्ये पठितत्वात्। एवं चैतादृशपुरुषज्ञानेन मोक्ष इति श्रुत्या प्रतिपाद्यते। यमेवेतिश्रुत्या भक्त्यैव मोक्षः। तत्र भक्तिज्ञानयोः समुच्चयो वा विकल्पो वेतिसंशयः। किंचेति। उक्तमिति। गीतायामितिशेषः। नैकतरनिर्धार इति। तथा च निर्धारा-

तथोक्तेः, ज्ञाननैरपेक्ष्योक्तिस्तु भक्तिस्तुत्यभिप्रायेति वाच्यम्। विषयभेदेन ज्ञानभेदान्मुक्तिसाधनं कतमज्ज्ञानमित्यनिश्चयात्। न च श्रौतत्वाविशेषात् समुच्चय इति वाच्यम्। ज्ञानिनोऽक्षरे भक्तस्य पुरुषोत्तमे लयात् समुच्चयासम्भवात्। तर्ह्येवं विरोधाभावादुपपन्नं सर्वमिति चेन्न, पूर्वं ज्ञानमार्गीयज्ञानवतः पश्चाद्भक्तिमार्गीयज्ञानवतो लयस्थाननिर्धारासंभवात्। अपरञ्च। "ततो मां तत्त्वतो ज्ञात्वा" (भ. गी. १८. ५५.) इतिवचनाद्भक्तिमार्गे तत्त्वतो भगवज्ज्ञानमेव प्रवेशसाधनमिति मन्तव्यम्। तथा च "मत्कामा रमणं जारं मत्स्वरूपाविदोबलाः। ब्रह्म मां परमं प्रापुः सङ्गाच्छतसहस्रशः॥" (भाग. ११. १२. १३.) इतिवाक्यात् ज्ञानमार्गीयभक्तिमार्गीयज्ञानरहितानामपि भगवत्प्राप्तेस्तत्साधनत्वनिरूपकश्रुतिविरोधः। तथा च क्वचिज्ज्ञानं मुक्तिसाधनत्वेनोच्यते क्वचिन्नोभयमपीत्येकतरसाधनानिश्चयान्मुक्तिसाधने मुमुक्षोः प्रवृत्त्यसम्भव इति प्राप्त आह **गतेरर्थवत्त्वमित्यादि**।

भावाद् वाक्यानामबोधकत्वमितिभावः। शङ्कते **न चेति**। **तथोक्तेरिति**। ज्ञाने भक्तावपि ज्ञानेनैव मोक्ष इत्युक्तेः। **स्तुत्यभिप्रायेति**। भक्तेरयमर्थवाद इत्यर्थः। उत्तरमाहुः **विषयेति**। **अनिश्चयात्** अनिर्धारात्। **न चेति**। उत्तरयन्ति **ज्ञानिन** इति। **समुच्चयासंभवात्**। तथा च स्थानभेदेन फलभेदात्समुच्चयो न भवतीतिभावः। शङ्कते **तर्ह्येवमिति**। स्थानभेदेन फलभेदे सतीत्यर्थः। **उपपन्नमिति** तत्रोभयोर्व्यवस्थितत्वाद् वाक्यानां विरोधाभावात् श्रुतिस्मृत्युक्तं सर्वमुपपन्नमिति व्यर्थमधिकरणारम्भ इत्यर्थः। उत्तरमाहुः **पूर्वमिति**। **निर्धारासंभवादिति**। तथा च संदेहे अधिकरणारम्भ इत्यर्थः। तृतीयमार्गोप्यस्तीत्याहुः **अपरंचेति**। **तत्साधनत्वेति**। ज्ञानभक्तिसाधनत्वेत्यर्थः। पूर्वपक्षमाहुः **तथा चेति**।

गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥२९॥ (३.३.७.)

गतेर्ज्ञानस्यार्थवत्त्वं फलजनकत्वमुभयथा मर्यादापुष्टिभेदेनेत्यर्थः। अत्रायमाशयः। " एष उ एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति " (कौ. ३. ९.) इत्यादिश्रुतिभ्यो भगवान् सृष्टिपूर्वकाल एवैतस्मै जीवायैतत् कर्म कारयित्वैतत् फलं दास्य इति विचारितवानिति तथैव भवति। तत्रोक्तरीत्या मुक्तिसाधनानुगमे हेतुरवश्यं वाच्यः। एवं सति कृतिसाध्यं साधनं ज्ञानभक्तिरूपं शास्त्रेण बोध्यते। ताभ्यां विहिताभ्यां मुक्तिर्मर्यादा। तद्रहितानामपि स्वस्वरूपबलेन स्वप्रापणं पुष्टिरित्युच्यते। तथा च यं जीवं यस्मिन् मार्गेऽङ्गीकृतवांस्तं जीवं तत्र प्रवर्तयित्वा तत् फलं ददातीति सर्वं सुस्थम्। अत एव पुष्टिमार्गेऽङ्गीकृतस्य ज्ञानादिनैरपेक्ष्यं मर्यादायामङ्गीकृतस्य तदपेक्षित्वं च युक्तमेवेतिभावः। अत्र साधकत्वेन

आहेति। सिद्धान्तमाहेत्यर्थः। सूत्रार्थमाहुः **गतेरिति**। विशदयन्ति **अत्रायमिति**। कार्यमात्रं प्रतीश्वरेच्छायाः कारणत्वबोधिका श्रुतिमाहुः **एष उ एवेति**। **साधनानुगमे हेतुरिति**। भगवदिच्छेतिशेषः। तथा च ज्ञानभक्तिवरणजारादिबुद्धिः भगवद्विषयककामः। एतेषां साधनानुगमे मार्गे भेद एव हेतुः, एकः मर्यादा एकः पुष्टिरिति। मर्यादा च सर्वसाधारणा एतावति कृत एतावद्दीयत इति। पुष्टिस्तु अनुग्रहः। लोकवत्तु लीलाकैवल्यमितिन्यायात्। यमेभ्यो लोकेभ्य इतिन्यायात्। उदितानुदितपक्षवद्व्यवस्था। केवलमर्यादायां वृतस्य जीवस्याक्षरे पूर्वपूर्वज्ञानमार्गीयज्ञानवतो लयः। पश्चाद्भक्तिमार्गीयज्ञानवत अक्षरे। ततः पुरुषोत्तमे लयस्य सुखेन संभवात् श्रुतिस्मृतिविरोधोऽपि नास्तीति। **सर्वं सुस्थम्। अत एवेति**। मार्गवैलक्षण्यादित्यर्थः। सूत्रशेषमवतारयन्ति

विपक्षे बाधकमाह अन्यथा हि विरोध इति । अन्यथा मर्यादा-पुष्टिभेदेन व्यवस्थाया अकथने विरोधाद्धेतोस्तथेत्यर्थः । विरोधस्तु पूर्वपक्षग्रन्थ उपपादितः । एतेनैव–ननु श्रवणादिरूपा प्रेमरूपा च भक्तिरविशेषेण पापक्षय एवोदेत्युत कश्चिद्विशेषोऽस्ति । तत्राधुनिकानामपि भक्तानां दुःखदर्शनाच्छ्रवणादेः पापनाशकत्वश्रवणाच्चाविशेष-पक्षस्त्वसङ्गतः । अथ श्रवणादिरूपा पापे सत्यपि भवति प्रेमरूपा तु तन्नाश एवेतिविशेषो वाच्यः । सोपि प्रेमवतामप्यक्रूरादीनां मणि-प्रसङ्गे भगवता समं कापट्यकृतिश्रवणान्न साधीयान्–इत्यपि शङ्का निरस्ता वेदितव्या । तथा हि । मर्यादापुष्टिभेदेनाङ्गीकारे वैलक्षण्या-दाद्यायामङ्गीकृतानां मुमुक्षयैव श्रवणादौ प्रवृत्तिस्तद्दातृत्वेनैव भगवति प्रेमापि न तु निरुपधिः । कदाचिद्वस्तुस्वभावेन मुक्तीच्छानिवृत्तावपि तद्भक्तेः साधनमार्गीयत्वात् " अनिच्छतो मे गतिमण्वीं प्रयुङ्क्ते " (भाग. ३. २५. ३६.) इतिवाक्यादन्ते मुक्तिरेव भवित्री । अस्मिन् मार्गे श्रवणादिभिः पापक्षये प्रेमोत्पत्तिस्ततो मुक्तिः, पुष्टि-मार्गेऽङ्गीकृतेस्त्वत्यनुग्रहसाध्यत्वात् तत्र च पापदेरप्रतिबन्धकत्वात् श्रवणादिरूपा प्रेमरूपा च युगपत् पौर्वापर्येण वा वैपरीत्येन वा भवत्येव । अत्र श्रवणादिकमपि फलरूपमेव । स्नेहेनैव क्रियमाण-

---

अत्रेत्यादि । **तथे**ति । साधने मुमुक्षोः प्रवृत्तिस्तस्याः प्रतिबन्धः । साधकीभूत-विरोधमाहुः **विरोधस्त्व**ति । अत्राधिकं **प्रकाशेनुसंधेयम्** ।

अस्याधिकरणस्य प्रयोजनान्तरमाहुः **एतेने**ति । निरस्ता वेदितव्येत्यन्तेन । शङ्कानिरसनमेव विशदयन्ति **तथाहीत्यादिना वक्तुं शक्यमित्यन्तेन** ।

त्वात् न विधिविषयः। न ह्यविद्यादिमुक्त्यन्तरूपभजनानन्दान्तराय- रूपाश्रङ्कषाविरलविविधमहात्तरुगहनानां दहने लोलुपस्यानुग्रहानलस्य तदान्तरालिकपापतूल प्रतिबन्धकमिति वक्तुं शक्यम्। तदुक्तं श्रीभागवते "स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः। विकर्म यच्चोत्पतितं कथञ्चिद्धुनोति सर्वं हृदि सन्निविष्टः" (भाग. ११. ५. ४२.) इति। 'विकर्म' प्राक्तनं तद् दुःखदमिति। स्वयञ्च 'हरि' त्वेन दुःखहर्तेति, 'धुनोति', उक्तविशेषणविशिष्टस्य स्वतो विकर्मोत्पत्त्यसम्भवात्। सांसर्गिकं मत्तो भूतं न तु मया कृतमितिवद्वा यत् कृतं 'विकर्म' तत् 'कथञ्चिदुत्पतितम्' इत्युच्यते। 'त्यक्तान्यभाव' त्वेन भगवत्सेवाव्यासङ्गेनेन्द्रद्युम्नाख्यपाण्ड्यराजवन्महदागमनाद्यज्ञानं वा, वक्तोक्तरूपे भक्ते विकर्मोक्तावरुचिज्ञापनाय वा 'कथञ्चिदि' इत्युक्तवान्। तेन तर्कित विकर्मात्राप्यभिप्रेतमिति ज्ञायते। एतादृशस्यापि यदि 'विकर्म' भवेत् तदा तन्निवृत्त्यर्थं न तेनान्यत् कर्तव्यं, भगवानेव 'हृदि निविष्टः' तद् 'धुनोति' यत इति। कदाचित् स्वभक्तिबलस्फूर्त्या

अत्रैतादृश्या ईश्वरेच्छायाः सत्त्वे प्रमाणमाहुः **तदुक्त**मिति। तत्र प्रथमं विकर्म विशदयन्ति। **हरित्वेने**ति। हराम्यघं यत्स्मर्तृणां हविर्भागं क्रतुष्वहम्। वर्णाश्च मे हरिश्रेष्ठस्तस्माद्धरिरहं स्मृतः॥ इति **भारते**।

द्वितीयं विशदयन्ति **उक्ते**ति। **मत्तो भूतमि**ति। कामनां विनेव मया कृतं बुद्ध्यापि न कृतमित्यर्थः। ततोऽतिरिक्तमाहुः **त्यक्ते**ति। **अज्ञानं वे**ति। विकर्मस्थानीयमज्ञानमित्यर्थः। गौण्यङ्गीकारे बीजमाहुः

सदोषमपि जनं कृतार्थीकरिष्यामीत्यङ्गीकुर्याच्चेद्भक्तस्तदैव हृदिस्थ एव तत्संसर्गजं दोषमस्यैतदङ्गीकारेण तद्दोषमपि धुनोतीति 'सर्व' पदेनोच्यते। चिरकालभोग्यमपि तत्क्षणेनैव नाशयति। तन्नाशने कालादेरप्रतिबन्धकत्वमित्यपि ज्ञापयितुं परस्य कालादेरीशत्वमुक्तम्। अत्र भजनादिहृन्निवेशान्तानां स्पष्ट एव विकर्मणि सत्यपि सम्भव इति ॥ २९ ॥ ॥ ७ ॥

इति तृतीयाध्याये तृतीयपादे सप्तमं गतेरर्थवत्त्वमित्यधिकरणम् ॥ ७ ॥

ननु मुक्तेरेव सर्वत्र फलत्वमुच्यते। युक्तश्चैतत्। संसृतेर्दुःखात्मकत्वात् तन्निवृत्तेः सर्वेषामिष्टत्वात्। पुष्टिमार्गीयभक्तानां तु तदनपेक्षितत्वमुच्यते। तदुक्तमाथर्वणोपनिषत्स्वष्टादशार्णमन्त्रस्वरूपमुक्त्वा पठ्यते। 'परब्रह्मैतद्यो धारयति' (गो. पू. १.) इत्यादेरन्ते 'सोमृतो भवति' (गो. पू. १.) इत्यादि। एतदग्रे 'किं तद्रूपं किं रसनं कथं हैतद्भजनम्' (गो. पू. १.) इत्यादि

वक्तेति। सर्वपदतात्पर्यमाहुः **कदाचिदिति**। रन्तिदेवोपाख्याने नवमस्कन्धे, द्वितीयस्कन्धे किरातहूणान्ध्रेत्यादिना। तथा च यत्सिद्धं तदाहुः **अत्रेति** ॥ इति सप्तमाधिकरणम् ॥

पूर्वाधिकरणे भक्तिहेतुबोधनेन भक्तस्य भक्तेश्च सर्वापेक्षया उत्कृष्टत्वं बोधितम्। अस्मिन्नधिकरणे मर्यादापुष्टिभक्त्योर्मध्ये पुष्टिभक्तेरुत्कर्षमाहुः **नन्विति**। **तदनपेक्षितत्वमिति**। मुक्त्यनपेक्षितत्वमित्यर्थः अत्र प्रमाण-

प्रश्नोत्तरं पठ्यते । ‘ भक्तिरहस्यभजनं तदिहामुत्रोपाधिनैराश्येनैवामुष्यात्मनः कल्पनमेतदेव नैष्कर्म्यम् ’ (गो. पू. १.) इति ।

एतदत्र विचार्यते । मन्त्रावृत्तितदधिष्ठातृरूपध्यानादेरमृतत्वं फलमुच्यते । भजनस्वरूपं च यावत्फलनैराश्येन भगवत्यात्मनः कल्पनमित्युते । न च फलनैराश्येन भजनेप्यन्ते मुक्तिरेव भवित्रीति वाच्यम् । ‘ तं यथा यथोपासते तथैव भवति तद्धैतान् भूत्वावति ’ (मुद्गल. ३. ९.) इतिश्रुतेर्मुक्तिसाधनत्वेन ज्ञात्वा भजतः सैव फलं, स्वरूपस्यैव स्वतन्त्रपुरुषार्थत्वमनुभवन् यो भजते तस्य तदेव फलमिति यतो निर्णयः सम्पद्यते । “ ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ” (भ. गी. ४. ११.) इति भगवद्वाक्याच्च । अत एव ‘ रहस्यभजनं ’ लक्ष्यमुक्तम् । तथा च श्रौतत्वभगवत्सम्बन्धित्वयोरविशेषात् कतमो गरीयानिति संशये गूढाभिसन्धिः पठति ।

माहुः तदुक्तं रहस्यभजनमिति । अस्यार्थमाहुः तदिहेति । उपाधिनैराश्येन फलेच्छाशून्येन कल्पनं तदीयत्वसमर्थनं अन्तर्बहिःसेवया तद्दृढीकरणमितियावत् । नैष्कर्म्यं संन्यासः ।

एतदत्रेति । एतत् तापनीयवाक्यद्वयम् । अत्र सूत्रे । विचारमाहुः मन्त्रेति । “ अमुं पञ्चपदं मन्त्रमावर्तयेद्यः स यात्यनायासतः केवलं तत् ” इति अष्टादशार्णमन्त्रस्यावृत्तिः । तदधिष्ठातृरूपेति । मन्त्राधिष्ठातृरूपेत्यर्थः । उच्यत इति । यो ध्यायति रसतीत्यादिब्राह्मण उच्यत इत्यर्थः । कल्पनमिति । समर्पणमित्यर्थः । अग्रे स्पष्टम् । अत एव भगवतः फलत्वादेव । एतावता यत्सिद्धं तदाहुः तथा चेति । संशये पूर्वपक्षरूपे संशये । पठतीति । सूत्रं पठतीत्यर्थः ।

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥३०॥ (३.३.८.)

मुमुक्षोः सकाशाद्रहस्यभजनकर्तैवोपपन्नः उपपत्तियुक्तः। तमेवोद्घाटयति **तल्लक्षणार्थोपलब्धेरिति**। **तल्लक्षणा** भगवत्स्वरूपात्मको योऽर्थः स्वतन्त्रपुरुषार्थरूपस्तदुपलब्धेः स्वाधीनत्वेन तत्प्राप्तेरित्यर्थः। यद्यपि पुरुषोत्तमे प्रवेशे तदानन्दानुभवो भवति, तथापि न प्रभोस्तदधीनत्वं भक्तितिरोभावात्, प्रत्युत वैपरीत्यम्। भजनानन्दस्य तत आधिक्यं तु 'मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगम्' (भाग. ५. ६. १८.) 'दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः' (भाग. ३. २९. १३.) 'नारायणपराः' (भाग. ६. १७. २८.) इत्युपक्रम्य 'स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः' (भाग. ६. १७. २८.) इत्यादिवाक्यैरध्यवसीयते। अत एव सामीप्यवाच्युपसर्ग उक्तः। तेन दासीत्वेन दासत्वेन लीलायां सुहृत्त्वेन प्रभुनिकटे स्थितिरुक्ता भवति। न च महत्पदार्थस्वरूपाज्ञानादल्प एवानन्दे यथा सर्वाधिक्यं मन्वानः

सूत्रार्थमाहुः **मुमुक्षोरिति**। **तमेवेति**। उपपन्नं भक्तमथवा गूढाभिसन्धिम्। ननु स्वरूपानन्दापेक्षया भजनानन्दस्याधिक्यं कथमित्यत आहुः **यद्यपीति**। भजनानन्दस्य स्वरूपानन्दापेक्षयाऽधिक्ये प्रमाणमाहुः **भजनानन्दस्येति**। **इत्यादिवाक्यैरिति**। पञ्चमतृतीयषष्ठस्कन्धेषु षष्ठाध्यायऋषभदेवसंवाद-एकोनत्रिंशाध्यायकपिलसंवाद-सप्तदशाध्यायरुद्रपार्वतीसंवादस्य वाक्यैरित्यर्थः। अयमेव सूत्राशय इत्यत्रोपष्टम्भकमाहुः **अत एवेति**। **उपसर्गेति**। उपोपसर्ग इत्यर्थः। भक्तस्य चतुर्विधमुक्त्यपेक्षयाधिक्यमाहुः **तेनेति**।

पूर्वोक्तं न वाञ्छति तथात्रापीति वाच्यम् । दीयमानानामर्थानां स्वरूपाज्ञानासम्भवात् । अनुभवविषयीक्रियमाणत्वस्यैवात्र दीयमान-पदार्थत्वात् । तदज्ञाने स्वर्गादित्रये तुल्यदर्शित्वासम्भवश्च । "मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगम्" (भाग. ५. ६. १८) इतिवाक्ये भक्तेराधिक्यं स्पष्टमेवोच्यते । तस्मान्न्यूनार्थजिघृक्षोः सकाशात् पूर्णार्थवान् महानितियुक्तमेवास्योपपन्नत्वम् । इममेवार्थं दृष्टान्तेनाह लोकवदिति । यथा स्वाधीनभर्तृका नायिका तदवस्थाननुगुणगृह-वित्तादिकं दीयमानमपि नोरीकरोति तथेत्यर्थः ।

अथवा स भगवानेव लक्षणमसाधारणो धर्मो यस्य स तल्लक्षण उद्भटभक्तिभावः स एवार्थः स्वतन्त्रपुरुषार्थरूप इति अग्रे पूर्ववत् । भगवत्प्राकट्यवानेव हि भक्तो भक्तत्वेन ज्ञायत इति तथा । एतेन ज्ञाप्यं हि ज्ञापकादधिकं भवति । एवं सति यज्ज्ञापकं परमकाष्ठापन्नं वस्तु पुरुषोत्तमस्वरूपं सर्वफलरूपं तन्महत्त्वं कथं वक्तुं शक्यमिति सूच्यते ॥ ३० ॥ ८ ॥

इति तृतीयाध्याये तृतीयापादेऽष्टमसुपन्नाधिकरणम् ॥ ८ ॥

अथर्वणोपनिषत्सु पठ्यते "परब्रह्मैतद्यो धारयति रसति भजति

शङ्कासमाधानेन भक्तेराधिक्यमाहुः **न वेत्यादिना** । सर्वापेक्षया भक्तस्योत्कृष्टत्वं बोधयितुं प्रकारान्तरमाहुः **अथवेति** । अत्र सर्वापेक्षया पुष्टिभक्तोऽधिक इति सूचितम् ॥ ३० ॥ इति अष्टमाधिकरणम् ॥

एतावता पुष्टिभक्तेः फलरूपत्वं विचार्य मर्यादाभक्तिजन्यायां मुक्तौ विचारं कर्तुमधिकरणमारभते **अनियम** इति । विषयादिकमाहुः **अथर्वणेति** ।

ध्यायते प्रेमति शृणोति श्रावयत्युपदिशत्याचरति सोऽमृतो भवति " (गो. पू. १.) इति । तत्र धारणादीनां समुदितानामेवामृतसाधकत्वमुत प्रत्येकमपीति भवति संशयः । अत्र धारणादिसाधनकलापमुक्त्वा फलमुच्यत इति समुदितानामेव मुक्तिसाधकत्वम् । उपलक्षणं चैतत् । श्रवणादिनवविधभक्तीनामप्येवमेव तथात्वमिति- पूर्वपक्षे सिद्धान्तमाह अनियम इति ।

अनियमः सर्वासामविरोधः

शब्दानुमानाभ्याम् ॥ ३१ ॥ (३. ३. ९.)

समुदितानमेव तेषां फलसाधकत्वमितिनियमो नास्तीत्यर्थः । अत्रोपपत्तिमाह सर्वासामविरोध इति । " चिन्तयंश्चेतसा कृष्णं मुक्तो भवति संसृतेः " (गो. पू. १.) इति श्रुत्या चिन्तनमात्रस्य तथात्वमुच्यते । " पञ्चपदीं जपन् " इत्याद्युक्त्वा " ब्रह्म सम्पद्यते ब्रह्म सम्पद्यते " (गो. पू. १.) इतिश्रुत्या कीर्तनमात्रस्य तथात्वमुच्यते । तथा च प्रत्येकपक्ष एव सर्वासां श्रुतीनामविरोधः स्यात् । एवं सति " परब्रह्मैतद्यो धारयति " (गो. पू. १.) इत्यादिषु " सोऽमृतो भवति " (गो. पू. १.) इतिपदं प्रत्येकं सम्बध्यत इति ज्ञेयम् । ननु यथा दण्डादीनां प्रत्येकं घटहेतुत्वो-

---

सर्वाङ्गेषु मनोधारणां करोति कीर्तयति, सेवते अङ्गलीलां वा चिन्तयति, स्निह्यति, द्रौ स्पष्टौ, मन्त्रोपदेशं करोति, भगवद्धर्माचरणं करोतीति नवानां यथासंख्येनार्थः । संशयस्तु स्पष्ट एव । पूर्वपक्षमाहुः अत्रेति । सिद्धान्तं कर्तुं सूत्रव्याख्यानमाहुः **समुदितानामिति** । अत्राशङ्कते **नन्विति** । समादधते

क्तावपि नैकस्यैव तज्जनकत्वमेवमत्राप्येकैकस्य चिन्तनादेस्तथात्वो-क्तावपि फलसाधकत्वं समुदितानामेव तेषामिति चेत्, मैवम्। योऽर्थो यत्प्रमाणैकसमधिगम्यः स तेन प्रमाणेन यथा सिध्यति तथा मन्तव्यः। दण्डादेस्तथात्वं प्रत्यक्षेण गृह्यत इति तत्र तथास्तु। प्रकृते तु तेषां तथात्वमलौकिकशब्दैकसमधिगम्यम्। श्रुतिस्तूक्तैव। न चोक्तन्यायः श्रुतिष्वपि तात्पर्यनिर्णायको भवतीति वाच्यम्। अलौ-किकेऽर्थे लौकिकस्यासामर्थ्यात्। अन्यथा ब्रह्मणा मनसैव प्रजाजनने निषेकादिकमपि कल्प्येत। स्मृतिरपि "केवलेन हि भावेन गोप्यो गावः खगा मृगाः। येऽन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसा॥" (भाग. ११. १२. ८.), "एतावान् साङ्ख्ययोगाभ्याम्" (भाग. २. १. ६.) इत्युपक्रम्य "अन्ते नारायणस्मृतिः" (भाग. २. १. ६.) इत्यादिरूपैवमेवाह। इममेवार्थं हृदि कृत्वाह सूत्रकारः शब्दानुमानाभ्यामिति। श्रुतिस्मृतिभ्यामित्यर्थः। ते चोक्ते।

एतेन सूत्रकारस्यान्योऽप्यनुशयोऽस्तीति भाति। यत्रोक्तसाधन-स्तोमसम्पत्तिरेकस्मिन् भक्तेऽस्ति तत्रैकेनैव मुक्तावितरसाधनत्वबोधक-श्रुतिविरोधाच्छ्रवणकीर्तनस्मरणानां मुक्त्यव्यवहितपूर्वक्षणे युगपदपि सम्भवादन्यथासिद्धिसम्भवे विनिगमकाभावादेकेनैव मुक्तिरिति न

मैवमिति। **एवमेवेति**। प्रत्येकपक्षमेव। नन्वेवं चेद्यत्र भक्तिसमुदायस्तत्र कस्य कस्य कारणतेत्याकाङ्क्षा पूरयति **एतेनेति**। सूत्रे अनियमोक्त्या। अनु-शयं व्युत्पादयन्ति **यत्रोक्तेति**। **अन्यथासिद्धीति**। युगपत्संभव इतिकृत्वा

नियमोऽतः प्रत्येकसाधकत्वबोधिकानां **सर्वासां** श्रुतीनां मिथो**विरोधः**। तर्ह्येकत्र तथात्वे सर्वत्रैव तथास्त्वित्याशङ्क्य तत्र बाधकमाह **शब्दानुमानाभ्यामिति** । पूर्ववत् । तत्र प्रत्येकमपि मुक्तिहेतुत्वमुच्यत इति न तथेत्यर्थः । यत्र प्रत्येकमपि तथात्वं तत्र किमु वक्तव्यं समुदितानां तथात्वमितिभावः । तेन श्लिष्टः प्रयोगोयमिति ज्ञेयम् ॥ ३१ ॥ ९ ॥

इति तृतीयाध्याये तृतीयपादे नवममनियमाधिकरणम् ॥ ९ ॥

पूर्वं मुमुक्षुभिः साधनत्वेन क्रियमाणानां भगवद्धर्माणां मुक्तिसाधनप्रकारो विचारितः । अधुना तु भगवान् स्वविचारितकार्ये लौकिकैश्वर्याद्यशक्यं ज्ञात्वा स्वैश्वर्यादिकं दत्त्वा येन जीवेन तत् कारयति स जीवस्तैर्धर्मैर्मुक्तो भवति न वेति विचार्यते । तत्र जीव-

---

अन्यथासिद्धिसंभव इत्यर्थः । **विनिगमकेति**। कस्यान्यथासिद्धिरित्यत्र विनिगमके नास्तीत्यर्थः । **बाधकमाहेति** । सुन्दोपसुन्दन्यायेन कस्यापि भक्तेः कारणत्वमस्त्वित्याशङ्क्य भक्तीनां मुक्तावहेतुत्वे बाधकमाहेत्यर्थः । **तत्रेति** । वेदे स्मृतौ चेत्यर्थः । विकल्पदोषपरिहारमाहुः **यत्र प्रत्येकमिति** । तथा यत्रानेकभक्तिसत्त्वं तत्रफलशीघ्रतैवेतिबोध्यम् । **श्लिष्ट इति** । अनियम इत्ययं प्रयोगः श्लिष्ट इत्यर्थः । एकमेव कर्तव्यं न द्वयं त्रयं वेत्यस्यानियम इति भावः । अत्रैव बोध्यम् । यत्रातिकृपा तत्र सद्योमुक्तिरन्यत्रार्चिरादिमार्ग इति सूत्राद्बोध्यम् । इति नवमाधिकरणम् ॥

पूर्वाधिकरणसंगतिमाहुः **पूर्वमिति** । अधिकरणप्रयोजनमाहुः **अधुनात्विति** । **तैर्धर्मैः** अधिकरणप्रयोजनधर्मैः । ते च " यदादित्यगतं तेजः " इति । अथ च प्रतर्दनसंवाद इन्द्रेण स्वस्मिन्नुक्ता ये धर्मा भगवदीया बोध्याः ।

कृतभगवद्विषयकधर्माणां यत्र तत्साधकत्वं तत्र भगवदीयानां धर्माणां तत्साधकत्वं सुतरामेव । तेषां स्वकृत्यसाध्यत्वेनाविषयत्वात् तत्साधनेष्वप्रवेशोपीतिसन्देहे निर्णयमाह यावदित्यादि ।

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३२ ॥

(३. ३. १०.)

यस्मिञ्जीवे कार्यसाधनार्थमधिकारो भगवता दत्तस्तत्कार्यसाधनक्षमास्तस्मिन् ये स्वधर्मा भगवता स्थापितास्त **आधिकारिका** इत्युच्यन्ते । तत्कार्यसम्पत्तिरेव तदधिकारप्रयोजनमिति तावदेव तेषां तस्मिन् **स्थिति**रित्यर्थः । एवं सति तत्सम्पत्तौ सोपि निवर्तत इति तत्सम्बन्धिनो धर्मा अपि निवर्तन्त मुक्तिपर्यन्तं न तेषां व्यापारसम्भवः । भगवता तथैव विचारितत्वात् । मुक्तिस्तु भक्त्यैवेतिभावः ।

विचार्यत इति । सायुज्यं तस्य भवति न वेति विचार्यत इत्यर्थः । यथादित्यप्रकाशतेजः भगवदीयधर्मः । तेनादित्यो युक्तो भवति वा न वेति **संशयः** । यदि भवति तदा भक्तेर्हेतुत्वं गतम् । यदि न भवति तदा मुक्तं प्रति तद्धर्माणां प्रतिबन्धकत्वं स्यादितिविचार इति भावः । पूर्वपक्षमाहुः **तत्रे**ति । **भगवद्विषयके**ति । भक्तिरूपाणा धर्माणामित्यर्थः । इत्येकः पूर्वपक्षः । अपरमाहुः **तेषामि**ति । **तत्साधनेष्वि**ति मुक्तिसाधनेष्वित्यर्थः । तथा च यथा यागादिकं कृतिसाध्यमिति तत्स्वर्गसाधनं, आदित्यगतं तेजः कृतिसाध्यं न भवतीति तत्साधनमपि न भवतीतिभावः ।

सिद्धान्तमाहुः **यस्मिन्नि**ति । **स्वधर्मा** इति । भगवद्धर्मा इत्यर्थः । **एवं सती**ति । यावत्कार्यं तावत्पर्यन्तमादित्यः आदित्यगतो धर्मः तेजोरूपम् । अत्र भगवदिच्छैव नियामिकेतिमुक्तिजनकतावच्छेदकं भक्तित्वमेवेतिभावः ।

यच्च " ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥ " (कूर्म. पू. १२ २६९.) इतिवाक्यं तत्त्वाकल्पान्तं येषामधिकारः सप्तर्षिप्रभृतीनां तद्विषयकमिति ज्ञेयम् । अन्यथा भगवद्दत्ताधिकारसामर्थ्यस्य भरतस्य स्वाधिकारसमाप्तौ मुक्तिं न वदेत् । ' कृतात्मानः ' इतिपदात् तेषामपि भगवति कृतान्तःकरणानामेव ' परस्य ' भगवतः ' परं पदम् ' व्यापिवैकुण्ठे प्रवेश उच्यते न स्वाधिकारिकगुणैः ॥ ३२ ॥ १० ॥

इति तृतीयाध्याये तृतीयपादे दशममाधिकारिकाधिकरणम् ॥ १० ॥

ननूक्तार्थर्वणोपनिषद्वाक्यैर्भगवद्धर्माणां मुक्तिसाधनत्वमुच्यते । श्रुत्यन्तरेषु "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेयनाय" (तै. आ. ३. १२. ७.) " ज्ञानादेव तु कैवल्यम् " (ग. पु. सा. १६. ८७.) " तरति शोकमात्मवित् " (छा. ७. १. ३.) " ब्रह्म वेद ब्रह्मैव भवति " (मु. ३. २. ९.) इत्यादिषु ज्ञान-

---

नन्विधिकारान्तेपि मुक्तिरुच्यते कुत्रचिदित्यत आहुः **यच्चेति** । तेषां भक्त्यैवाधिकारमुक्तिरितिभावः । तथा स्वीकारे गमकमाहुः **अन्यथेति** । **सामर्थ्यस्य** भगवदीयधर्मवतः । सप्तर्षीणामपि तथैवाहुः **कृतात्मान** इति ॥ ३२ ॥ इति दशमाधिकरणम् ॥

एतावता भक्तेरेव मुक्तिहेतुत्वं व्यवस्थापितम् । इदानीमक्षरज्ञानस्यापि मोक्षकारणत्वं क्वचिच्छ्रूयत इत्येतदर्थमक्षराधिकरणमाहुः **अक्षरधियामिति** । सूत्रमवतारयन्ति **नन्विति** । **अथर्वणेत्यादिना** विषयसंशयौ । पूर्वपक्षमाहुः

स्यैव मुक्तिसाधनत्वमुच्यते । श्रुतित्वाविशेषादुभयोस्तथात्वे कारण-वैजात्ये कार्यवैजात्यस्यावश्यकत्वान्मुक्तौ च तदसम्भवाद् "भक्त्या मामभिजानाति" (गीता. १८. ५५.) इतिवाक्याद्भक्तौ ज्ञान-स्यापि सम्भवाज्ज्ञानेनैव मुक्तिरितिपूर्वपक्षे ज्ञानसाधनत्वनिरूपक-श्रुतितात्पर्यं निरूपयन् पुरुषोत्तमप्राप्तेरेव मुक्तिपदवाच्यत्वात् तद्भ-जनस्यैव तत्प्रापकत्वमिति हृदि कृत्वाहाक्षरधियामित्यादि ।

अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौ-पसदवत् तदुक्तम् ॥ ३३ ॥ (३. ३. ११.)

तुशब्दः पूर्वपक्षनिरासे । वाजसनेयके श्रूयते "एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलम्" (बृ. ३. ८. ८.) इत्यादि । तथाथर्वणे "अथ परा यया तदक्षरमधिगम्यते" (मु. १. १. ५.) इति । तेन ज्ञानमार्गेऽक्षरविषयकाण्येव ज्ञानानि निरूप्यन्ते पुरुषोत्तम-विषयकाणि नेति निश्चीयते । "ब्रह्मविदाप्नोति परम्" (तै. उ.

श्रुतित्वाविशेषादिति । **मुक्तौ च तदसंभवादिति** । मुक्तौ सर्वमायानिवृत्ति-रिति श्वेताश्वतरोपनिषद्युक्तमतो वैजात्यं नास्तीत्यर्थः । **पूर्वपक्ष** इति । सतीति-शेषः । **हृदि कृत्वाहेति** । अक्षरज्ञानस्य भक्तिं प्रति कारणत्वमाहेत्यर्थः । सूत्रार्थमाहुः **तुशब्द** इति । **निरासे** ज्ञानेनैव मोक्ष इति पक्षनिरासे इत्यर्थः । ज्ञानकारणश्रुतितात्पर्यं वर्णयन्ति **वाजसनेयक** इति । तथाचाक्षर-ज्ञानं ब्रह्मज्ञानमिति ब्राह्मणपदेनोक्तमत्रेतिभावः । **निश्चीयत** इति । पुरुषो-त्तमविषयकाणि नेति ज्ञानविषयविशेषणबलान्निश्चीयत इत्यर्थः । **अक्षरज्ञानस्य** फलविचारमाहुः **ब्रह्मविदिति** । **न त्वक्षरविषयकमिति** । तथा च जगत्का-

२. १.) इति श्रुतावक्षरब्रह्मविदोऽक्षरात् परस्य प्राप्तिरुच्यते। " अक्षरादपि चोत्तमः " (भ. गी. १८. ५५.) इतिभगवद्वाक्याच्चाक्षरातीतः पुरुषोत्तमः। " भक्त्या मामभिजानाति " इतिवाक्ये ' माम् ' इतिपदाद् पुरुषोत्तमविषयकं ज्ञानमुच्यते न त्वक्षरविषयकम्। किञ्च ब्रह्मभूतस्य भक्तिलाभोक्तेस्तस्य चानन्दांशाविर्भावात्मकत्वात् तस्य चाविद्यानाशजन्यत्वात् तस्य चाक्षरज्ञानजन्यत्वात् पूर्वकक्षाविश्रान्तमेवाक्षरज्ञानम्। एवं सत्यक्षरविषयिणीनां धियां श्रुतौ मुक्तिसाधनेषु योवरोधः प्रवेशनं गणनेतियावत् स सामान्यतद्भावाभ्यां हेतुभ्याम्। पुरुषोत्तमसम्बन्धिसम्बन्धे मुक्तिरिति सामान्यम्। मर्यादामार्गेऽङ्गीकृतानां " ब्रह्मभूतः

रणीभूतस्य चेतनस्यैवाक्षरपदवाच्यत्वात् जीवप्रकृत्योरभावेन श्रुतौ परमयोगेन च पुरुषोत्तमाक्षरयोरैक्यासंभवेन च भक्त्या मामितिवाक्येन पुरुषोत्तमविषयकमेव ज्ञानमित्यर्थः। अक्षरज्ञानेन भक्तिर्जायत इत्याहुः **किञ्चेति**। **तस्य च** ब्रह्मभावस्य च आनन्दाविर्भावस्य च। **तस्य च** अविद्यानाशस्य च। **पूर्वकक्षेति**। परप्राप्तिपूर्वकक्षारूपोऽर्थो ब्रह्मभावस्तद्विश्रान्तमित्यर्थः। तथा च ज्ञानकारणतानिरूपकश्रुत्या अक्षरस्य परमधामत्वात् पुरुषोत्तमाविनाभूतत्वात् तत्प्राप्तः पुनरावृत्तिरहितत्वेन ब्रह्मभावात्मकत्वोपपत्तिरितिभावः।

तथा च सिद्धमाहुः **एवमिति**। **श्रुतौ** तैत्तिरीयश्रुतौ। **अवरोध**पदार्थमाहुः **प्रवेशनं गणनेति**। **सामान्येति**। **सः** अवरोधः। **सामान्यं च तद्भावश्च** ताभ्यां गणनेतिपूर्वेणान्वयः। तत्र सामाधानमाहुः **पुरुषोत्तमेति**। स संबन्धः भगवद्भक्तेषु अथवाऽक्षरेपि समान इत्यतस्तदेव सामान्यमित्यर्थः। तद्भावमाहुः **मर्यादेति**। **वस्तुतस्त्विति**। तथा चाक्षरप्राप्तेः परममुक्तित्वं

प्रसन्नात्मा न शोचति न काङ्क्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥" (भ. गी. १८. ५४.) इतिवाक्याद् ब्रह्मभावानन्तरमेव भगवद्भावसम्भवात् तेन पुरुषोत्तमे प्रवेशात् तत्र परम्परोपयोगो ब्रह्मभावस्येत्युभाभ्यां हेतुभ्यां तथेत्यर्थः। वस्तुतस्तु पुरुषोत्तमप्राप्तिरेव मुक्तिरितिभावः।

नन्वक्षरस्याविशिष्टत्वेन तदुपपासकानामपि तथात्वात् केषाञ्चित्तत्रैव लयः केषाञ्चिद्भक्तिलाभ इति कथमुपपद्यत इत्याशङ्क्य तत्र हेतुं दृष्टान्तेनाहौपसदवदिति। उपसदाख्ये कर्मणि तानूनप्त्रस्पर्शाख्यमौपसदं कर्मास्ति। तत्रातिथ्यायां ध्रौवात् स्रुचि चमसे वा यदाज्यं चतुरवत्तं पञ्चावत्तं वा समवद्यति तत् तानूनप्त्रमित्युच्यते। "अनाधृष्टमसि" (तै. सं. १. २. १०.) इतिमन्त्रेण षोडशा-

---

नास्ति किंतु भगवद्धामप्राप्तिरितिभावः। सूत्रांशमवतारयन्ति **नन्विति**। **तत्रैवेति**। अक्षरज्ञानेन ब्रह्मविद्ब्रह्मैव भवतीतिवाक्यादक्षरे लयः, केषांचिद्भक्तिरित्यर्थः। **हेतुमिति**। भगवदिच्छाहेतुरूपं हेतुमित्यर्थः। **उपसदाख्येति**। सोमयागे आतिथ्येष्ट्यनन्तरं त्रिषु दिनेष्वनुष्ठीयमान उपसदाख्यकर्मणीत्यर्थः। तानूनप्त्रस्वरूपमाहुः **तत्रेति**। पूर्वमातिथ्येष्टिः कृतास्ति। तत्र ध्रौवं नाम ध्रुवाज्यं तस्मात् चतुरवत्तं पञ्चावत्तं वा पञ्चवारं स्रुचि चमसे वा आज्यं सम्यगवद्यति गृह्णाति। **तत्तानूनप्त्रमिति**। तस्याज्यस्य तानूनप्त्रमितिसंज्ञा। **अनाधृष्टमिति**। आनाधृष्टमस्यनाधृष्यं देवानामोजोऽभिशस्तिपा अनभिशस्तेऽन्यमिति। **अत्र विद्यारण्यभाष्यं**– हे तानूनप्त्राज्य त्वमितः पूर्वं केनाप्यतिरस्कृतमसि। इतः परमप्यतिरस्कार्यं देवानामोजः सारमसि। अभिशस्ते हिंसारूपादन्योन्यविरोधादस्मान् पालयसि। त्वं पुनः अभिशस्तेरविषयभूतमसीति

प्यृत्विजो यजमानेन सह तानूनप्त्रं समवमृशन्ति "अनु मे दीक्षाम्" (तै. सं. १. २. १०.) इतिमन्त्रेण यजमानस्तत् समवमृशन् "यमृत्विजं कामयेतायं यज्ञे यशसमृच्छेदिति तं प्रथममवमर्शयेत्" इति श्रूयते श्रुतौ कल्पे (आप. श्रौ. ११. १. ४) च। अत्र सर्वेषामृत्विजां तानूनप्त्रित्वाविशेषेपि यस्मिन् स्नेहातिशयेन तथेच्छा तत्रैव तथाकृतिर्नेतरेषु। न हि तत्राविशिष्टेषु कथमेवं कृतिरितिपर्यनुयोगः सम्भवत्येवमिहापीत्यर्थः। ननु श्रवणादेर्यथा पुरुषोत्तमसम्बन्धित्वेन तत्प्राप्तिहेतुत्वमेवमक्षरस्याप्यस्त्वित्याशङ्का तु निखिलासुरजीवतमःपुञ्जनिरासकेन यदुवंशोदयाचलचूडामणिनैव निरस्तेति न स्वतो वक्तुमुचितेत्याशयेनाह तदुक्तमिति।

मन्त्रार्थः। **समवमृशन्तीति**। परस्परं द्रोहो न कर्तव्य इत्येतदर्थं शपथं कर्तुं सर्वेऽपि तानूनप्त्रसंज्ञकाज्यं सम्यक् स्पृशन्ति **अनु मे दीक्षामिति**। अनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्पतिरञ्जसा सत्यमुपगेषं सुविते मा धा इतिमन्त्रः। **अत्र विद्यारण्यभाष्यं**–दीक्षणीयेष्टौ यो देवः स दीक्षापतिर्ममेमां दीक्षामनुजानातु। अहं चाञ्जसा सत्यमुपगेयमार्जवेन तानूनप्त्रस्पर्शनरूपं शपथं प्राप्तोस्मि। हे तानूनप्त्र मां सुविते शोभनमार्गे यज्ञकर्मणि स्थापयेतिमन्त्रार्थः। **यमृत्विजमिति**। यजमानो यमृत्विजं कामयेतोयमृत्विग् यज्ञे यशः प्राप्नोतु इति। तमेव ऋत्विजं प्रथमं तानूनप्त्रस्पर्शने आज्ञा ददातीत्यर्थः। **कल्पे** सूत्रे। **अत्रेति**। तानूनप्त्रस्पर्शने। **तथेति**। अयं प्रथमं तानूनप्त्रस्पर्शनं करोतु इतीच्छेत्यर्थः। **तत्रैवेति**। तस्मिन्नेव कृताविव्यर्थः। **तथाकृतिरिति**। तानूनप्त्रस्पर्शनानुकूलाकृतिः। **न हीति**। सर्वेषां मध्ये एकस्मिन् ऋत्विजि एवं करणं कथमिति पर्यनुयोगो न संभवति। कुतः। यजमानेच्छायाः प्रबलाया इत्यर्थः। **एवमिहापीति**। ईश्वरेच्छापीत्यर्थः।

भगवद्गीतास्वितिशेषः । तत्र " यदक्षरं वेदविदो वदन्ति " (भ. गी. ८. ११.) इत्युपक्रम्य " स याति परमां गतिम् " (भ. गी. ८. १३) इत्यन्तेनाक्षरप्राप्त्युपायमुक्त्वा " अनन्यचेताः सततम् (भ. गी. ८. १४.) इत्यादिना स्वप्राप्त्युपायं वैलक्षण्यं चोक्त्वा भक्त्येकलभ्यत्वं स्वस्य वक्तुं पूर्वं क्षराक्षरयोः स्वरूपमाह । " सहस्रयुगपर्यन्तम् " (भ. गी. ८. १७.) इत्युपक्रम्य " प्रभवत्यहरागमे " (भ. गी. ८. १८.) इत्यन्तेन क्षरस्वरूपमुक्त्वा " परस्तस्मात् तु भावोन्यः " (भ. गी ८. २०.) इत्युपक्रम्य " तद्धाम परमं मम " (भ. गी. ८. २१) इत्यन्तेनाक्षरस्वरूपमुक्तम् । अत्र पूर्वं क्षरस्वरूपमुक्तमिति " परस्तमात्तु " (भ. गी. ८. २०.) इत्यत्र क्षरादेव परत्वमुच्यते । तच्छब्दस्य पूर्वपरामर्शित्वात् । तस्यैव पूर्वमुक्तत्वात् । अत एवाक्षरव्यावर्तकस्तुशब्द उक्तः । एतेन " नित्यत्वेन क्षरणाभावादक्षरशब्देन जीव एवोच्यते न तु पुरुषोत्तमाधिष्ठानभूतो जीवातीतः " इति निरस्तम् । " यं प्राप्य न निवर्तन्ते " (भ. गी. ८. २१) इति वाक्याज्जीवे तथात्वासम्भवान् नित्यमुक्तत्वापत्त्या शास्त्रवैफल्यापत्तेश्च । इत एव ज्ञानमार्गिणां तत्प्राप्तिरेव मुक्तिरिति ज्ञेयम् । ततोनिवृत्तेः । " पुरुषः

सूत्रांशमवतारयन्ति **नन्विति** । **तत्रेति** । अष्टमाध्याये । **अत्रेति** । सहस्रयुगेत्यादिग्रन्थे ।

मतान्तरमाहुः **एतेनेति** । परत्वकथनेनेत्यर्थः । अन्यदपि समाधानमाहुः **यमिति** । **इत एव** अक्षरस्य भगवद्धामत्वादेव इत्यर्थो ज्ञेय इति । तथा

स परः पार्थ " (भ. गी. ८. २२.) इत्यनेनाक्षरात् परस्य स्वस्य भक्त्यैकलभ्यत्वमुक्तम् । तेन ज्ञानमार्गीयाणां न पुरुषोत्तमप्राप्तिरितिसिद्धम् । " यस्यान्तःस्थानि " (भ. गी. ८. २२.) इत्यनेन परस्य लक्षणमुक्तम् । तच्च मृत्स्नादिप्रसङ्गे श्रीगोकुलेश्वरे स्पष्टमुच्यते । तेनाक्षरोपासकानां न पुरुषोत्तमोपासकत्वं तद्विषयकश्रवणादेरभावादितिभावः । " अव्यक्तोक्षर इत्युक्तस्तमाहुः परमां गतिम् " (भ. गी. ८. २१.) इतिवाक्यात् " स याति परमां गतिम् " (भ. गी. ८. ३१.) इत्यत्राक्षरमेव यातीत्यर्थो ज्ञेयः ।

किञ्च तैत्तिरीयोपनिषत्सु पठ्यते " यस्मिन्निदं सञ्च वि चैति सर्वं यस्मिन् देवा अधिविश्वे निषेदुः । तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन् । येनावृतं खञ्च दिवम्महीं च येनादित्यस्तपति तेजसा भ्राजसा च । यमन्तःसमुद्रे कवयो वयन्ति यदक्षरे परमे प्रजाः ॥ " इति (नारा. १.) अत्राक्षरात्मकत्वेन क्षरात्मकादाकाशात् " परमे व्योम्नि " भक्तानां हृदयाकाश इति यावत् । तत्र प्रकाशमानमित्यर्थात् । अत एव ' ब्रह्मविदाप्नोति परम् ' (तै. २. १) इत्युपक्रम्य " सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे

च अनन्यभक्त्यभावादक्षरस्य परप्राप्तिहेतुत्वं नास्तीतिशङ्का न कर्तव्येतिभावः । ननु अक्षरे स्थितत्वं पुरुषोत्तमस्य नास्ति किंतु ततोपि परत्वं श्रुतावुक्तमित्यत आहुः **किंचेति** । श्रुत्यर्थमाहुः **अत्रेति** । ननु भक्तहृदयाकाशमेव परमव्योमपदार्थः । अत्र किं प्रमाणमत आहुः **अत एवेति** । नन्वेतादृशाक्षरस्य लोका-

व्योमन्" (तै. २. १) इत्येतदुपनिषत्स्वेव पठ्यते। "यदक्षरे परमे प्रजाः" इतिपदं "अवयन्ति" इत्यनेन सम्बध्यते। अत्र "प्रजाः" पदाद् व्यापिवैकुण्ठात्मको लोकोक्षरपदेनोच्यत इत्यवगम्यते। अत एव "न यत्र माया" (भाग. २. ९. १०.) इत्यादिना श्रीभागवते तत्स्वरूपमुच्यते। एतेनाक्षरस्य पुरुषोत्तमाधिष्ठानत्वं निश्चीयते। इतोप्यक्षरातीतः पुरुषोत्तम इत्यवगम्यते। एवं सति सामान्यं भगवद्विभूतिरूपत्वं, तद्भावस्तस्य पुरुषोत्तमस्य भावः सत्तोक्तरीत्या तत्र स्थितिरितियावत्। ताभ्यां हेतुभ्यां तथेत्यप्यर्थो ज्ञेयः ॥ ३३ ॥

ननु संसारनिवृत्त्यानन्दाविर्भावयोरविशेषादक्षरे ब्रह्मणि लये पुरुषोत्तमे प्रवेशान् न्यूनतोक्तौ को हेतुरित्याकाङ्क्षायामाह

इयदामननात् ॥ ३४ ॥

त्मकत्वं कथनमत आहुः **यदित्यादि**। अत्र प्रजापदेन भक्तहृदयाकाशरूपाक्षरस्य लोकात्मकत्वं बोध्यम्। अत्र प्रमाणमाहुः **अत एवेति**। **इतोपि** श्रीभागवतवाक्यादपि। ननु भक्तहृदयाकाशरूपाक्षरे स्थितिश्चेत् स्वे महिम्नि प्रतिष्ठितमितिकथमित आहुः **एवं सतीति**। सामान्यतद्भावाभ्यामितिहेतुद्वयस्यार्थमाहुः **सामान्यमिति**। अक्षरब्रह्मणो विभूतिरूपमित्यर्थः। एवंचाक्षरस्य चरणरूपत्वेन भक्तिसामान्यं तत्र स्थितौ स्वप्रतिष्ठितत्वमस्तीतिभावः। एतावता प्रबन्धेन भक्तौ भगवत्प्राप्तिः। मय्यावेश्य मनो ये मामितिद्वादशाध्यायस्य गीतावाक्यात्। भक्तौ त्वौपसदवदितिदृष्टान्तेनेच्छाया एव प्राधान्यं क्वचित् परंपरया कर्मणः भक्तेर्ज्ञानस्य च क्वचित्सायुज्यप्रापकत्वमित्यवसेयम् ॥ ३३ ॥

सूत्रमवतारयन्ति **आनन्देति**। उभयत्रापीतिभावः। तथा च योऽक्षर

इयदिति परिमाणवचनम् । तस्य श्रुतौ कथनादित्यर्थः । अत्रेदं ज्ञेयम् । तैत्तिरीयोपनिषत्सु ' सैषानन्दस्य मीमांसा भवति ' (तै. २. ८.) इत्युपक्रम्य मानुषमानन्दमेकं गणयित्वा तस्मादुत्तरोत्तरं शतगुणमानन्दं गन्धर्वानारभ्य प्रजापतिपर्यन्तस्योक्त्वोच्यते, ' ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्दः ' (तै. २. ८.) इति । एवं सतीयदेतावदित्यक्षरानन्दस्य सावधिकत्वेन श्रुतौ कथनादानन्दमयत्वेन निरवध्यानन्दात्मकत्वस्य पुरुषोत्तमे कथनात् तथोक्तिरिति ॥ ३४ ॥ ११ ॥

इति तृतीयाध्याये तृतीयपाद एकादशमक्षरधियामित्यधिकरणम् ॥ ११ ॥

अथ ज्ञानमार्गे यथा स्वात्मत्वेन ब्रह्मणो ज्ञानं तथा भक्तिमार्गेपि भक्त्या पुरुषोत्तमज्ञाने स्वात्मत्वेन पुरुषोत्तमज्ञानं भवति न वेति विचार्यते । सर्वान्तरत्वेन श्रुतौ कथनात् तद् भवतीति पूर्वः

आनन्दाविर्भावः स एव पर इत्यर्थः । **परिमाण** इति । परिमाणबोधकवचनमित्यर्थः । श्रुतौ कथं परिमाणवचनमित्यत आहुः **अत्रेदमिति** । तथा च गणितानन्दोऽक्षरे, अगणितानन्दः पुरुषोत्तम इति विशेष इति भावः । इत्येकादशम् ॥ ३४ ॥ ११ ॥

अन्तरा भूतग्रामवत्स्वात्मन इत्यधिकरणमाहुः **अथेति** । **विचार्यत** इति । स्वात्मपुरुषोत्तमाभेदात्मिका वृत्तिर्भवति न वेति संशये सतीति शेषः । पूर्वपक्षमाहुः **सर्वान्तरत्वेनेति** । **श्रुताविति** । बृहदारण्यके कहोडप्रश्ने

पक्षः । तथात्वेपि 'सर्वस्य वशी सर्वस्येशानः' (बृ. ६.२.२२.) इत्यादिश्रुतिभिरेवमेव ज्ञानं न तु तथेतिसिद्धान्तः । अत्र तथाज्ञानाभावस्यावश्यकत्वार्थं विपरीते बाधकमाह । पूर्वस्मिन् सूत्रे ब्रह्मानन्दाद् भजनानन्दस्याधिक्यं निरूपितम् । स तु भगवद्दत्तः । तद्व्यवधायकोर्थश्च प्रभुणा न सम्पाद्यते । स्वात्मत्वेन ज्ञानञ्च भजनानन्दान्तरायरूपम् । यद्येतत्सम्पादयत् तं न दद्यात् । अन्यथाभावात् । अतः स्वात्मत्वेन ज्ञानं भक्तिमार्गीयस्य न सम्भवतीत्याशयेनाहान्तरा स्वात्मन इति ।

अन्तरा भूतग्रामवत् स्वात्मनः ॥ ३५ ॥ (३.३.१२.)

भगवता भक्तिमार्गे स्वीयत्वेनाङ्गीकृतो य आत्मा जीवस्तस्य यदात्मत्वेन ज्ञानं तद् भजनानन्दानुभवेन्तरा व्यवधानरूपमिति

याज्ञवल्केन कथनादित्यर्थं । सिद्धान्तमाहुः **तथात्वेपीति** । सर्वान्तरत्वेन ब्रह्मणो जीवाभिन्नत्वेपीत्यर्थः । **एवमेवेति** । उत्कटभक्त्या सर्वेशितत्वादिरूपेणैव ज्ञानं, तत्तु स्वात्मप्रकारकत्वेनेत्यर्थः । **अत्र तथेति** । स्वात्मत्वेन पुरुषोत्तमज्ञानाभावस्येत्यर्थः । **विपरीते** स्वात्मत्वेन ज्ञाते । **पूर्वस्मिन्निति** । इयदामननादितिसूत्र इत्यर्थः । **भगवद्दत्त** इति । कृपाधिक्येनेति शेषः । तथा च स वै नैव रेमे तस्मादेकाकी न रमत इत्यादिश्रुत्या मुख्यभक्तिमार्गस्य क्रीडार्थत्वात्, अभेदे क्रीडाया असंभवादिति भावः । **भजनानन्देति** । यत्र सर्वात्मैवाभूत् तेन कं पश्येदितिश्रुत्या भेदविलयाद्भिन्नरूपमित्यर्थ । **यद्येतदिति** । आत्मत्वेन ज्ञानमित्यर्थः । **तमिति** । भजनानन्दमित्यर्थः । **अत** इति । विलयनेनेतिशेषः । **न संभवतीति** । पूर्णतादशायामित्यादि । आहेति । **बाधक**माहेत्यर्थः । सूत्रार्थमाहुः **भगवतेति** । **अन्तरेत्यस्यार्थमाहुः**

भगवता तादृशे जीवे तत्र **सम्पाद्यत** इत्यर्थः। तत्सम्पादनस्य सर्वथैवासम्भावितत्वं हीनत्वञ्च ज्ञापयितुं दृष्टान्तमाह **भूतग्रामवदिति**। उक्तभक्तस्य विग्रहोप्यलौकिक इति तत्र लौकिको भूतग्रामो न सम्भवति हीनत्वात्तथेत्यर्थः।

अथवा लौकिको **भूतग्रामः** स्त्रीपुत्रपश्वादिर्ब्रह्मानन्दानुभवे बाधकस्तथा भजनानन्दानुभवे स्वात्मत्वेन भगवज्ज्ञानमित्यर्थः॥३५॥

ननु भक्तेष्वप्युद्धवादिषु ज्ञानोपदेशः श्रूयते। स चात्मब्रह्माभेदज्ञानफलक इत्यात्मत्वेन ज्ञानाभावे तदभेदोपदेशानुपपत्तिः स्यादिति तन्मन्तव्यमेव। एवं सति भक्तिमार्गाज्ज्ञानमार्गस्योत्कर्षश्च सिध्यतीत्याशङ्क्य परिहरत्युपदेशान्तरवदिति।

व्यवधानेति। भगवता तत्र संपाद्यत इति कथं ज्ञायत इत्यत आहुः **तत्संपादनस्ये**ति। **उक्तभक्तस्ये**ति। पुष्टिभक्तस्येत्यर्थः। **हीनत्वादि**ति। चिकीर्षितलीलाप्रतिबन्धकत्वेन हीनत्वादित्यर्थः। तथा च यथेह लौकिकशरीरं प्रतिबन्धकं तथाऽभेदोपि प्रतिबन्धक इत्यर्थः। लौकिकप्रतिबन्धकत्वं संशयग्रस्तमतः पक्षान्तरमाहुः **अथवे**ति। यथेत्यध्याहार्यम्। **भगवज्ज्ञान**मिति। स्वात्मत्वेन भगवज्ज्ञानमित्यर्थः॥ ३५॥

एवं सति भक्तेषु स्वात्मत्वेन ज्ञानोपदेशो न स्यादिति शङ्कां निराकुर्वन् सूत्रं व्याकुर्वन्ति **नन्वि**त्यादिना। **श्रूयते** एकादशस्कन्धे। सौत्रान्यथापदस्यार्थमाहुः **स चे**ति। सौत्रस्या**भेदानुपपत्ति**पदस्यार्थमाहुः **इति तन्मन्तव्य**मित्यादिना। **आशङ्क्ये**ति। उद्धवस्तु अत्यन्तमन्तरङ्गः। तस्यात्मत्वेनोपदेशो भगवता कृत इति। तस्यापार्थकत्वे जीवतुल्यता स्यादित्याशङ्क्येत्यर्थः। **परिहरती**ति। दृष्टान्तेन परिहरतीत्यर्थः। परिहारमेवाहुः

अन्यथाभेदानुपपत्तिरिति चेन्नोपदेशान्तरवत् ॥३६॥

न ह्यत्राभेदज्ञानायोपदेशः किन्तु यथाग्रिमस्वर्गापवर्गाख्यपारलौकिकानन्दफलकालौकिके कर्मण्यधिकाररूपसंस्कारार्थं गायत्र्युदेशः क्रियते तत्संस्कारसंस्कृतं तच्छरीरादिकमपि भूतादिभिरपि नोपहतं भवति, यथा वा योगोपदेशसंस्कृतस्य वपुरग्न्यादिभिर्नोपहन्यते, तथा प्रकृते भक्तिभावस्य रसात्मकत्वेन संयोगविप्रयोगभावात्मकत्वाद् द्वितीयस्य प्रलयानलादतिकरालत्वेन कदाचित् तद्भावोदये तेन भक्तवपुरादेस्तिरोधानेग्रिमभजनानन्दानुभवप्रतिबन्धः स्यादिति तन्निवृत्त्यर्थं ज्ञानोपदेशसंस्कारसंस्कृतं तद्वपुरादिकं भगवता क्रियते न त्वात्माभेदज्ञानं भगवतोभिप्रेतमित्यर्थः । अन्यथोपदेशानन्तरं बदरीं गच्छन् विदुरं प्रति " इहागतोहं विरहातुरात्मा " (भाग. ३. ४. २०.) इति न वदेत् । एवमेवान्येष्वपि भक्तेषु ज्ञेयम् । अत्रोपदेशान्तरपदं प्रस्तुतोपदेशभिन्नमुपदेशान्तरमाहेति प्रस्तुतस्य तस्यान्यस्याभावाद-

---

नहीति । **यथेति** । गायत्रीसंस्कारसंस्कृतं शरीरमन्यफलार्थं तथेत्यर्थः । प्रकारान्तरमाहुः **यथा वेति** । **नोपहन्यत** इति । अग्न्यादिभिर्न हन्येत मुनेर्योगमयं वपुरित्येकादशस्कन्धीयवाक्यादित्यर्थः । **संस्कारसंस्कृतमिति** । तथा चोपदेशस्यान्यदेव फलमित्यतो न ज्ञानमार्गस्योत्कर्ष इतिभावः । अत्रार्थे गमकमाहुः **अन्यथेति** । **भक्तेषु ज्ञेयमिति** । कुरुक्षेत्रप्रसंगोत्कण्ठावाक्ये ज्ञेयमित्यर्थः । ननु सूत्रे तु अभेदोपदेशानुपपत्तिरिति नोक्तमिति कथं ज्ञातव्यमयमेव सूत्रकाराशय इत्यत आहुः **अत्रेति** । **उपदेशान्तरमिति** । दृष्टान्तकोटिप्रविष्टमितिदोषः । **अभावादिति** । अतः अभेदानुपपत्तिपदम-

भेदपदेनाभेदोपदेश एवोच्यते । एतेन भगवान् स्वीयानां भक्तिभावप्रतिबन्धनिरासायैव सर्वं करोतीति ज्ञापितं भवति ।

अथवोपदेशान्तरवदित्यस्यायमर्थः । शरीराद्यध्यासवतस्तद्भिन्न आत्मा तत्त्वं न तु शरीरादिरित्युपदेशो ज्ञानमार्गे यथा क्रियते तेन शरीरादावात्मबुद्ध्या यः स्नेहादिः सोपगच्छति तथात्र सर्वेषामात्मनो ह्यात्मा " य आत्मनि तिष्ठन् " (बृ. ३. ७.) इत्यादिश्रुतिसिद्धो जीवात्मनोप्यात्मा पुरुषोत्तम इति बोध्यते। तेन पुरुषोत्तमे निरुपधिः स्नेहस्तत्सम्बन्धत्वेनात्मनि स सिध्यति । यद्यप्येवम्भावः पूर्वमप्यासीदेव तथापि सहजस्य शास्त्रार्थत्वेन ज्ञानेतिप्रमोदो दार्ढ्यं च भवतीति तथा । नैतावता जीवाभेद आयाति । अग्रे जीवनसम्पत्तिरेवोपदेशकार्यं न तु तेन पूर्वभावोपमर्दः सम्भवतीति सारम् । तेन ज्ञाने सर्वाधिक्यं मन्वानाय भक्तिबलप्रदर्शनञ्च सिध्यति ॥ ३६ ॥

ननु 'तद्योहं सोसौ योसौ सोहम्' (ऐत. आर. २. १२. २.) इत्यैतरेयके तैत्तिरीयके च " अहमस्मि ब्रह्माहमस्मि " (महानारा.

ऽन्यकं स्यादिति अभेदपद लक्षणयाऽभेदोपदेशपरं बोध्यमित्यर्थः । **एतेनेति** । उक्ताशङ्कानिरासेन । उपदेशान्तरपदार्थान्तरमाहुः **अथवेति** । **सिध्यतीति** । उद्धवं प्रति यो ज्ञानोपदेशः स पुरुषोत्तमे निरुपधिकस्नेहफलको न तु ब्रह्माभेदज्ञानफलक इत्यर्थः । **यद्यपीति** । **तथा** अवैयर्थ्यम् । **नैतावतेति** । आत्मत्वोपदेशमात्रेण न जीवस्य ब्रह्माभेद आयातीत्यर्थः । तेन यत्सिद्धं तदेव दर्शयन्ति **अग्र** इति । **सारमिति** । तथा च वियोगसहनं यत्र कार्यार्थमावश्यकं तत्रैव प्रभुः करोति न तु सर्वत्रेति सर्वं समञ्जसम् ॥ ३६ ॥

सूत्रमवतारयन्ति **नन्विति** । **श्रूयते** । एकादशस्कन्ध इतिशेषः । **अत्र**

५, १०) इति पठ्यते । अत्र मध्यस्थं " ब्रह्म " पदमुभयत्र सम्बध्यते । तेनावृत्त्या व्यतिहारोतो ब्रह्माभेदः सिध्यति । तथा लीलामध्यपातिभक्तानामपि " कृष्णोहमहं कृष्णः " (भाग. १०. १९. २७.) इतिभाव उल्लेखश्च श्रूयते । अतस्तभेदज्ञानं भक्तिफलमिति पम्फुल्लमानं प्रतिवादिनं तत्स्वरूपं बोधयति ।

व्यतिहारो विशिंषन्ति हीतरवत् ॥ ३७ ॥

रसात्मकत्वाद्भक्तेः संयोगविप्रयोगात्मकत्वाद् द्वितीयभावोद्रेके यथेतरेश्रुप्रलापादयो व्यभिचारिभावास्तथातिविगाढभावेन तदभेदस्फूर्तिरप्येकः । स च न सार्वदिकः । तदा स्वात्मानं तत्त्वेन विशिंषन्ति तं च स्वात्मत्वेन । सोत्र व्यतिहारपदार्थ इत्यर्थः । अपरञ्चोद्देश्यविधेययभावस्फूर्तौ न ह्यद्वैतज्ञानमस्ति किन्तु भावनामात्र, भक्तानां तु विरहभावे तदात्मकत्वमेवाखण्डं स्फुरति येन तल्लीलां स्वतः कुर्वन्ति । एतद् यथा तथा श्रीभागवतदशमस्कन्धविवृतौ

तैत्तिरीयोपनिषदि । **व्यतिहार** इति । आत्मनो ब्रह्मत्वविधानेन ब्रह्मणः स्वात्मत्वविधानेन व्यत्ययः । **अतः** कारणात् । **वादिनमिति** । भक्त्याभेदज्ञानं जायते इति वादिनो हर्ष इति **पम्फुल्ल**पदेन द्योत्यते । **तत्स्वरूपमिति** । इति शङ्काया व्यतिहारस्वरूपमित्यर्थः । सूत्रार्थमाहुः **रसात्मकत्वादिति** । **द्वितीयेति** । विरहेत्यर्थः । **एक** इति । व्यभिचारिभाव इत्यर्थः । तेन काश्चनब्रह्मत्वेन **तं च** भगवन्तं च **स्वात्मत्वेन** काश्चन **विशिंषन्तीति** । भिन्नवस्तुतो व्यतिहारो न तु त्वदुक्त इत्यर्थः । भक्त्युत्कर्षं द्रढयन्ति **अपरं चेति** । भक्तौ विशेषमाहुः **भक्तानामिति** । सूत्रार्थस्तु **इतरवत्** अश्रुप्रलापादिवत् । **व्यतिहारः** अहं कृष्णः कृष्णोहमिति व्यतिहारः व्यभिचारिभावः **हि** यतो

प्रपञ्चितमस्माभिः । एवं सति मुख्यं यदद्वैतज्ञानं तद् भक्तिभावैकदेशव्यभिचारिभावेष्वेकतरं इति सर्षपस्वर्णाचलयोरिव ज्ञानभक्त्योस्तारतम्यं कथं वर्णनीयमितिभावः ॥ ३७ ॥ १२ ॥

इति तृतीयाध्याये तृतीयपादे द्वादशमन्तरा भूतग्रामवदित्यधिकरणम् ॥ १२ ॥

अथेदं विचार्यते । प्राप्तभक्तेः पुरुषस्य सत्यशमदमादयो विधीयन्ते न वेति । फलोपकार्यन्तरङ्गसाधनत्वाच्छुद्धौ सत्यामेव भगवत्प्रादुर्भावसम्भवाद्विधीयन्त इति पूर्वः पक्षः ।

सैव हि सत्यादयः ॥ ३८ ॥ (३. ३. १३.)

तादृशस्य ते न विधीयन्त इतिसिद्धान्त । तत्र हेतुमाह । हि यस्माद्धेतोः । सैव भक्तिरेव सत्यादिसर्वसाधनरूपा । तस्यां सत्यादयो ये ज्ञानमार्गे विहितत्वात् कष्टेन क्रियन्ते मुमुक्षुभिस्ते भक्तहृदि भगवत्प्रादुर्भावात् स्वत एव भवन्तीति न विधिमपेक्षन्त इत्यर्थः ॥ ३८ ॥

हेतोः । आत्मानं कदाचिदेव विशिंषन्ति न सर्वदेति ॥ ३७ ॥ इति द्वादशाधिकरणम् ॥

साधनदशायामपि भक्त्युत्कर्षं साधयितुमधिकरणमाहुः **सैव हीति** । सूत्रमवतारयन्ति **अथेति** । **फलोपकारीति** । फलस्य भगवत्प्राप्तेः उपकारि मुख्यं साधनं भगवदाविर्भावः, तस्यान्तरङ्गा चित्तशुद्धिः, तस्याः साधनानि सत्यादीनि तस्मात् । **तादृशस्य** प्राप्तभक्तेः । **विधीयन्त** इति । भक्त्यन्तरमपीतिशेषः । भक्त्या त्वनन्ययेतिवाक्येन्यसाधनानपेक्षितत्वस्योक्तत्वात् ॥ ३८ ॥

पूर्वसूत्रे शास्त्रोक्ताखिलसाधनरूपत्वं भक्तेरुक्तम्। तद्दार्ढ्यार्थमधुना मुक्तिप्रतिबन्धकत्वेन हेयत्वेनोक्तानां कामादीनामपि भगवत्सम्बन्धान्मुक्तिसाधकत्वमुच्यते। भक्तिस्तु विहिताविहिता चेति द्विविधा। माहात्म्यज्ञानयुतैश्वरत्वेन प्रभौ निरुपधिस्नेहात्मिका विहिता। अन्यतोऽप्राप्तत्वात्। कामाद्युपाधिजा सा त्वविहिता। एवमुभयविधाया अपि तस्या मुक्तिसाधकत्वमित्याह

कामादीतरत्र तत्र चायतनादिभ्यः॥ ३९॥

इतरत्र विहितभक्तेरितिशेषः। कामाद्युपाधिस्नेहजरूपायां कामाद्येव मुक्तिसाधनमित्यर्थः। भगवति चित्तप्रवेशहेतुत्वात्। आदिपदात् पुत्रत्वसम्बन्धित्वादयः। स्नेहत्वाभावेऽप्यविहितत्वभगवद्विषयकत्वयोरविशेषाद् द्वेषाद्विरपि सङ्गृह्यते। तेन भगवत्सम्बन्धमात्रस्य मोक्षसाधकत्वमुक्तं भवति। तत्र विहितभक्तावित्यर्थः। शास्त्रे सर्वथा हेयत्वेनोक्ता हि गृहाः। सर्वनिवेदनपूर्वकं गृहेषु भगवत्सेवां कुर्वतां तदुपयोगित्वेन तेभ्य एव मुक्तिर्भवतीत्यर्थः। एतादृशानां गृहा भगवद्गृहा एवेतिज्ञापनायायतनपदम्। तेषु तथाप्रयोगप्राचुर्यात्। आदिपदेन स्त्रीपुत्रपश्वादयः सङ्गृह्यन्ते। एतेन ज्ञानादिमार्गा-

---

सूत्रप्रयोजनमाहुः **पूर्वेति**। सूत्रार्थं वक्तुं विभजन्ति **भक्तिरिति**। **अन्यत** इति। शास्त्रातिरिक्तहेत्वन्तरादप्राप्तत्वात्। सूत्रं व्याकुर्वन्ति **इतरत्रेति**। अत्र हेतुमाहुः **भगवतीति**। सौत्रं तत्रेतिपदं व्याकुर्वन्ति **विहितेति**। **आयतनपदमिति**। सूत्र इतिशेषः। **प्रयोगप्राचुर्यादिति**।

दुत्कर्ष उक्तो भवति । बाधकानामपि साधकत्वात् । माहात्म्यज्ञानपूर्वकस्नेहे सत्येव भर्तृत्वेन ज्ञाने कामोपि सम्भवतीतिज्ञापनाय चकारः ॥ ३९ ॥ १३ ॥

इति तृतीयाध्याये तृतीयपादे त्रयोदशं

सैव हीत्यधिकरणम् ॥ १३ ॥

ननु नित्यानां वर्णाश्रमधर्माणां भगवद्धर्माणां चैककाले प्राप्तौ युगपदुभयोः करणासम्भवादन्यतरबाधे प्राप्ते कस्य स्यान्न कस्येति स्यात् संशयः । तत्र कर्मणां स्वस्वकाले विहितानामकरणे प्रत्यवायश्रवणादितरत्रातथाश्रवणादन्यदापि तत्कृतिसम्भवात् सावकाशत्वेन तेषामेव बाधो युक्तो न तु निरवकाशानामिति पूर्वः पक्षः । तत्र सिद्धान्तमाहादरादिति ।

आदरादलोपः ॥ ४० ॥ (३. ३. १४.)

ब्रह्मयज्ञप्रकरणे तैत्तिरीयैः पठ्यते " ओमिति प्रतिपद्यत एतद्वै

अण्डमुत्पादयामासुर्ममायतनमुत्पन्नमिति प्रयोगादित्यर्थः । **चकार**प्रयोजनमाहुः **माहात्म्येति** ॥ ३९ ॥ इति त्रयोदशाधिकरणम् ॥

इदानीं राजसानां कर्मण्यासक्तानां कर्माकरणनिर्णयार्थमधिकरणमारभते **आदरादिति** । सूत्रमवतारयन्ति **नन्विति** । **संशय** इति । कस्य बाधः स्यान्न कस्येति संशय इत्यर्थः । पूर्वपक्षमाहुः **तत्रेति** । **इतरत्रेति** । भगवत्सेवादिधर्मेष्वित्यर्थः । **निरवकाशानां** कर्मणामितिशेषः । सिद्धान्तं वक्तुं सूत्रार्थमाहुः **ब्रह्मयज्ञेति** । **प्रकरणे** तैत्तिरीयाणामारण्यके स्वाध्यायब्राह्मणे । **ओमिति प्रतिपद्यत** इति । अस्यार्थः । ब्रह्मयज्ञेन यक्ष्यमाणः प्रणवं प्रथममुच्चरेत् ।

यजुस्त्रयीं विद्यां प्रत्येषां वागेतत् परममक्षरं तदेतदृचाभ्युक्तं, ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधिविश्वे निषेदुर्यस्तन्न वेद किमृचा करिष्यति य इत् तद् विदुस्त इमे समासत इति" (तै. आ. २. ११. १.) इति। अत्र ऋक्सम्बन्धित्वेन वर्णात्मके वस्तुतस्तु "परमे" परमव्योमात्मकेक्षरे ब्रह्मण्योङ्कारे वर्तमानं "तत्" लोकवेदप्रसिद्धं परं ब्रह्म "यो न वेद स किमृचा करिष्यति" इत्यनेन तदज्ञाने वेदाध्ययनस्य निष्फलत्वमुच्यते। एवं सति तदुक्तकर्मणोपि तथात्वमायाति। एतेन "भक्त्या मामभिजानाति" इतिवाक्यात् परब्रह्मस्वरूपज्ञानं भक्त्यैवेति भक्ताः सन्तः पुरुषोत्तमविदो ये तेषामेव वेदाध्ययनादिकं फलप्रदं नान्येषामित्युक्तं भवति। अत एव श्रीभागवतेप्युक्तं "ऋषयोपि देव युष्मत्प्रसङ्गविमुखा इह सञ्चरन्ति", संसरन्तीति वा (भाग. ३. ९. १.)। अन्वये निदर्शनम्। "य इद्" ईश्वरत्वेन तत् पूर्वोक्तं परं ब्रह्म विदुस्ते भक्ताः सर्वापेक्षया सम्यक्प्रकारेण भगव-

---

तत्र हेतुः **एतदिति**। अयं यजूरूपः प्रणवमन्त्रस्त्रयी विद्या लक्ष्यीकृत्य प्रतिनिधिरूपः। अस्तीतिशेषः। **एषा वागिति**। सर्ववाग्बीजत्वात् सर्ववाग्रूपाम्। **एतत्परमिति**। एतदेवाक्षरं ब्रह्मेत्यर्थः। एतत् ऋचा अनुपदं वक्ष्यमाणया। ऋगाहुः **ऋच** इति। तां व्याकुर्वन्ति **अत्रेति**। ऋचः **ऋक्संबन्धित्वेन वर्णात्मके वस्तुतः** परमव्योमात्मके ओंकाराक्षरे वर्तमानं तं पुरुषोत्तमम्। अग्रे स्पष्टम्। **ऋषय इति**। इदं तृतीयस्कन्धे नवमाध्याये। **अन्वयेति**। अन्वयव्यभिचारे **निदर्शनं** पूर्वोक्तं श्रीभागवतवाक्यं श्रुतिं चाहुः। अथवाऽन्वयव्याप्तौ **निदर्शनमिति** इति ज्ञायते। एतेन भक्तानादरो

न्निकटे श्रीगोकुलवैकुण्ठादिष्वासत इति । तेनान्येषां सम्यगसत्त्वमर्थाक्षिप्तं भवति । पुरःस्थितार्थवाचीदंशब्दप्रयोगेण चान्येषामसतुल्यत्वं श्रुतेरभिमतमिति ज्ञायते । ऋक्शाखायामपि "तमु स्तोतारः पूर्व्यं यथाविद ऋतस्य गर्भं जनुषा पिपर्तन आस्य जानन्तो नाम चिद् विवक्तन महस्ते विष्णो सुमतिं भजामहे" (ऋक्सं. १. १६४. ३९.) इत्याद्यृग्भिरन्येभ्यो धर्मेभ्यः सकाशाद् भगवद्धर्मेष्वादरः श्रूयत इति तेषामलोप एवेत्यर्थः । एतेनाकरणे प्रत्यवायश्रवणादित्यादि यदुक्तं तदपि प्रत्युक्तं वेदितव्यम् । करणेपि

दर्शितः । साधनभक्तावादरः श्रुत्यन्तरे दर्शित **ऋगि**ति । **तमु स्तोतार** इति । हे उ स्तोतारः इति वेदानामुक्तिः स्तवनकर्त्तारः मदुत्कर्षवर्णनपरा इतियावत् । **तं** वेदलोकप्रसिद्धं **पूर्व्यं** पूर्वस्य कारणस्य सबन्धि **यथाविदः** यथावत्स्वरूपवेत्तारो भवन्त **ऋतस्य** सूनृतवाणीरूपस्य वेदस्य **गर्भ**मन्तर्निहितं **जनुषा** पूर्वजन्मना **पिपर्तन** संतोषं कुरुत । अत्र श्रुतिर्यथाविद इत्यनेन देहेन्द्रियप्राणान्तःकरणजीवविनियोगं दर्शयति भगवत्संतोषार्थम् । एतेन श्रुतेरादरो भगवद्धर्मेषु दर्शितः । भगवद्धर्मकरणेऽशक्तस्यानुकल्पमाहुः **आस्ये**ति । **आ** समन्तात् **अस्य** भगवतः **नाम जानन्तः** अखण्डशब्दस्वरूपत्वेन जानन्तः **विवक्तन** विशेषेण वदत । अनुकल्पेन संतोषार्थं नाम्नः स्वरूपमाह **चि**दिति । उपलक्षणमेतत् । सच्चिदानन्दरूपमित्यर्थः । एवं चेतादृशज्ञानस्वरूपनामद्वारा भगवज्ज्ञानं भविष्यतीतिभावः । नामस्वरूपज्ञान उपायं गुरूपसत्तिरूपमाहुः **महस्त** इति । हे विष्णो **ते** त्वत्संबन्धिनं **महः** तेजोरूपं **सुमतिं** सुबुद्धिं भक्तम् । अन्यो भजतु मा वा वयं तु **भजामहे** इति श्रुतयः स्वकृतिं दर्शयन्ति । एतेन भगवद्धर्माणामत्यादरत्वं सूचितम् । **इत्याद्यृग्भिरित्यादि**-

वैयर्थ्यात् तदपरिहारात् । एवं सति यदकरणे प्रत्यवायकथनं तेन तस्मादवकाशं प्राप्य गौणकालेप्यकरणे तथेति तस्याशय इति ज्ञायते ।। ४० ॥

नन्वेवंतात्पर्यकत्वे श्रुतेरुपनयनादिवत् कर्मोपयोगित्वं भक्तितज्ज्ञानयोः स्यादिति कर्मण एव प्राधान्यं न तु भक्तेः सिध्यतीत्याशङ्क्य भक्तितज्ज्ञानावश्यकत्वप्रबोधकश्रुतितात्पर्यमाह

उपस्थितेतस्तद्वचनात् ॥ ४१ ॥

तयोर्युगपत्करणेनुपस्थितेपि यदि पूर्वं भगवद्धर्मकरणमुच्येत तदा त्वदुक्तं स्यान्न त्वेवं किन्तूभयोर्युगपत्करण उपस्थिते बलाबलविचारे क्रियमाणे तु आदराद्धेतोस्तद्वचनाद् भगवद्धर्माणां बलवत्त्वेनालोपवचनान्न कर्माङ्गत्वमेतेषां सिध्यतीत्यर्थः ॥ ४१ ॥ १४ ॥

इति तृतीयाध्याये तृतीयपादे चतुर्दशमादरादलोप इत्यधिकरणम् ॥ १४ ॥

पदेन प्रतन्ते अद्य शिपिविष्टेत्यादीनामृचां सग्रहः । प्रत्यवायस्य का गतिरित्याकाङ्क्षायां तामाहुः **एवमिति** ॥ ४० ॥

सूत्रमवतारयन्ति **नन्विति** । **तात्पर्यकत्व** इति । भगवद्धर्मकरणे श्रुत्युक्तानां कर्मणां सार्थक्यमन्यथा नेत्येवं तात्पर्यकत्वम् । **उपनयनादिवदिति**। यथाग्निहोत्रार्थमुपनयनं तथा कर्मार्थं भक्तिरिति तस्या अङ्गत्वमित्यर्थः । सूत्रार्थमाहुः **तयोरिति** । **त्वदुक्तमिति** । उपनयनादिवत् कर्माङ्गत्वं स्यादित्यर्थः ॥ ४१ ॥ इति चतुर्दशाधिकरणम् ।

अथेदं विचार्यते पुरुषोत्तमविदः कर्म कर्तव्यं न वेति । तत्र मार्गत्रयफलात्मके तस्मिन् सम्पन्ने पुनस्तस्य स्वतोपुरुषार्थस्य करणमप्रयोजकमिति न कर्तव्यमेवेति पूर्वपक्षः । तत्र सिद्धान्तमाह तन्निर्धारणेत्यादिना ।

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४२ ॥ (३. ३. १५.)

अत्रेदमाकूतम् । भक्तिमार्गे हि मर्यादापुष्टिभेदेनास्ति द्वैविध्यम् । तत्र मर्यादायां पुष्टौ चैतादृशस्य न कर्मकरणं सम्भवति । अत एव तैत्तिरीयकोपनिषत्सु पठ्यते " आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन " (तै. २. ४.) इति । " एतꣳह वाव न तपति किमहꣳ साधु नाकरवं किमहं पापमकरवम् " (तै. २. ९.) इति । श्रूयते चोभयविधानामपि कर्मकरणमम्बरीषोद्धवपाण्डवादीनाम् । एवं सत्युभयविधानां मध्ये मम कर्मकरणे प्रभोरिच्छास्तीति यो निर्धारयति स करोति । य एतद्विपरीतं स न करोति यथा शुकजडादिः । एतन्निर्धारश्च भगवदधीनोऽतो भक्तेष्वपि

ननु यथा परमहंसैर्न कर्म कर्तव्यमेवं भक्तैरपि न कर्तव्यमिति शङ्क्य कर्मप्रयोजनं बोधयितुमधिकरणमाहुः **तन्निर्धारणेति**। संशयपूर्वपक्षावाहुः **अथेदमिति**। पूर्वपक्षमाहुः **तत्रेति** । **मार्गेति** । **तस्मिन्निति** पुरुषोत्तमज्ञाने । **अपुरुषार्थस्य** । कर्मण इति शेषः । सिद्धान्तसूत्रं व्याकुर्वन्ति । **अत्रेदमिति** । **एतादृशस्य** पुरुषोत्तमज्ञानवतः । **श्रूयत इति** । गोपालोत्तरतापनीये । **एतद्विपरीतमिति** । निर्धारयतीतिशेषः । ननु पुरुषोत्तमविदः कर्मणः फलं

तन्निर्धारणानियमोऽतः कर्तव्यमेवातन्निर्धारणे त्वाधुनिकानाम् । एवं सतीच्छाज्ञानवता तत्सन्देहवता च कर्म कर्तव्यमिति सिद्धम् । तत्रोभयोः फलं वदन्नाद्यावाद्यस्याह तद्दृष्टेस्तस्या भगवदिच्छाया दृष्टिर्ज्ञानं यस्य स तथा । तस्य जीवकृतकर्मफलात् **पृथग्** भिन्नमीश्वरकृतकर्मणो यत् फलं वेदमर्यादारक्षा लोकसङ्ग्रहश्च तत् फलमित्यर्थः । हिशब्देन " सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत । कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसङ्ग्रहम् " (भ. गी. ३. २५.) इति भगवद्वाक्यरूपोपपत्तिः सूचिता । द्वितीयस्य मध्यमाधिकारात् कालसङ्गादिजनितचित्तमालिन्येन भगवत्सान्निध्ये प्रतिबन्धः स्यात् । तन्निवृत्तिस्तत्कृतकर्मणः फलमित्यर्थः ।

अथवा पूर्वसूत्राभ्यां भगवद्धर्मकृतेरावश्यकत्वमुक्तम् । सर्वात्मभाववतः " न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह " (भाग. ११. १२. १४.) इतिभगवद्वचनाद् विधेयाभावादसम्भवाच्च कर्मज्ञानयोर्विहितभक्तेश्च करणं न सम्भवतीति तस्य किं फलमित्याकाङ्क्षा-

---

नास्ति कृतार्थत्वादित्याशङ्क्य सूत्रशेषमवतारयन्ति **तत्रेति** । **उभयोः** ज्ञातेच्छतत्संदेहवतोः । **आद्यस्य** निश्चितेच्छस्य । द्वितीयस्याहुः **द्वितीयस्येति** । एवं चैतादृशोरपि कर्मणः साफल्यमस्तीति न पूर्वोक्तविचारवैयर्थ्यमित्यर्थः ।

व्याख्यानान्तरं कर्तुं सूत्रमवतारयन्ति **अथवेति** । **भगवदिति** । मोक्षफलकश्रवणादिकृतेरित्यर्थः । **विधेयाभावादिति** । तं प्रति मोक्षसाधनानां विधेयानां तेषामभावादित्यर्थः । **असंभवादिति** । तद्भावस्वभावत्वेन कर्तुमशक्यत्वेना-

पूरणाय तदनुवदति **तन्निर्धारणे**त्यादिना । तस्मिन् धर्मिण्येव न तु धर्मेष्वपि दृष्टिर्यस्य स तथा । दृष्टिपदेन ज्ञानमात्रमुच्यते । तेनान्य विषयकदर्शनश्रवणादिज्ञानाभाव उक्तो भवति । एतादृशस्य प्रभुसङ्गम-मात्रमपेक्षितम् । तत्र भगवदुक्तस्वसङ्गमावधिकस्य भक्तस्य सङ्गम-समयनिर्धारो भवति । अतादृशस्य तस्य स नेति **तन्निर्धारणानियमः** । एतेन फलप्राप्तेः प्रागवस्थोक्ता भवति । फलस्वरूपमाह पृथग् फलमिति । अस्यानिर्वचनीयत्वादनुभवैकवेद्यत्वान्मोक्षान्तं यत् फलं शास्त्र उक्तं तस्माद् भिन्नमित्युक्तम् । अन्यत्र हि धर्माणां साधनत्वं यत्र फलमेव साधनं तत्फलस्यानिर्वाच्यता युक्तैवेति हिशब्देनाह । ज्ञानमोक्षादिना तद्भावाप्रतिबन्धश्च फलमित्यर्थः । प्रासङ्गिकमेतत् सूत्रम् ॥ ४२ ॥ १५ ॥

इति तृतीयाध्याये तृतीयपादे पञ्चदशं

तन्निर्धारणाधिकरणम् ॥ १५ ॥

संभवादित्यर्थः । **तदनुवद**तीति । तस्य फलमनेन सूत्रेणानुवदतीत्यर्थः । व्याकुर्वन्ति **तस्मिन्नि**ति । **एतेने**ति । तन्निर्द्धारणानियमपदेनेत्यर्थः । **अन्य-त्रे**ति । मोक्षपर्यन्ते फलान्तरे । **यत्र फलमे**वेति । भगवत्संगानुसंधानेन तदे-कतानस्य यतो वाचोनिवर्तन्त इति श्रुत्युक्तमगणितानन्दरूपं फलमित्यर्थः । **तद्भावाप्रतिबन्धश्चे**ति । तत्प्राप्तिपूर्वदशाया तद्भावप्रतिबन्धाभावश्च फल-मित्यर्थः । **एतत्सूत्रमि**ति । एतेनाधिकरणमिदं न भवतीतिसूचितम् ॥ ४२ ॥ इति पञ्चदशाधिकरणम् ॥

अथेदं विचार्यते । सर्वात्मभावो विहितकर्मज्ञानभक्तिसाध्यो न वेति । तत्र पुराणे " तस्मात् त्वमुद्धवोत्सृज्य " (भाग. ११. १२. १४.) इत्युपक्रम्य " मामेकमेव शरणमात्मानं सर्वदेहिनाम् । याहि सर्वात्मभावेन यास्यसे ह्यकुतोभयम् । " (भाग. ११. १२. १५.) इतिवाक्ये मुक्त्यात्मकाकुतोभयसाधनरूपशरणगमने प्रकारत्वेन सर्वात्मभावस्य कथनेन स्वप्रयत्नसाध्यत्वं गम्यतेऽतः साधनसाध्य इति पूर्वः पक्षः । तत्र सिद्धान्तं वक्तुं तदुपदेशस्वरूपमाह प्रदानवदिति ।

प्रदानवदेव तदुक्तम् ॥ ४३ ॥ (३. ३. १६.)

यद्ययं साधनोपदेशः स्यात् स्यात्तदा साधनत्वेन सर्वात्मभावेन शरणप्राप्तेः स्वकृतिसाध्यत्वं, नत्वेवं, किन्तु **तदुक्तं** भगवदुक्तम् । **प्रदानवत्** । प्रकृष्टं दानं प्रदानं वरदानमिति यावत् । तद्वदेवेत्यर्थः । वरेण हि स्वकृत्यसाध्यमपि सिध्यतीति । तथा शत्रुसंहारभयादिनापि शरणाप्तिर्भवति । तत्र न तस्याः पुरुषार्थत्वं किन्तु तन्निवृत्तेरेव । प्रकृतेपि सर्वात्मभावे स्वरूपप्राप्तिविलम्बासहिष्णुत्वेना-

---

इदानीं मुख्या भक्तिः केन जायत इत्यकाङ्क्षायामधिकरणमाहुः **प्रदानवदिति** । **अथेति** । **इदमिति** । इदमधिकरणम् । संशयमुक्त्वा पूर्वपक्षमाहुः **तत्रेति** । सिद्धान्तं व्याकुर्वन्ति **यद्ययमिति** । **शत्रुसंहारेति** । शत्रुभयं संहारभयं चादि यस्येत्यर्थः । **तन्निवृत्तेरिति** । शत्रुभयनिवृत्तेरित्यर्थः । एतद्वाक्यस्य वरदानतुल्यत्वमुपपादयन्ति **प्रकृतेति** । **एतच्चेति** । एतादृश-

त्यार्त्यां स्वरूपातिरिक्तास्फूर्त्यां तद्भावस्वाभाव्येन गुणगानादिसाधनेषु कृतेष्वप्यप्राप्तौ स्वाशक्यत्वं ज्ञात्वा प्रभुमेव शरणं गच्छति । एतच्च न स्वकृतिसाध्यमिति सुष्टूक्तं प्रदानवदिति । भक्तस्येप्सितोर्थो हि वरो भवति । सर्वात्मभावस्यानुभवैकवेद्यत्वेन पूर्वमज्ञानेनेप्सितत्वासम्भवेपि स्वत एव कृपया दानमिति वदित्युक्तम् ।

अथवा सर्वात्मभावेन मां याहीति सम्बन्धः ।

यद्वा प्रदानवदित्यस्य पूर्ववदेव व्याकृतिः । तत्र साधनासाध्यत्वे प्रमाणमाह तदुक्तमिति । “ नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यः ” (कठ. २. २२.) इतिश्रुत्या वरणातिरिक्तसाधानाप्राप्यत्वमुच्यत इति तत् तथैवेत्यर्थः । भगवदुक्ताकुतोभयपदस्य न मुक्तिरर्थः, किन्तु “ यतो वाचः ” (तै. २. ४.) इत्यादिनानन्दस्य स्वरूपमुक्त्वा “ आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन ” (तै. २. ४.)

शरणगमनमित्यर्थः । नन्वस्य भावस्य वरत्वमेव न तु तत्तुल्यत्वमत आहुः भक्तस्येति ।

प्रकारान्तरेण वाक्ययोजनामाहुः अथवेति । कीदृशं मां शरणमिति योजना । वरणश्रुतिरेवाहेममर्थमिति सूचयितुं सूत्रांशं प्रकारान्तरेण व्याकुर्वन्ति यद्वेति । तत्तथैवेति । वरणलभ्य एव सर्वात्मभाव इत्यर्थः । इदानीमकुतोभयपदार्थमाहुः भगवदिति । तदर्थ इति । न बिभेति कुतश्चनेतिवाक्योक्त-

इतिश्रुत्युक्तं यत् पूर्वोक्तरसात्मकपुरुषोत्तमभजनानन्दानुभवोत्तरकालीनमकुतोभयं तदर्थः ॥ ४३ ॥ १६ ॥

इति तृतीयाध्याये तृतीयापादे षोडशं
प्रदानवद्दित्यधिकरणम् ॥ १६ ॥

ननु प्रतिबन्धककालादृष्टादिसद्भावेपि वरणकार्यं स्यादुत तन्निवृत्ताविति संशये प्रतिबन्धकाभावस्य सर्वत्र हेतुत्वात् तन्निवृत्तावेव तथेति पूर्वपक्षे सिद्धान्तमाह लिङ्गेत्यादिना ।

लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि ॥४४॥ (३.३.१७.)

सामोपनित्सु नवमे प्रपाठके सनत्कुमारनारदसंवादे प्रथमत एव मुख्या ब्रह्मविद्योपदेशार्हा न भवतीति ज्ञात्वा सनत्कुमारो नारदाधिकारं च ज्ञातुं "यद् वेत्थ तेन मोपसीद" (छा. ७. १. २.) इत्युक्तो नारदः स्वयं विदितमृग्वेदादिसर्पदेवजनविद्यान्तमुक्त्वा "सोहं भगवो मन्त्रविदेवास्मि" (छा. ७. १. ३.)

रसरूपब्रह्मानुभवोत्तरकालीन एवोकुतोभयपदार्थ इत्यर्थः ॥ ४३ ॥ इति षोडषाधिकरणम् ॥

सर्वात्मभावस्य वरणैकसाध्यत्वं स्थिरीकर्तुं तस्य च पुनः स्वरूपं निरूपयितुं लिङ्गभूयस्त्वाधिकरणमाहुः **लिङ्गभूयस्त्वेति** । अधिकरणमवतारयन्ति **नन्विति** । **अदृष्टादी**त्यादिपदेन स्वभावपरिग्रहः । संशयमुक्त्वा पूर्वपक्षमाहुः **प्रतिबन्धकेति** । सूत्रार्थं वक्तुं लिङ्गभूयस्त्वबोधिकां श्रुतिमाहुः **सामोपनिषदिति**। छान्दोग्ये। तं होवाचेति सनत्कुमारवाक्यस्य तात्पर्यमाहुः **प्रथमत इति**। **स्वयमिति**। ऋग्वेदाद्यारभ्य सर्पदेवजनविद्यान्तं सर्वं जानामीत्यर्थः। इदं

इति स्वाधिकारमुक्त्वाह " नात्मविच्छ्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोहं भगवः शोचामि तं मा भगवान् शोकस्य पारं तारयतु " (छा. ७. १. ३.) इति नारदेनोक्तः सनत्कुमारः पूर्वस्मात् पूर्वस्माद् भूयो वदेति पृष्टः भूयःपदमाधिक्यार्थकम् नामवाङ्मनःसङ्कल्पचित्तध्यानविज्ञानबलान्नापस्तेजआकाशस्मराशाप्राणान् ब्रह्मत्वेनोपासनाविषयत्वेनोक्त्वा प्राणोपासकस्यातिवादित्वं सत्यवादित्वेनोक्त्वा विजिज्ञासितव्यत्वेन सत्यविज्ञानमतिश्रद्धानिष्ठाकृतिसुखानि पूर्वपूर्वकारणत्वेनोत्तरोत्तराण्युक्त्वा सुखस्वरूपजिज्ञासायामाह " यो वै भूमा तत् सुखम् " (छा. ७. २३. १.) इति। भूम्नः स्वरूपजिज्ञासायामाह " यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमा " (छा. ७. २४. १.) इति। एतेन सर्वात्मभावस्वरूपमेवोक्तं भवति। तत्र विरहभावेतिविगाढभावेन सर्वत्र तदेव स्फुरतीति " स एवाधस्तात् " (छा. ७. २५. १.) इत्यादिनोक्त्वा कदाचित् स्वस्मिन्नेव भग-

---

च श्रुतावेव स्फुटम्। एतेन मन्त्रवित्त्वमेव नारदेन ज्ञापितम्। तेन शोकनिवृत्तिर्नास्तीत्यत आहुः **भगवानिति**। सनत्कुमारेणोपदेशे प्रारब्धे भूय आहुः एतस्मादधिकं वदेति नारदेनोक्ते प्रथमतो नाम तदनन्तरं वागित्यारभ्य उक्त्वेत्यन्तं श्रुतौ प्रसिद्धम्। तदनन्तरं सुखस्वरूपजिज्ञासा जाता। तदनन्तरमुपदेशमाहुः **यो वै** इति। तथा च वरणकार्यमाहु **एतेनेति**। **तत्रेति**। भूम्नि ज्ञाते सति लाभो न जात इतिकृत्वा **विरहभावे** च सति **अतिविगाढभावेनेति**। प्रपञ्चविस्मरणपूर्वपरमासक्तिरूपेणेत्यर्थः। **तदेव** आसक्तिविषयीभूतं भगवत्स्वरूपमेव। स्वस्मिन्भगवत्स्फूर्तिर्भवति न वेति संशये आहुः **कदाचिदिति**।

वत्त्वस्फूर्तिरपि भवतीति "अथाहङ्कारादेशः" (छा. ७. २५. १.) इत्यादिना तामुक्त्वैतेषां व्यभिचारिभावत्वेनानियतत्वं ज्ञापयितुं पुनः सर्वत्र भगवत्स्फूर्तिमाह "अथात आत्मादेशः" (छा. ७. २५. २.) इत्यादिना। ततः संयोगभावेऽसति पूर्वभावेन सर्वोपमर्दिना स्वप्राणादिसर्वतिरोधानेनाग्रिमलीलानुपयोगित्वं न शङ्कनीयं यतो भगवत एव सर्वसम्पत्तिरित्याशयेन "तस्य ह वा एतस्यैवं पश्यतः" इत्युपक्रम्य "आत्मन एवेदꣳ सर्वम्" (छा. ७. २६. १.) इत्युक्तवान्। ततः श्लोकैस्तद्भावस्वरूपमुक्त्वैतस्य मूलकारणमाह "आहारशुद्धौ" (छा. ७. २६. २.) इत्यादिना। प्राणपोषको ह्याहारस्तस्य सदोषत्वे तु न किञ्चित् सिध्यति।

तांस्फूर्तिम्। **एतेषां** विरहभावकृततत्स्फूर्तिरूपाणां ज्ञानानाम्। **पुनरिति**। अहंकारादेशात्पूर्वं निरूपितस्यावृत्त्याम्। तस्य ह वा एतस्येत्यादिग्रन्थतात्पर्यमाहुः तत इति। **ततः** विरहभावानन्तरं **संयोगभावेऽसति पूर्वभावेन** विरहात्मकेन **सर्वतिरोधानेन** प्राणादिसर्वतिरोधानेन वृथैवेद सर्वमिति न शङ्कनीयमित्यर्थः। **सर्वसंपत्तिः** सर्वस्थितिः। तथा च विरहेण सर्वोपमर्दाभावाल्लीलोपयोगसिद्धिरितिभावः।

तदेवाहुः **ततः श्लोकैरिति**। न पश्यो मृत्युं पश्यति न रोगं नोत दुःखतामित्यादिश्रुत्युक्तश्लोकैरित्यर्थः। पश्यः उक्तविधभूमदर्शनवान् मृत्युरोगौ न पश्यति। **तद्भावेति**। भूमद्रष्टुर्भावमुक्त्वेत्यर्थः। **आहारशुद्धाविति**। "त्वयोपभुक्तस्रग्गन्धवासोऽलंकारचर्चिताः। उच्छिष्टभोजिनो दासास्तव मायां जयेमहि॥" इतिरीत्याहारशुद्धावित्यर्थः। तथा चाहारशुद्धौ सत्यामविद्याकाम-

एवं सति भगवदतिरिक्तस्य स्वतो निर्दोषत्वाभावाद् भगवानेव चेत् प्राणपोषको भवेत् तदा सर्वं सम्पद्यते। स च सर्वात्मभावे सत्येव भवति। स च तथा तद्वरणं विना न भवति। तच्चोक्तकार्यानुमेयमिति वरणलिङ्गं सर्वात्मभावस्तस्यैव भूयस्त्वात् सर्वतोधिकत्वात् तद् वरणमेव सर्वतः कालादेर्बलीय इत्यर्थः। यल्लिङ्गमेव सर्वतोधिकं तस्य तथात्वे किं वाच्यमिति कैमुतिकन्यायोपि सूचितः। ज्ञानमार्गीयज्ञानेन प्रतिबन्धशङ्कायामाह **तदपीति। उक्तमिति शेषः।** **"अन्तरा भूतग्रामवत् स्वात्मनः" (ब्र. सू. ३. ३. ३५.)** इतिसूत्रेण। तच्चोपपादितमस्माभिः ॥ ४४ ॥

कर्मकृतानां ग्रन्थीनां विप्रमोक्ष इतिज्ञेयम्। मूलकारणमेव विशदयन्ति **एवं सतीति।** इदं च सर्वं तत्रत्योपनिषत्पर्यालोचनया सुगमं भविष्यति। विस्तरभियास्माद्विरम्यते। एतावदुपनिषद्ग्रन्थतात्पर्यमुक्त्वा सूत्रार्थमाहुः **स चे**त्यादि। स भगवान् प्राणपोषकः। **स च** सर्वात्मभावश्च। **तथा** अत्यनुग्रहेण। **तद्वरणं** तस्य जीवस्य वरणम्। **तच्च** वरणं च। **उक्तकार्ये**ति। भगवत्कृतप्राणपोषणानुमितसर्वात्मभावरूपकार्यानुमेयमित्यर्थः। **बलीय** इति। कालादिप्रतिबन्धकसद्भावेऽपि तत्कार्यं भवत्येवेत्यर्थः। **हि**शब्देनोक्तमर्थमाहुः **यल्लिङ्गमिति।** सूत्रांशमवतारयन्ति **ज्ञाने**त्यादिना। **प्रतिबन्धशङ्कायामिति।** श्रुतावात्मादेश उक्तः। तेनचाभेदं सर्वमिति सर्वस्यात्मत्वेन भानमुक्तम्। एवं च स्वात्मनि तदभेदभावे विरहभावो न जायत इतिकृत्वा सर्वात्मभावो न भविष्यतीतिशङ्कायामित्यर्थः। शङ्कानिवारणमाहुः **अन्तरेति। उपपादितमिति।** अस्य भजनानन्दरूपफलं भवत्वित्याकारिकायामिच्छायां सत्यां विरहभावो भगवता संपाद्यत इत्युपपादितमित्यर्थः।

तत्राह । नात्र वरणलिङ्गभूयस्त्वं निरूप्यते किन्त्वात्मज्ञानप्रकारविशेष एव । तथा हि । पूर्वप्रपाठक आत्मना सहाभेदः सर्वस्य निरूपितः श्वेतकेतूपाख्यानेन । अग्रिमे च "सोऽहं भगवो मन्त्रविदेवास्मि नात्मवित्" (छा. ७. १. ३.) इत्यादिना नारदस्यात्मजिज्ञासैवोक्ता । एवं सत्युत्तरमपि तद्विषयकमेव भवितुमर्हत्यत आत्मप्रकरणत्वादुभयोः प्रपाठकयोः पूर्वस्मिन् यदभेद उक्तस्तस्यैव स्वरूपम् "आत्मन एवेदꣳ सर्वम्" (छा. ७. २६. १.) इत्यन्तेनोक्तमिति पूर्वोक्तप्रकारादन्येन प्रकारेणात्माभेद एव सर्वस्योक्त इत्येतदेवाह

पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ॥४५॥

पूर्वस्य पूर्वप्रपाठकोक्तात्माभेदज्ञानस्य विकल्पः प्रकारभेद एवाग्रेपि निरूप्यते । तत्रोपपत्तिमाह प्रकरणादिति । एतत्तूपपादितम् । अत्र सिद्धान्तिसम्मतमेव दृष्टान्तमाह तद्धृदयसंवादार्थं क्रिया मानसवदिति । यथा पूजनप्रकरणे बाह्यं तत्क्रियारूपमुच्यत आन्तरं तु मनोव्यापाररूपमुच्यते । न ह्येतावतान्यतरस्य तद्भिन्नत्वं वक्तुं शक्यं प्रकरणाभेदात् तथेहापीत्यर्थः ॥ ४५ ॥

अत्र सूत्रद्वयेनाशङ्कां पूर्वोक्तार्थदार्ढ्यार्थमाहुः **पूर्वे**ति । अवतारयन्ति **तत्रे**ति । **उक्त** इत्यन्तेन । **तत्र** उक्तेर्थे पूर्वपक्षी **आहे**त्यर्थः । **निरूपित** इति । तत्त्वमसि श्वेतकेतो ऐतदात्म्यमिदं सर्वमितिमहावाक्य इत्यर्थः । **तद्विषयकमेव** आत्मविषयकमेव । पूर्वोक्तमेव विशदयन्ति **एतदेवाहे**ति । **अग्रेपि** नवमे प्रपाठकेपीत्यर्थः । **उपपादितम**वतरणग्रन्थ इतिशेषः । **बाह्यं त**दिति । **बाह्यं** पूजनमित्यर्थः । **तद्भिन्नत्वं** पूजनभिन्नत्वम् ॥ ४५ ॥

अतिदेशाच्च ॥ ४६ ॥

नामरूपात्मकं हि जगत् । तत् पूर्वं सर्वशब्देनानूद्य तस्मिन् ब्रह्माभेदो निरूपितोऽग्रे त्वृगादिविद्या अनूद्य नामात्मकब्रह्मत्वं तत्राति-दिश्यते " नामैवैतन्नामोपास्स्व " (छा. ७. १. ४.) इति । इतोपि हेतोर्ज्ञानप्रकारभेद एवाग्रे निरूप्यत इत्यर्थः ॥ ४६ ॥

विद्यैव तु निर्धारणात् ॥ ४७ ॥

तुशब्दः पूर्वपक्षं व्यावर्तयति । यदुक्तं सनत्कुमारनारदसंवाद आत्मज्ञानप्रकारविशेष एव निरूप्यत इति तन्न । किन्तु विद्यैव निरूप्यत इति । अत्रेदमाकूतम् । ' नायमात्मा ' (कठ. २. २२., मुण्ड. ३. ३.) इतिश्रुतिरितरसाधननिषेधपूर्वकं वरणस्य साधनत्वमुक्त्वा वृतलभ्यत्वे हेतुत्वं वदन् वरणविषयमप्याह ' तस्यैष

सूत्रार्थमाहुः **नामेति**। **तत्** जगत् । **पूर्वं** पूर्वस्मिन् प्रपाठके । **सर्वशब्दे-नेति** । ऐतदात्म्यमिदं सर्वमिति सर्वशब्देनेत्यर्थः । **अग्रे** अस्मिन्प्रपाठके । **ऋगादीति**। यद्वै किंचाध्यगीष्ठा इत्यादिना नारदोक्ता **ऋगादिविद्या अनूद्ये**-त्यर्थः । **नामात्मकेति** । मनःप्रभृतिरूपात्मकं जगत्तच्छब्देनानूद्य तत्तदात्मक-ब्रह्मत्वं तत्रातिदिश्यत इत्यर्थः । अग्रे अस्मिन् प्रप्राठके ॥ ४६ ॥

सूत्रार्थेनैव शङ्कां निरस्यन्ति **तुशब्द** इति । कथं व्यावर्तयतीत्यत आहुः **यदुक्तमिति** । **अनूद्य तन्नेत्य**नेन दूषयन्ति । ननु विद्याशब्देन ज्ञानसामान्यं गृह्यते न तु सर्वात्मभावरूपज्ञानविशेष इत्यतस्तदुपपत्तिं कर्तुं वरणश्रुत्येक-वाक्यत्वेन प्रकृतश्रुतितात्पर्यं वक्तुं पूर्ववर्णश्रुतिं व्याकुर्वन्ति **अत्रेति** । मुण्डकस्था " नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वाम् " इति । **उक्त्वेति** ।

आत्मा वृणुते तनुं स्वाम् ' इति । ' तस्य ' वृतस्यात्मन ' एषः ' भगवान् ' आत्मा ' । अत एव तत्तनूरूपः स जीवात्मा । तद्वरणस्यावश्यकत्वज्ञापनाय ' स्वाम् ' इति । सर्वो हि स्वकीयां तनुमात्मीयत्वेनात्मत्वेन च वृणुते । तद्विशिष्ट एव भोगान् भुङ्क्ते । अत एव तैत्तिरीयकोपनिषत्स्वपि ' ब्रह्मविदाप्नोति परम् ' (तै. २. १.) इति सामान्यतो ब्रह्मविदः परब्रह्मप्राप्तिमुक्त्वाग्रिमर्चा विशेषतो वदन् " सत्यं ज्ञानमनन्तं ब्रह्म " (तै. २. १.) इति परब्रह्मस्वरूपमुक्त्वा " यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कमान् सह ब्रह्मणा विपश्चिता " (तै. २. १.) इत्युक्तम् । एतद्यथा तथानन्दमयाधिकरणे प्रपञ्चितमस्माभिः ।

किञ्च पुरुषोत्तमलाभहेतुभूतं तु भक्तिमार्गे यद् वरणं स्वीयत्वेनाङ्गीकाररूपं तदेव न त्वन्यादृशमपीतिज्ञापनायाग्रे वदति ' नायमात्मा

पादत्रयेणोक्त्वेत्यर्थः । **अत एवे**ति । भगवतो वृतात्मत्वादेव । तथा च तस्यैष आत्मा सन्नर्थात्तं स्वां तनुं वृणुत इत्यन्वयः । ननु वृतस्यैव तत्तनूरूपत्वं कथमित्यत आहुः **तद्वरणस्ये**ति । तथा बृहदारण्य अन्तर्यामिब्राह्मण आत्ममात्रस्य ब्रह्मशरीरत्वं यदुक्तं तत्तु नियन्तव्यतार्थं स्वीक्रियते न तु वृतस्यैवेतिशेष इति भावः । अत एव गीतायामुक्तं " श्रद्धावान्भजते यो मां स मे युक्ततमो मतः " इति । अस्मिन्नर्थे उपष्टम्भकमाहुः **अत एवे**ति । विशेषरूपेण प्रातिपदार्थस्थकामभङ्गरूपत्वमित्याशयेनाहुः **सोऽश्नुते** इति । **एतदि**ति । आनन्दमयाधिकरणे रसरूपस्यैव परशब्दार्थत्वमक्षरस्य तस्य तद्धामत्वं तत्प्राप्तिश्च वरणेनैवेत्युक्तम् । अन्यपदमाहुः **किञ्चे**ति । **अग्रे** मुण्डके **वदति** ।

बलहीनेन लभ्यः ' (मुण्ड. ३. ४.) इति । बलकार्यं हि प्रभुवशीकरणम् । तच्च " अहं भक्तपराधीनः " (भाग. ९. ४. ६३.) " वशे कुर्वन्ति मां भक्त्या " (भाग. ९. ४. ६६.) इत्यादिवाक्यैर्भक्त्यैवेति बलशब्देन भक्तिरुच्यते । अन्यथा पूर्ववाक्य एवेतरनिषेधस्य कृतत्वात् पुनर्बलाभावनिषेधं न कुर्यात् । वरणमात्रस्य हेतुत्वमुक्त्वा बलस्य तथात्वं च न वदेत् । एतादृशस्य हृदि भगवत्प्राकट्यं भवतीत्याह " एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधाम " (मुण्ड. ३. २. ४.) इति । अस्यार्थस्तु ' एष आत्मा ' आत्मनोप्यात्मा पुरुषोत्तमः ' ब्रह्म ' अक्षरब्रह्मात्मकं ' धाम विशते ' इति । ' धाम ' पदं पुरुषोत्तमस्याक्षरं ब्रह्म सहजं स्थानमितिज्ञापनार्थमुक्तम् । अन्यथा न वदेत् । तेन तद्धृदये स्वस्थानमाविर्भावयित्वा स्वयं तत्र प्रकटीभवतीति ज्ञाप्यते । प्रकृते श्वेतकेतूपाख्याने परोक्षवादेन ब्रह्माभेदबोधनेन पुरुषोत्तमाधिष्ठानत्वयोग्यता ज्ञाप्यते । अग्रे तु न ह्येतावतैवाधिष्ठानात्मकाक्षराविर्भावो भवति

लभ्य इत्यनन्तरं " न च प्रमादात्तपसो वाप्यलिङ्गाद् " इतिपूरणीयम् । अत्र बलशब्देन कथं भक्तिलाभ इत्यत आहुः **बलकार्यमिति** । अत्र गमकमाहुः **अन्यथेति** । हेत्वन्तरमाहुः **वरणेति** । एतद्बलं पुष्टिमार्गीयमेव ग्राह्यम् । भगवदनुग्रहजन्यं भक्तिरूपमेव तदिति बोध्यम् ।

एतदुत्तरार्धमवतारयन्ति **एतादृशेति** । व्याकुर्वन्ति **अस्यार्थ इति** । पूर्वं ब्रह्माभेदपरत्वमाशङ्कितं तत्राहुः **प्रकृत** इति । **परोक्षवादेन** अन्यार्थमन्यकथनरूपो यः परोक्षवादः तेन । **बोधनेनेति** । जीवस्येतिशेषः । **अग्रे**

पुरुषोत्तमस्य वा । तथा सति ज्ञानिनां सर्वेषां परप्राप्तिः स्यात् । न त्वेवं, " भक्त्याहमेकया ग्राह्यः " (भाग. ११. २४. ११.) इत्यादिवाक्यैः । किन्तु भगवदनुग्रहेण भक्तसङ्गेन च भक्तौ सत्यामितिज्ञापनाय भक्त एव तद्बोधाधिकारीत्यपि ज्ञापयितुं भक्तस्य नारदस्य भगवदावेशयुक्तस्य सनत्कुमारस्य च संवाद उक्तः । तत्रात्मशब्देन पुरुषोत्तम उच्यते । भक्तिमार्गे तु निरुपधिस्नेहविषयः स एव यतः । स तु सर्वात्मभावैकसमधिगम्य इति सर्वात्मभाव एव विद्याशब्देनोच्यते । परमकाष्ठापन्नं यद् वस्तु तदेव हि वेदान्तेषु **मुख्यत्वेन प्रतिपाद्यम् । अक्षरब्रह्मादिकं तु तद्विभूतिरूपत्वेन तदुपयो**गित्वेन मध्यमाधिकारिफलत्वेन च प्रतिपाद्यते । तेन तत्र **विद्या**शब्दप्रयोग औपचारिकः । सर्वात्मभाव एव मुख्यः । युक्तं चैतत् । अक्षरविषयिण्या विद्यायाः सकाशात् तत उत्तमविषयिण्यास्तस्या उत्तमत्वम् । एवं सति पूर्वप्रपाठकस्याक्षरप्रकरणत्वादुत्तरस्य पुरुषोत्तमप्रकरणत्वात् त्वद्धेत्वसिद्धिश्चात उक्तन्यायेन विद्यैवाग्रिमप्रपाठके निरूप्यते न तु पूर्वोक्तात्मज्ञानप्रकारविशेषः । अत्र हेतुमाह **निर्धारणादिति**। " सुखं त्वेव विजिज्ञासितव्यम् " (छा. ७. २२. १.)

त्विति । अग्रिमप्रपाठक इत्यर्थः । भक्त्यैव पुरुषोत्तमप्राप्तिरित्याहुः **भक्त्याहमिति** । सापि भगवदनुग्रहभक्तसंगाभ्यां जातायां भक्तौ भवतीति ज्ञापयतीति ज्ञापयितुमुभयोः संवाद उक्त इत्यर्थः । अन्यदप्याहुः **परमेति** । **हेत्वसिद्धिश्चेति** । प्रकरणभेदे अतिदेशरूपहेत्वसिद्धिरित्यर्थः । हेतुमवतारयन्ति **अत्रेति** । व्याकुर्वन्ति **सुखमिति** । तथा च पूर्वं सदेव सोम्येदमग्र आसीदिति सद्रूप-

इत्युक्त्वा सुखस्वरूपमाह " यो वै भूमा तत् सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्यः " (छा. ७. २३. १.) इति। अक्षरपर्यन्तं गणितानन्दत्वात् पुरुषोत्तमस्यैवानन्दमयत्वेन निरवधिसुखात्मकत्वात् स एव भूमा तस्यैव विजिज्ञासितव्यत्वेन निर्धारणादित्यर्थः। भूम्नो लक्षणमग्र उच्यते " यत्र नान्यत् पश्यति " (छा. ७. २४. १) इत्यादिना। यस्मिन् ज्ञाते सति " नान्यत् पश्यति " इत्यर्थः। तथा सति सर्वात्मभाववतः प्रभु-दर्शने सत्यपि लीलोपयोगिवस्तुदर्शनादिकमनुपपन्नमिति शङ्का तु " तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मनः प्राणाः " (छा. ७. २६. १.) इत्यादिना निरस्ता वेदितव्या। तैः सह लीलां चिकीर्षतः प्रभुत एव सर्वं सम्पद्यते न तु भक्तसाम-र्थ्येनेतिभावेन तदुक्तेः ॥ ४७ ॥

दर्शनाच्च ॥ ४८ ॥

मात्मानं प्रकृत्य ब्रह्माभेदज्ञानमुपदिष्टम्। अत्र तु निरवध्यानन्दरूपजिज्ञास्य-त्वेन निर्धारयति। मुख्यसर्वात्मभावरूपैव विद्योच्यते इति भावः। ननु भूमपदेन सर्वात्मभावः कथं लभ्यत इत्यत आहुः **भूम्न** इति। तथा च **यत्रे**तिपदेन सर्वात्मभावलाभ इत्यर्थः। ननु लक्षणे तदितरदर्शनं निषिध्यते सर्वात्मभाववतां तु तद्दृश्यत इति तेन तल्लाभः कथमित्यत आहुः **तथा सती**ति। सर्वत्र भूमदर्शने सति। **तैः सह** प्राणादिधर्मैः सह। **संपद्यत** इति। तथा च भगवदिच्छयैव सर्वं भवतीतिभावः ॥ ४७ ॥

दृश्यते च सर्वात्मभाववतां भक्तानां व्रजसीमन्तिनीप्रभृतीनां पूर्वमितरविस्मृतिर्भगवत्स्पर्शादिनाग्रे सर्वसामर्थ्यमिति व्यासः स्वानुभवं प्रमाणत्वेनाह । उक्तं च श्रीभागवते ताभिरेव " चित्तं सुखेन भवतापहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये । पादौ पदं न चलतस्तव " (भाग. १०. २६. ३४.) इत्यादिना । तेन ज्ञानशक्तिक्रियाशक्तितिरोधानमुक्तं भवति । अग्रे तदाविर्भावादिकं स्फुटमेव ॥ ४८ ॥

ननु सनत्कुमारनारदसंवादात्मकमेकं वाक्यम् । तत्रोपक्रमे " मन्त्रविदेवास्मि नात्मविच्छ्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि " (छा. ७. १. ३.) इत्यादिना स्वात्मज्ञानस्यैवोपक्रमादुपसंहारोऽपि तमादायैवोचितः । अग्रे चेदात्मपदानामीश्वरपरत्वं स्याद् वाक्यभेद उपक्रमविरोधश्च स्यात् । तस्माद् वाक्यानुरोधात् पूर्वज्ञानप्रकारविशेष एवायमिति मन्तव्यमित्यत उत्तरं पठति

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४९ ॥

नैवं वाक्यानुरोधाद् वरणेन सर्वात्मभावलिङ्गभूयस्त्वं बाधि-

पूर्वं शब्देनान्यदर्शनं साधितं, इदानीं प्रत्यक्षेण साधयति **दर्शनाच्चेति** । व्याकुर्वन्ति **दृश्यत** इति । **स्वानुभवमिति** । स्वयं समाधौ यदनुभूतं तदेवोक्तं **दर्शनाच्चेति** सूत्रेणेत्यर्थः ॥ ४८ ॥

नन्वित्यादिग्रन्थः स्पष्ट एव । **उत्तरं पठतीति** । सूत्रकार इति शेषः । व्याकुर्वन्ति **नैवमिति** । **वाक्यानुरोधादिति** । शङ्कास्थवाक्यार्थानुरोधा-

तव्यम् । वाक्यापेक्षया श्रुतिलिङ्गयोर्बलीयस्त्वात् । एतद्बलीयस्त्वं तु "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यम्" (जै. सू. ३. ३. १३.) इतिजैमिनीयसूत्रे सिद्धम् । प्रकृत इतरसाधननिषेधपूर्वकं "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वाम्" (मुण्ड. ३. २. ३.) इतिश्रुतिर्वरणमात्रलभ्यत्वमाह । एतदग्रे च "नायमात्मा बलहीनेन लभ्यः" (मुण्ड. ३. २. ३.) इत्युपक्रम्य "एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधाम" (मुण्ड. ३. २. ४.) इतिश्रुतिः पठ्यते । एतच्च "विग्रैव तु निर्धारणात्" (ब्र. सू. (ब्र. सू. ३. ३. ४७.) इत्यत्र निरूपितम् । अपरं च "नात्मवित् तरति शोकमात्मवित्" (छा. ७. १. ३.) इतिनारदवाक्यानुवादयोरात्मपदमुत्तमप्रश्नात्मकेन लिङ्गेन पुरुषोत्तमपरमिति ज्ञायते । स हि सर्वेभ्य उत्तमोतो ब्रह्मेत्युपास्यत्वेन सनत्कुमारोक्तं प्रतिरूपं ततः 'ततो भूयोस्ति' इत्यपृच्छ । अन्ते सर्वाधिकत्वेन सुखात्मकत्वेन भूमानं श्रुत्वा तथा नापृच्छत् किन्तु तत्प्राप्त्यर्थमत्यार्त्या "कस्मिन् प्रतिष्ठितः" (छा. ७. २४. १.) इत्यपृच्छत् ।

दित्यर्थः । कुतो न बाधितव्यमित्यत आहुः **वाक्यापेक्षयेति** । **सिद्धमिति** । पूर्वमीमांसायामिति शेषः । श्रुतिमाहुः **यमेवैष** इति । लिङ्गमाहुः **अपरंचेति** । ज्ञापयति **उत्तमप्रश्नात्मकेनेति** । प्रथमः सनत्कुमारेण नाप्तः । उत्तमत्वमुक्तम् । ततः भूयः किमित्यारभ्य अक्षरपर्यन्तमुक्त्वा ततोपि **भूमा** इत्यात्मपदेन पुरुषोत्तम उक्तः । स एव ज्ञायत इत्यर्थः । अत आत्मपदं न जीवाक्षरपदं,

तदा सर्वात्मभाववत्स्वेव प्रतिष्ठित इत्याशयेन सर्वात्मभाव-लिङ्गात्मकं भावं "स एवाधस्तात्" (छा. ७. २५. २५.) इत्यादिनोक्तवान् ॥ ४९ ॥

नन्वेतया श्रुत्या न सर्वात्मभावलिङ्गात्मको भाव उच्यते किन्तु व्यापकत्वेन सर्वरूपत्वेन स्वभिन्नाधिकरणाभावादन्यत्राप्रतिष्ठितत्व-मेवोच्यत इत्यत उत्तरं पठति

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तम् ॥ ५० ॥

भूमस्वरूपं श्रुत्वा "स भगवः कस्मिन् प्रतिष्ठितः" (छा. ७. २४. १.) इतिप्रश्ने "स्वे महिम्नि" (छा. ७. २४. १.) इत्युत्तरम् । तदर्थस्तु स्वीयत्वेन वृते भक्ते यो महिमरूपः सर्वात्म-भावस्तस्मिन्निति स्वरूपात्मके महिम्नीति वा भगवदात्मकत्वात्

आद्यस्य दुःखित्वात्, द्वितीयस्य गणितानन्दत्वात्, वाक्यापेक्षया लिङ्गस्य बलीयस्त्वात् पुरुषोत्तमपरमेव । ननु तथापि सर्वात्मभावबोधकस्यात्रादर्शन-मित्यत आहुः **तदेति** ॥ ४६ ॥

अग्रिमसूत्रमवतारयन्ति **नन्विति** । अनया श्रुत्या पूर्वमुपक्रमगतवाक्य-बलेन । **किन्त्विति** । उत्तरश्रुतौ स्वे महिम्नि प्रतिष्ठितत्वस्योक्त्या सर्वात्मभाव-वद्भक्तहृदय अप्रतिष्ठितत्वमेवोच्यते । अत्रोत्तर पठतीत्यर्थः । व्याकुर्वन्ति **भूमेति** । सर्वात्मभावो नोच्यत इति यदुक्तं तत्रोत्तरमाहुः **स्वे महिम्नीत्यु-त्तरमिति** । स्वपदमात्मीयवाचकमात्मवाचकं वा । तत्र प्रथममाहुः **स्वीय-त्वेति** । द्वितीयमाहुः **स्वरूपेति** । तस्य महिमरूपत्वं कथमित्यत आहुः

सर्वात्मभावस्य, तदितरस्य साक्षात् पुरुषोत्तमाप्रापकत्वादस्यैव तत्प्रापकत्वात् परमकाष्ठापन्नमहित्वरूपोयमेव भाव इति महिमशब्दे-नोच्यते । स तु विप्रयोगभावोदये सत्येव सम्यग् ज्ञातो भवति व्यभिचारिभावैः । ते त्वनियतस्वभावा इति ज्ञापयितुं त्रिविधाः "स एवाधस्तात्" (छा. ७. २५. १.) इत्यादिना "आत्मै-वेद्ꣳसर्वम्" (छा. ७. २६. १.) इत्यन्तेन निरूप्य भूमप्रतिष्ठा-धिकरणप्रश्ने यदुत्तरं "स्वे महिम्नि" (छा. ७. २४. १.) इति तमेवानुबध्नाति "स वा एषः" (छा. ७. २५. २.) इत्यनेन । तच्छब्दस्य पूर्वपरामर्शित्वात् ।

एवं सति त्वदुक्तमन्यत्राप्रतिष्ठितत्वं चेदिह प्रतिपाद्यं स्यात् तदोक्तरीत्यानुबन्धं न कुर्यादहङ्कारादेशादिकं च न कुर्यादुक्तप्रश्नो-त्तरं स्वान्यवस्त्वभावान्न क्वापीत्येव वदेत् । तस्मादस्मदुक्त एव मार्गो-नुसर्तव्यः । आदिपदात् त्रिविधा ये भावा उक्तास्तेषामपि स्वरूपं

तदितरस्येति । स च कथं ज्ञायत इत्यत आहुः **स त्विति** । **ते त्विति** । व्यभिचारिभावा इत्यर्थः । **तमेवेति** । महिमपदोक्तं भावमेवेत्यर्थः । **पूर्वेति** । उक्तमहिमवद्वक्तेत्यर्थः । सूत्रैकदेशे योजना त्वित्थम् । **न बाध** इति पूर्वसूत्रस्थमत्रानुवर्तते । अनुबध्नातीत्यनुबन्धः । पचाद्यच् । उक्तमनुलक्ष्यीकृत्य बध्नाति नियमयतीत्यनुबन्धः । स एष एवं पश्यन्निति वाच्यः । स इति पूर्वपरा-मर्शः । स च तदादयश्चेत्यनुबन्धादयः । द्वन्द्वः । तेभ्योऽनुबन्धादिभ्यश्चतुर्भ्यो हेतुभ्यः सर्वात्मभाव एव दृढीक्रियते न तस्य बाध इति ।

इदानीं परोक्तं दूषयन्ति **एवं सतीत्यादिना** । अनुबन्धादिविचारेण श्रुतेः सामञ्जस्ये सति । **तस्मादित्यनेन** संबन्धः । **आदिपदोक्तानां** स्वरूपं

" एवं पश्यन्नेवं मन्वान एवं विजानन् " (छा. ७. २५. २.) इतिक्रमेण यन्निरूपितं तदुच्यते । पूर्वं ह्यतिविगाढभावेन तदितरास्फूर्त्या तमेव सर्वत्र पश्यति । एतदेवोक्तं " एवं पश्यन् " इत्यनेन । ततः किञ्चिद्बाह्यानुसन्धानेऽहङ्कारादेशो भवति । स त्वहमेव सर्वतः स्वकृतिसामर्थ्येन तं प्रकटीकरिष्य इति मनुते । करोति च तथा । अत एवान्वेषणगुणगाने कृते ताभिः । एतदेवोक्तमेवं मन्वान इत्यनेन । ततो निरुपधिस्नेहविषयः पुरुषोत्तम आत्मशब्देनोच्यत इति तदादेशो भवति । तदा पूर्वकृतस्वसाधनवैफल्यज्ञानेनातिदैन्ययुक्तसहजस्नेहजविविधभाववान् भवति । तदेतदुक्तमेवं विजानन्नित्यनेन । अत एवोपसर्ग उक्तः । ततोतिदैन्येनाविर्भावे सति या अवस्थास्ता निरूपिताः " आत्मरतिः " इत्यादिना । अत्रात्मशब्दाः पुरुषोत्तमवाचका ज्ञेयाः । अन्यथौपचारिकत्वं स्यात् । मुख्ये सम्भवति तस्यायुक्तत्वात् ।

ननु सर्वात्मभावस्यापि मुक्तौ पर्यवसानमुत नेतिसंशयनिरासाय दृष्टान्तमाह प्रज्ञान्तरपृथक्त्ववदिति । मुमुक्षुभक्तस्य स्वेष्टदातृत्वेन भगवद्विषयिणी या प्रज्ञा सा सर्वात्मभाववद्भक्तप्रज्ञातः प्रज्ञान्तरमित्युच्यते ।

व्याख्यातुमाहुः **आदीति** । व्याकुर्वन्ति **पूर्वमिति** । **एतदेवेति** । एतादृश दर्शनमेव । **स त्विति** । अहङ्कारादेशवास्तु । अग्रिमग्रन्थं योजयन्ति **ततोऽतीति** । सूत्राशमवतारयन्ति **नन्विति** ।

दृष्टान्तं व्याकुर्वन्ति **मुमुक्षुभक्तस्येति** । एवं चान्या प्रज्ञा इति **प्रज्ञान्तरं** तत्कृतं पृथक्त्वं प्रज्ञान्तरपृथक्त्वम् । षष्ठ्यर्थे वतिः । प्रज्ञान्तरफलस्यैवैतत्फल-

तच्च कर्मज्ञानं तदितरभक्तप्रज्ञाभ्यः पार्थक्येन तदिष्टमेव साधयति। तथा सर्वात्मभाववतो भक्तस्य यत्प्रकारिका भगवद्विषयिणी प्रज्ञा तमेव प्रकारं स भावः साधयति नान्यमिति न मुक्तौ पर्यवसानमित्यर्थः। अत्र व्यासः स्वानुभवं प्रमाणत्वेनाह दृष्टश्चेति। उक्तभाववतो भक्तस्य प्रभुस्वरूपदर्शनाद्यतिरिक्तफलाभावोऽस्माभिरेव दृष्ट इत्यर्थः। एतादृशा अनेके दृष्टा इति नैकस्य नाम गृहीतम्। अत्र शब्दमपि प्रमाणमाह तदुक्तमिति। भगवतेतिशेषः। श्रीभागवते दुर्वाससं प्रति "अहं भक्तपराधीनः" (भाग. ९. ४. ६३.) इत्युपक्रम्य "वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा" (भाग. ९. ४. ६६.) इति। यो हि यद्वशीकृतः तदिच्छानुरूपमेव करोत्यतो न सायुज्यादिदानं किन्तु भजनानन्ददानमेव। तेषां मुक्त्यनिच्छा तु "मत्सेवया प्रतीतं च सालोक्यादिचतुष्टयम्। नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत्कालविप्लुतम्॥ स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः। सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत॥ दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः" (भाग. ९. ४. ६७–६९.) इत्यादिवाक्यसहस्रैर्निर्णीयते ॥ ५० ॥

स्यापि पृथक्त्वमेवेति नैतस्य बाध इतिभावः। अग्रिमसूत्राशमवतारयन्ति **अत्र व्यास** इति। **अस्माभिरेव**ति। व्यासोक्तेः। शेषमवतारयन्ति **अत्र शब्दमिति**। **निर्णीयत** इति। एवं च ज्ञानमार्गे भगवद्दर्शने हृदये ग्रन्थिभेदनं नानावृत्त्यनुदयरूपम्। अत्र तु सर्वग्रन्थीनां विप्रमोक्षो भगवद्विषयकनानावृत्त्युदयेऽपि एकत्वपर्यन्तानिच्छारूप इति दर्शनभेदात्फलभेदस्तत्क्रतुन्यायादप्युपपन्न इति भावः॥ ५० ॥

ननु " नान्यत् पश्यति " इत्यारभ्य सर्वस्य प्रपाठकस्य सर्वात्मभावनिरूपकत्वोक्तिरनुपपन्ना । अत एवात्मपदानां पुरुषोत्तमपरत्वोक्तिश्च । यतस्तस्य मुक्तावपि कामभावः प्रतिपाद्यते । अत्र तु तस्य " सर्वेषु लोकेषु कामचारो भवति " (छा. ७. २५. २.) इतिश्रुतिः पठ्यते । एवं सति न तन्निरूपणमत्रेति वाच्यं तद्भाववतोप्यन्यकामवत्त्वमिति वा । द्वितीयस्योक्तप्रमाणपराहतत्वेनाद्यपक्ष एवाश्रयणीय इतिपूर्वपक्षं निरस्यति नेति ।

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥५१॥

तत्र हेतुमाह **सामान्यादप्युपलब्धेरिति** । तत्समानधर्मयोगादपि तत्प्रयोगः श्रुतावुपलभ्यतेनेकशो यतः प्रकृतेपि विविधानां लोकानां विविधसुखप्रधानत्वाद् भगवत्सम्बन्धिषु सर्वेषु सुखेषु ' कामचारो भवतीतिश्रुतेरर्थो ज्ञेयः । ननु यथाश्रुत एवार्थोस्तु । तत्राह

अवतारयन्ति **नन्विति** । **परत्वोक्तिश्चेति** । **अनुपपन्नेति** पूर्वेणान्वयः । **यतः** कारणात् **तस्य** सर्वात्मभावः **प्रतिपाद्यते** श्रीभागवते कपिलवाक्यरूपस्मृतौ । **एवं सति** श्रुतिस्मृत्योर्विरोधे सति । **वाच्यं** वक्तव्यम् । द्वितीयपक्षमाहुः **तद्भाववतोपीति** । सर्वात्मभाव इत्यर्थः । पूर्वपक्षं खण्डयन्ति **नेतीति** । सौत्रं हेतुवाक्यं विशदयन्ति **तदिति** । **तत्समानेति** । विविधसुखविशिष्टलोकसमानयोगादित्यर्थः । तत्प्रयोगादित्यर्थः । **तत्प्रयोगः** भगवत्संबन्धिषु पूर्वोक्तेषु रतिक्रीडादिषु सुखरूपेषु पदार्थेषु लोकपदप्रयोग इत्यर्थः । तथा **च** सर्वेषु लोकेषु कामाचारो भवतीतिश्रुतौ लोकपदं न इन्द्रादिलोकपरमितिभावः । **अनेकश इति** । अजामेकामित्यादौ सृष्टीरुपदधातीत्यादौ च ।

न हि लोकापत्तिरीति । सर्वात्मभाववत इति । प्रकरणात् 'नान्यत् पश्यति' इत्यादिधर्मविशिष्टस्यात्मनः प्राणादिसर्ववतो लोकसम्बन्धो युक्तिसहोपि नेतिज्ञापनाय हिशब्दः । किञ्चैतदग्रे " न पश्यो मृत्युं पश्यति " (छा. ७. २६. २.) इतिश्रुत्या यथा मृत्युनिषेधः क्रियते तथा " आत्मन एवेद्ᳪ सर्वम् " (छा. ७. २६. २.) इतिश्रुत्यैवकारेणात्मातिरिक्तव्यवच्छेदः क्रियत इति मृत्युवल्लोकोपि न सम्बध्यत इत्याह मृत्युवदिति । तत्र रोगादीनामपि दर्शननिषेधे सत्यपि मृत्योरेव यन्निदर्शनमुक्तं तेन भक्तानां लोकान्तरसम्बन्धस्तुल्य इति ज्ञाप्यते । अत एव " नोत दुःखम् " (छा. ७. २६. २.) इति दुःखसामान्यनिषेधोग्रे कृतः ॥ ५१ ॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात् त्वनुबन्धः ॥ ५२ ॥

अत्र हेत्वन्तरमाहास्मिन्नेव श्लोके " सर्वमाप्नोति सर्वशः " (छा. ७. २६ २.) इति **परेण** पदेन **शब्दस्य** श्रुतिवाक्यस्य " आत्मन एवेद्ᳪ सर्वम् " (छा. ७. २६. २.) इति यत् पूर्वोक्तं श्रुतिवाक्यं **ताद्विध्यं**तैव प्रतीयत इति न लोकसम्बन्धो वक्तुं

सूत्रांशमवतारयन्ति **नन्विति** । यथाश्रुतार्थग्रहणं न कर्तव्यमित्यत्र सौत्रं दृष्टान्तं विशदयन्ति **किंचेति** । **व्यवच्छेद** इति । प्रापञ्चिकसर्वस्येतिशेषः ॥ ५१ ॥

सूत्रं व्याकुर्वन्ति **अस्मिन्निति** । **न लोकसंबन्ध** इति । प्रापञ्चिके-

शक्य इत्यर्थः । ननु " आत्मन एवेदꣳ सर्वम् " इतिवाक्येनैवै-तदर्थलाभे पुनस्तदुक्तिर्नोचितेतिशङ्कायां तत्र हेतुमाह । तुशब्दः शङ्कानिरासे । भूयस्त्वाद्धेतोः । उक्तेर्थे हेतूनां बाहुल्ये तद्दार्ढ्यं भवतीत्याशयेनोक्तार्थस्यैव श्लोकेनानुबन्धः कृत इत्यर्थः । अथवा भूयःपदमाधिक्यार्थम् । तथा च स्वकृतसाधनसाधितफलापेक्षया स्वयमुद्यम्य भगवता साधितफले निरवधिरुत्कर्ष इतिज्ञापनाय पुनः श्लोकेन तथेत्यर्थः ॥ ५२ ॥

एक आत्मनः शरीरे भावात् ॥ ५३ ॥

उक्तेर्थे श्रुत्यन्तरसम्मतिमप्याहैके शाखिनस्तैत्तिरीयाः शरीरे भक्तशरीरे हृदयाकाश इति यावत् । तत्रात्मनो भगवतो भावा-दाविभावात्तेन सह सर्वकामोपभोगं वदन्तीं श्रुतिं पठन्ति " सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता " (तै. २. १.) इति । अत्रोपक्रमे " ब्रह्मविदाप्नोति परम् " (तै. २. १.) इति श्रुति-रक्षरब्रह्मविदः परब्रह्मप्राप्तिं सामान्यत उक्त्वा विशेषतः कथनार्थं " तदेषाभ्युक्ता " (तै. २. १.) इतिवाक्यं तद् ब्रह्म प्रतिपाद्य-

---

तिशेषः । सूत्रशेषमवतारयन्ति नन्विति । व्याकुर्वन्ति तुशब्द इति । अनुबन्ध इति अनुबध्यते पूर्वोक्तं संबध्यते इत्यनुबन्धः । अर्थान्तरमाहुः अथवेति । तथेत्यर्थ इति । अनुबन्ध इत्यर्थः ॥ ५२ ॥

भाष्यमत्र स्पष्टार्थम् । अस्मिन्नधिकरणे भक्तिस्वरूपं सर्वात्मभावस्वरूपं

त्वेनाभिमुखीकृत्यैषा वक्ष्यमाणा ऋक् परब्रह्मविद्भिरुक्तेत्युक्त्वा तामुक्तवती " सत्यं ज्ञानम् " इति । परब्रह्मस्वरूपमनुभवैकवेद्यं, न शब्दादिभिर्वेद्यमितिज्ञापनाय स्वयं तत्तत्त्वप्रतिपादिकाप्यन्य-मुखेनोक्तवती । अत्र ब्रह्मणा सह सर्वकामोपभोग उक्त इत्येतदेक-वाक्यतायै " सर्वेषु लोकेषु कामचारो भवति " (छा. ७. २५. २.) इति श्रुतेरप्युक्त एवार्थो मन्तव्यः ॥ ५३ ॥ १७ ॥

इति तृतीयाध्याये तृतीयपादे सप्तदशं लिङ्गभूयस्त्वाधिकरणम् ॥ १७ ॥

ननु " ब्रह्मविदाप्नोति परम् " (तै. २. १.) इतिश्रुत्या-क्षरब्रह्मविदः परब्रह्मप्राप्तिरुच्यते । तत्रेतरसाधनसापेक्षं ब्रह्मज्ञानं परं प्रापयत्युत तन्निरपेक्षमिति भवति संशयः । अत्र श्रुतौ तन्मात्रो-क्तेरितरनिरपेक्षमेव तत् तथेति पूर्वः पक्षः । सिद्धान्तस्त्वेवं सति ज्ञानमार्गीयाणामपि परप्राप्तिः स्यात् । सा त्वनेकप्रमाणबाधितेति पूर्वमवोचाम । किञ्च, ज्ञानशेषभूतब्रह्मापेक्षया फलात्मकस्य परस्य मुख्यत्वात् " तदेषाभ्युक्ता " (तै. २. १.) इतिश्रुतिस्तदेव

सर्वसाधनापेक्षयाधिकमिति बोधितव्यम् । अत्र सर्वमतविचारस्तु **प्रकाशे**नु-संधेयः ॥ ५३ ॥ इति सप्तदशाधिकरणम् ॥

पूर्वं ब्रह्मविदाप्नोति परमितिश्रुतिः संमतत्वेनोक्ता । तदर्थविचारार्थमधि-करणमारभते **व्यक्तिरेके**ति । व्याकुर्वन्ति । अवतारयन्ति **नन्वि**ति । संशयमाहुः **तत्रे**ति । पूर्वपक्षमाहुः **अत्रे**ति । **तन्मात्रोक्तेरि**ति । ब्रह्मविदा-प्नोति परमित्येतावन्मात्रोक्तेरित्यर्थः । **पूर्वमवोचामे**ति । " नायमात्मा

प्रतिपाद्यत्वेनाभिमुखीकृत्य ऋगुक्तेत्याह । तेन तत्र ब्रह्मपदे पुरुषोत्तमपरे ज्ञायेते । तथा च गुहायां यदाविर्भूतं परमं व्योम पुरुषोत्तमगृहात्मकमक्षरात्मकं व्यापिवैकुण्ठं भवति तदा तत्र भगवानाविर्भवतीति तत्प्राप्तिर्भवतीत्युच्यते " यो वेद निहितं गुहायां परमे व्योमन् (तै. २. १.) इत्यनेन ।

व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥ ५४ ॥ (३. ३. १८.)

तथा च ज्ञानिनां गुहासु परमव्योम्नो **व्यतिरेक** एव । तत्र हेतुस्तद्भावाभावित्वादिति । " यमेवैष वृणुते " (कठ. २. २२.) इतिश्रुतेर्वरणाभावे भगवद्भावस्यासम्भवाज् ज्ञानिनां तथावरणाभावाद् भगवद्विषयको भावो न भावीति तथेत्यर्थः । ननु ज्ञानविषयत्ववदाविर्भावोऽप्यस्तु, किञ्च तदतिरिक्तमाविर्भावमपि न पश्याम इत्याशङ्कायामाह न तूपलब्धिवदिति । उपलब्धिर्ज्ञानं तद्वद्

बलहीनेन लभ्यः ", " यमेवैष वृणुते तेन लभ्यः ", " भक्त्या मामभिजानाति " इत्यनेकप्रमाणबाधितेति पूर्वाधिकरणे अवोचामेत्यर्थः । अयमर्थः श्रुतेरेवोत्पद्यत इत्याहुः **किंचेति** । **ज्ञानशेषभूतेति** । ब्रह्मविदाप्नोति परमितिवाक्ये ज्ञानविषयीभूतेत्यर्थः । ऋक्प्रतिपाद्यमाहुः **तथा चेति** ।

परमव्योमाविर्भावस्तु न ज्ञानमार्गीयाणामिति सूत्रादर्थमाहुः **तथा चेति** । तत्र हेतुर्नास्तीत्याहुः **यमेवेति** । सूत्रांशमवतारयन्ति **नन्विति** । यथा अक्षरस्य ज्ञानविषयत्वं तथाविर्भावोपि भविष्यतीत्यर्थः । **तदतिरिक्तमिति** । अक्षरब्रह्मातिरिक्तमित्यर्थः । सूत्रांशं व्याकुर्वन्ति **उपलब्धिरिति** । अनाविर्भावे

गुहायामाविर्भावो न भवतीत्यर्थः। यस्मै भक्ताय यल्लीलाविशिष्टं स्वस्वरूपमनुभावयिता प्रभुर्भवति तद्गुहायां तल्लीलाश्रयभूतमक्षरस्वरूपं वैकुण्ठलोकवदाविर्भावयतीति नोक्तशङ्कालेशोपि। यत्र पुरुषोत्तमस्य चाक्षुषत्वं तत्र ततोधःकक्षस्य तस्य तथात्वे का शङ्का नाम। एतच्चोपपादितं पूर्वं विद्वन्मण्डने च।

ननु ज्ञानिज्ञानविषयभक्तगुहाविर्भूताक्षरयोर्भेदोस्ति न वा। नाद्यः। मानाभावादेकत्वेनैव सर्वत्रोक्तेः। न द्वितीयः। निरवयवस्य क्वचिल्लोकरूपत्वातद्रूपत्वाभ्यामेकत्वानुपपत्तेरिति चेत्, मैवम्। लोकरूपत्वस्य पश्चाद्भावित्वे हीयमनुपपत्तिर्न त्वेवं, किन्त्वक्षरस्वरूपमेव तथेति श्रुतिराह "अम्भस्यपारे भुवनस्य मध्ये" (तै. आ. १०. १. १.) इत्युपक्रम्य "तदेव भूतं तदु भव्यामा इदं तदक्षरे परमे व्योमन्" (तै. आ. १०. १. १.), एतदग्रे च "यमन्तःसमुद्रे

हेतुमाहुः **यस्मा** इति। **लोकवदिति**। लोकविशिष्टम्। तथाचाविर्भावो दर्शनविषयत्वयोग्यता न तु ज्ञानमात्रम्। भगवतो ज्ञानिना प्रति तदनुभावनेच्छाया अभावान्न परप्राप्तिः। तेषां भक्तिसत्त्वे तु तत्प्राप्तिरितिभावः।

ननु समन्वयाध्याये अदृश्यत्वादिगुणकस्याक्षरस्योक्तत्वान्नेदं साधीय इत्याशङ्कायामाहुः **यत्रेति**। वरणे तु पुरुषोत्तमचाक्षुषत्वं वरणश्रुतावुक्तं कश्चिद्धीर इतिश्रुत्या। **तस्य** अक्षरस्य। **तत्र ततोऽधःकक्षमिति** कैमुतिकन्यायावतारः साधनसंपत्तौ। अतः सर्वादृश्यत्वेऽपि **दृश्यत्वे** विरोधाभाव इत्यर्थः। अक्षरस्वरूपविचारं शङ्कते **नन्विति**। **अक्षरयोरिति**। ज्ञानिविषयो भक्तगुहाविर्भूतश्चैतदुत्तरं लोकस्वरूपतद्भिन्नमित्यनुपपत्तेरित्यर्थः। समाधानमाहुः **मैवमित्यादिना निर्णीतमित्यन्तेन**। **इयमिति**। भेदोऽस्ति वा नवेतीयमित्यर्थः। **न त्वेवं** न स्वरूपभेदः। इत आरभ्य

कवयोवयन्ति यदक्षरे परमे प्रजाः" (तै. आ. १०. १. १.) इत्यादिरूपा। स्मृतिरपि "परस्तस्मात्तु भावोन्यो व्यक्तोऽव्यक्तात् सनातनः। समः सर्वेषु भूतेषु नश्यत्सु न विनश्यति॥ अव्यक्तोक्षर इत्युक्तस्तमाहुः परमां गतिम्। "यं प्राप्य न निवर्तन्ते तद्धाम परमं मम॥" (भ. गी. ८. २०—२१.) इत्यादि तु गीतासु। श्रीभागवतेपि "दर्शयामास स्वं लोकं गोपानां तमसः परम्। सत्यं ज्ञानमनन्तं यद् ब्रह्म ज्योतिः सनातनम्॥ यद्धि पश्यन्ति मुनयो गुणापाये समाहिताः।" (भाग. १०. २५. १४—५.) इति दशमे। द्वितीये च "तस्मै स्वलोकं भगवान् समाहितः सन्दर्शयामास" (भाग. २. ९. ९.) इत्युपक्रम्य कालत्रिगुणमायासम्बन्धराहित्यमुक्त्वाभगवत्पार्षदानुक्त्वा विमानप्रमदा उक्त्वा श्रीरुक्ता। तथा च श्रुतिस्मृत्येकवाक्यतायां तादृक्स्वरूपमेवाक्षरमितिनिर्णयो भवति। एवं सति सच्चिदानन्दत्वदेशकालापरिच्छेदस्वयंप्रकाशत्वगुणातीतत्वादिधर्मवत्त्वेनैव ज्ञानिनामक्षरविज्ञानम्। भक्तानामेव पुरुषोत्तमाधिष्ठानत्वेन तथेति ज्ञेयम्। "मल्लानामशनिः" (भाग. १०. ४०. १७.) इतिश्लोकोक्तरीत्या पुरुषोत्तमस्येव। प्रभुणा ये यथा विचारिताः सन्ति ते तथा भवन्तीति तद्विचार एव सर्वेषामधिकाररूप इति "कृतप्रयत्नापेक्षस्तु" (ब्र. सू. २. ३. ४२.) इत्यत्र निर्णीतम्॥ ५४॥

भाष्यं स्पष्टार्थम्। **निर्णीतमिति**। कृतप्रयत्नापेक्ष इति सूत्रे निर्णीतमित्यर्थः। एवं च मल्लानामितिवत् यत्र यत्र यादृशी भगवदिच्छा तस्य तस्यैव भानं जायत अधिकारभेदात्। अक्षरस्वरूपं तु पूर्वोक्तमेवेतिध्येयम्॥ ५४॥

अस्मिन्नर्थे कैमुतिकन्यायकथनार्थं निदर्शनेनोत्तरं पठति

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५५ ॥

यागे तत्तदृत्विङ्नियतकर्तव्यान्यन्वाधानादीन्यङ्गानि। तत्रावबद्धाः सर्व एवर्त्विजो यजमानेन। अवबन्धनं नाम 'अध्वर्युं त्वा वृणे' 'होतारं त्वा वृणे' 'उद्गातारं त्वा वृणे' इत्यादिरूपं वरणमेवाऽन्यथा सर्वकर्मविदुषां तत्कृतिपटूनामेकत्राधिकारो नान्यत्रेतिनियमो न स्यात्। तस्य तस्य तथावरणे तु यजमानेच्छैव हेतुः। ते च तदा न सर्वासु शाखासु विहितान्यङ्गानि कर्तुं सर्वेपि शक्ताः किन्तु यजमानवरणनियमिता एव तथा। तत्र हेतुमाह हि यतः कारणात् प्रतिवेदं नियमितान्यङ्गानि "हौत्रमृचाध्वर्यवादि यजुषौद्गात्रं साम्ना" (आप. परि. १. १८–२०.) इति। तथा चालौकिके वैदिके कर्मणि जीवेच्छा नियामिका भवति यत्र तत्र किमु वाच्यं प्रतिरोमकूपं सावकाशममितब्रह्माण्डस्थितिमतस्तदीशितुरिच्छैव नियामिका तत्तत्साधनफलसम्पत्ताविति ॥ ५५ ॥

ननु पूर्वं कर्मज्ञाननिष्ठानामपि पुंसामग्रे भक्तिमार्गीयत्वं यत्र भवति तत्र तथैव भगवद्वरणमिति सिद्धान्तः। ऋत्विजस्त्वेकस्मिन्

व्याकुर्वन्ति **याग** इति। **यजमानेने**ति। **अवबद्धा** इति पूर्वेणान्वयः। एवं च यागे जीवेच्छा यथा नियामिका कैमुतिकन्यायात् यथाधिकारं भगवतस्तथा फलदित्सा नियामिकेत्यर्थः ॥ ५५ ॥

सूत्रमवतारयन्ति **नन्वि**ति। **भगवद्वरणमि**ति। तथा च तत्तत्कर्मकरणानन्तरमेनं भक्तिमार्गे प्रवेशं करिष्यामीतीच्छया वरणमित्यर्थः। **ऋत्विज** इत्यस्य

याग एकत्र वृतस्य नापरत्रापि तथेति विरुद्धो दृष्टान्त इत्यरुच्या निदर्शनान्तरमाह

मन्त्रादिवद् वाविरोधः ॥ ५६ ॥

यथैक एव कश्चिन्मन्त्रो बहुषु कर्मसु सम्बध्यते कश्चिद् द्वयोः कश्चिदेकत्रैव तथैव विधानात् तथात्रापीत्यर्थः । आदिपदात् कर्मोच्यते । यत्र काम्येनैव नित्यकर्मनिर्वाहस्तत्र कामितार्थसाधकत्वे-प्रत्यवायपरिहारेऽप्येकमेव तदुपयुज्यते । यथा च सर्वतोमुखेऽनेकहोतृप्रवरेऽध्वर्युप्रवरे च गृह्यमाणे "देवाः पितरः" (तै. ब्रा ३. ७. ५. ४.) इत्यादिना यजमानकर्तृकानुमन्त्रणमेव सर्वत्र सम्बध्यते तथैव विधेः, तथात्रापि तावद्विधं यदेकमेव वरणं तेन तत्तन्निष्ठानन्तरं भक्तिनिष्ठेति न दृष्टान्तविरोध इत्यर्थः ।

वृतस्येत्यनेन संबन्धः । **तथे**ति । विनियोग इत्यर्थः । सूत्रार्थमाहुः **यथे**ति । **कश्चिदि**ति । "देवस्य त्वा सवितुः प्रसवे" इति मन्त्र इत्यर्थः । **कश्चिद् द्वयोरि**ति । गायत्रीमन्त्रः सूर्योपस्थाने मन्देहादिनिवृत्तौ चेत्यर्थः । **कश्चिदेकत्रैवे**ति । तेजस्वी भूयासमितिमन्त्रः । कर्मोदाहरणमाहुः **यत्रे**ति । ज्योतिष्टोमादिकं श्रौतं, जयन्तीव्रतादिकं स्मार्तम् । **सर्वतोमुख** इति । एक एव गार्हपत्यः आहवनीयाश्चतुर्दिक्षु चत्वारः चत्वारः अध्वर्य्वादयश्चतुर्दिक्षु एवं चतुःषष्टि ऋत्विजः एवं सर्वतोमुखः यज्ञोऽस्ति तत्रेत्यर्थः । **गृह्यमाण** इति । कश्यपवत् अवत्सारवत् निध्रुववत् इति कश्यपसगोत्रिणो यजमानस्य प्रवरग्रहणमध्वर्युणा होत्रा क्रियते । 'देवाः पितरः पितरो देवा योऽस्मि स सन्यजे ' इति मन्त्रेणानुमन्त्रणं यजमानेन क्रियते इष्टौ । सर्वतोमुखे चानेककर्तृकप्रवरग्रहणे यजमानेन देवाः पितर इत्येकवारमेवेत्यर्थः । **तावद्विधं** क्रमेण तत्तत्प्रकारकम् ।

अथवा ओमित्युदाहृत्यैव, मन्त्राणामुच्चारणान्मन्त्रादिरोङ्कारः । स यथा ब्रह्मात्मकत्वेनैक एव सर्वमन्त्रेषु सम्बध्यते तथा वरणमपीति तथेत्यर्थः । यद्यपीतरनिष्ठानन्तरभूतभक्तिनिष्ठावतो वरणं तथाभूतमेकमेवेति न दोषस्तथाप्युत्कृष्टमार्गे वृतस्य नीचकक्षापादानमनुचितमिति मत्वा पक्षान्तरमुक्तम् । वस्तुतस्तु साधनमर्यादाया यत्र भक्तिर्दित्सिता तत्र तथेति नानुपपत्तिः काचित् ॥ ५६ ॥ १८ ॥

इति तृतीयाध्याये तृतीयपादेऽष्टादशं व्यतिरेकाधिकरणम् ॥ १८ ॥

ननु सुखस्वरूपजिज्ञासायां " यो वै भूमा तत् सुखम् (छा. ७. २३. १.) इत्युक्तम् । भूमस्वरूपजिज्ञासायां "नान्यत् पश्यति" (छा. ७. २४. १.) इत्यादिना तद्यन्निरूपितं तत् सर्वात्मभावस्वरूमिति यदुक्तं तन्नोपपद्यते । भूम्नो हि सुखरूपतोच्यते । सर्वात्मभावे तु विरहभावे दुःसहदुःखानुभवः श्रूयते । तेन मोक्षसुखमेव " यो वै भूमा " इत्यादिनोच्यते । " यो वै भूमा

प्रकारान्तमाहुः **अथवेति** । पूर्वव्याख्याने दोषमाहुः **यद्यपीति** । **तथाभूतमिति** । केवलभक्तिमार्गे यादृशं वरणं तादृशमित्यर्थः । सिद्धान्तेन मुख्यं समाधानमाहुः **वस्तुतस्त्वेति** । **नानुपपत्तिरिति** । अनुपपतिपरिहारस्तु भगवद्दित्साविचारेणेत्यर्थः ॥ ५६ ॥ इत्यष्टादशाधिकरणम् ॥

सिंहावलोकनन्यायेन पुनर्भूम्नि विचारं कर्तुमधिकरणमाहुः **भूम्न इति** । व्याकुर्वन्ति **नन्विति** । संशयमाहुः **तन्नोपपद्यत इति** । मोक्षसुखरूप-

तदमृतम् ” (छा. ७. २४. १.) इतिवाक्याच्च । अग्रे च “ स वा एष एवं पश्यन् ” (छा. ७. २५. २.) इत्याद्युक्त्वा “ तस्य सर्वेषु लोकेषु कामचारो भवति ” (छा. ७. २५. २.) इति फलमुच्यते । तच्च मोक्षानन्तरमसम्भव्यतः स भावो मोक्षो वात्रोच्यत इतिसंशयः । तत्र कामचारोक्तेर्मुक्तिपूर्वदशायां तन्माहात्म्यनिरूपणार्थत्वादमृतशब्दाच्च मुक्तिरेव भूमपदेनोच्यत इति पूर्वपक्षः । तत्र भूमशब्देन स भाव एवोच्यत इति सिद्धान्तः । तत्र दुःखदर्शनानुपपत्त्या सर्वाधिकत्वलक्षणं भूमत्वमनुपपन्नमितिशङ्कां परिहरति

भूम्नः ऋतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥ ५७ ॥ (३. ३. १९.)

भूम्नः सर्वात्मभावस्य ज्यायस्त्वं सर्वस्मान्मन्तव्यम् । तत्रोक्तानुपपत्तिपरिहारार्थं दृष्टान्तमाह ऋतुवदिति । दर्शपूर्णमासप्रकरणे तैत्तिरीयके पठ्यते “ परमेष्ठिनो वा एष यज्ञोग्र आसीत् तेन स परमां काष्ठामगच्छत् ” (तै. सं. १. ६. ९.) इत्युपक्रम्य “ य एवं विद्वान् दर्शपूर्णमासौ यजते परमामेव काष्ठां गच्छति ”

कोटिर्वाक्याच्चेत्यनेन, असंभवीत्यन्तेन सर्वात्मभावकोटिर्दर्शिता । **स भाव** इति । सर्वात्मभाव इत्यर्थः । पूर्वपक्षमाहुः **तत्रेति** । सिद्धान्तमुक्त्वावतरणमाहुः **तत्र दुःखेत्यादि** । सूत्रं व्याकुर्वन्ति **भूम्न** इति । **पठ्यते** । परमेष्ठिनो वा एष यज्ञः पठ्यत इति । तैत्तिरीयसहिताया प्रथमाष्टके षष्ठाध्याये नवमानुवाके पठ्यत इत्यर्थः । पाठमेवाहुः **परमेष्ठिन** इति । **यथेति** । यथा

(तै. सं. १. ६. ९.) इति । यथा व्रतादिदुःखात्मकत्वेपि परमकाष्ठालक्षणफलगमकत्वेन दर्शपूर्णमासयोः सर्वक्रतुभ्योधिकत्वं वक्तुमग्र आसीदिति स्तूयते तथा दुःखहेतुत्वेप्यनन्यलभ्यसाक्षात्पुरुषोत्तमानन्दप्राप्तिहेतुत्वेन सुखरूपत्वमुच्यत इत्यन्येभ्यः सर्वेभ्यो ज्यायस्त्वं मन्तव्यमित्यर्थः । अत्रोपपत्तिमाह तथा हि दर्शयति । श्रुतिस्तु "स एवाधस्तात्" (छा. ७. २५. १.) इत्याद्युक्त्वा "अथाहङ्कारादेशः" (छा. ७. २५. १.) इत्याद्युक्त्वा "अथात्मादेशः" (छा. ७. २५. १.) इत्याद्युक्तवती । एतदग्रे चैतादृशस्य "आत्मत एव" (छा. ७. २६. १.) प्राणाशास्मरादिसर्वमिति च दर्शयति । एतत् सर्वात्मभाववत्येव सर्वमुपपद्यते न तु मुक्तस्य । वृत्तिभावाभेदात् प्राणाद्यभावाच्च । जीवन्मुक्तिदशायां प्राचीनानामेव सत्त्वात् "आत्मतः प्राणाः" इत्यादि न वदेत् ।

यद्वा, ननु लोकेपि शृङ्गाररसभाववति पुंसि नार्यां च त्वदुक्तभावसम्बधिव्यभिचारिभावाः श्रूयन्ते सैव सर्वत्र स एव सर्वत्रेति । एवं सति लौकिकसधर्मकत्वान्न त्वदुक्तभावस्यालौकिक ज्ञानादिभ्य आधिक्यं वक्तुं शक्यमलौकिक विषयत्वाल्लौकिकत्वमपि न तथेति

दर्शपूर्णमासौ तथा भावि सुखं भूमसुखमित्यर्थः । भाविस्वरूपमित्यत्र गमकमाहुः **अत्रेति** । **श्रुतिस्तु** । उक्तवतीत्यन्वयः । **न वदेदिति** । तथा च भूमशब्देन सर्वात्मभाव एव ग्राह्यः, न तु जीवन्मुक्त्यवस्था चेतिभावः ।

प्रकारान्तरेण व्याख्यानं वर्ण्यकमित्युच्यत इति वर्ण्यकान्तरमाहुः **यद्वेति** । **त्वदुक्तेति** । सर्वात्मभाव इत्यर्थः । **श्रूयन्ते** भरतसूत्रे । आकारमाहुः **सैवेति** । **पुरुषस्य स एवेति** । नार्याः **सैवेति** । **अलौकिकेति** । अक्षरज्ञानम् । **आदि॰**

भवति संशयः। तत्र मनुजत्वरिपुत्वादिज्ञानानामिव कामादिभावेन स्नेहभावस्यापि सम्भवान्नास्यालौकिकत्वमिति पूर्वः पक्षः। सिद्धान्तस्त्वस्य भावस्य लौकिकेभ्यो ज्यायस्त्वं मन्तव्यम्। ननूक्तं लोकसाधारण्यं बाधकमितिशङ्कानिरासाय निदर्शनमाह क्रतुवदिति। यथा दर्शादिषु दोहनाधिश्रयणातञ्चनव्रीह्यवघातादिपुरोडाशभक्षणादीनां लौकिकक्रियातुल्यत्वेन दर्शनेऽपि न लौकिकत्वं लौकिकप्रमाणाप्राप्तत्वादलौकिकतत्प्राप्तत्वात् तथोक्तप्रमाणरूपवरणलभ्यत्वेन श्रुत्युक्तत्वान्न लौकिकत्वमस्य भावस्येतिदिक्। वस्तुतस्तु ग्रामसिंहस्य सिंहरूपत्वेऽपि न ताद्रूप्यं वक्तुं शक्यं तथा लौकिकपुंसि नार्यां वा तदाभासो रसशास्त्रे निरूप्यते तद्दृष्टान्तेन भगवद्भाववद्भक्तरीतिभावनार्थम्। न त्वृषीणां लौकिके तात्पर्यं भवितुमर्हति। अत्रोपपत्तिमाह तथा हीत्यादि।

पदेन मुक्तिजीवन्मुक्तिग्रहणम्। संशयमुक्त्वा पूर्वपक्षमाहुः तत्रेति। **तत्र** भगवति। **सिद्धान्तस्त्वि**ति। सूत्रैकदेशं व्याकुर्वन्ति **यथे**ति। **आतञ्चने**ति। उत्तरस्मिन्दिवस एन्द्रदधिसिद्ध्यर्थं पूर्वं किंचिदधिप्रक्षेपः। दार्ष्टान्तिके व्युत्पादयन्ति **तथे**ति। केवलं सादृश्यशङ्का न कर्तव्येत्याशयेनाहुः **वस्तुतस्त्वि**ति। ग्रामसिंहस्य श्वानस्य। **तदाभासः** रसाभासः। **भगवद्भाववदि**ति। भगवति विगाढभाववान् यो भक्त इत्यर्थः। **नत्वि**ति। तथा च कामसूत्रे समाप्तौ वात्स्यायनऋषिणोक्तम्। तथा हि। तदेतद् ब्रह्मचर्येण परमेण समाधिना। विहितं लोकयात्रार्थं न रागार्थोऽस्य संविधिः॥ रक्षन् धर्मार्थकामांस्त्रीन् संपश्यन् लोकवर्तनीम्। अस्य शास्त्रस्य तत्त्वज्ञो भवत्येव जितेन्द्रियः॥ एतच्छास्त्रस्य जितेन्द्रियभवनरूपं फलमुक्तम्। तेन लौकिके तात्पर्यं नास्तीतिमन्तव्यम्। **उपवेदे** संगीतशास्त्रेऽप्येवं बोध्यम्। सूत्रांशमवतारयन्ति **अत्रे**त्यादिना।

पूर्वोक्तभाववत आत्मनः प्राणादिकं सर्वं दर्शयति श्रुतिः " तस्य ह वा एतस्यैवं पश्यत " (छा. ७. २६. १.) इत्यादिना । इतः पूर्वमपि " स वा एष एवं पश्यन् " (छा. ७. २५. २.) इत्युपक्रम्य " आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति सर्वेषु लोकेषु कामचारो भवति " (छा. ७. २५ २.) इतिश्रुतिश्च । न हि लोक एव सम्भवत्यात्मपदानां भगवद्वाचकत्वादिति सर्वोत्तमविषयकभावस्यैव तथात्वं युक्तमिति चोपपत्तिर्हिशब्देन सूच्यते ॥ ५७ ॥ १९ ॥

इति तृतीयाध्याये तृतीयपाद एकोनविंशं
भूम्न इत्यधिकरणम् ॥ १९ ॥

पूर्वाधिकरणैः सर्वात्मभावस्वरूपादिनिर्णयं कृतवान् । अथ मत्स्यादिरूपाणां भगवदवतारत्वमविशिष्टमिति सर्वेषां समस्योपासना कार्येति पार्थक्येनेति विचारयति । तत्रोपास्याभेदेपि रूपभेदादेकत्रोपासकस्यान्यत्रानुपासनलक्षणावज्ञासम्भवादस्या अप्यसिद्धिसम्भवादपि समस्यैव सा कार्येति प्राप्ते सिद्धान्तमाह

नाना शब्दादिभेदात् ॥ ५८ ॥ (३. ३. २०.)

पूर्वोक्तेति । सर्वात्मभाव इत्यर्थः । हिशब्दतात्पर्यमाहुः **सर्वोत्तमेति** । अत्र मतान्तरं **प्रकाशे**ऽनुसंधेयम् ॥ ५७ ॥ इत्येकोनविंशतितममधिकरणम् ॥

प्रसंगसंगतिं बोधयन्ति **पूर्वेति** । **स्वरूपादीति** । **आदिना** उत्कर्षफलाधिकारिसंग्रहः । पूर्वपक्षमाहुः **तत्रेति** । सिद्धान्तं वक्तुं सूत्रार्थमाहुः

सर्वेष्ववतारेषु नानैवोपासना कार्या । तत्र हेतुः **शब्दादिभेदादिति** । तत्तत्स्वरूपवाचकशब्दानां मन्त्राणां चादिपदादाकारकर्मणां च भेदादित्यर्थः । एतेनैव मिथोविरुद्धानामाकारकर्मणामेकत्र भावनस्याशक्यत्वमयुक्तत्वं चेतिभावः सूचितः ॥ ५८ ॥ २० ॥

इति तृतीयाध्याये तृतीयपादे विंशं नानाशब्दादिभेदादित्यधिकरणम् ॥ २० ॥

पार्थक्येनोपासनानि कर्तव्यानीतिस्थिते विचार्यते किमग्निहोत्रदर्शपूर्णमासादिवदेषां समुच्चय उत विकल्प इति । तत्र विधिफलयोः समानत्वात् समुच्चय इति प्राप्ते निर्णयमाह

विकल्पोऽविशिष्टफलत्वात् ॥ ५९ ॥ (३. ३. २१.)

उपासनानां **विकल्प एव** । तत्र हेतु**रविशिष्टफलत्वात्** । मुक्तिफलत्वं हि सर्वेषामुपासनानामविशिष्टम् । एवं सत्येकेनैव तत्सि-

---

सर्वेत्यादि । अत्रशङ्कादोषनिवृत्तिमाहुः **एतेनेति** । **अयुक्तत्वं चेति** । अशक्यस्यायुक्तस्याकरणे दोषो नास्तीत्यपराधाभावान्न प्रतिबन्ध इतिभावः ॥ ५८ ॥ इतिविंशतितममधिकरणम् ॥

अधिकरणं विचारयन्ति **पार्थक्येनेति** । संशयमाहुः **किमिति** । अग्निहोत्रमपि कर्तव्यं दर्शपूर्णमासेष्टिरपि कर्तव्येतिसमुच्चयः, तद्वत्रापीत्यर्थः । पूर्वपक्षमाहुः **तत्रेति** । **विधिफलयोरिति** । अग्निहोत्रं जुहुयात् स्वर्गकामः दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति अपूर्वविधिफलयोरित्यर्थः । सिद्धान्तमाहुः **निर्णयमाहेति** । सूत्रांशं व्याकुर्वन्ति **मुक्तिफलकत्वमिति** । अक्षरविद्योप-

द्धावपरस्याप्रयोजकत्वादग्निहोत्रादिवन्नित्यताबोधकश्रुत्यभावात् तदर्थिनो विकल्प एव ॥ ५९ ॥

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ६० ॥

येषु तूपासनेषु भिन्नानि भिन्नानि फलान्युच्यन्ते तत्र त्वनेकफलार्थिनस्तत्तत्फलकोपासनानि समुच्चीयेरन्नविशिष्टफलत्वाभावात् । यत्र त्वेकस्यैवोपासनस्य स्वकामितानेकफलत्वं श्रूयते तत्र तथैव चेदुपासनं करोति तदा न समुच्चीयेरन्नपि । स्वकामितेष्वेकतरस्य तदन्यफलवैशिष्ट्येनाविशिष्टफलत्वाभावादिति पूर्वहेत्वभावादितिश्लिष्टप्रयोगाभिप्रायेणोक्तमिति ज्ञेयम् ।

कोसलविद्यादहरविद्यादीनामित्यर्थः । नित्यस्याकरणे प्रत्यवाय इत्यत आहुः **अग्निहोत्रादिवदिति** । **तदर्थिन** इति । केवलमोक्षार्थिन इत्यर्थः ॥ ५९ ॥

इदानीं काम्यस्थले पक्षद्वयं समुच्चयपक्ष एकपक्षश्च । अनेककर्मणां भिन्नं भिन्नं फलम् । यस्यानेककामना तेन समुच्चयपक्षः कार्यः । यस्य चानेककामना एकस्यैवोपासनस्यानेकफलत्वं तेनैकपक्षः कार्यः । तत्र प्रथमपक्षमाहुः **येषु त्विति** । द्वितीयपक्षमाहुः **यत्र त्विति** । **इतिश्लिष्टेति** । समुच्चयपक्षे फलानामनेकत्वादेकस्य फलस्यान्यफलविशिष्टत्वादविशिष्टफलत्वाभावो हेतुरितिश्लिष्टप्रयोगाभिप्रायेणेत्यर्थः ।

श्लेषे क्लेशात् पक्षान्तरमाहुः **अथवेति** । यस्यानेककामना तेन समुच्चयः कार्यः । तत्र कर्मणामनेकफलकत्वेन विशिष्टफलत्वस्य सत्त्वादविशिष्टफलत्वा-

अन्यथा कामैक्ये नियतफलकानि न समुच्चीयेरन् । अत्र हेतुः स्पष्टः ॥ ६० ॥ २१ ॥

इति तृतीयाध्याये तृतीयपाद एकविंशं विकल्प इत्यधिकरणम् ॥ २१ ॥

प्रधानेषु निर्णयमुक्त्वाङ्गेषु तमाह । एकार्थसाधकानामुपासनानां भेदेनाङ्गभेदेप्येकतरोपासने फलैक्यादङ्गानि तत्र समुच्चीयेरन्न वेतिसंशये निर्णयमाह

अङ्गेषु यथाश्रयभावः ॥ ६१ ॥ (३. ३. २२.)

उपासनाङ्गानां तदेवाश्रयः । तथा च यदङ्गं यदुपासनाश्रितं तत्रैव तस्य भाव इत्यर्थः ॥ ६१ ॥

अत्र हेतुमाह **शिष्टेश्च** ॥ ६२ ॥

तदुपासनं तत्तदङ्गविशिष्टमेव वेदे शिष्यत इति तथेत्यर्थः, चकारादतिरिक्तकरणे प्रायश्चित्तोक्तिरपि बाधिकेति सूच्यते ॥ ६२ ॥ २२ ॥

इति तृतीयाध्याये तृतीयपादे द्वाविंशमङ्गेष्वित्यधिकरणम् ॥ २२ ॥

भावो हेतुः स्पष्टः । यस्य तु एकैव कामना तेन समुच्चयो न कार्यः । तत्रैकमेव फलमिति **नियतफलकानां** तेषामविशिष्टफलकत्वाभावरूपहेतोः फलमित्यर्थः ॥ ६० ॥

विषयान्तरं बोधयितुमधिकरणान्तरमवतारयन्ति **प्रधाने**ति । **एकार्थे**ति । एक अर्थः फलम् । **भेदेपि** रूपादिभेदेन भेदेपि । सूत्रार्थमाहुः **उपासनाङ्गानामि**ति । **तदेव** उपासनमेव । **यथाश्रयभाव** इत्यस्यायमर्थः । आश्रयमनतिक्रम्य यथाश्रयं भावः सत्ता ॥ ६१ ॥

उत्तानार्थं भाष्यम् ॥ ६२ ॥ द्वाविंशतितममधिकरणम् ॥

कर्ममार्गीयोपासने निर्णयमुक्त्वा ज्ञानमार्गीयोपासने तमाह

समाहारात् ॥ ६३ ॥ (३. ३. २२.)

अथर्वोपनिषत्सु नृसिंहोपासनादिषु मत्स्यकूर्मादिरूपत्वेनापि स्तुतिः श्रूयते । श्रीभागवते च " नमस्ते रघुवर्याय " (भाग. १०. ३०. २.) इत्यादिरूपा स्तुतिर्व्रजनाथे । एवं सति रूपभेदेपि भगवदवतारस्याविशिष्टत्वादेकस्मिन् रूपे रूपान्तरसमाहारो दृश्यत इति सर्वरूपत्वेनैकत्रोपासनमपि साध्वित्यर्थः ॥ ६३ ॥

गुणसाधारण्यश्रुतेश्च ॥ ६४ ॥

ऐश्वर्यवीर्यादिगुणानां सर्वेष्ववतारेषु साधारण्यं श्रूयते । तेन धर्मिधर्माणामैक्यात् पूर्वोक्तं साध्वित्यर्थः ॥ ६४ ॥ २३ ॥

इति तृतीयाध्याये तृतीयपादे त्रयोविंशं समाहाराधिकरणम् ॥२३॥

नन्वेवमुपासनं नित्यमुत वैकल्पिकमितिसंशयः । उक्तरीत्या नित्यत्वे प्राप्ते तन्निषेधमाह **नेति** ।

विषयमाहुः **अथर्वेति** । उपासना सर्वरूपत्वेन कार्या वा न वेतिसंशयः । न कार्येति पूर्वपक्षः । सिद्धान्तमाहुः **एवं सतीति** ॥ ६३ ॥

स्पष्टम् । भगवत्प्राधान्येन यत्रोपासनं तत्र सर्वरूपत्वेनोपासनं कार्यं, तत्तद्रूपप्राधान्येनोपासने तथा न कार्यमिति न विरोधः ॥ ६४ ॥ त्रयोविंशतितममधिकरणम् ॥

अधिकरणमवतारयन्ति **नन्वित्यादिना** । **एवमिति** । सर्वरूपत्वेनैकावतारोपासनम् । **नित्यमिति** । अग्निहोत्रस्तदनन्तरं दर्शपूर्णमासेष्टिरेवं रीत्या

न वा तत्सहभावाश्रुतेः ॥६५॥ (३. ३. २४)

- किन्तु वा विकल्प एवैवमुपासन ऐच्छिकः तत्र हेतुमाह **सहभावाश्रुते**रिति । नियमतस्तेषां रूपाणां सहभावश्रवणं चेत् स्यात् तदा स्यात् तथोपासनस्य नित्यता, न त्वेवमतो विकल्प एवेत्यर्थः ॥ ६५ ॥

दर्शनाच्च ॥ ६६ ॥

योपि रूपान्तरसमाहारपूर्वकमुपास्ते सोप्येकं रूपमुपास्यत्वेन मत्वा तत् तथोपास्त इति फलं तस्यैकस्यैव रूपस्य **दर्शनं** भवति न तु सर्वेषामितोपि हेतोर्विकल्प एवेत्यर्थः । एतद्दृष्टान्तेन यस्मिन् रूपे यादृग्धर्मवत्त्वं श्रूयते तादृग्धर्मविशिष्टमेवैकं रूपमुपास्यमिति-व्यासहृदयमिति ज्ञायते । उपासनानिर्णयान्ते दर्शनात्मकहेतूक्त्या सर्वोपासनानां भगवत्साक्षात्कारः फलमिति ध्वन्यते । माहात्म्य-

---

नित्यमित्यर्थः । **वैकल्पिकमिति** । एकमेवोपासनं यावज्जीवं कर्तव्यमथवा सर्वावतारसमुच्चयेनोपासनमिति विकल्प इत्यर्थः । पूर्वपक्षमाहुः **उक्तेति** । दर्शाग्निहोत्रवत् । सिद्धान्तमाहुः **नेतीति** । **चेत् स्यादिति** । अग्निहोत्र-दर्शपूर्णमासयोरिव सर्वावतारसहभावश्रवणं चेत्स्यादित्यर्थः ॥ ६५ ॥

योपीति । उपासकोपीत्यर्थः । **तथा** समाहारपूर्वकम् । **एतद्दृष्टान्ते-नेति** । तथा चोपास्यरूपं विशिष्टं दर्शयेत् तत्तद्रूपविशिष्टमेकमेवोपास्यमेक-

ज्ञापनार्थं परं सर्वावताररूपत्वं यथार्थमेव कैश्चिज्ज्ञाप्यते । यथार्थत्वात् तदप्यविरोधीति ज्ञेयम् ॥ ६६ ॥ २४ ॥

इति तृतीयाध्याये तृतीयपादे चतुर्विंशं न वा तत्सहभावाश्रुतेरित्यधिकरणम् ॥ २४ ॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते श्रीमद्ब्रह्मसूत्राणुभाष्ये तृतीयाध्यायस्य तृतीयः पादः ॥

स्मिन्रूपे सर्वावतारोपासनात् । **यथार्थे**ति । साविरोधिनीतिदिक् । अधिकं तु **प्रकाशे**नुसंधेयम् ॥ ६६ ॥ २४ ॥

इति श्रीमन्मुकुन्दरायसहजमाधुरीपरमानिर्वचनीयसरसवदनतामरससुधावगाहिश्रीमदाचार्यपदाम्बुजकृपापारसारश्रीमत्प्रभुचरणात्मजमहाराजयदुनाथकुलोद्भवगोस्वामिश्रीगिरिधरविरचितेऽणुभाष्यविवरणे **तृतीयाध्यायस्य तृतीयः पादः समाप्तिमफाणीत्** ॥

अथ तृतीयाध्यायस्य चतुर्थः पादः।

उपासनाभेदेप्युपास्याभेदाच्छाखान्तरोक्तधर्माणामप्युसंहार कर्तु-मुचित इति पूर्वपादे निरूपितमिति तन्न्यायेनोत्तरकाण्डप्रतिपाद्य-ब्रह्मफलसर्वात्मभावेपि पूर्वकाण्डप्रतिपादितकर्मणामुपसंहारः प्राप्नोति न वेत्यधुना विचार्यते। विधिपक्षे तत्सहकृतस्यास्य फलसाधकत्व-मिति सिध्यति। निषेधपक्षे तु केवलस्येतीममेव पक्षं सिद्धान्तत्वे-नाह पुरुषार्थ इत्यादिना। सिद्धान्ते ज्ञाते तत्र पूर्वपक्षसम्भव इत्यादौ तमेवाह।

पुरुषार्थोतःशब्दादिति बादरायणः ॥१॥ (३. ४. १.)

संगतिबोधनार्थं पूर्वपादार्थानुवादपूर्वकमेतत्पादार्थमाहुः **उपासने**-त्यादिना। **तन्न्यायेन** पूर्वपादोक्तन्यायेन। एतेनाङ्गाङ्गिभावसंगतिः सूचिता। **कर्मणामिति**। यज्ञो दानं तपश्चैवेतिगीतावाक्याद् यज्ञादिकर्मणा-मित्यर्थः। भक्त्या त्वनन्ययेत्यनेन साधनान्तरापेक्षाभावादाहुः **न वेति**। सूत्रमवतारयन्ति **विधिपक्ष** इति।

ननु सर्वत्राधिकरणे प्रथमतः पूर्वपक्षस्तदनन्तरं सिद्धान्त इति वर्तते। अत्र तु सिद्धान्तकथनमित्यत आहुः **सिद्धान्त** इति। **तमेव** सिद्धान्तमेव। सूत्रार्थमाहुः **अत** इति।

अतः सर्वात्मभावादेव केवलात् पुरुषार्थः सिध्यति । कुतः । शब्दात् । श्रुतेरित्यर्थः । श्रुतिस्तु "नायमात्मा प्रवचनेन" (कठ. २. २२.) इत्युपक्रम्य " यमेवैष वृणुते " (कठ. २. २२.) इत्यादिका, " ब्रह्मविदाप्नोति परम् " (तै. २. १.) इत्यादिका, " तमेवं विद्वानमृत इह भवति " (नृ पू. १. ६.), सनत्कुमारनारदसंवादे " यत्र नान्यत् पश्यति " (छा. ७. २४. १.) इत्याद्यात्मिका छान्दोग्यश्रुतिश्च । एतदादिश्रुतिषु पूर्वोक्तरीत्या केवलस्यैव भगवद्भावस्य फलसाधकत्वं श्रूयत इति तथा । अत्र " फलमत उपपत्तेः " (ब्र. सू. ३. २. ३८.) इत्यत्रेवोपपत्तिं हेतुत्वेनानुक्त्वा श्रुतिपदं चानुक्त्वा शब्दपदं यदुक्तवांस्तेन श्रुतिस्मृत्यात्मकः सर्वोपि प्रमाणशब्दो हेतुत्वेन व्यासाभिमत इति ज्ञायते । तेन " केवलेन हि भावेन गोप्यो गावः खगा मृगाः । येन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसा ॥ यन्न योगेन साङ्ख्येन दानव्रततपोध्वरैः । व्याख्यास्वाध्यायसन्न्यासैः प्राप्नुयाद् यत्नवानपि ॥ " (भाग. ११. १२. ८–९.) इत्यादिरूपा स्मृतिरपि सङ्गृह्यते । एतेन श्रुत्यादिप्रमाणवादिनामिदमेवाभिमतं तद्विरुद्धवादिनामितोन्यदिति तेषामप्रामाणिकत्वं ज्ञाप्यते । अत एव स्वनाम गृहीतम् । स्वस्य वेदव्यासकर्तृत्वेन तत्रैव यतो भरः ।

सूत्रे शब्दादित्युक्तं तस्य तात्पर्यमाहुः **अत्रेति** । **तेनेति** । शब्दशब्दप्रयोगेनेत्यर्थः । यत्सिद्धं तदाहुः **एतेनेति** । **अप्रामाणिकत्वं** प्रमाणीभूतवेदतात्पर्यानभिज्ञत्वम् । स्वनामग्रहणे तात्पर्यमाहुः **अत एवेति** ।

अपरं च वैदिकसिद्धान्ते भगवत्स्वरूपस्यैव स्वतन्त्रपुरुषार्थत्वात् प्राप्ततत्स्वरूपाणां मुक्त्यनिच्छाकथनात् " मुक्तोपसृप्यव्यपदेशात् " (ब्र. सू. १. ३. २.) च मुक्तेरपरमपुरुषार्थत्वात् सा भवतु नामान्यैः साधनैः। वस्तुतः परमपुरुषार्थो य उक्तरूपः स तु सर्वात्मभावेनैवेतिज्ञापनाय फलपदमनुक्त्वा पुरुषार्थपदमुक्तम्। एवं सत्यस्य सूत्रस्यार्थान्तरमपि व्यासाभिमतमिति ज्ञायते। तथा सत्ययं श्लिष्टः प्रयोगः। तथा हि पुरुषार्थो भगवानेव। कुतः। अतःशब्दात्। अतःपदविशिष्टश्रुतिवाक्यादित्यर्थः। तैत्तिरीयोपनिषत्सु पठ्यते " अतःपरं नान्यदणीयसꣳ हि परात् परं यन्महतो महान्तं यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात् " (महानारा. १. १.) इति ॥ १ ॥

अथात्र प्रत्यवतिष्ठते

शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः ॥२॥

पुरुषार्थपदस्य तात्पर्यं वदन्ति **अपर**मिति। सूत्रे पुरुषार्थपदं यदुक्तं तस्य प्रयोजनमाहुः **अपरं चे**ति। **अन्यै**रिति। मर्यादामार्गीयैः कर्मज्ञानविहितभक्त्याख्यसाधनैरित्यर्थः। **उक्तरूप** इति। पुरुषोत्तमप्राप्तिरूप इत्यर्थः। व्याख्यानान्तरमाहुः **एवं सती**ति। सूत्रे पुरुषार्थपददाने सति। **श्लिष्टः प्रयोग** इति। अतःशब्दादिति श्लिष्टः प्रयोगः।

एतादृशं श्रुतिवाक्यमाहुः **अतः पर**मिति। परात्परमित्यनेनाक्षरादुत्तमत्वं बोध्यते। एतेनात्राणीयस्त्वं महीयस्त्वं चेति विरुद्धधर्माश्रयत्वं बोधितम्। तथा च पुरुषोत्तम एव परमपुरुषार्थ इति सिद्धम् ॥ १ ॥

सूत्रमवतारयन्ति **अथे**ति। **अत्र** उक्तेर्थे। **प्रत्यवतिष्ठते** प्रतिकूलतयाव-

विष्णोरिज्यत्वेन कर्मशेषत्वात् तत्स्वरूपज्ञानपूर्वको यागः फलातिशयहेतुरिति तन्माहात्म्यमुच्यत इत्यर्थवादरूपं तत् । अत्र दृष्टान्तमाह यथान्येष्विति । अन्येषु द्रव्यसंस्कारकर्मसु " यस्य पर्णमयी जुहूर्भवति न स पापश्ं श्लोकं शृणोति " (तै. सं. ३. ५. ७.) " यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते यत् प्रयाजानुयाजा इज्यन्ते वर्म वा एतद् यज्ञस्य क्रियते वर्म यजमानस्य भ्रातृव्याभिभूत्यै" (तै. सं. २. ६. १.) इत्येवंजातीयका फलश्रुतिरर्थवादस्तद्वदित्यर्थः ॥ २ ॥

ननु " तमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रजन्ति " (बृ. ४. ४. २२.) । एतदग्रे च " ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति " (बृ. ४. ४. २२.) इतिश्रुतिर्भगवज्ज्ञानवतः सर्वत्यागं वदतीति न त्वदुक्तं साधीय इत्यत उत्तरं पठति

स्थितो भवति । मीमांसक इति शेषः । तथा च कर्म कर्तव्यं कर्माङ्गत्वेनेश्वरस्य फलदातृत्वमिति मीमांसकानामाशयः । सूत्रं व्याकुर्वन्ति **विष्णोरिति** ।

कर्मशेषत्वादिति । अथातः शेषशेषिलक्षणमित्यत्र कर्माङ्गत्वेन विष्णोर्विधानादित्यर्थः । **तदिति** । विष्णोर्माहात्म्यकथनम् । **द्रव्यसंस्कारो** यथा **यस्य पर्णमयीति** । यजमानसंस्कारो यथा **यदाङ्क** इति । इयं षष्ठाष्टके प्रथमप्रपाठके श्रुतिः ॥ २ ॥

उत्तरसूत्रचतुष्टयमवतारयन्ति **नन्विति** । **न त्वदुक्तमिति** । भगवज्ज्ञान-

आचारदर्शनात् ॥ ३ ॥

- ब्रह्मविदामपि वसिष्ठादीनामग्निहोत्रादिकरणं जैमिनिः पश्यति तदाचारं प्रामाणिकं च मनुत इति तन्मतमनुवदन्निममप्यनूक्तवान् व्यासः। ब्रह्मविदां त्यागावश्यकत्वे गार्हस्थ्यमेतेषां न स्यादितिभावः। उक्तश्रुतिस्तु कर्मण्यशक्तानां तेषां त्यागमनुवदति ॥ ३ ॥

तच्छ्रुतेः ॥ ४ ॥

" लोकैषणायाश्च व्युत्थाय " (बृ. ४. ४. २२.) इति-श्रुतेर्लोकसङ्ग्रहार्थं तत्करणमिति न वक्तुं शक्यम्। ब्रह्मविदः कर्माचारनिरूपकश्रुतेरित्यर्थः। सा च " जनको ह वैदेहो बहुद-क्षिणेन यज्ञेनेजे " (बृ. ३. १. १) इत्यादिरूपा। तथा च ज्ञानेनैवार्थसिद्धिश्चेत् स्यात् तदा तद्वत आयाससाध्ये कर्मणि प्रवृत्तिर्न स्यादितिभावः ॥ ४ ॥

समन्वारम्भणात् ॥ ५ ॥

" तं विद्याकर्मणी समन्वारभेते " (बृ. ४. ४. २.) इति-श्रुतिः फलारम्भे विद्याकर्मणोः साहित्यं दर्शयतीति न स्वातन्त्र्यं विद्यायाम् ॥ ५ ॥

पूर्वको यागः फलातिशयहेतुरिति न त्वदुक्तमित्यर्थः। इममपीति। यदेव विद्यया करोति तदेव वीर्यवत्तरं भवतीतिश्रुत्या तथा मनुत इत्यर्थः।

ननु तमेव विदित्वातिमृत्युमेतीतिश्रुतेर्व्यर्थत्वं स्यादित्यत आहुः उक्तेति ॥ ३ ॥

तद्वतो विधानात् ॥ ६ ॥

" ब्रह्मिष्ठो ब्रह्मा दर्शपूर्णमासयोस्तं वृणीते " (आप. श्रौत. ३. १८. १.) इतिकल्पश्रुत्या ब्रह्मविदो ब्रह्मत्वेन वरणं विधीयत इति ब्रह्मज्ञानस्यार्त्विज्याधिकारसम्पादकत्वात् कर्मशेषत्वमेवेत्यर्थः ॥ ६ ॥

ननु " यदहरेव विरजेत् तदहरेव प्रव्रजेद् गृहाद् वा प्रव्रजेद् वनाद् वा " (जाबा. ४.) इत्यादिश्रुतिभ्यो विहितत्वाविशेषात् कर्मतत्त्यागयोरैच्छिको विकल्पोऽङ्गीकार्योऽतो न शेषिशेषभाव इत्यत उत्तरं पठति

नियमाच्च ॥ ७ ॥

" आश्विनं धूम्रललाममालभेत यो दुर्ब्राह्मणः सोमं पिपासेत् " (तै. सं. २. १. १०.) " ऐन्द्राग्नं पुनरुत्सृष्टमालभेत य आ तृतीयात् पुरुषात् सोमं पिबेद् विच्छिन्नो वा एतस्य सोमपीथो यो ब्राह्मणः सन्नातृतीयात् सोमं न पिबति " (तै. सं. २. १. १५.) " यावज्जीवमग्निहोत्रं जुहुयात् (व. ब्रा.) इत्यादिश्रुतिभ्यो यथा कर्मकरणे नियमः श्रूयते न तथा तत्त्याग इति नोक्तपक्षः साधुरित्यर्थः । चकारात् " नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते । मोहात् तस्य परित्यागस्तामसः परिकीर्तित " (भ. गी. १८. ७.) इत्यादिरूपा स्मृतिः समुच्चीयते ॥ ७ ॥

कर्मकरणश्रुतेर्लोकसंग्रहार्थत्वं स्यादित्यतः सूत्रं पठति । तच्छ्रुतेः, समन्वारम्भणात् तद्वतो विधानात्—एतत्सूत्रत्रयभाष्यं स्पष्टार्थम् ॥ ४, ५, ६ ॥

उत्तरसूत्रमवतारयन्ति नन्विति । नियमाच्चेतिसूत्रं व्याकुर्वन्ति आश्विनमिति ॥ ७ ॥

त्यागविधिरशक्तविषय इत्युक्तमिति प्राप्ते प्रतिवदति

अधिकोपदेशात् तु बादरायणस्यैवं तद्दर्शनात् ॥८॥

तुशब्दः पूर्वपक्षं व्यवच्छिनत्ति । यदुक्तं "शेषत्वात् पुरुषार्थवादः" (ब्र. सू. ३. ४. २.) इति तन्नोपपद्यते । कुतः । **अधिकोपदेशात्** । कर्मसाम्यमपि न वक्तुं शक्यं तत्र तत्र तच्छेषत्वं दूरापास्तम् । यत ईश्वरः कर्मणः सकाशादधिक उपदिश्यते । तथा हि "स वा अयमात्मा सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किञ्च स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्" (बृ. ४. ४. २२.) इत्युपक्रम्याग्रे पठ्यते "तमेतं वेदानुवचनेन विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन चैतमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमभीप्सन्तः प्रव्रजन्ति" (बृ. ४. ४. २२.) इत्यादि । एवं सति यज्ज्ञानसाधनत्वं यज्ञे तस्य यज्ञशेषत्वं कथं स्यात् । किन्तु यज्ञस्य तद्वेदनशेषत्वम् । एतेनेज्यत्वेन तच्छेषत्वं प्रत्युक्तं वेदितव्यम् । तज्ज्ञानस्य यागपूर्वाङ्गत्वात्

प्राप्त इति। अनेन प्रकारेण ब्रह्मणो विद्यायाः कर्माङ्गत्वे प्राप्त इत्यर्थः । **प्रतिवदतीति**। प्रत्युत्तरं सूत्रकारो वदतीत्यर्थः। सूत्रं व्याकुर्वन्ति **तुशब्द** इत्यादिना। **कर्मसाम्यमिति** । कर्मस्वरूपफलनिरूपितं सादृश्यमित्यर्थः । **स वेति**श्रुतिर्बृहदारण्ये शारीरब्राह्मणे । **एवं सतीति** । कर्मणा भगवज्ज्ञानशेषत्व उक्ते सति। अधिकोपदेशादितिसूत्रांशेन सिद्धमाहुः **एतेनेति**। कथं प्रत्युक्तमितितद्विशदयन्ति **तज्ज्ञानस्येति** । इज्यत्वेन भगवज्ज्ञानविशिष्टस्येत्यर्थः । **तद्विशिष्ट-**

तद्विशिष्टस्य ब्रह्मज्ञानसाधनत्वात्। न च पूर्वं सामान्यत इज्यज्ञानमासीद् यज्ञेन विशेषतो ज्ञाने सति पुनर्यज्ञकरणे पूर्णं कर्मफलं भवति न तदशेषत्वमिति वाच्यम्। "तमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमभीप्सन्तः प्रव्रजन्ति" (बृ. ४. ४.२२.) इतिश्रुतेस्तद्वेदनस्य गार्हस्थ्याविरोधित्वेन तदसम्भवात्। यश्च साध्वसाधुकर्मफलसम्बन्धरहितस्तस्य कर्तृत्वेन तथात्वमनुपपन्नमतो जीवात्मन एव तथात्वं न तु परस्य। न चैतयोर्वास्तवाभेदान्नैवमिति वाच्यम्। वास्तवाभेदाज्जीवेप्युक्तश्रुतिभ्यस्तथात्वस्य सुवचत्वात्।

स्येति। तादृशभगवज्ज्ञानविशिष्टस्येत्यर्थः। तस्य यागस्य **ब्रह्मज्ञानेति**। तथा च यथा स्वर्गज्ञानानन्तरयागे प्रवृत्त्या यागपूर्वाङ्गत्वं स्वर्गस्य सिद्धावपि यागाङ्गत्वं स्वर्गस्य नास्ति तथा ब्रह्मणोपि नास्तीतिभावः। पुनः शेषत्वमाशङ्कते **न चेति**। **पूर्व**मध्ययनकाले। **इज्यज्ञानमिति**। इज्यत्वेन ब्रह्मणो ज्ञानमित्यर्थः। **विशेषत** इति। इज्यब्रह्मज्ञानविशिष्टयज्ञकरणानन्तरं विशेषतो ब्रह्मज्ञानं जायत इत्यर्थः। **ज्ञाने सतीति**। विशेषतो ब्रह्मज्ञाने सतीत्यर्थः। **पूर्णं फलमिति**। यदेव विद्ययेतिश्रुत्या यागो वीर्यवत्तरो भवति तेन च पूर्णफलं भवतीतिभावः। **न तदशेषत्वमिति**। ब्रह्मणो यागाङ्गत्वं न भवतीतिनेत्यर्थः। आशङ्का परिहरन्ति **तमेवेति**। **तद्वेदनस्य** तादृग्ब्रह्मज्ञानस्य। **तदसंभवादिति**। यज्ञासंभवादित्यर्थः। तथा च यज्ञं विना फलोत्पादनं कर्तुं न शक्यत इति कर्मशेषत्वं ब्रह्मणो न संभवतीति भावः।

नन्वीश्वरस्य यज्ञकर्तृत्वं संभवति कुतः। कर्तृत्वात्। कर्तरि च पुनर्यज्ञशेषत्वमस्तीति शङ्कते **यश्चेति**। **तथात्वं** कर्मशेषत्वं जीवस्यैवेत्यनेन निराकरणम्। एकदेशिमतेन पुनः शङ्कते **न चेति**। **तथात्वस्य** कर्मशेषत्वस्य।

वास्तवाभेदस्य पूर्वमेव निरस्तत्वात्। तमादाय ये पूर्वपक्षास्ते पूर्वपक्षा एवेत्यलमुक्त्वा । "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः । परेण नाकं निहितं गुहायां विभ्राजते यद् यतयो विशन्ति" (महा. नारा. १०. ५.) इतिश्रुत्या कर्मप्रजाधनैर्मोक्षाप्राप्तिमुक्त्वा त्यागेन तत्प्राप्तिरुच्यते । त्यागविषयस्यान्यस्यानुक्त्या सान्निध्यात् कर्मादीनामेव त्यागोभिप्रेतः । तथा च मुक्तोपसृप्यत्वाद् भगवत उक्तसाधनेन मुक्ताः सन्तो नाकं परेण विद्यमानमपि भक्त्या गुहायां विभ्राजते यत्, "यस्मात् परं नापरम्" (महा. नारा. १०. ५.) अस्तीत्यादिनोपक्रान्तत्वात् पुरुषोत्तमस्वरूपं यतयो विरहभावेन तद्विना स्थातुमशक्तास्तत्प्राप्त्यर्थं यतमाना विशन्तीति भक्तिमार्गीयाणां फलमुक्तम्। अग्रे "वेदान्तविज्ञान०" (महा. नारा. १०. ६.) इत्यृचा ज्ञानमार्गीयाणां फलमुक्तम् । अन्यथा पौनरुक्त्यं स्यात्। एवं कर्मज्ञानाभ्यामधिको भक्तिमार्गस्तत्प्राप्यः पुरुषोत्तमश्च श्रुतावुपदिश्यत इति तदेकप्रमाणवादिनो बादरायणस्य मतमप्येवं जैमिनिमतादाधिकमित्यर्थः । एवं श्रुत्या परमतं निरस्य शिष्यविश्वासार्थं स्वानुभवमपि प्रमाणयति तद्दर्शनादिति । उक्ताधि-

---

पूर्वमेवेति। अंशो नानाव्यपदेशादिति सूत्रे द्वितीयाध्यायस्य तृतीयपादे निरस्तत्वात् । अंशत्वव्यवस्थापनेनेतिशेषः । पुनः कर्मशेषत्वं दूरीकर्तुं श्रुतिमाहुः **न कर्मणेति** । श्रुतिरुत्तानार्था । भक्तिभावस्य फलमाहुः **तथा चेति** । ज्ञानमार्गीयाणां फलबोधिकयाः श्रुतेर्व्यवस्थामाहुः **अग्र इति** । सूत्रैकदेशमवतारयन्ति **एवमिति** । **तद्दर्शनादिति** । सूत्रैकदेशव्याख्यानं कैश्चित्कृतं

क्यवत्त्वेनैव भगवतो भक्तिमार्गस्य चानुभवादित्यर्थः । श्रुतयोधिकमात्मानं दर्शयन्तीति न व्याख्यानम् । उपदेशपदेन पौनरुक्त्यापत्तेः । तन्मतमनिरस्य तस्मात् स्वमत आधिक्यमात्रोक्त्या निष्कामकर्मणश्चित्तशुद्धिहेतुत्वेन परम्परया ज्ञानमार्गोपयोगाङ्गीकारः सूच्यते । पुष्टिभक्तिमार्गे तु सोपि न । "यत्न योगेन" (भाग. ११. १२. ९.) इतिवाक्यात् । एवं सति क्व कर्मशेषत्वगन्धोपि ब्रह्मणीतिभावः ॥ ८ ॥

तुल्यं दर्शनम् ॥ ९ ॥

यदुक्तमाचारदर्शनात् कर्मशेषत्वं ब्रह्मणस्तदपि न साधीयः । तुल्यं यतो दर्शनम् । ब्रह्मविदां शुकतृतीयजन्मवदार्षभादीनां त्यागदर्शनात् । एतेन यद्विदां कर्मत्यागस्तस्य कर्मशेषत्वं कथं शङ्कितुमपि शक्यमितिभावः सूच्यते । एतेन कर्मण्यशक्तान् प्रति त्यागविधिरिति निरस्तम् । शुकादीनामतथात्वात् ॥ ९ ॥

तद्दूषयन्ति **श्रुतय** इत्यादिना । बादरायणपदस्य तात्पर्यमाहुः **तन्मतमिति** । जैमिनिमतमित्यर्थः । अग्रे स्पष्टम् ॥ ८ ॥

इदं च सूत्रं विद्यायाः कर्मशेषत्वनिवारकम् । **आचारदर्शनादिति** । विद्यायाः कर्माङ्गत्वेऽयं हेतुः । तेन च कर्मशेषत्वमित्यर्थः । खण्डयन्ति **तुल्यमिति** । **ब्रह्मविदामिति** । एवं च साधारणत्वादयं हेतुर्हेत्वाभासान्तर्गत इतिभावः । जैमिनीयमते या त्यागव्यवस्था ता निरस्यति **शुकादीनामिति** ॥ ९ ॥

ननु " जनको ह वैदेहः " (बृ. ३. १. १.) इतिश्रुतिसाहाय्यादाचारदर्शनं त्यागदर्शनादधिकबलमित्यत उत्तरं पठति

असार्वत्रिकी ॥ १० ॥

ब्रह्मविदां सर्वेषामेतदाचारं चेन्निरूपयेच्छ्रुतिस्तदा त्वदुक्तं स्यात् । न त्वेवं, यत एतादृशी श्रुतिर्ब्रह्मवित्सु सर्वेषु न श्रूयते । तथा हि, " एतद्ध स्म वा एतद्विद्वांस आहुर्ऋषयः कावषेयाः किमर्था वयमध्येयामहे किमर्था वयं यक्ष्यामहे एतद्ध स्म वै तत् पूर्वे विद्वांसोऽग्निहोत्रं न जुहवाञ्चक्रिरे, एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्त्येतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राज " (बृ. ४. ५. १५.) इत्यादिश्रुतयो बह्व्यस्तद्विदां कर्मत्यागमेवानुवदन्ति । अतस्त्यागपक्ष एव बलवान् ॥ १० ॥

ननु ब्रह्मवित्त्वाविशेषेप्येकेषां कर्मकृतिरेकेषां तत्त्याग इतिविभागः कुत इत्याशङ्क्य तत्र हेतुमाह

सूत्रमवतारयन्ति **नन्विति** । **अधिकबलमिति** । श्रुतिः सहायभूता भवतीत्यधिकबलमित्यर्थः । तथा च साधारण्यं नास्तीतिभावः । **अत इति** । अतो हेतोः । श्रुतेः साधारणत्वं बोधयितुं सूत्रान्तरमाहुः **असार्वत्रिकीति** । सूत्रार्थमाहुः **ब्रह्मविदामिति** । **एतद्ध स्मेति** । इयं श्रुतिर्बृहदारण्ये शारीरब्राह्मणे एतदनन्तरं मैत्रेयीब्राह्मणे । **बह्व्य इति** । बहुत्वानुगृहीतत्वबोधिकेत्यर्थः । **एवेति** । एतेन कर्मकरणपक्षो व्यवच्छिद्यते ॥ १० ॥

सूत्रमवतारयन्ति **नन्विति** । **एकेषामिति** । जनकादीनाम् । **एकेषां** शुकादी-

विभागः शतवत् ॥ ११ ॥

“ एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ” (बृ. ४. ३. ३२.) इतिश्रुतेर्मानुषानन्दमारभ्य ब्रह्मानन्दपर्यन्तं ये गणिता आनन्दास्ते सर्वे पुरुषोत्तमानन्दात्मका एव । एवं सति येषु यावानानन्दो दत्तोस्ति तावन्तं तं निरूपयत्यधिकारतारतम्येन तद्दानमितिज्ञापनाय शतोत्तरमानन्दं श्रुतिर्न्यरूपयत् । अत एव पुरुषायुःसङ्ख्यासमानसङ्ख्यैयवोत्कर्ष उक्तः । तेन पुरुषधर्मस्याधिकारस्यैवोत्कर्षः सूच्यते । एवं प्रकृतेप्यन्यभावराहित्यतारतम्येन भगवद्भावतारतम्यम् । अत्र त्वनुग्रह एवाधिकाररूप इति तदुत्कर्षे त्यागस्तदनुत्कर्षे नेत्यर्थः ॥ ११ ॥

यच्चोक्तं “ तद्वतो विधानात् ” (ब्र. सू. ३. ४. ६.) इति तत्राह

अध्ययनमात्रवतः ॥ १२ ॥

यदुक्तं “ ब्रह्मिष्ठो ब्रह्म ” (आप. श्रौत. ३. १८. १.) इत्यादि तत्र ब्रह्मशब्देन वेद एवोच्यते न तु परः । तथा च तं

नाम् । व्याकुर्वन्ति **एतस्यैवेति** । **दत्तोस्तीति** । भगवतेतिशेषः । **निरूपयन्तीति** सुबन्तं श्रुतिरित्यस्य विशेषणम् । अधिकाराभिप्रायादेव । **संख्यासमानेति** । शतवर्षमायुस्तत्समानेत्यर्थः । प्रकृते योजयन्ति **एवमिति** । **तदुत्कर्षे** भगवदनुग्रहोत्कर्षे अथवा अन्यभावराहित्येन भगवद्भावोत्कर्षे ॥ ११ ॥

सूत्रमवतारयन्ति **यच्चोक्तमिति** । **तद्वतः** ब्रह्मज्ञानवतः । **विधानादिति** आर्त्विज्यविधानात् । व्याकुर्वन्ति **यदुक्तमिति** । **तं** वेदम् । **प्रत्ययस्येति** ।

ब्रह्मत्वेनाविकृतशब्दरूपत्वं ज्ञात्वा सततं तदध्ययनमात्रं यः करोति न तु तेन किञ्चित् कामयते तस्याधिकारो ब्रह्मत्वार्त्विज्य इत्युच्यत इति न ब्रह्मज्ञानस्य कर्मशेषत्वम्। प्रत्ययस्यातिशायनार्थकत्वादतिशयेन ब्रह्मरूपस्तदैव भवतीति युक्तं तस्य तदार्त्विज्यम्। एवं सति ब्रह्मपदं ब्राह्मण्यपरमपि सङ्गच्छते।

अथ वा वेदाध्ययनमात्रवतः कर्मण्यधिकारो न तु ब्रह्मविदोपीत्यर्थः। न च तदन्तःपातित्वेन वेदान्तानामप्यध्ययनस्यावश्यकत्वे तत्प्रतिपाद्यब्रह्मज्ञानस्याप्यवर्जनीयत्वात् तद्वत एव तत्राधिकार इति वाच्यम्। शब्दपरोक्षज्ञानस्य ब्रह्मज्ञानत्वाभावात्। न हि सिता मधुरेतिशब्दज्ञानमात्रवांस्तन्माधुर्यज्ञो भवति। तथा सति पित्तोपशमादिकं तत्कार्यमपि स्यात्। नत्वेवम्। अत एव छान्दोग्ये सनत्कुमारेण "यद् वेत्थ तेन मोपसीद" (छा. ७. १. १.) इत्युक्तो नारद ऋग्वेदमारभ्य सर्पदेवजनविद्यापर्यन्तं स्वाधीतमुक्त्वाह "सोहं मन्त्रविदेवास्मि नात्मविद्" (छा. ७. १. ३.) इति। अतोपरो-

---

इष्ठन्प्रत्ययस्येत्यर्थः। पक्षान्तरमाहुः **अथवेति**। शङ्कते **न चेति**। **तदन्तःपातित्वेनेति**। वेदाध्ययनान्तःपातित्वेनेत्यर्थः। उत्तरयन्ति **शब्देति**। कुतो नास्तीत्यत आहुः **न हीति**। **न त्वेवं** तथा तु न दृश्यत इत्यर्थः। तथा च प्रकृतेपि तादृशज्ञाने सति शुकादिवत्संचरेन्न त्वार्त्विज्यं कुर्यादितिभावः। अत्र प्रमाणमाहुः **छान्दोग्य** इति। प्रमाणान्तरमाहुः **अत एवेति**। ननु तथापि विद्यायाः कर्मशेषत्वमस्त्येव। कुतः। तं विद्याकर्मणीत्यनेन समन्वारंभणस्य विहितत्वात् कर्मसाहित्येन फलजनकत्वाद् विद्याया इति

क्षब्रह्मज्ञानमेव ब्रह्मज्ञानमुच्यते । अत एव तैत्तिरीयोपनिषत्सु " वेदान्तविज्ञानसुनिश्चितार्थाः " (महा. नारा. १०. ६.) इति पठ्यते । विज्ञानमनुभव एव न तु ज्ञानमात्रम् । अतो दूरापास्तं कर्मशेषत्वं ब्रह्मणः । " तं विद्याकर्मणी " (बृ. ४. ४. २.) इत्यादिस्तु संसार्यात्मनः पूर्वदेहत्यागसामयिकं वृत्तान्तं निरूपयति न तु ब्रह्मविद इति " समन्वारम्भणात् " (ब्र. सू. ३. ४. ७.) इतिसूत्रमुपेक्षितमाचार्येण ॥ १२ ॥

यच्चोक्तं " नियमाच्च " इति तत्राह

नाविशेषात् ॥ १३ ॥

" आश्विनम् " (तैत्ति. सं. २. १. १०) इत्यादि श्रुतिभ्यः कर्मकृतौ यथा नियमः श्रूयते न तथा त्याग इति यदुक्तं तन्न । कुतः । अविशेषात् । " न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः " (महा. नारा. १०. ५.) इतिश्रुतिः

शङ्कायामाहुः **तं विद्ये**ति । **वृत्तान्त**मिति । संसारिजीववृत्तान्तं निरूपयति शारीरब्राह्मणे श्रुतिरिति । तथा च तत्र विद्यापदेन विद्वद्वाक्योक्ता विद्या कर्माङ्गीभूता गृह्यते न तु वेदान्तविद्येति न तस्याः कर्मशेषत्वमित्यर्थः ॥ १२ ॥

सूत्रमवतारयन्ति **यच्चोक्ता**मिति । व्याकुर्वन्ति **आश्विन**मिति । "आश्विनं धूम्रललाममालभेत यो दुर्ब्राह्मणः सोमं पिपासेत् " इत्यादिश्रुतिभ्य इत्यर्थः । **नियम** इति । आश्विनपश्वालम्भनाकरणे दौर्ब्राह्मण्यदोषः स्यादित्येतदर्थमवश्यं सोमे पश्वालम्भनं कर्तव्यमितिनियम इत्यर्थः । सौत्रं हेतुं व्याकुर्वन्ति **न कर्मणे**ति ।

कर्मादिनामृतत्वाप्राप्तिमुक्त्वा तत्त्यागेन तां वदन्ती कर्मत्यागस्यावश्यकत्वं वदतीति तस्मान्न **विशेषो** यत इत्यर्थः। तथा चामृतत्वमानशुरितिपदात् मुमुक्षोः कर्मत्यागनियमोऽमुमुक्षोस्तत्कृतिनियम इतिव्यवस्थेतिभावः।

अथ वा ननु क्रमप्राप्ते तुरीयाश्रमे हि कर्मत्यागो द्वितीये तस्मिन् कर्मकरणनियमस्तत्र च कर्तुरङ्गत्वेन तत्स्वरूपज्ञानमावश्यकं तच्च वेदान्तैरेवेति कथं न कर्मशेषत्वमित्युत्सूत्रमाशङ्क्य निषेधति **नेति**। "यदहरेव विरजेत्" (जाबा. ४.) इतिश्रुतेः "तावत् कर्माणि कुर्वीत न निर्विद्येत यावता" (भाग. ११. २०. ९.) इतिभगवद्वाक्याच्च त्यागे वैराग्यस्य च प्रयोजकत्वादाश्रमविशेषे विशेषाभावादप्रयोजकत्वादित्यर्थः। यत्रापि क्वचित् क्रमप्राप्तिस्तत्रापि न तज्ज्ञानं ब्रह्मज्ञानमिति पूर्वसूत्र एवोक्तमितिभावः।

आवश्यकत्वमिति। कर्मत्यागपूर्वकमोक्षप्राप्तेरुक्तत्वात् त्यागस्यापि नियमेनावश्यकत्वमित्यर्थः। इदमेव विशदयन्ति **तथा चेति**।

पक्षान्तरमाहुः **अथवेति**। **तत्र** कर्मणि। **तत्स्वरूपज्ञानं** कर्तृत्वस्वरूपज्ञानम्। **उत्सूत्रमिति**। सूत्राद्बहिरित्यर्थः। सूत्रार्थमाहुः **यदहरेवेति**। सौत्रं हेतुं व्याकुर्वन्ति **आश्रमविशेष** इति। ननु अध्ययनजन्यवेदान्तजन्याया विद्यायाः कर्मशेषत्वमस्त्येवेतिशङ्का पूर्वमेव निराकृतेत्याहुः **यत्रापीति**। **यत्रापि** कस्मिंश्चित्पुरुष इति। **क्रमप्राप्तिः** अध्ययनादिक्रमेण त्यागप्राप्तिः। **न तज्ज्ञानमिति**। शाब्दज्ञानस्य मुक्तिसाधनत्वाभावादितिभावः। **पूर्वसूत्र एवेति**। अध्ययनमात्रवत इतिपूर्वसूत्र इत्यर्थः। ननु वेदाध्ययनं कर्म

एतेन वेदाध्ययनादिकमप्यप्रयोजकमिति ज्ञापितम् । अत एव शुकस्य वैराग्यातिशयादुपनयनादेरप्यनपेक्षोच्यते । एवं सूत्रद्वयेन कर्माधिकारसम्पादकत्वेन ब्रह्मज्ञानस्य तच्छेषत्वं निरस्तम् ॥ १३ ॥

अथ ग्रहिलतया ब्रह्मिष्ठ इत्यत्र 'ब्रह्म' पदेन पर एवोच्यत इति वदसि तत्रापि वदामः

स्तुतयेनुमतिर्वा ॥ १४ ॥

दर्शपूर्णमासावेतादृशौ यत्र ब्रह्मविदार्त्विज्याधिकारीति तत्स्तुत्यर्थं 'ब्रह्मिष्ठो ब्रह्म' इत्यनेन ब्रह्मविदोप्यार्त्विज्येनुमतिः क्रियते । न तु तस्याधिकारित्वमभिप्रेतमुक्तानुपपत्तिभिरित्यर्थः ॥ १४ ॥

कामकारेण चैके ॥ १५ ॥

ननु "एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान्" (बृ. ४. ४. २३) इतिश्रुत्या ब्रह्मविदः कर्मकृतगुणदोषौ निषिध्येते । स च प्राप्तिपूर्वक इति ब्रह्मविदः कर्मकरणमावश्यकमिति प्राप्त उच्यते **कामकारेणेति** ।

ब्राह्मणस्यावश्यकं ततो ज्ञाने जाते तस्य कर्माङ्गत्वमावश्यकमित्यत आहुः **एतेनेति** । दृष्टान्तमाहुः **अत एवेति** ॥ १३ ॥

पुनः सूत्राद्बहिः किंचिदाशङ्क्य निराकरोतीत्यभिप्रायेणाग्रिमं सूत्रमवतारयन्ति **अथेति** । सूत्रं व्याकुर्वन्ति **दर्शेति तस्येति** । ब्रह्मज्ञानस्येत्यर्थः । **उक्तानुपपत्तिभिरिति** । शुकाद्याचारकावषेयोक्तबृहदारण्यश्रुतिविरोधत्यागनियमरूपार्त्विज्यबाधकैरित्यर्थः । ब्रह्मनिष्ठस्यार्त्विज्यं प्रासंगिकमिति बोधयितुं **वाशब्दः** । तेन चानादरः सूचितः ॥ १४ ॥

सूत्रमवतारयन्ति **नन्विति** । **स चेति** । निषेधश्चेत्यर्थः । सूत्रार्थमाहुः

करणं कारः। कामेनेच्छया करणं कामकारः। तथा च परानुग्रहार्थमिच्छामात्रेण न तु विधिवशाद् यत् करणं तत् कामकार इत्युच्यते। तथा चैवंकृते कर्मणि तत्कृतगुणदोषप्रसक्तौ तत्प्रतिषेधमेके शाखिनः "एष नित्यः" (बृ. ४. ४. २३.) इत्यादि पठन्ति। न ह्येतावता कर्मकृत्याधिकारप्राप्तिरितिभावः।

अथ वा कामेन कारा यस्य स तथा। तादृशेन कर्मणा प्राप्तवृद्धिह्रासयोः सम्बन्धाभावं ब्रह्मविद्येके पठन्तीत्यर्थः। चकारेणेश्वराज्ञया लोकसङ्ग्रहार्थं कृतं कर्म समुच्चीयते। "सर्वस्य वशी सर्वस्येशानः" (बृ. ४. ४. २२.) इतिश्रुतेस्तथा ॥ १५ ॥

उपमर्दं च ॥ १६ ॥

अनेन कर्माधिकाराभावे हेत्वन्तरमुच्यते। द्वैतभाने हि यथाकथञ्चित् कर्मकृतिसम्भावनापि। यस्य त्वखण्डब्रह्माद्वैतभानं ब्रह्मेत्येव, न त्विदं ब्रह्मेति सखण्डम्। अत्रोद्देश्यत्वेन प्रपञ्चस्यापि भानात् सखण्डत्वम्। तथा चाखण्डतद्भाने कर्मतदधिकारादेरुपमर्दं चैके शाखिनः पठन्तीति न ब्रह्मज्ञानस्य कर्मशेषत्वसम्भावनापीत्यर्थः। श्रुतिस्तु "यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्" (बृ. ४. ५. १५.) इत्यादिरूपा ॥ १६ ॥

करणमिति। **इच्छामात्रेणे**ति। करणमितिशेषः। प्रकारान्तरमाहुः **अथवे**ति। **स तथे**ति। ब्रह्मविदित्यर्थः। ईश्वरेच्छायां प्रमाणमाहुः **सर्वस्ये**ति ॥ १५ ॥

उक्तोपष्टम्भार्थं सूत्रार्थं पठतीति सूत्रमवतारयन्ति **अनेने**ति। सूत्रं व्याकुर्वन्ति **द्वैतभाने ही**ति। पठन्तीत्युक्तम्। कुत्र पठन्तीत्याहुः **श्रुतिस्त्व**ति ॥ १६ ॥

ऊर्ध्वरेतस्सु च शब्दे हि ॥ १७ ॥

अत्रेदं विचार्यते । ब्रह्मचर्यानन्तरं गार्हस्थ्यमपि श्रुत्या बोध्यते । " ब्रह्मचर्यादेव प्रव्रजेत् " (जाबा. ४.) इत्यादिश्रुतिभिर्ब्रह्मचारिण एव प्रव्रजनमपि बोध्यते । एवं सत्यविरोधाय " यदहरेव " (जाबा. ४.) इतिश्रुतेश्च रागितद्रहितभेदेन विषयभेदो वाच्यः । तत्र ब्रह्मचर्याविशेषेपि भगवदनुग्रहविशेषजचित्तशुद्धिविषजवेदान्तार्थपरिज्ञानमेव हेतुर्वाच्यः । " वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद् यतयः शुद्धसत्त्वाः " (महा. नारा. १०. ६.) इतिश्रुतिरिममेवार्थमाह । तथा चैतादृशा एवोर्ध्वरेतस इत्युच्यन्ते । एवं सत्यूर्ध्वरेतस्सु कर्माभाव उक्तरीत्या त्वयाप्युरीकार्य इति ज्ञानरहितानां कर्मण्यधिकारस्तद्वतां सन्न्यास इति त्वदुक्ताद् विपरीतोर्थः सिध्यतीति क्व कर्मशेषत्वसम्भावना ज्ञाने । ननु सन्न्यासेपि तदाश्रमीणं कर्मास्तीति वैराग्यसहकृतं ज्ञानमेतच्छेषभूतं तदसहकृतं तदग्निहोत्रादिशेषभूतमिति न वैपरीत्यमिति प्राप्त आह शब्दे हीति । ज्ञानस्वरूपं तत्फलं च न युक्तिसिद्धं किन्तु वेदमात्रसिद्धम् । तत्र

सूत्रं व्याकुर्वन्ति **अत्रेदमिति**। **श्रुत्येति**। ब्रह्मचर्यं समाप्य गृही भवेदितिजाबालश्रुत्येत्यर्थः। **ब्रह्मचर्यादेवेति**। यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद्वा वनाद्वेतिजाबालश्रुतिभिरित्यर्थः। वैराग्यमेव सन्न्यासप्रयोजकमित्याहुः **एवं सतीति**। आश्रमधर्मे कृते चित्तशुद्धौ सत्या वैराग्यं जायत इत्यत आहुः **तत्रेति**। सूत्रशेषमवतारयन्ति **नन्वित्यादिना**। **कर्मास्तीति**। शौचाचमनाष्टग्रासभक्षणादि तदाश्रमोक्तं कर्मास्तीत्यर्थः। सूत्रशेषं व्याकुर्वन्ति **ज्ञानस्वरूप-**

तु " तमेवं विद्वानमृत इह भवति " (नृ. पू. १. ६.) " ब्रह्मविदाप्नोति परम् " (तै. २. १.) " य एनं विदुरमृतास्ते भवन्ति " (बृ. ४. ४. १४.) इत्यादिवाक्यैर्ब्रह्मज्ञानस्य मोक्ष एव फलं श्रूयते । सर्वसाधनानां साक्षात्परम्पराभेदेन तत्रैव पर्यवसानात् । अतो धर्मिग्राहकमानविरोधात् सन्न्यासाश्रमिणः कर्मशेषत्वमपि न वक्तुं शक्यमित्यर्थः । नन्वेवं सन्न्यासवैयर्थ्यमिति चेन्न । ब्रह्मविदतिरिक्तसङ्गस्य भगवद्विस्मारकत्वेनावश्यत्याज्यत्वेन श्रुत्या कथनात् । अत एव " वेदान्तविज्ञानसुनिश्चितार्थाः " (महा. नारा. १०. ६.) इत्युक्त्वा " सन्न्यासयोगाद् यतयः शुद्धसत्त्वाः " इत्युक्तम् । अत्र पञ्चम्यान्तःकरणे संस्कारविशेषाधायकत्वं च प्रतीयते सन्न्यासस्य । स च संस्कारः फलोपकार्यङ्गमित्यावश्यकः सन्न्यासो मर्यादामार्गे । पुष्टिमार्गे त्वन्यैव व्यवस्था । " न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह " (भाग. ११. २०. ३१.) इतिवाक्यात् ॥ १७ ॥

परामर्शं जैमिनिरचोदना चापवदति हि ॥ १८ ॥

मिति । **धर्मिग्राहकमाने**ति । कर्मशेषं वा मुख्यं वेति संदेहविषयीभूतं ज्ञानं धर्मि, तद्ग्राहकमानं श्रुतिः, तस्या विरोधादित्यर्थः । अत्राशङ्कामाहुः **नन्वेवमि**ति । **एवं** केवलस्य ज्ञानस्य कारणत्वे । परिहरन्ति **ब्रह्मविदि**ति । **अत्र पञ्चम्ये**ति । **संस्कारः** सत्त्वशुद्धिः, **तद्विशेष** इत्यर्थः । **फलोपकार्यङ्गमि**ति । **फलं** साक्षात्कारः, **तदुपकारि** ज्ञानं तदङ्गमित्यर्थः । व्यभिचारेण क्वचिदनावश्यकत्वसंशयः स्यादत आहुः **पुष्टिमार्गे त्वि**ति । मार्गभेदो दोषावहो न भवतीति भावः । चतुर्भिः सूत्रैराग्रहो नास्तीतिसूचितम् ॥ १७ ॥

ऊर्ध्वरेतस्सु च ज्ञानोक्तेस्तस्य मुक्तिफलकत्वोक्तेः "किं प्रजया करिष्यामो येषां नोयमात्मायं लोकः" (बृ. ४. ४. २२.) इत्यादिश्रुतेश्च ब्रह्मप्राप्तावेव सर्वस्याः श्रुतेस्तात्पर्यमिति सिध्यति। तस्या एव सर्वक्लेशापायपूर्वकपरमानन्दरूपत्वात्। न तु कर्मणि। दुःखात्मकसंसारहेतुत्वात् तस्य। जीवश्रेयोनिमित्तमेव श्रुतिप्राकट्यात्। अन्यथा निषेधविधिर्न स्यात्। तथा च कर्मविधिनापि परम्परया मोक्ष एव फलत्वेन परामृश्यत इति सिद्धम्। तं परामर्शं कर्मस्वातन्त्र्यवादी **जैमिनिरपवदति** बाधत इत्यर्थः। मोहकशास्त्रप्रवर्तकः स इतीश्वरमेव न मनुते यतोतस्तत्प्राप्तिस्तस्य मते दूरापास्ता। कर्मानधिकारिणामन्धादीनां सन्न्यासविधिविषयत्वमन्यथा "वीरहा वा एष देवानां योग्निमुद्वासयते" (तै. सं. १ १. ५. २.) इतिश्रुतिर्न स्यात्। अतो "ब्रह्मचर्यं समाप्य गृही भवेद् गृहाद् वनी भूत्वा प्रव्रजेद् यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद् वनाद्वा" (जाबा. ४.) इतिश्रुतेरप्यङ्गहीन एव स विषयः। यत आयुर्भागविभागेनाश्रमाणां विधानम्। तुरीये तस्मिन् देहेन्द्रियादि-

---

सूत्रं व्याकुर्वन्ति ऊर्ध्वेति। **तस्य** ज्ञानस्य। **तस्याः** ब्रह्मप्राप्तेः। **न तु कर्मणी**ति। तात्पर्यमितिशेषः। **परम्परे**ति। ज्ञानजननद्वारा। **सिद्धमि**ति। श्रुतिसंदर्भविचारेण सिद्धमित्यर्थः। **जैमिनि**पदस्वारस्यमाहुः **मोहके**ति। तर्हि संन्यासस्य व्यर्थता स्यादत आहुः **कर्मानधिकारिणा**मिति। वीरहा वेति श्रुतिः प्रथमाष्टके पञ्चमप्रपाठके। **स विषय** इति। **सः** पुरुषो विषय इत्यर्थः। अत्र गमकमाहुः **यत** इति। एतावता यत्सिद्धं तदाहुः

वैकल्यं नियतम् । अतः कर्मण्येव श्रुतेस्तात्पर्यम् । अपि च ज्ञान-कर्मणोरलौकिकफलसाधकत्वेन विहितत्वमेव प्रयोजकम् । अपरोक्षब्रह्मज्ञानं च न विधेयम् । साक्षात्स्वकृत्यसाध्यत्वात् । चोदना-बोधकलिङ्गाद्यभावाच्च ज्ञानस्य न मुक्तिसाधकत्वं वक्तुं शक्यम् । " य एनं विदुः " (बृ. ४. ४. १४.) इत्यादिस्तु यागेष्विज्य-विष्णुस्तुतिपरेत्याशयेनाहाचोदना चेति । जैमिनिवत् तत्सहाय-भूतेयमचोदना च परामर्शमपवदतीतिसम्बन्धः । तथा च विधिसम्बन्धात् कर्मैवानुष्ठेयं न तु मुक्तिसाधनमप्यतथात्वादिति स्थितम् ॥ १८ ॥

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

बादरायण आचार्यो जैमिनेरपि गुरुस्तदेव कर्तव्यमिति शिष्य-सम्मतमनुष्ठेयं कर्मापवदतीति पूर्वेण सम्बन्धः । तत्र हेतुः साम्य-श्रुतेः । " यथा वीरहा वा एष देवानाम् " (तै. सं. १. ५. २.) इतिश्रुत्या कर्मत्यागकर्तुर्निन्दा श्रूयत एवमेव भगवज्ज्ञानर-हितस्यापि सा श्रूयते यतः । तथा हि " असुर्या नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोबुधा जनाः ॥"

अन इति । अचोदनेत्यादिसूत्रांशमवतारयन्ति **अपि चेति**। अत्र भाष्यं स्पष्टम् ॥ १८ ॥

मत्रं व्याकुर्वन्ति **बादरायण** इति । **कर्मापवदतीति** । कर्मानूद्य निराकरोति । **पूर्वेण** पूर्वसूत्रेण । वीरहेतिश्रुतिः प्रथमाष्टके पञ्चमे प्रपाठके । **अविद्वांस** इत्यनेन कर्मज्ञानशून्यानां ग्रहणं स्यादित्यत आहुः **एतदग्रे**

(ईशा. ३.) । एतदग्रे च " ये तद् विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवोपयन्ति " (बृ. ४. ४. १४.) इत्यादिरूपा । एतच्च निन्दामात्रेण साम्यमुक्तमापाततः । वस्तुतस्तु " तमेतं वेदानुवचनेन विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन चैतमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रजन्ति " (बृ. ४. ४. २२.) इतिश्रुत्या ज्ञानसाधनत्वेनैवाश्रमकर्मकरणोक्तेश्च न स्वातन्त्र्यं कर्मणो वक्तुं शक्यम् । अत एव शुकस्य न ब्रह्मचर्यादिकमपि । फलस्य जातत्वेन तत्साधनानपेक्षणात् । न च स्वर्गकामपदश्रवणान्नैवमिति वाच्यम् । त्वदभिमतलोकात्मकस्वर्गे " यन्न दुःखेन सम्भिन्नम् " (आप. श्रौ.) इतिवाक्यशेषोक्तस्वर्गपदप्रवृत्तिनिमित्तधर्माभावादात्मसुखस्यैव तादृशत्वात् तस्यैव तत्रोक्तेः । एवं सति " तमेतं वेदानुवचनेन " (बृ. ४. ४. १४.) इतिश्रुत्येकवाक्यतापि सम्पद्यते । अन्यथा तु विरोध एव ।

चेति । शारीरब्राह्मणस्थं वाक्यद्वयम् । **वस्तुत** इति । ज्ञानस्यैव सर्वमिदं साधनमितिभावः । **शुकस्येति** । उपनयनाभावादाश्रमधर्मरूपं ब्रह्मचर्यादिकमित्यर्थः । शङ्कते **नचेति** । ज्योतिष्टोमेन स्वर्गकामो यजेतेतिवाक्ये श्रवणादित्यर्थः । निराकुर्वन्ति **त्वदभिमतेति** । **यन्न दुःखेनेति** । " यन्न दुःखेन सभिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम् ॥ " । **तत्रोक्तेरिति** । ज्योतिष्टोमेनेतिवाक्य उक्तेरित्यर्थः । **एवं सतीति** । कर्मणामात्मसुखात्मकलोकजनकत्वे सतीत्यर्थः ।

ननु दृष्टफलका अपि कारीरीचित्रादियागाः श्रूयन्त इति नैवं निर्णय इति चेत्, उच्यते। नित्यकर्मणो हि ज्ञानसाधनत्वमुच्यते। व्रीहिपश्वादीनां तन्निर्वाहकत्वात् तच्छेषत्वेन तेषां विधानम्। एवं सति वीरहतिश्रुतिः साग्निकस्य गृहिण आलस्यादिदोषेण तदुद्वासने दोषमाह न त्वाश्रमान्तरपरिग्रह इति मन्तव्यम्। अन्यथा तदुच्छेदस्तद्विधिवैयर्थ्यं च स्यात्। न चानधिकृतमादाय तत्समाहितिरिति वाच्यम्। अत्र पृच्छामः—अन्धपङ्ग्वादिभिः प्रव्रजनं कार्यमितिविधिरस्त्याहोस्विद् यावज्जीवमग्निहोत्रविधायकवाक्यप्रव्रजनविधायकवाक्ययोर्विरोधाभावाय विषयो भिन्नः कल्प्यते। नाद्यः। अश्रुतेः। न द्वितीयः। "यदहरेव विरजेत्" (जाबा. ४.) इतिश्रुत्या वैराग्यवतः प्रव्रजनविधानात्। तेनैव विषयभेदसिद्धौ तत्कल्पनानवकाशात्। तेन "नापुत्रस्य लोकोस्ति" (ऐ. ब्रा. ७. १३. १२.)

कुत्रचित् स्वर्गकामपदं नास्ति यागस्तु विधीयते तत्र निर्णयो न भवतीति शङ्कते **नन्विति**। "वृष्टिकामः कारीर्या यजेत" "चित्रया यजेत पशुकामः" इत्यादौ वृष्ट्यर्थं पश्वर्थं यागो विधीयत इत्यर्थः। समाधानमाहुः **उच्यत** इति। **तेषा** व्रीहिपश्वादीनाम्। **एवं सतीति**। नित्यकर्मणोर्ज्ञानजनकत्वे सिद्धे सति। **अन्यथेति**। पूर्वोक्तास्वीकारे। **तदुच्छेदः** संन्यासोच्छेदः, संन्यासविधिवैयर्थ्यमित्युभयं स्यादित्यर्थः। **न चेति**। **अनधिकृतमिति**। पङ्गोः विष्णोः क्रमोसीति न जायते, अन्धस्याज्यावेक्षणं न जायते, इति अन्धपङ्ग्वादीनां कर्मानधिकारादितिभावः। **तत्समाहितिरिति**। संन्यासोच्छेदतद्विधिवैयर्थ्ययोः समाधानमित्यर्थः। तथा च तैः संन्यासः कर्तव्य इतिकर्मवादिमतम्। समाधानमाहुः **अत्रेति**। **अश्रुतेरिति**। तादृशविधेरश्रवणादित्यर्थः। **तेनेति**। तथा च पुत्ररहितस्य विदुषो लोकोस्तीतिभावः।

इतिश्रुतिरप्यविद्वद्विषयिणीति न विरोधः । “ विद्वांसः प्रजां न कामयन्ते ” (बृ. ४. ४. २२.) इतिश्रुतेः । एतेनर्णत्रयापाकरणमपि प्रत्युक्तं वेदितव्यम् । अविद्वद्विषयत्वात् । यदप्युक्तं “ अचोदना च ” (ब्र. सू. ३. ४. १८.) इतिसूत्रावयवेन चोदनाबोधकलिङाद्यभावो बोधक इति, तदपि न साधीयः । श्रुतिसाम्यादेव । श्रूयते हि “ तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत् ” (बृ. ४. ४. १४.) इति । न च प्रमाणवस्तुपरतन्त्रत्वान्न ज्ञानस्य विधेयतेति वाच्यम् । इतरज्ञानस्य तथात्वेपि जीवात्मलक्षणेधिष्ठाने परमात्मनो भगवतो दर्शनस्यान्यतोप्राप्तत्वात् । श्रद्धान्तसाधनैस्तद्दर्शने स्वरूपयोग्यतासम्पत्तावात्मन्यधिष्ठाने परमात्मदर्शनानुकूलप्रयत्नविधानसम्भवाच्छ्रवणविधिना श्रुतिवाक्यजशब्दज्ञानानुकूलप्रयत्नविधानवत् । एवमेव हि यागविधिनापि क्रियारूपयागस्य स्वानुकूलप्रयत्नाधीनत्वेन स प्रयत्न

अत्र प्रमाणमाहुः **विद्वांस** इति । **एतेने**ति । त्रिभिर्ऋणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इतिश्रुत्या ऋणत्रयापाकरणमित्यर्थः । ननु चोदनाकृतापवादस्य परिहारो नास्ति, कुतः, ज्ञानस्य प्रमाणवस्तुपरतन्त्रत्वेन चोदनाविषयत्वेनाभावादित्यत आहुः **यदपी**ति । परिहरन्ति **तदपी**ति । श्रुतिसाम्यादेव न साधीय इत्यन्वयः । **पश्येदि**ति । अस्य प्रमाणान्तरजन्यदर्शनानुवादत्वमाशङ्कते **न चे**ति । निषेधन्ति **इतरज्ञानस्ये**ति । **श्रद्धान्तसाधनैरि**ति । शमदमवैराग्यदुःखसहिष्णुत्वश्रद्धान्तसाधनैरित्यर्थः । **दर्शनानुकूलप्रयत्नविधानसंभवादि**ति । तादृशप्रयत्नस्य प्रमाणान्तरेणाप्राप्तत्वाद्विधानस्य सुखेन संभवान्नानुवादत्वमित्यर्थः । अत्र दृष्टान्तमाहुः **श्रवणे**ति ।

एव विधीयतेऽन्याप्राप्तत्वान्न तु क्रिया । तत्प्रयत्ने सति तस्याः स्वत एव सम्भवात् ।

अथवा । ननु यथा "वीरहा" (तै सं. १. १. ५. २.) इतिश्रुत्या कर्मत्यागो निन्द्यते तथैव "असुर्या नाम ते लोका अन्धेन तमसा वृताः । तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोबुधा जनाः" ॥ (ईशा. ३.) "ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवोपयन्ति" (बृ. ४. ४. २४.) इत्यादिश्रुत्या भगवज्ज्ञानाभावो निन्द्यते । एवं सति कर्मज्ञानानुकूलप्रयत्नयोर्विधेयत्वे मिथो विरोधादधिकारिभेदेन विधेयत्वं वाच्यम् । न च "तावत् कर्माणि कुर्वीत न निर्विद्यते यावता" (भाग. ११. २०. ९.) इतिभगवद्वाक्याद् रागिणः कर्म विधीयते तद्रहितस्य ज्ञानमिति वाच्यम् । "जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे" (बृ. ३. १. १.) इतिश्रुतेर्नीरागत्वेन प्रसिद्धस्यापि तस्य कर्मणि प्रवृत्तिर्या सा न स्यादधिकाराभावात् । अथ जनकदृष्टान्तेन कर्मणोऽङ्गित्वं ज्ञानस्य तदङ्गत्वं वाच्यम् । तथा च ज्ञानवता कर्मानुष्ठेयमिति प्राप्ते प्रतिवदति

एवमेवेति । अनेन प्रकारेणेत्यर्थः । **तत्प्रयत्न** इति । यागानुकूलप्रयत्न इत्यर्थः । इदं च भावार्थाः कर्मशब्दा इतिजैमिनीयसूत्रे द्वितीयाध्यायारम्भे **श्रीमदाचार्यकृतभाष्ये** विस्तरेण प्रपञ्चितम् ।

इदं व्याख्यानं विधिर्वा धारणवदितिसूत्रे प्रतिपादनीयमित्यरुच्या प्रकारान्तरमाहुः **अथवेति** । **मिथोविरोधादिति** । कर्माङ्गं कामः, ज्ञानाङ्गं शान्तिः, अनयोर्विरोधादित्यर्थः । शङ्कते **नचेति** । समादधते **जनकेति** । अग्रे स्पष्टम् । **अथवे**तिपक्षे सूत्रमाहुः **अनुष्ठेय**मिति । हेतुं व्याकुर्वन्ति **स्वत** इति ।

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

ज्ञानमङ्गं तदङ्गित्वेनानुष्ठेयं कर्मेतिमतं बादरायणोप्यवदतीति पूर्वेण सम्बन्धः। तत्र हेतुमाह साम्यश्रुतेरिति। स्वतोऽपुरुषार्थं कर्म फलार्थिनैवानुष्ठेयम्। तथा च "एष नित्यो महिमा" (बृ. ४. ४. २४.) इतिश्रुत्या ज्ञानवति विहितनिषिद्धयोः कर्मणोः फलाजनकत्वेन साम्यं श्रूयत इति फलार्थिप्रवृत्त्यसम्भवेन ज्ञानिनस्तथात्वाभावेन कर्मोच्छेदप्रसक्त्या न ज्ञानस्याङ्गत्वं शक्यम्। कृषीवलस्य व्रीहीणां वपने भर्जनस्येव। तथा च ज्ञानिनः प्रवृत्त्यसम्भवेनान्येषां च "अथेतरे दुःखमेवोपयन्ति" (बृ. ४. ४. १४.) इतिनिन्दाश्रवणेन तथात्वात् सर्वार्थतत्त्वज्ञा श्रुतिर्ज्ञानबहिर्भूतं कर्म कथं विदध्यादिति ज्ञानस्य पुरुषार्थसाधकत्वोक्तिमसहमानेनाचार्येण प्रौढ्या निरूपितम् ॥ १९ ॥

एवं सति पूर्वकाण्डवैयर्थ्यमापततीति तत्तात्पर्यमाह

विधिर्वा धारणवत् ॥ २० ॥

यथा योगशास्त्रे मनःसमाधेरेव साध्यत्वात् तत्साधनत्वेनैव मानस्या मूर्तेर्धारणं विधीयते, न तु स्वतन्त्रतया फलसाधकत्वेन,

---

तथात्वाभावेन कर्मकर्तृत्वाभावेन। स्वोक्तं विभजन्ते **तथा चेति**। **अन्येषां** ब्रह्मविषयकज्ञानरहितानां **तथात्वात्** कर्मकरणासम्भवात्। नन्वेव निरूपणे किं तात्पर्यमत आहुः **ज्ञानस्येति** ॥ १९ ॥

सूत्रमवतारयन्ति **एवं सतीत्यादिना**। सूत्रं व्याकुर्वन्ति **यथेति**

मनःसमाधौ तत्त्यागात् । "ततः किञ्चन न स्मरेत्" (भाग. २. १. १९; ११. १४. ४४.) "तच्चापि चित्तबडिशं शनकैर्वियुक्तम्" (भाग. ३. २८. ३४.) इत्यादिवाक्येभ्यस्तथा । तथा सति भक्तिसाधनत्वेनैवानुष्ठेयमितितात्पर्येण कर्मविधिरुच्यते न तु स्वतन्त्रतया फलसाधकत्वेन । ननु तत्र समाधिमधिकृत्य यमादीन्युक्तानीति तन्मध्यपातित्वेन धारणस्य तथात्वमुच्यते, प्रकृते ज्ञानं भक्तिं वाधिकृत्य न कर्म विहितमिति दृष्टान्तवैषम्यमिति चेत्, न । उक्तानुपपत्त्या स्वानिन्द्यमेव कर्म श्रुतिर्विदधातीत्यवश्यं वाच्यम् । निन्दायां चेतरपदाज्ज्ञानमध्यपातिन एव तद्विषयस्य प्राप्तेरावश्यकत्वात् । तथा च भगवज्ज्ञानस्येतरानिरपेक्षत्वेन स्वरूपोपकारित्वमस्य कर्मणो वाच्यम् । तथा चोक्तं "दानव्रततपोहोमजपस्वाध्यायसंयमैः । श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते ॥" (भाग. १०. ४५. २४.) इति । "एष नित्यो महिमा" (बृ. ४. ४. २३.) इतिश्रुतिरपि यज्ज्ञाने सति विहितनिषिद्धकर्मफलासम्बन्धस्तद्वित् स्यादित्यनुक्त्वा "तस्यैव पदवित् स्यात्" (बृ. ४. ४. २३.) इति यदुक्तवती तेन पदयोर्भक्तिमार्गरूपत्वात् तत्र च पदयो-

---

ततः किंचनेति वाक्यद्वयमेकादशस्कन्धीयम् । **तथा** त्याज्यत्वम् । दृष्टान्तवैषम्यमाशङ्कते **नन्वि**ति । समाधानमाहुः **उक्ते**ति । पूर्वकाण्डवैयर्थ्यप्रसक्तिरूपयानुपपत्त्या । **निन्दायामि**ति । अथेतर इत्यविद्वन्निन्दावाक्ये कर्मणा ज्ञानाङ्गत्वमुक्त्वा भक्त्यङ्गत्वे मानमाहुः **तथा चोक्तमि**ति । श्रौतमानमाहुः **एष नित्ये**ति । एष नित्यो महिमा ब्राह्मणस्य । इदं च तृतीयाष्टके ब्राह्मणे-

रेव सेव्यत्वेन मुख्यत्वात् तज्ज्ञानानुकूलप्रयत्नमेव पूर्वं विदधते। तेन "शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः। त एव पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाम्बुजम्।" (भाग. १. ९. २६.) इतिवाक्याच्च वर्णाश्रमधर्मा आत्मधर्माश्च पदज्ञानसाधनत्वेन कर्तव्या इति सिद्धम्। "तस्यैव" (बृ. ४. ४. २३.), तच्छब्दस्य प्रसिद्धार्थकत्वाल्लोकवेदप्रसिद्धस्य पुरुषोत्तमस्यैव, तत्रापि "पदवित्" एव दीनभावेन भक्तिमार्गीयज्ञानवानेव "स्यादेव" इत्येवकारः सर्वत्रानुषज्यते। तथा सति भक्तौ जातायां स्वत एव भवतीति ज्ञापयितुं "तं विदित्वा" (बृ. ४. ४. २४.) इति पश्चादुक्तवतीति तदाशयो ज्ञायते। अत एव पूर्वं कर्म निरूपितं साधनत्वात्।

स्यादेतत्। भक्तिसाधनत्वमेव चेत् कर्मणः श्रुतेरभिप्रेतं तदा भगवद्विदि तत्फलासम्बन्ध इत्यनुपपन्नमिति चेत्, मैवम्। कर्मणां हि भक्त्युत्पत्तौ स्वरूपयोग्यतासम्पादकत्वमेव। "नायमात्मा" (कठ. २. २२.) इतिश्रुतेः कर्मज्ञानाभ्यामलभ्यत्वाद् भगवतः।

समाप्तिप्रपाठके। एतावता यत्सिद्धं तदाहुः **तेने**त्यादिना। स्वल्पोपपादने परितोभावात्। विशेषेण श्रुत्यर्थमाहुः **तस्यैवे**त्यादिना। **तच्छब्दस्ये**ति। तस्यैवात्मा पदवित्तं विदित्वेतिश्रुतिः। तत्रत्य तस्यैवेति तच्छब्दस्येत्यर्थः। **सर्वत्र** पदविच्छब्देपि। **पूर्वं** पूर्वार्धे। अत्र **श्रीप्रकाशकृतस्तु** वस्तुतस्तु तेनेत्यादिसिद्धार्थकथनात्पूर्वस्तस्यैवेत्यादिग्रन्थो लेखकभ्रमात्पश्चात्पतित इति **प्रतिभातीत्याहुः**।

पुनराशङ्कते **स्यादेतदि**ति। **भगवद्विदि** भगवज्ज्ञानवति।

स्वरूपयोग्यतापेक्षापि मार्यादिकस्य न तु पौष्टिकस्यात एव वाशब्द उक्तोनियमवाची। तथा सति भगवदनुग्रहश्चेत् तदा भक्तिस्तया पुरुषोत्तमज्ञानं तदा कर्मतत्फलसम्बन्धगन्धोपि नेति किमनुपपन्नम्। एतेन "तमेव विदित्वा मुनिर्भवति" (ब. ४. ४. २२.) "अग्राह्यो न हि गृह्यते" (बृ. ३. ९. २६.) इत्यादिश्रुतीनां मिथो विरोधः परिहृतः। भक्त्या ग्राह्यत्वात् तदितरसाधनाग्राह्यत्वात्। अत एव "विविदिषन्ति" न तु विदन्त्यपीत्याशयवती "तमेतं वेदानुवचनेन" (८. ४. ४. २२.) इतिश्रुतिः पठ्यते। न चानुपदमेव "तमेव विदित्वा मुनिर्भवति" (बृ. ४. ४. २२.) इत्युक्तेः सान्निध्यादुक्तसाधनैरेव वेदनमभिप्रेतमिति वाच्यम्। वेदानुवचनादीनां सर्वेषां वेदनसाधनत्वे सर्वेषां तत्कर्तणां वेदनसम्भवेन "मुनिर्भवति" (बृ. ४. ४. २२.) इत्येकत्वं तद्विदि न वदेत्। अतो ज्ञानं कस्यचिदेकस्य भवतीति दुर्लभत्वं ज्ञाप्यते। "मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये। यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥" (भ. गी. ७. ३.) इतिभगवद्वाक्याच्च। तर्हि वेदानुवचनादिषु निःशङ्का प्रवृत्तिः कथम्। इत्थम्। "स

समाधानमाहुः **नैवमिति**। **उक्त** इति। सूत्रे उक्त इत्यर्थः। **एतेनेति**। एता[दृ]शार्थकथनेन। **अत एवेति**। ज्ञानविषयत्वे साधनबलाभावादेव। **इत्याशयवती** यज्ञादीना ज्ञाने स्वरूपयोग्यत्वसपादकत्वं बोध्यमित्याशयवतीत्यर्थः। अग्रिमवाक्यविरोधाशङ्कते **नचेति**। **उक्तसाधनैः** वेदानुवचनादिसाधनैः। नन्वेवंरीत्या कस्यचिज्ज्ञानं चेत्तत्राशाङ्कते **तर्हीति**

वा अयमात्मा" (बृ. ४. ४. २२.) इत्यादिकया पूर्वश्रुत्या भगवन्माहात्म्यं श्रुत्वा यथाकथञ्चित् तद्वेदनौत्सुक्ये सति सत्सङ्गाभावेन भक्तिमार्गापरिचयात् कर्ममार्गमात्रमाश्रमधर्मत्वेनालौकिकार्थसाधकत्वेनापि पूर्वं ज्ञातमस्तीति तदेव भगवद्वेदनेपि साधनमिति मन्यमानास्तदेव कुर्वन्ति । ननु वैदिकसाधनानां वैयर्थ्यं कथमिति चेत्, न । श्रमकृतत्वेपि जन्मान्तरीयाक्षरज्ञानोपयोगिसंस्काराधायकत्वेनावैयर्थ्यात् ॥ २० ॥

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥

ननु साम्यश्रुतेर्हेतोः कर्मशेषत्वं ज्ञानस्य यदपास्तं तन्नोपपद्यते । साम्योक्तेर्ज्ञानस्तुतिरूपत्वात् । अपि च तथा ज्ञानिनोपि कर्मोपादानात् कर्मकृतिस्वीकारादितियावत् । अन्यथा ज्ञानिनां कर्मकृत्यभावेन तत्कृतगुणदोषाप्रसक्त्या तन्निषेधानुपपत्तिः स्यात् । तेषामपि तत्कृतगुणदोषसम्बन्धोस्त्येवेतिज्ञापनाय मात्रपदम् । निषेधेनेतरसाधारण्यं परिह्रियते । तथा च ज्ञानिनोपि कर्मकरणात् कर्मशेषत्वं ज्ञानस्य निःप्रत्यूहमिति चेन्नैवं वक्तुं युक्तम् । पदज्ञानस्य कर्मफलासम्बन्ध-

---

प्रवृत्तिमुपपादयन्ति **इत्थमिति** । वैयर्थ्यमाशङ्कते **नन्विति** । समाधानमाहुः **श्रमेति** ॥ २० ॥

सूत्रस्य पूर्वपक्षभागस्यार्थमाहुः **नन्विति** । ननु निषेधो य उक्तः स कथमित्यत आहुः **निषेधेनेति** । **इतरेति** । अज्ञानिना कर्मजन्यगुणदोषौ ज्ञानिनां नेतिभावः । **कर्मकरणादिति** । संन्यासाश्रमोक्तकर्मकरणादित्यर्थः । सूत्रस्थपरिहारभागस्यार्थमाहुः **नैवमिति** । **विधेयत्वमेवेति** । अत्रायम-

फलकत्वस्यापूर्वत्वाद् विधेयत्वमेव । न हि यस्य कर्मणो ज्ञानस्य वा यत् फल तदुक्तिरपि स्तुतिरेवेति युक्तम् । तयोरुच्छेदापत्तेः । विधिर्हि प्रवर्तकः । तस्य पुरुषप्रवृत्त्युपयोग्यर्थकथनेनैव चारितार्थ्यादन्यार्थकथनस्य स्तुतित्वमस्तु नाम । न ह्येवं प्रकृते । मुमुक्षोः कर्मबन्धाभावप्रेप्सोस्तत्साधनत्वज्ञान एव प्रवृत्तिसम्भवात् । यच्च कर्मफलसम्बन्धनिषेधानुपपत्त्या कर्मसम्बन्ध इत्युक्तं तन्न साधीयः । न हि तरणौ तमःकार्याभाव इत्युक्ते तत्प्राप्तिरपि सम्भवति ।

अथवा पुरुषोत्तमज्ञानमुख्यफलस्यातिमहत्त्वेन साक्षाद् वक्तुमशक्यत्वं ज्ञापयन्ती कैमुतिकन्यायेन परम्परया तदाहानयर्चा । " तं विदित्वा ब्राह्मणो भवति " इतिश्रुतेर्ब्राह्मणपदेन ब्रह्मविदुच्यते । तथा चाद्यपदेन बुद्धिस्थब्राह्मणमाहात्म्योद्देशे कृते स क इत्याकाङ्क्षायामाह तं ब्राह्मणं विदित्वा विहितनिषिद्धफलासम्बन्धी भवतीतिलक्षण इत्यर्थः । साक्षाद् भगवद्विदः किमु वाच्यमितिभावः । अतः " तस्यैव " तच्छब्दस्य पूर्वपरामर्शित्वाद् ब्राह्मणस्यैव भगवद्विदो भक्तस्यैव "पदवित् स्यात्" (बृ. ४. ४. २३.) तज्ज्ञानानुकूल-

---

पूर्वविधिः रात्रिसत्रन्यायेन बोध्यः । इदमेवाहुः **न हीति** । पूर्वोक्तमाशङ्क्यमनुवदन्ति **यच्चेति** । निषेधन्ति **तन्नेति** । **तरणौ** सूर्ये ।

पक्षान्तरमाहुः **अथवेति** । **तदाहेति** । अनया ऋचा महत्त्वमाहेत्यर्थः । तदेव व्याकुर्वन्ति **तं विदित्वेतिश्रुतेः** । पदवित्तं विदित्वेतिश्रुतेः ।

प्रयत्नवान् स्यात् । तद् भजेतेतियावत् । तथा च यत्र भगवद्विषयक-ज्ञानस्याप्युक्तरीत्या न कर्मशेषत्वं वक्तुं शक्यं तत्र भगवज्ज्ञानस्य तथात्वं दूरदूरतरमिति सर्वं सुस्थम् ॥ २१ ॥

भावशब्दाच्च ॥ २२ ॥

पूर्वसूत्रेणापूर्वत्वेन विधेयतामुपपाद्य विधिशब्देनापि तामाह **भावशब्दाच्चेति** । विधिशब्दादपि ज्ञानस्य विधेयत्वमित्यर्थः । विधिशब्दस्तु पदवित्स्यादिति ॥ २२ ॥

अथ प्रकारान्तरेण शङ्कते । "भृगुर्वै वारुणिः वरुणं पितर-मुपससार" (तै. ३. १.) "अधीहि भगव इति होपससाद

भगवद्विषयकेति । भगवज्ज्ञानिज्ञानवत इत्यर्थः । **सुस्थमिति** । संन्यासा-श्रमीणकर्मशेषत्वं ज्ञानस्य नास्तीत्यनवद्यमित्यर्थः ॥ २१ ॥

सूत्रप्रयोजनमाहुः **पूर्वसूत्रेणेत्यादि** । सूत्रं व्याकुर्वन्ति **विधि-शब्दादित्यादि** । विधिबोधकशब्दादित्यर्थः । तादृशशब्दमाहुः **पदवित्स्या-दिति** । स्यादिति विधौ लिङ् । कुर्यात् क्रियेत कर्तव्यं भवेत्स्यादितिपञ्चकम् । एतत्स्यात्सर्ववेदेषु नियतं विधिलक्षणमिति प्राचा स्मरणात् । (इदं सूत्रं सभाष्यं विवरणपुस्तकस्थाणुभाष्ये दृश्यते शाङ्करभाष्यादिवत्, किन्तु मुद्रिताणुभाष्यपुस्तकेषु हस्तलिखिताणुभाष्यपुस्तकेषु च न दृश्यते । अत्र प्रकाशकारा आहुः—एतदग्रे भावशब्दाच्चेति सूत्रं पठ्यते ।...तच्च "विधिर्वा धारणवत्" (ब्र. सू. ३. ४. २०) इत्यत्रैतस्यैव स्यात्पदविदिति श्रुतिव्याख्यानेनैव व्युत्पादितमतः प्रयोजनाभावादुपेक्षितमिति प्रतिभाति । लेखकदोषात् त्रुटितं वेति ज्ञयमिति । सं.) ॥ २२ ॥

सूत्रं व्याकुर्वन्ति **अथेति** । इदं सूत्रैकदेशपूर्वपक्षावतरणम् । भृगुर्वै इति

सनत्कुमारं नारदः" (छा. ७. १. १.) "प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम" (कौ. ३. १.) इत्याद्युपाख्यानैर्हि ब्रह्मविद्या निरूप्यते । "सर्वाण्याख्यानानि पारिप्लवे शंसति" (आप. श्रौ.) इति श्रुत्या शंसनशेषत्वं तेषामवगम्यते । शंसने शब्दमात्रस्य प्राधान्येनार्थज्ञानस्यातथात्वादुपदेशान्ताख्यानप्रतिपाद्यं ज्ञानं मन्त्रार्थवदप्रयोजकमिति कर्मशेषत्वमपि न वक्तुं शक्यम् । प्राधान्यं तु दूरापास्तं धर्मिण एवासिद्धेरित्याह पारिप्लवार्था इति ।

पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २३ ॥

उक्तरीत्या सर्वा उपाख्यानश्रुतयः कर्मशेषभूता इत्यर्थः । अत्राचार्य एवमपि कर्मशेषत्वं ज्ञानस्य न सम्भवतीत्याह नेति । कुतः । विशेषितत्वात् । कर्मणः सकाशाज्ज्ञानं विशेषितमधिकधर्मविशिष्टत्वेनोक्तमिति न ज्ञानस्य कर्मशेषत्वमित्यर्थः । ननु विशेषितत्वमाख्यानेष्वेवेत्यप्रयोजको हेतुरिति चेत्, मैवम् । आचार्याशयानवगमात् । तथा हि पूर्वं तुष्यतु दुर्जन इतिन्यायेनाख्यानानां शंसनशेषत्वमुपेक्ष्योच्यते । न ह्याख्यानेष्वेव ज्ञानं निरूप्यते किन्त्वन्यत्रापि । तथा हि तैत्तिरीयके पठ्यते "ब्रह्मविदाप्नोति परं तदेषाभ्युक्ता सत्यं ज्ञानमनन्तं ब्रह्म" (तै. २. १.) इत्युपक्रम्य माहात्म्यविशेषज्ञानार्थमाकाशादिकर्तृत्वमुक्त्वानन्दमयत्वं रसरूपत्व-

---

तैत्तिरीयोपनिषदि । इति होपससादेति छान्दोग्ये । प्रतर्दनेति कौषीतकिब्राह्मणे । तेषामुपाख्यानानाम् । धर्मिण एवासिद्धेरिति । धर्मिणः ज्ञानस्य ।

मुक्त्वा "भीषास्मात्" (तै. २. १.) इत्यादिना सर्वनियामकत्वं चोक्त्वा भगवानेव पूर्णानन्द इतिज्ञापनायानन्दगणनां कृत्वानन्दमयं पुरुषोत्तमं प्राप्तेनानुभूयमानानन्दस्वरूपं "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" (तै. २. ९.) इत्यादिनोक्त्वा तद्विदो माहात्म्यमुच्यते "एतꣳ ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवम्" (तै. २. ९.) इति। अत्र ज्ञानवान् सच्चिद्रूपं देशकालापरिच्छिन्नं सर्वकर्तारं निरवध्यानन्दात्मकं सर्वनियामकं मनोवागगोचरं पुरुषोत्तमं प्राप्नोति। कर्म तु स्वयं क्लेशात्मकं तद्वांश्च "अस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" (बृ. ४. ३. ३२.) इतिश्रुतेः क्षुद्रतरानन्दजनकस्वर्गपश्वादिफलमाप्नोतीति विहितनिषिद्धकर्मणोश्चाप्रयोजकत्वं तस्मिन्नुच्यत इति कर्मणः सकाशाज् ज्ञानस्य निरवधिरेव विशेष उच्यत इति न धर्म्यसिद्धिर्न वा कर्मशेषत्वं ज्ञानस्य सिध्यति ॥ २३ ॥

तथाप्याख्यानप्रतिपादितविद्यानामसिद्धिरेवेति चेत् तत्राह

तथा चैकवाक्यतोपबन्धात् ॥ २४ ॥

यथा केवलश्रुतेर्विद्याप्राधान्यं तथैवोपाख्यानश्रुतीनामित्यर्थः। चकारेण प्रश्नोत्तरैर्निर्णीतार्थप्रतिपादनम्। महतामेवात्र प्रवृत्तिः।

परिहारं समवतारयन्ति **अत्रेति**। **विशेषितं** विशेषो जातोऽस्येत्यर्थः। **अधिकेति**। परमानन्दरूपफलजनकत्वेनेत्यर्थः। एतदेवात्र उच्यते। शेषं स्फुटम् ॥ २३ ॥

अग्रिमसूत्रप्रयोजनं दर्शयन्ति **तथापीति**। **असिद्धिरिति**। कर्मशेषत्वा-

सापि बह्वायासपूर्विकेति विद्यामाहात्म्यज्ञापनं प्ररोचनं चाधिकमुपाख्यानानामुपाख्यानं विनैव विद्यानिरूपिकायाः श्रुतेः सकाशादित्युच्यते । तत्र हेतुरेकवाक्यतोपबन्धादिति । "आचार्यवान् पुरुषो वेद" (छा. ६. १४. २.) इतिश्रुत्यैकवाक्यताज्ञानमाख्यानं विना न भवतीति तदर्थमुपबन्धाद् गुरुशिष्यकथोपबन्धादित्यर्थः ।

अथवोपाख्यानरहितायां श्रुतौ यथा ज्ञानं निरूप्यते तथैव "अधीहि भगव इति होपससाद सनत्कुमारं नारदः" (छा. ७. १. १.) इत्याद्याख्यानेष्वपि निरूप्यत इत्यनाख्यानश्रुत्यैकवाक्यतयैवाख्याने ज्ञानस्वरूपोपबन्धात् प्रतिपादनादित्यर्थः । नैकट्यवाचिनोपपदेन वस्तुसती या तत्तद्गुरुतत्तच्छिष्यकथा तत्सामीप्यमत्रोच्यते । अन्यथा सामीप्यासम्भवादतः कल्पितत्वशङ्कानिरासः । नन्वेवमपि पारिप्लवार्थत्वेन बाधकं पश्याम इति चेत्, उच्यते । अश्वमेधप्रकरणे "मनुर्वैवस्वतो राजा" (आप. श्रौ.) इत्यादी-

---

भावस्येतिशेषः । सूत्रं व्याकुर्वन्ति यथेति । **प्ररोचनमिति** । इदं चावान्तरफलम् । एकवाक्यतामुपपादयन्ति **आचार्ये**त्यादिना ।

नन्वाख्यानवतीना तच्छेषत्वाभावः, किन्त्वाख्यानरहितानां तच्छेषत्वं कुतः । आख्यानोक्तार्थाकाङ्क्षत्वात् । अतो नोक्तदोषनिवृत्तिरित्यतः पक्षान्तरमाहुः **अथवेति** । **नैकट्ये**त्यनेनोपसर्गकथनस्य तात्पर्यं सूचितम् । अत्राशङ्कते **नन्वेवमपीति** । एवं परस्पराकाङ्क्षया एकवाक्यत्वे समाधानमाहुः **उच्यत** इति । एवं चानेनवाक्येन विज्ञानां न कर्मशेषत्वसिद्धिः । प्रकरणेन

न्याख्यानानि यत्र पठितानि तत्र सामान्यतस्तेषां विनियोगः "सर्वाण्याख्यानानि पारिप्लवे शंसति" इत्यनेनोक्त इति सर्वशब्द-स्तदाख्यानपर एव न त्वाख्यानान्तरपरोपि । प्रकरणस्य नियामकत्वात् । एवं सति यदा पारिप्लवाख्यकर्मप्रस्तावस्तदा विशेषविनियोग उक्तः "पारिप्लवमाचक्षीत" (आप. श्रौ.) इति । तत्र प्रथमेहनि "मनुर्वैवस्वतो राजा" (आप. श्रौ.) इति । द्वितीयेहनि "इन्द्रो वैवस्तः" (आप. श्रौ.) इति । तृतीयेहनि "यमो वैवस्वतो राजा" (आप. श्रौ.) इत्याद्याख्यानविशेषा वाक्यशेषे विनि-युज्यन्ते । आख्यानसामान्यपरत्वे त्वहोविशेष उपाख्यानविशेष-विधानं न स्यात् । अतएव पारिप्लवमित्येकवचनमतो नाख्यानान्तर-गन्धसम्बन्धोपि । प्रापकाभावत् ॥ २४ ॥

अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २५ ॥

एवं "पुरुषार्थोतःशब्दात्" (ब्र. सू. ३. २. १.) इत्यु-पक्रम्य ज्ञानस्य फलसाधने कर्मानपेक्षत्वमुपपाद्य तत्रैवोपपत्त्यन्त-रमाह । यतो ज्ञानी ज्ञानेन स्वयमेव यज्ञात्मको जातोत एव जरा-मर्याग्निहोत्रेग्निस्तदिन्धनं समिदादि तदादय आज्यादयस्तेषामन-पेक्षोक्ता श्रुतौ । तैत्तिरीयके पठ्यते "तस्यैवंविदुषो यज्ञस्यात्मा

सर्वशब्दार्थसंकोचावगमादितिभावः । लिङ्गमपि सङ्कोचे मानमाहुः एवं सतीति । सर्वशब्दार्थसंकोचे गमकान्तरमाहुः अत एवेति ॥ २४ ॥

सूत्रं व्याकुर्वन्ति एवमिति । तैत्तिरीयके उपनिषदि अन्ते पठ्यते

यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्निः" (नारा. ८०.) इत्यादि। एतेन यदन्यस्य यज्ञतासम्पादकं तस्य स्वकार्यसाधने कथं यज्ञापेक्षा भवेदितिभावः सूच्यते ॥ २५ ॥ १ ॥

इति तृतीयाध्याये चतुर्थपादे प्रथमं पुरुषार्थोऽतःशब्दादित्यधिकरणम् ॥ १ ॥

उक्तन्यायेन ज्ञानं प्रति कर्मणः फलोपकारित्वाभावेपि स्वरूपोपकारित्वमस्ति न वेति चिन्त्यते। तत्र नेति पूर्वः पक्षः। गुरूपसत्तितदुपदेशैरेव तत्सम्भवात्। "आचार्यवान् पुरुषो वेद" (छा. ६. १२. २.) इतिश्रुतेः। अत्र सिद्धान्तमाह सर्वापेक्षेति।

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥

सर्वेषां कर्मज्ञानभक्तीनां पुरुषोत्तमज्ञानोत्पत्तावस्त्यपेक्षा। अत्र प्रमाणमाह यज्ञादिश्रुतेरिति। यज्ञादिनिरूपिका श्रुतिरेव प्रमाणं यत इत्यर्थः। इदमात्राकूतम्। पुरुषोत्तम एव स्वतन्त्रपुरुषार्थरूपस्तत्प्राप्तिरेव फलं तत्र प्रेमभक्तिजं तज्ज्ञानमेव साधनमिति "ब्रह्मविदाप्नोति परम्" (तै. २. १.) इत्यादिना "य एतद् विदुर-

---

तस्यैवं विदुष इत्यत्र जरामर्याग्निहोत्र पठ्यत इत्यर्थः ॥ २५ ॥ इति प्रथमाधिकरणम्।

अधिकरणमवतारयन्ति उक्तन्यायेनेति। संशयमाहुः स्वरूपेति। पूर्वपक्षमाहुः तत्रेति। सिद्धान्तमाहुः सर्वेषामिति। कथं प्रमाण-

मृतास्ते भवन्ति " (बृ. ४. ४. १४) इत्यादिश्रुतिसहस्रैश्च प्रतिपाद्यते । "अथेतरे दुःखमेवोपयन्ति" (बृ. ४. ४. १४.) इतिश्रुत्या ज्ञानरहितानां दुःखमात्रप्राप्तिरुच्यते। एवं सति स्वतोऽपुरुषार्थरूपं यज्ञादिकं सर्वार्थतत्त्वप्रतिपादिका श्रुतिर्यन्निरूपयति तत् सर्वथा पुरुषार्थसाधनत्वेनैवेति मन्तव्यम् । तच्च निष्कामतयैव कृतं तथा। अत एव वाजसनेयिशाखायां " यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति " (बृ. ४. ४. ५.) इत्युपक्रम्य पठ्यते " तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मण इति तु कामयमानोथाकामयमानो योकामो निष्काम आत्मकाम आप्तकामो भवति न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते ब्रह्मैव सन् ब्रह्माप्येति (बृ. ४. ४. ६.) इत्यादि। अत्राथाकामयमानः कर्ता निरूप्यत इति शेषः । यः पुमान् कर्मकृतावकामस्ततो निष्कामः सन्नात्मकामो निरुपधिस्नेहवान् प्रभौ ततो भगवत्प्राप्त्याप्तकामो भवतीत्यर्थः । " यथाकारी " इत्यादिना कर्मकर्तुरेवोपक्रमादथाकामयमान इत्यनेनापि तथाभूतः स एवोच्यते । एवं सति सत्कर्मणि प्रवृत्त्यर्थं विविधफलानि स्वयमेवोक्त्वा जनान् भ्रामितवानिति स्वोक्तकरणा-

---

मत आहुः **इदमत्रेति** । **एवं सति** दुःखप्रापकत्वे सति । **मन्तव्यमिति** । निरूपणेन सर्वथा स्वीकर्तव्यम् । **तच्चेति** । कर्म च । **तथा** भगवज्ज्ञानोपयोगि । अथाकामयमान इति श्रुत्यंशव्याख्यानमाहुः **अथाकामयमान इति**। **तथाभूत इति**। अकामः कर्मकरणे निष्कामः फले । एतावता द्विविधः कर्ता निरूपितः।एतेन यत्सिद्धं तदाहुः **एवं सतीति**। अत्रार्थे स्मृतिं

च्चिरेण दयया निष्कामं करोति । सकामतयापि क्रियामणेनैव वैदिककर्मणानेकजन्मभिः संस्कारविशेषप्रचयेनापि तथा । "कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते" (म. भा. १२. २७६. ३९.) इत्यादिस्मृतिभ्यश्च ज्ञानोत्पत्तौ कर्मापेक्षास्तीति । चकारेण पुष्टावङ्गीकृतस्य सर्वानपेक्षेति सा समुच्चीयते । अत एव नायमात्मेत्यादिश्रुतिर्न विरुध्यते । ननु ज्ञानद्वारा कर्मादीनामेव फलसाधकत्वमस्त्विति शङ्कानिरासाय दृष्टान्तमाहाश्ववदिति । यथा स्वेष्टफलसाधकदेशव्यवधानात्मकदेशातिक्रमेऽश्वस्य साधनत्वं न तु तत्र फलसिद्धावपि तथाधिभौतिकाध्यात्मिकाधिदैविकप्रतिबन्धनिवृत्तावेव साधनत्वं न तु भगवत्प्रासावपीत्यर्थः । इदं च मुमुक्षुभक्तविषयकमिति ज्ञेयम् ।

आत्यन्तिकभक्तिमतां भक्तीतरानपेक्षणात् ॥ २६ ॥

ननु "तस्मादेवंविच्छान्तो दान्तः" (बृ. ४. ४. २३.) इत्यादिना शमादेरेव ज्ञानसाधनत्वमुच्यते न तु यज्ञादेरिति चेत् तत्राह

प्रमाणयन्ति **कषायेति** । अनेन प्रकारेण कर्मापेक्षा या भगवत्साक्षात्कारे निरूपता सा मर्यादामार्गे शरणगमनध्यानादीनां तथा भक्त्युपयोगिनां भजनादीनां च गोपालतापिन्युक्तानामप्यपेक्षास्ति । सा चाग्रिमसूत्रे व्युत्पादयिष्यते । **चकारेण** च समुच्चीयते । एतावता ज्ञाने कर्मापेक्षा सिद्धा न तु ज्ञाने भक्तेरपेक्षास्तीति तत्कथनप्रयोजनमाहुः **इदं चेति** । कर्मापेक्षणमित्यर्थः ॥ २६ ॥

सूत्रमवतारयन्ति **नन्विति** । सूत्रं व्याकुर्वन्ति **शमदमेति** । **तथा-**

शमदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ॥ २७ ॥

शमदमाद्युपेतो भक्तिमार्गेऽपि स्यादेव यद्यपि तथापि तदङ्गतया "आत्मन्येवात्मानं पश्येत्" (बृ. ४. ४. २३.) इति ज्ञानमार्गीयज्ञानाङ्गतयैव शमादिविधेर्हेतोर्ज्ञानमार्गे तेषामवश्यानुष्ठेयत्वात् तथाविधिरित्यर्थः । भक्तिमार्गे स्वत एव शमादीनां सम्भवेऽप्यावश्यकत्वं न तेषामितिभावः ॥ २७ ॥

ननु सत्त्वशोधकत्वेन यज्ञशमदमादेर्विधानमिति मतं नोपपद्यते "आहारशुद्धौ सत्त्वशुद्धिः" (छा. ७. २६. २.) इतिश्रुतेः तद्विरुद्धा सर्वान्नभक्षणानुमतिरपि यतः श्रूयते छन्दोगानां "न ह वा एवंविदि किञ्चनानन्नं भवति" (छा. ५. २. १.) तथा वाजसनेयिनां "न ह वा अस्यानन्नं जग्धं भवति" (बृ. ६. १. १४.) इत्यादि । तस्मात् सत्त्वशुद्ध्यर्थं यज्ञादेर्न विधानमिति प्राप्ते विषयव्यवस्थामाह

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २८ ॥

आहारदौर्लभ्येन प्राणात्यये उपस्थिते प्राणधारणस्य ज्ञानान्तरङ्गतमसाधनत्वेनाहारस्य देहपोषकत्वेन ततो बहिरङ्गत्वात् तदनुमतिः

विधिरिति । साधनत्वेन विधिरित्यर्थः । भक्तिमार्गे व्यवस्थामाहुः **भक्तीति** ॥ २७ ॥

यत्किञ्चिदाशङ्कते **नन्विति** । सूत्रार्थमाहुः **आहारेति** । **तदनुमतिः**

क्रियत इत्यर्थः । अत्र प्रमाणमाह तद्दर्शनादिति । " चाक्रायणः किलर्षिरापद्गत इभ्येन सामिखादितान् कुल्माषांश्चखाद " (छा. १. १०. १.) इत्यादिश्रुतिदर्शनादित्यर्थः । यद्यपि ज्ञानसाधनत्वेन सत्त्वशुद्धेरपेक्षितत्वाज्जाते ज्ञाने तत्साधनानपेक्षणादेवंविदीतिवचनात् तादृशे सार्वदिक्यपि तदनुमतिर्नानुचिता । " अपि स्मर्यते " (ब्र. सू. ३. ४. २९.) इत्यनेनाविदुषोप्यनुमतेर्वक्ष्यमाणत्वाच्च । तथाप्याचार्येणावस्थाविशेषविषयकत्वमुक्तं यत् तेन ज्ञानिनोप्यनापदि विहितत्यागोविहितकरणं च चित्तमालिन्यजननेन ज्ञानतिरोधायकमितिश्रुत्यभिमतमिति ज्ञाप्यते । अत एव श्रीभागवते द्वितीयस्कन्धे " विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितम् । सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम् । ऋषे विदन्ति मुनयः प्रशान्तात्मेन्द्रियाशयाः । यदा तदेवासत्तर्कैस्तिरोभूयेत विप्लुतम् ॥ " (भाग. २. ७. ३९–४०.) इति ब्रह्मणोक्तं " ज्ञानिनामपि चेतांसि देवी भगवती हि सा । बलादाकृष्य मोहाय महामाया प्रयच्छति " (मा. पु. दे. ६. ५४.) इति मार्कण्डेयेनाप्युक्तम् । एषा ज्ञानमार्गीयज्ञानवतो व्यवस्थेति ज्ञेयम् । भक्तिमार्गीयस्यैवमापदसम्भवात् " अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् " (भ. गी. ९. २२.) इतिभगवद्वाक्यात् । " मामेव

क्रियते । आहारानुमतिः प्राणधारणार्थं क्रियत इत्यर्थः । किंचिदाशङ्कते **यद्यपीति** । परिहरति **तथापीति** । भक्तिमार्गे व्यवस्थामाहुः **भक्तीति** ।

ये प्रपद्यन्ते मायामेतां तरन्ति ते " (भ. गी. ७. १४.) इत्यत्रैवकारेण पुरुषोत्तमज्ञानवत एव मायातरणोक्तेरक्षरमात्रज्ञानवतां तथात्वमुचितम् ॥ २८ ॥

अबाधाच्च ॥ २९ ॥

आपदि तथान्नभक्षणेन ज्ञाने चित्ताशुद्ध्यसम्भवेन तज्जनितप्रतिबन्धाभावाच्च न दोष इत्यर्थः ॥ २९ ॥

अपि स्मर्यते ॥ ३० ॥

आपद्यविदुषोपि दुष्टान्नभक्षणे पापाभावो यत्र स्मर्यते तत्र विदुषि श्रुत्यनुमते का शङ्केत्यर्थः । स्मृतिस्तु " जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः । लिप्यते न स पापेन पद्मपत्रमिवाम्भसा " (मनु. १०. १०४.) इति ।

अथवा विदुषो दुष्टकर्मासम्बन्धः । " ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा " (भ. गी. ४. ३७.) इति स्मर्यतेपीत्यर्थः ॥ ३० ॥

शब्दश्चातोकामकारे ॥ ३१ ॥

यतो ज्ञानाग्निरेव सर्वकर्मदहनसमर्थ इति फलदशायां कामकारेपि न दोषोत एव साधनदशायां तदभावेन " तस्मादेवंवि

ज्ञानमार्गे त्वापत्तिरस्तीत्याहुः **मामेवेति** । मायातरणाभावादापत्तिरस्तीतिभावः ॥ २८ ॥

अबाधाच्च–अपिस्मर्यते–शब्दश्चातोकामकारे–एतत्सूत्रत्रयभाष्यं स्पष्टम् । २९, ३०, ३१ ॥ इति द्वितीयाधिकरणम् ।

च्छान्तो दान्त उपरतस्तितिक्षुः " (बृ. ४. ४. २३.) इत्यादिरूपः शब्दः कामकारनिवर्तकः श्रूयत इत्यर्थः ॥ ३१ ॥ २ ॥

इति तृतीयाध्याये चतुर्थपादे द्वितीयं सर्वापेक्षेत्यधिकरणम् ॥२॥

एवं ज्ञानस्य कर्मनाशकत्वे सिद्धे जातज्ञानस्याश्रमकर्म कर्तव्यं न वेति चिन्त्यते । तत्र फलस्य जातत्वात् कृतस्यापि नाश्यत्वेनाप्रयोजकत्वान्न कर्तव्यमिति पूर्वः पक्षः । तत्र सिद्धान्तमाह

विहितत्वाच्चाश्रमकर्मापि ॥ ३२ ॥

यथा ज्ञानिनामप्यनापदि शिष्टानामेवान्नं भक्षणीयं **विहितत्वात् तथाश्रमकर्मापि** कर्तव्यमेव नित्यं विहितत्वादित्यर्थः । यथानापद्यशिष्टान्नभक्षणं दोषाय निषिद्धत्वात् । एतच्चोपपादितं " सर्वान्नानुमतिः " (ब्र. सू. ३. ४. २८.) इत्यत्र । तथा नित्यत्यागोपि प्रत्यवायजनक इति तत् कर्तव्यमेवेतिभावः ॥ ३२ ॥

यच्चोक्तं कृतस्यापि नाश्यत्वेनाप्रयोजकत्वान्न कर्तव्यमिति तत्राह

सहकारित्वेन च ॥ ३३ ॥

शमदमादीनामन्तरङ्गसाधनानां **सहकारी**ण्याश्रमकर्माणीत्येतद्रहितैः शमादिभिरपि ज्ञानं न स्थिरीकर्तुं शक्यमिति तानि

अधिकरणप्रयोजनमाहुः । **एवमिति** । संशयमाहुः **जातज्ञानस्येति** । पूर्वपक्षमाहुः **तत्रेति** । सूत्रार्थमाहुः । **यथेति** ॥ ३२ ॥

सूत्रमवतारयन्ति **यच्चोक्तमिति** । ननु ज्ञानस्य सर्वकर्मनाशकत्वं गीतायामुक्तम् । जातज्ञानस्य ज्ञानमस्ति । तेन कर्मनाशो तेषां सहकारित्वं कथं

कर्तव्यान्येवेत्यर्थः। संसारवासनाजनकत्वस्वभावो यः कर्मणां स ज्ञानेन नाश्यत इति न सहकारित्वेनुपपत्तिः काचिदितिभावः ॥३३॥

एवं ज्ञानमार्गीयज्ञानस्थैर्यसाधनमुक्त्वा भगवच्छ्रवणादीनामित आधिक्यमावश्यकतां चाह

सर्वथापि त एवोभयलिङ्गात् ॥ ३४ ॥

भगवच्छ्रवणकीर्तनादयः साधनान्तरवद् विहितत्वेन कर्तव्या एव यद्यपि तथापि सर्वथाप्यन्येषां युगपदुपस्थितौ तदनुरोधमकृत्वापि त एव भगवद्धर्मा एव कर्तव्या इत्यर्थः। कुतः। श्रुतिलिङ्गात् स्मृतिलिङ्गाच्च। श्रुतिलिङ्गं तु "तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः। नानुध्यायाद् बहूञ् छब्दान् वाचो विग्लापनं हि तत्" (बृ. ४. ४. २१.) इति। "तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुः" (मुण्ड. २. २. ५.) इत्यपि। अत्रैवकारेण भगवदतिरिक्तं प्रतिषिध्य तद्विषयकज्ञानानुकूलं प्रयत्नं श्रवणात्मकं विज्ञायेति विधाय, स्मरणमपि तन्मात्रविषयकमेव प्रज्ञां कुर्वीतेतिवचनेन विधाय, तदेकनिष्ठताहेतुभूतानामेव शब्दानामाव-

---

युज्यत इत्यत आहुः **संसारे**ति। एवं च गीतायामिन्धनाग्निदृष्टान्त उक्तोस्ति। अग्निर्यथा एधांसि दहति, तेषां धूमादिजनकस्वभावं नाशयति, स्वस्थितिपर्यन्तमङ्गाररूपेण तत्स्वरूपं स्थापयति, एवमत्रापि स्वान्तर्गतमेव कर्मस्वरूपं कृत्वा स्थापयति। अतः सहकारित्वे अनुपपत्तिर्नास्तीत्यर्थः॥ ३३ ॥

इदानीं भक्तिमार्गीयाणां भक्तिस्थैर्यप्रकारं दर्शयितुं सूत्रमवतारयन्ति **एवमि**त्यादिना। सूत्रं व्याकुर्वन्ति **भगवदि**ति। **अन्येषामि**ति।

तेनमर्थानुसन्धानमपि कर्तव्यं नान्येषामिति नानुध्यायाद् बहूनित्य-नेनोक्तवती । अत्रान्वित्युपसर्गेण ध्यानस्य पश्चाद्भावित्वमुच्यते । तेन योग्यतया श्रवणकीर्तने एव तत्पूर्वभाविनी प्राप्येते । स्मृतिस्तु "शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः । त एव पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाम्बुजम् ॥" (भाग. १. ९. ३६.) इति, "महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः । भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः । नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥" (भ. गी. ९. १३–१४.) इति । एतेन भगवद्धर्माणामात्मधर्मत्वेनान्तरङ्गत्वादाश्रमकर्मणो देहधर्मत्वेन बहिरङ्गत्वात् तदविरोधेनैव तत् कर्तव्यमिति स्थितम् । अत एव भगवद्धर्मान्यधर्मं प्रतिषिध्य तेषां सर्वेभ्य आधिक्यं ज्ञापयितुं "स वा अयमात्मा सर्वस्य वशी" (बृ. ४. ४. २२.) इत्यादिना भगवन्माहात्म्यमुक्तम् ॥ ३४ ॥

प्रधान्येन भगवद्धर्मा एव कर्तव्या इत्यत्रोपोद्बलकान्तरमनेनोच्यते

अनभिभवं च दर्शयति ॥ ३५ ॥

अत्राश्रमधर्माणामित्यर्थः । ननु सूत्रे त एवेति तच्छब्देन परामृश्यते । पूर्वं चाश्रमधर्मा एवोक्ताः । ते तु भगवद्धर्मा इत्याशङ्कां हेतुव्याख्याने निरस्यन्ति **श्रुतिलिङ्गं** त्विति । स्मृतिलिङ्गमाहुः **स्मृतिस्त्व**िति । एवं च यत्सिद्धं तदाहुः **एतेने**ति । तथा चास्मिन् सूत्रे त एवेत्यवधारणम् । तेन च त्रयाणा युगपदुपस्थितौ भगवद्धर्माणामेव ग्रहणं ज्ञाप्यते ॥ ३४ ॥

" सर्वं पाप्मानं तरति नैनं पाप्मानं तपति " (बृ. ४. ४. २३.) इत्यादिना भगवद्धर्मानुरोधेनाश्रमकर्माकरणजदोषैरनभिभवं च श्रुतिर्दर्शयति । अतो भगवद्धर्मा एव सर्वे उत्तमानि साधनानीत्यर्थः ॥ ३५ ॥

अन्तरा चापि तु तद्दृष्टेः ॥ ३६ ॥

भगवद्धर्मेभ्य आश्रमधर्मा हीना इत्यप्यल्पमुच्यते । अपि तु तस्मिन् पुरुषोत्तमे धर्मिण्येव दृष्टिस्तात्पर्यं यस्य पुंसस्तस्याश्रमधर्मा अन्तरा च फलसिद्धौ व्यवधानरूपाश्चेति श्रुतिर्दर्शयतीति पूर्वेण सम्बन्धः । अन्तराशब्दोत्राव्ययात्मको व्यवधानवाचकः । तथा च श्रुतिः " एतद्ध स्म वै तत्पूर्वे ब्राह्मणा अनूचाना विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोयमात्मायं लोकः " (बृ. ४. ४. २२.) इत्यृणापाकरणहेतुत्वेन लौकिकोत्कर्षहेतुत्वेनापि प्रजाया अभीष्टत्वेपि तदुत्पादनव्यासङ्गेन भगवदानन्दानुभवेन्तरायो भविष्यतीति तद्दृष्ट्या तत्रोपेक्षां दर्शयति ॥ ३६ ॥

अपि स्मर्यते ॥ ३७ ॥

अग्रिमा पञ्चसूत्री एतदुपष्टम्भायैव । अनभिभवं च दर्शयन्ति–अन्तरा चापि तु तद्दृष्टेः–अपि स्मर्यते–विशेषानुग्रहश्च— एतत्सूत्राणा भाष्यं स्पष्टम् । अनुग्रहस्तु धर्मान्तरं कृपापरपर्यायम् । फलदित्सा अनुग्रहशब्दार्थो न भवति, यस्यानुग्रहमिच्छामीति वाक्यविरोधात् । अयमनुग्रह एव पुष्टिशब्देनोच्यते । पोषणं तदनुग्रह इति वाक्यात् । इदं **पुष्टिप्रवाहमर्यादाविवरणे** स्पष्टम् ॥ ३५–३८ ॥

अपिशब्देनाश्रमधर्माणां तथात्वं किमु वाच्यं यतो ज्ञानतत्साधनवैराग्यादीनामप्यन्तरायरूपत्वं स्मर्यते । " तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥" (भाग. ११. २१. ३१.) इति भगवद्वाक्यम् ॥ ३७ ॥

विशेषानुग्रहश्च ॥ ३८ ॥

" स्मर्यते " इति पूर्वेण सम्बन्धः । ज्ञानादेः सकाशाद् भक्तिमार्गे फलतोप्युत्कर्षमाह । ज्ञानादिसाधनवस्त्वनुग्रहो मुक्तिपर्यन्त एव । भक्तिमार्गे तु "अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज" (भाग ९. ४. ६३.) इत्यादिवाक्यैर्विशेषरूपो मुक्त्यादिभ्योपि भक्तानां व्यावर्तको भगवदनुग्रहः स्मर्यत इत्यर्थः ॥ ३८ ॥

गूढाभिसन्धिमुद्घाटयन् फलितमर्थमाह

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३९ ॥

अत इति पूर्वोक्तश्रुतिस्मृतिपरामर्शः । तथा चेतरस्या मुक्तेरपि भक्तिमार्गीयतदीयत्वमेव ज्याय इत्यर्थः । अत्र हेत्वन्तरमाह लिङ्गाच्चेति । मुक्तानां तु मायाविनिर्मुक्तमात्मस्वरूपमेव न तु देहेन्द्रियादिकमप्यस्ति येन भजनानन्दानुभवः स्याद् । भक्तानां तु देहेन्द्रियादिकमपि मायातत्कार्यरहितत्वेनानन्दरूपत्वेन च भग-

---

मुक्तेरिति । सकाशादित्यर्थः । **अत्रेति** । मुक्त्यपेक्षया भक्तिमार्गस्याधिक्ये । **आत्मस्वरूपमेवेति** । केवलमात्मस्वरूपमेवात्रतिष्ठतीत्यर्थः । **भजनेति** । भज सेवायाम् । तथा च सेवानन्दानुभव इत्यर्थः । **देहेन्द्रियादिकम-**

वदुपयोग्यतोपि तत् तथेत्यर्थः। न हि मुक्तात्मनां कश्चन भगवदुपयोगोस्तीतिभावः। तदुक्तं श्रीभागवते "न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः" (भाग. २. ९. १०) इत्यादि। "मुक्तोपसृप्यत्वं" चोच्यते। अत एव सप्तमस्कन्धे "देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनाम्॥" (भाग. ७. १. ३४.) इत्युक्तम्. पुरवासित्वे देहादेरावश्यकत्वान्निषेधो जडात्मकानामेवेत्यवगम्यते।

'इतरज् ज्यायः' इतिपाठे तु पूर्वोक्ताश्रमकर्मपरामर्शोत इत्यनेनोक्तयोरेव वा। एतेन "सोश्नुते सर्वान् कामान् सह

पीति। तिष्ठतीतिशेषः। ननु मायायाः सत्त्वादाधिक्यं कथमत आहुः **मायेति**। उच्छिष्टभोजिनो दासास्तव मायां जयेमहीतिवाक्यात् मायारहितत्वेनेत्यर्थः। **भगवदुपयोगीति**। देहेन्द्रियादिकमपीति पूर्वेणान्वयः। **अतोपीति**। अतः कारणादपीत्यर्थः। **तत्** भक्तिमार्गीयतदीयत्वं **तथा** ज्यायः। तथा च भजनानन्दानुभवजनकस्य भगवत्संबन्धिस्थूलसूक्ष्मशरीरद्वयस्य सत्त्वाज्ज्यायस्त्वं भक्तेरित्यर्थः। अत एवोक्तं **निबन्धे** 'सर्वेन्द्रियैस्तथा चान्तःकरणैरात्मनापि हि। ब्रह्मभावात्तु भक्तानां गृह एव विशिष्यते'॥ अत्र प्रमाणमाहुः **तदुक्तमिति**। **मुक्तोपसृप्यत्वं** चेति। मुक्तोपसृप्यत्वव्यपदेशाच्चेति सूत्रे मुक्तसेव्यत्वं बादरायणैरुच्यत इत्यर्थः। मुक्तौ देहसंबन्धो नास्ति, अत्र तु देहसंबन्ध इत्यत आहुः **अत एवेति**।

पाठान्तरव्याख्यानमाहुः **इतरदिति**। **अत इत्यनेनेति**। अत इतरज्ज्याय इत्येव पाठः। अत्र **इतरत्** भक्तिमार्गीयभगवदीयत्वं ज्याय इत्यर्थः। **आश्रमकर्मपरामर्शे** स्वारस्याभावादाहुः **उक्तयोरिति**। श्रुतिस्मृत्योरित्यर्थः।

ब्रह्मणा विपश्चिता ।" (तै. २. १.) इत्युक्तफलवत्त्वं तस्य सूच्यते ॥ ३९ ॥ ३ ॥

॥ इति तृतीयाध्याये चतुर्थपादे तृतीयं विहितत्वाच्चाश्रमकर्मेत्यधिकरणम् ॥ ३ ॥

अथेदं विचार्यते । तदीयानामपि कदाचित् सायुज्यमस्ति न वेति । तत्र भक्तिमार्गस्यापि साधनरूपत्वात् तस्य च मुक्तावेव पर्यवसानात् तदीयत्वस्य साधनावस्थायामुत्कृष्टावस्थारूपत्वात् तेषामपि मुक्तिरावश्यकी । तथा च फलतो न कश्चिद् विशेष इति प्राप्त उच्यते

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः ॥ ४० ॥

तद्भूतस्येत्यादि । तुशब्देन मर्यादामार्गीयव्यवच्छेदः । अत्र विश्वासदार्ढ्यायाहअन्यस्य का वार्ता, कर्ममात्रनिरूपकस्य जैमिनेरपि

तस्य भक्तस्य । तथा च यज्ञादीनामाश्रमधर्माणां शमादीनां ज्ञानिनां धर्माणां सेवादीनां भक्तधर्माणा च युगपत्प्राप्तौ भक्तिमार्गीयधर्माणामेवाचरणं गौणकाले स्वन्येषाम् । कुतः । भक्तेरातिशय्यात् । **अनभिभवाद्दिति** । **पञ्चसूत्र्या** भगवद्धर्माणामुत्कर्षस्य प्रदर्शनाच्चेतिभावः ॥ ३९ ॥ इति तृतीयाधिकरणम् ॥

अधिकरणमवतारयन्ति **अथेदमिति** । **अस्ति न वेति** । साधनभक्तेर्यदा परिपाकस्तदा अक्षरसायुज्यमस्ति न वेतिसंदेह इत्यर्थः । पूर्वपक्षमाहुः **तत्रेति** । **तस्येति** । भक्तिमार्गीयसाधनस्य । सिद्धान्तमाहुः **उच्यत** इति । सूत्रार्थमाहुः **तुशब्देनेति** । **अत्र** पुष्टिमार्गे । **यदीति** ।

यदि कदाचिद् भगवत्कृपयायं भावो भवेत् तदा तद्भूतस्य पुष्टिमार्गीयभगवद्भावं प्राप्तस्य तस्यापि नातद्भाव उक्तभावतिरोधानं न कदाचिदपीत्यर्थः। अत्र हेतूनाह नियमादीन्। तैत्तिरीयके "ते ते धामान्युष्मसि" (तै. सं. १. ३. ६.) इतिमन्त्रे "यत्र भूरिशृङ्गा अयासस्तदुरुगायस्य परमं पदम्" (तै. सं. १. ३. ६.) इत्युक्त्वा तदनन्तरं तत्र कृतानि कर्माण्यपि "विष्णोः कर्माणि पश्यत" (तै. सं. १. ३. ६.) इतिमन्त्रेण निरूप्य पुनः पूर्वोक्तलीलास्थानं "तद् विष्णोः परमं पदम्" (तै. सं. १. ३. ६.) इति पदेनानूद्य तस्य नित्यत्वनिरूपणायोच्यते "सदा पश्यन्ति सूरयः" (तै. सं १. ३. ६.) इति। सूरयो विद्वांसः पुरुषोत्तमज्ञानवन्त इति यावत्। तच्च भक्त्यैवेति सूरिपदेन भक्ता उच्यन्ते। तथा च भक्तानां सार्वदिकदर्शनं नियम्यते सदेतिपदेन। एवं सति पुष्टिमार्गीयभगवद्भावं प्राप्तस्य मुक्तावुच्यमानायां तन्नियमो भज्येतेत्यर्थः। यच्चोक्तं साधनावस्थायामुत्तमावस्थारूपत्वं परं तदीयत्वस्य फलं मुक्तिरेवेति तत्राहातद्रूपेति। उक्तभगवदीयत्वं न साधनरूपमपि तु मुक्तेरपि फलरूपं, "मुक्तानामपि सिद्धानां नारायणपरायणः। सुदुर्लभः प्रशान्तात्मा" (भाग. ६. १४. ५.) इतिवाक्याद्।

भगवत्प्रीत्या कर्माचरणेन भगवतः संतोषे जात इत्यर्थः। नातद्भाव इत्यस्यार्थमाहुः उक्तेति। तैत्तिरीयकेति। इय विद्वन्मण्डने स्पष्टं प्रतिपादिता। भज्येतेति। सार्वदिकदर्शनं भज्येतेत्यर्थः। मुक्तेरपि फलरूप-

" यदा सर्वे प्रमुच्यन्ते कामा येस्य हृदि श्रिताः । अथ मर्त्योमृतो भवत्यत्र ब्रह्म समश्नुते " (बृ. ४. ४. ७.) इतिश्रुत्यामृतस्य मुक्तस्य ब्रह्मस्वरूपभोग उच्यते । स च " यमेवैष वृणुते " (कठ. २. २३.) इतिश्रुतेर्भगवदीयत्वसाध्य एवेति स्पष्टफलत्वमस्यातोतद्रूपत्वम् । किञ्च फलं हि साधनादुत्तमं भवति । भगवदीयत्वादुत्तमस्यार्थस्याभावादपि न मुक्तिरुचिता । तदुक्तं श्रीभागवते पञ्चमस्कन्धे पूर्वं भक्तिस्वरूपं निरूप्य " तयैव परया निर्वृत्या ह्यपवर्गमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियन्ते भगवदीयत्वेनैवं परिसमाप्तसर्वार्थाः " (भाग. ५. ६. ७.) इति ॥ ४० ॥ ४ ॥

॥ इति तृतीयाध्याये चतुर्थपादे चतुर्थं तद्भूतस्येत्यधिकरणम् ॥ ४ ॥

अथेद विचार्यते । ध्रुवायेत्र च ब्रह्मादिलोकाधिकारं दत्त्वा तत्सम्बन्धि फलं ददाति न वेति ।

मित्यत्रापरां शारीरब्राह्मणस्थां श्रुतिं दर्शयन्ति **यदा सर्वे** इति । ब्रह्मणि लयं पूर्वमुक्त्वा तदनन्तरमियं श्रुतिः पठ्यते । अत्रामृतत्वं प्रथममुक्तं तदनन्तरं ब्रह्म समश्नुते इत्युक्तम् । तेन च मुक्तिफलरूपस्य ब्रह्मस्वरूपभोगस्योक्तत्वान्न मुक्तिसाधनत्व पुष्टिमार्गीयभगवदीयत्वस्येत्यर्थः । सूत्र **अतद्रूप** इतिभावप्रधानो निर्देश इति सूचयितुमाहुः **अतोतद्रूपत्वमिति** । **शेषं** स्पष्टम् ॥४०॥ इतिचतुर्थाधिकरणम् ॥

अधिकरणमवतारयन्ति **अथेत्यादिना** । **अथ** पुष्टिमार्गविचारानन्तरं **विचार्यते** पुष्टिमार्गे आधिकारिकं फलं विचार्यते । **ध्रुवायेवेति** । यथा ध्रुवाय

न चाधिकारिकमपि पतनानुमानात् तदयोगात् ॥४१॥

तत्र नेत्याह न चेति । तत्र हेतुः पतनानुमानादिति । " आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन " (भ. गी. ८. १६.) इतिस्मृतेरित्यर्थः । फलस्य सावधिकत्वादितिभावः । किञ्च तादृशे भगवदीये पतनायोगादपि न तथा ।

अथवा तादृशस्य सदा भक्तिरसानुभवात् तदतिरिक्तस्यानपेक्षणादन्येषां फलानां सम्बन्धाभावादित्यर्थः ॥४१॥

उपपूर्वमपि त्वेके भावमशनवत् तदुक्तम् ॥ ४२ ॥

एके भक्ता आधिकारिके फले पतनमात्रं न हेयत्वप्रयोजकमिति वदन्त्यपि तूपपूर्वं पतनमेव तदिति वदन्ति । भक्तिभावा-

---

ददाति तथेत्यर्थः । संदेहमाहुः **फलमिति** । पूर्वपक्षमाहुः **तत्रेति** । फलं ददातीतिपूर्वपक्षे सिद्धान्तं वक्तु सूत्रं व्याकुर्वन्ति **नेत्याहेति** । हेतौ **अनुमान**-शब्दार्थः स्मृतिरिति बोधयितुमाहुः **आब्रह्मेति** । फलस्य आधिकारिकफलहेत्वन्तरं विशदयन्ति **किंचेति** । **तदयोगादित्यस्यार्थमाहुः तादृश इति** । पुष्टिमार्गीयभगवदीये । तथा च भगवान् पुष्टिमार्गेऽङ्गीकृतायभक्तायाधिकारिकं फलं **च**कारादधिकारं न ददाति । कुतः । श्रुत्यनुमापकस्मृतेरितिसूत्रार्थः । **अथवेति** । **तादृशस्य** मर्यादामार्गीयभक्तस्य । **अन्येषामिति** । आधिकारिकाणामित्यर्थः । ननु ध्रुवाय कथं दत्तमिति चेन्न । " नैच्छन्मुक्तिपतेर्मुक्तिं पश्चात्तापमुपेयिवान् " इतिभागवतवाक्यात् ध्रुवस्य मर्यादामार्गीयत्वं वक्तव्यम् । कुतः । पुष्टिमार्गीयभक्तैस्तु मुक्तेराकाङ्क्षा नैव क्रियत इत्यलम् ॥४१॥

केषांचिद्भक्तानां मत आधिकारिके फल उपपतनं, मुक्तौ तु महापतनमितितदेतद्विशदयन्ति **एके भक्ता इति** । अग्रे स्पष्टम् । **श्रीभागवत इति** ।

च्च्युतेः । अधिकारसमाप्तौ भगवदनुग्रहाशापि कदाचित् सम्भवतीत्युपपतनं तत् । मुक्तौ त्वपुनरावृत्तेर्भक्तिरसाशापि नेति महापतनमेव सेतिभावः । तेन निषिद्धकर्मफलतुल्यत्वं ज्ञापितं भवति । अत एव श्रीभागवते " नारायणपरा लोके न कुतश्चन बिभ्यति । स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥" (भाग. ६. १८. २८.) इति गीयते । भक्तिमार्गे तु साक्षात्सङ्गाभावेपि तदीयभावमात्रमप्यशनवत् साक्षाद्भगवत्स्वरूपभोगवदेव मन्यते । तदुक्तं श्रीभागवते " अथ ह वाव तव " (भा. ३. ९. ३९.) इत्यादिना । साक्षाद्भगवद्भोगो जीवस्यासम्भावित इतिशङ्कानिरासायाह तदुक्तमिति । ' सोश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता " (तै. २. १.) इति । " अत्र ब्रह्म समश्नुते " (बृ. ४. ४. ७.) इत्यादिश्रुतिषु साक्षाद्ब्रह्मस्वरूपरसाशनमुक्तमित्यर्थः ॥ ४२ ॥ ५ ॥

इति तृतीयाध्याये चतुर्थपादे पञ्चमं

न चाधिकारिकमित्यधिकरणम् ॥ ५ ॥

बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४३ ॥

षष्ठस्कन्धे नवमाध्याय इतिशेषः । तदुक्तमिति । तैत्तिरीयोपनिषदीतिशेषः । तथाच तेषां भगवान्स्वलोकेअक्षरात्मकं सेवानुरूपं देहमथ चान्तर्भजनानन्दानुभवं ददातीतिभावः ॥४२॥ इतिपञ्चमाधिकरणम् ॥

अथेदं चिन्त्यते । प्रचुरभगवद्भावमात्रवतः साक्षात्स्वरूपभोगवतो वा गृहत्यागः कर्तव्यो न वेति । फलस्य सिद्धत्वान्नेतिपक्षव्यवच्छेदाय, "मद्वार्तायातयामानां न बन्धाय गृहा मताः" (भाग. ४. ३०. १९) इतिवाक्याद् बन्धकत्वेन त्याज्य इतिपक्षव्यवच्छेदाय च तुशब्दः । भावमात्रे साक्षात्प्रभुसम्बन्धे वोभयथापि गृहाद् बहिर्गमनं गृहत्याग इति यावत् । स आवश्यकः । तत्र प्रमाणमाह स्मृतेरित्यादि । "त्वं तु सर्वं परित्यज्य स्नेहं स्वजनबन्धुषु । मय्यावेश्य मनः सम्यक् समदृग् विचरस्व गाम् ॥" (भाग. ११. ७. ६.) इत्यादिस्मृतिर्भगवद्भाववतस्तत्सङ्गविशिष्टस्यापि बहिर्गमनमाह । तदाचारोपि तथैव श्रूयतेतस्तथा । अत्रायमाशयः । आश्रमधर्मत्वेन गृहत्यागः "यदहरेव" (जाबा. ४.) इत्यादिश्रुतिभ्यः पूर्वमुपपादितोपि यदधुना पुनरुच्यते तेन तदतिरिक्तोयमिति ज्ञायते । तथा चोक्तवाक्यान्मुमुक्षुमुक्तिप्रतिबन्धकत्वाभावेपि व्यासङ्गस्य तत्रावश्यकत्वादुक्तोभयोरप्यनवरतं प्रभुरसास्वादे प्रतिबन्धकत्वेन तस्य तत्त्यागस्य विप्रयोगरसानुभावकत्वेन च स कर्तव्यः यद्यपि स्वेष्टान्तराय-

---

अधिकरणमवतारयन्ति **अथेति** । **प्रचुरेति** । निरन्तरेत्यर्थः । **कर्तव्यो न वेति** संशयकथनम् । पूर्वपक्षव्यवच्छेदार्थं तुशब्दमाहुः **फलस्येति** । सिद्धान्तमाहुः **भावमात्र** इति । ननु पुनरुक्तिरिव तिष्ठत्यत आहुः **अत्रेति** । **पूर्वमिति** । ऊर्ध्वरेतःसूत्रे । **प्रतिबन्धकत्वाभावेपीति** । मद्वार्तायातयामानामितिवाक्यात् प्रतिबन्धकत्वाभावेपीत्यर्थः । **उक्तोभयोरिति** । प्रचुरभावसाक्षाद्भाववतोरित्यर्थः । **तस्य** गृहस्य । प्रतिबन्धकत्वेनेतिपूर्वेणान्वयः । **रसानु-**

त्वेन स्वत एव तत्त्यागो भावी तथापि " आश्रमादाश्रमं गच्छेत् " (भाग. ११. १७. ३८.) इतिवाक्यादत्राश्रमान्तरत्वाभावेन त्यागस्याविहितत्वशङ्काभावायेयमुक्तिरिति ॥ ४३ ॥

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥

पुष्टिमार्गीयभक्तस्य विहितत्वादिविज्ञानमप्रयोजकम् । तत्र हेतुस्तस्य भक्तिमार्गस्वामिनः श्रीगोकुलेशादेव फलस्य श्रुतेरतो बहिर्गमनं न साधनत्वेनात्र कार्यमितिभावः । अत्र "यमेवैष वृणुते" (मुण्ड. ३. २. ३.) इतिश्रुतिरनुसन्धेया । एतदनुपदमेव पठ्यते " नायमात्मा बलहीनेन लभ्यः " (मुण्ड. ३. २. ४.) इति । अत्र भगवद्वरणानन्तरमपि जीवबलं कतमद् यदपेक्षो भगवल्लाभ इतिजिज्ञासायां सर्वात्मभाव एव बलमिति निर्णीयते । तस्यैव मर्यादाबलोपमर्दकत्वाद् भगवद्वशीकारहेतुत्वाच्च । व्रजसीमन्तिनीनां प्रभुवचनातिक्रममपि कृत्वा स्वरूपपरिग्रहस्तद्बलेनैव यत इत्यात्रेय

भावकत्वेनेति । वियोगसत्त्वे गृहादिकं सम्यक् न लयतीतित्यागः क्रियते । तेन विप्रयोगस्य पुष्टता जायत इत्यनुभावकत्वम् । विभावानुभावाद्रसनिष्पत्तिरितिभरतसूत्रात् । **इयमुक्ति**रिति । तथा चाश्रमोत्तररूपगृहत्यागादतिरिक्तोऽयं संन्यास इतिबोधनायेयमुक्तिरित्यर्थः । यदुक्तं श्रीभागवत एकादशस्कन्धे पूर्वं त्रिदण्डसंन्यास उक्तः तदनन्तरं ज्ञाननिष्ठो विरक्तो वेत्यादिभिरेकादशश्लोकैरष्टादशाध्याये । इदं च सर्वं **संन्यासनिर्णये** स्पष्टमेवोच्यते ॥४३॥

उत्तमस्य त्यागो नास्तित्याशयेनाहुः **पुष्टी**त्यादि । **अनुसंधेये**ति । गुणोपसंहारपादे प्रतिपादितत्वादत्रानुसंधेयेत्यर्थः । **मर्यादे**ति ज्ञानबलोपमर्दकत्वात् ।

आचार्यो मनुते । इदमत्राभिप्रेतम् । सर्वात्मभावस्य यद् बलं तत् तदात्मकस्य प्रभोरेव । तस्य चायं स्वभावो यदन्यन्न रोचते । अत एव व्रजपरिवृढवदनेन्दुवचनकिरणप्रचारप्रोच्छलत्केवलभावाम्भोधिवचनवीचयो गीयन्ते " यर्ह्यम्बुजाक्ष तव पादतलमस्प्राक्ष्म तत्प्रभृति नान्यसमक्षं स्थातुं पारयामः " (भाग. १०. २९. ३६.) इत्यादयः । अतस्त्यागस्तु पृष्ठलग्न इवायातीति न तदर्थं यतनीयमिति । विष्णववतारत्वेन पुरुषोत्तमभावस्वरूपज्ञोयमिति तथा ॥४४॥

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥४५॥

सर्वत्यागपूर्वकं यद् बहिः प्रभुसमीपगमनं भक्तस्य तदार्त्विज्यमृत्विक्कर्मैवेत्यौडुलोमिराचार्यो मन्यते । तस्यायमभिसन्धिः । यजमानो हि स्वेष्टसिद्ध्यर्थमृत्विज आदौ वृणुते । प्रकृते च "यमेवैष वृणुते" (कठ. २३.) इतिश्रुतेः " तस्मादेकाकी न रमते " (बृ. १. ४. ३.) इतिश्रुतेश्च स्वक्रीडार्थं भगवान् स्वचिकीर्षिततत्तल्लीलानुरूपाञ् जीवान् वृणुते । " यूनः स्थविरान् वा " (आप. श्रौत.) इतिविकल्पादेकरूपाणां यथा सोमादिषु वरणं

अत एवैकादशस्कन्धे "धर्मः सत्यादयोपेतो विद्या वा तपसान्विता । मद्भक्त्यापेतमात्मानं न सम्यक् प्रपुनाति हि" इति । **अत एवेति** । यतो भगवदतिरिक्तं न रोचत अत एवेत्यर्थः । कथं **गीयन्ते** इत्यत आहुः यर्ह्यम्बुजाक्षेति । नन्वात्रेयस्य कथमिदं ज्ञानमत आह **विष्णवतारेति** । "अत्रेरपत्यमभिकाङ्क्षतः" इतिद्वितीयस्कन्ध उक्तम् ॥४४॥

सूत्रं व्याकुर्वन्ति **सर्वेति** । **तस्येति** । औडुलोम्याचार्यस्येत्यर्थः । **अभिसन्धिः** अभिप्रायः । दार्ष्टान्तिके योजयन्ति **प्रकृत** इति । **एकरूपाणामिति** ।

तथा सर्वात्मभाववत्त्वेनैकरूपाणामेवात्र वरणम्। तत्र यथा स्वीय-स्वीयतदङ्गमात्रकरणं तेषां तथेतरसम्बन्धनिवर्तनपूर्वकं तद्भोग्यसमर्पकत्वमत्र। तदुक्तं भगवता "यदा पुमांस्त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे" (भाग. ११. २९. ३४.) इति। अत्र पूर्वपदेनेतरसम्बन्धनिवर्तनोक्त्या सर्वात्मभाव उक्तो भवति। तदनन्तरमात्मनिवेदने सति तद्विषयकलीलाकरणेच्छाविषयः संभवति। अन्तरङ्गलीलाप्रवेशनमिच्छायां विशेषः। तस्मात् सुष्ठूक्तमार्त्विज्यमिति। एतेन "न ददाति न पचति" (आप. श्रौ. १०. १४. ६. ७.) इत्यादिश्रुतेर्यथा सोमादौ दीक्षितस्य तद्यागेतरधर्मनिवृत्तिः स एव परमो धर्मो यतस्तथा पुरुषोत्तमस्योक्तभक्तैः सह रमणमेव सार्वदिकमेतदेव च महन्महत्त्वमिति सूचितं भवति। प्रकृते भक्तानामृत्विक्त्वेन निरूपणे हेतुत्वेन तात्पर्यान्तरमप्याह **तस्मै** यजमानारब्धकर्मसाङ्गत्वाय ऋत्विक् **परिक्रीयते** वरणेन स्वकार्यमात्रोपयोगित्वाय स्वीयः क्रियते। तथा प्रकृतेपि। न च

सर्वेषां यूनत्वं सर्वेषां स्थविरत्वं वेतिविकल्पात् सोमे ऐकरूप्यं तथा प्रकृते सर्वात्मभाववत्त्वमैकरूप्यं बोध्यम्। सोमे यथा तथात्रापीत्याहुः **तत्रेति**। यथा सोमे ऋत्विजां तथात्रापीत्यर्थः। तदेवाहुः **तथेति**। **तदुक्तमिति**। भागवत एकादशस्कन्ध ऊनत्रिंशाध्याय उक्तमित्यर्थः। एतस्यार्थमाहुः **अत्रेति**। **पूर्वपदेन** त्यक्तसमस्तकर्मेतिपदेन। एतत्प्रश्नोत्तरार्धे यदा एवं भवति तदा वह्न्ययोगोलकन्यायेन ब्रह्मभावं प्राप्नोति सर्वान् कामान् भुङ्क्ते इति बोध्यम्। सूत्रांशं व्याकर्तुमाहुः **प्रकृत इति**। चिकीर्षितलीलासिद्ध्यर्थं भक्तवरणमित्यर्थः। आर्त्विज्यं तु स्वार्थं, भजनं तु भगवल्लीलासिद्ध्यर्थमितिदृष्टान्तवैषम्य-

" कच्चित् कल्याण्यो दक्षिणाः " (आप. श्रौ.) इतिप्रश्नवचनात् तदर्थैव तत्प्रवृत्तिरत्र न स्वतः पुरुषार्थत्वेन भगवदर्था प्रवृत्तिरतो वैषम्यमिति वाच्यम् । नीरागस्यापि वरणसमये तत्प्रश्नस्यावश्यकत्वात् तथैव दक्षिणादानमपि । अन्यथा निरङ्गत्वापत्तेः । प्रकृतेपि भक्तानां स्नेहादेव प्रवृत्तिर्भगवान् स्वानुभवार्थमेवताननुभावयतीति न वैषम्यम् ॥ ४५ ॥

श्रुतेश्च ॥ ४६ ॥

अथर्वणोपनिषत्सु पठ्यते " भक्तिरस्य भजनं तदिहामुत्रोपाधिनैराश्येनैवामुष्मिन् मनःकल्पनमेतदेव नैष्कर्म्यम् (गो. पू. ता. १.) इति ।

माशङ्कते न चेति । न हीत्यर्थः । परिहरन्ति नीरागस्येति । याजनेन द्रव्यसंपादनेच्छारहितस्येत्यर्थः ॥ ४५ ॥

सूत्रार्थमाहुः अथर्वणेति । नैष्कर्म्यमिति । अत्रायं गूढाभिसंधिः । द्विविधः संन्यासः, भक्तिमार्ग एकोऽवैधः, अपरो वैधः । पूर्वस्तु व्रजभक्तानामत्यन्तसिद्धानां विगाढभावप्राप्तत्वात् । द्वितीय उक्त उद्धवादीनां विरहानुभवार्थं क्रियमाणत्वात् । मद्भक्तोवानपेक्षकः सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचर इति वचनाद्वैधः । इदं च संन्यासद्वयं नाश्रमरूपमित्युक्तम् । ननु विविदिषाविद्वत्संन्यासभेदेनाश्रमरूपमेवेदं संन्यासद्वयं कुतो न स्वीक्रियत इत्यत आहुः

भक्तिमार्गप्रचारैकहृदयो बादरायणः । मानं भागवतं तत्र तेनैवं ज्ञेयमुत्तमैः ॥ १ ॥ ४६ ॥ ६ ॥

इति तृतीयाध्याये चतुर्थपादे षष्ठं बहिस्तूभयथेत्यधिकरणम् ॥६॥

ननु " यमेव " (कठ. २. २३.) इतिश्रुतिः साधनान्तरनिषेधपूर्वकं वरणस्यैव साधनत्वमाह । " तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत् " (बृ. ४. ४. २३.) इतिश्रुतिः साधनान्तरमप्याह । एवं विरोधे श्रुतित्वाविशेषात् किमादरणीयं किं नेतिसंशये साधनान्तरविधिरेवादरणीयोऽन्यथा शास्त्रवैयर्थ्यं स्यादिति प्राप्त उच्यते **सहकार्यन्तरविधिरिति ।**

सहकार्यन्तराविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४७ ॥

भक्तिमार्गेति । मानमिति । " अनर्थोपशमं साक्षाद्भक्तिभावमधोक्षजे " इति भागवतवाक्यं मानमित्यर्थः । न च ज्ञानमार्गीयद्विविधसंन्यासः कुतो नाद्रियत इति वाच्यम् । कालदोषेणानादरस्य दर्शितत्वात् । अत एव सप्तमस्कन्धे " गृहस्थस्य क्रियात्यागो बटोरपि " इत्यादिना नारदेनोक्तम् । तथा एकादशे " मौनानीहानिलाया दण्डा वाग्देह चेतसाम् " इत्यादिना भगवताप्युक्तम् । एवं चैतादृशसंन्यासस्य दुर्घटत्वाद् भक्तिमार्गीयैरुत्तमैरेवं ज्ञेयमित्यर्थः ॥ ४६ ॥ इतिषष्ठाधिकरणम् ॥

साधनद्वयबोधिकाश्रुतिद्वयव्यवस्थां बोधयितुं सहकार्यन्तराधिकरणमाहुः **सहकारीति** । सूत्रं व्याकर्तुं संशयपूर्वकं पूर्वपक्षमाहुः **नन्विति** । सिद्धान्तमाहुः **उच्यत** इति । ननु शमदमादीना मानससाधनानां भक्तावुपयोगो न

मर्यादापुष्टिभेदेन वरणं द्विधोच्यते । तत्र सहकार्यन्तरविधिस्तु मर्यादारूपेणोच्यते पुष्टौनान्यपेक्षेति न विरोधगन्धोपि । अपरं च । साधनं हि कायिकं वाचिकं मानसिकं च विधीयते । तत्र "मनसैवाप्तव्यम्" (कठ. ४. ११.) इतिश्रुतेस्तृतीयं मुख्यम् । तदपि तावदेव मार्यादिकस्यापि विधेयत्वेन कर्तव्यं यावत् स्नेहो न भवति । यतस्तद्भुतः स्नेहवतस्तूक्तं तृतीयं साधनमपि विध्यादिवत् । यथा विधिरर्थवादो वा प्रवृत्तावप्रयोजकस्तस्य स्वत एव सम्भवात् तथा भगवत्प्राप्ताविदमित्यर्थः । कैमुतिकन्यायेन पूर्वयोरप्रयोजकत्वमेतच्छेषत्वादेवायास्यतीति तृतीयमेवोक्तम् ॥ ४७ ॥ ७ ॥

इति तृतीयाध्याये चतुर्थपादे सप्तमं सहकार्यन्तराधिकरणम् ॥७॥

ननु "बहिस्तूभयथा" (ब्र. सू. ३. ४. ४३.) इत्यादिना भगवदीयस्य गृहत्याग आवश्यक इति निरूपितम् । छान्दोग्ये

स्यादत आहुः अपरं चेति । विधीयते शान्तो दान्त इत्यादिवाक्यैर्विधीयते । तृतीयमिति । मानसिकमपीत्यर्थः । विध्यादिवदिति । विधिरिवार्थवाद इवेत्यर्थः । अत्रेदं बोध्यम् । यस्य यागे इच्छा नास्ति तस्य प्रवृत्तिरेव न जायत इति प्रवर्तको भगवानेव न तु विधिरित्युक्तं निबन्धे । किं च यस्य पितरि स्नेहस्तस्य स्वत एव सेवाया प्रवृत्तिः, तत्र विधिरर्थवादश्च न प्रयोजकः । एवं च दृढभक्ताविदं शमादिकं न विधेयं तादृशभक्तीच्छावन्तं प्रति प्रतिविधेयमिति सर्वं समञ्जसम् । तथा पुष्टिमार्गे वरणमेव साधनमिति भावः ॥ ४७ ॥ इतिसप्तमाधिकरणम् ॥

सूत्रमवतारयन्ति नन्विति । निरूपितमिति । पूर्वाधिकरण इतिशेषः ।

(८. १५. १.) त्वाचार्यकुलादित्युपक्रम्य छान्दोग्योपनिषदन्ते "आचार्यकुलाद् वेदमधीत्य गुरोः कर्मातिशेषेणातिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधदात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिꣳसन् सर्वाणि भूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तते न च पुनरावर्तते।" इदं विषयवाक्यम्। "ब्रह्मलोकमभिसम्पद्यते" (छा. ८. १५. १.) इति गृहिणोपसंहारः कृतः। वाजसनेयिशाखायां च "एतद्ध स्म वै तत् पूर्वे ब्राह्मणा अनूचाना विद्वांसः प्रजां न कामयन्ते" (बृ. ४. ४. २२.) इत्युपक्रम्य "अथ भिक्षाचर्यं चरन्ति" (बृ. ४. ४. २२.) इति पठ्यते। एवं सति विकल्पे सम्भवत्यप्युपसंहारस्य तात्पर्यग्राहकत्वाद् गृहिण एव यथोक्तकर्तुर्ब्रह्मसम्पत्ति-

---

छान्दोग्ये त्विति। **गृहिणोपसंहारः कृत** इत्येनेनान्वयः। कथं कृत इत्यतः श्रुतिं पठन्ति **आचार्यकुलादि**ति। कुलादित्यनेन गुर्वभावे तत्पत्न्यां तत्पुत्रे तद्गोत्रे वा ब्रह्मचर्यमिति ज्ञापितम्। **कर्मातिशेषेणे**ति। **वेदमधीत्ये**ति पूर्वेणान्वयः। गुरोः सेवारूपं यत्कर्म तस्मादवशिष्टो यः कालस्तेनेत्यर्थः। **अतिसमावृत्ये**ति। समावर्तनं कृत्वेत्यर्थः। गुरुकुलान्निवृत्य दारानाहृत्येतियावत्। धार्मिकान् कुर्वन्नित्यर्थः। आत्मनि हृदये अन्तर्यामिणि ब्रह्मणि। **सर्वे**ति। बाह्याभ्यन्तर इत्यर्थः। **अन्यत्रे**ति। तीर्थेभ्य उपायेभ्योऽन्यत्रेत्यर्थः। गृहस्थाश्रमस्यापि त्याग इत्यत्र श्रुतिं प्रमाणयन्ति **वाजसनेयी**ति। **एवं सती**ति। उभयविधत्याग उक्ते सति। **उपसंहारस्ये**ति। छान्दोग्योक्तोपसंहारस्येत्यर्थः। **त्यागोक्तिस्त्वि**ति। वाजसनेयिशाखोक्तिरित्यर्थः।

रितिश्रुतेस्तात्पर्यम् । त्यागोक्तिस्तु ब्रह्मैतादृशं यदर्थं सर्वं त्यज्यत इतिस्तुतिपरेति प्राप्ते गृहिणोपसंहारे हेतुत्वेन तात्पर्यमाह कृत्स्नेति ।

कृत्स्नभावात् तु गृहिणोपसंहारः ॥ ४८ ॥

त्यागे वाङ्मनसोरेव भगवति विनियोगो न सर्वेन्द्रियाणाम् । गृहिणस्तु सर्वैः प्रकारैर्भजनं भवतीति परिजनश्च कृतार्थो भवतीति च भजने कृत्स्नता भवतीति तेनोपसंहारः कृत इत्यर्थः । अत एव "आत्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्य" इत्युच्यते । अत्रात्मपदं भगवत्परमिति ज्ञेयम् । कर्ममार्गीयगृहिव्यवच्छेदाय तुशब्दः ।

अत्रेदमाकूतम् । "भक्तिमार्गो बहुविधः" (भाग. ३. २९. ७.) इति कपिलदेववाक्यात् केचन भक्ताः स्वगृहेष्वेव स्नेहेन भगवदाकारे विविधोपचारैः सेवां कुर्वन्तस्तयैव निर्वृत्या मुक्तिमपि तुच्छां मन्यन्ते । "मधुद्विट्सेवानुरक्तमनसामभवोपि फल्गुः" (भाग. ५. १४. ४४.) इति । तेन भगवद्भजन एव

तात्पर्यमाहेति । बादरायणः । उक्तश्रुतेस्तु तात्पर्यमाहेत्यर्थः । सूत्रं व्याकुर्वन्ति **त्याग** इति । **कृत्स्नतेति** । सर्वेषामिन्द्रियाणां सार्थक्यमित्यर्थः । **तेनेति** । गृहिणेत्यर्थः । एवं तात्पर्ये गमकं वदन्ति **अत एवेति** । **कर्ममार्गीयेति** । जैमिनीयतन्त्रविचारिते कर्ममार्गीये इत्यर्थः । पूर्वाधिकरणोक्तत्यागनिरूपणोत्तरं गार्हस्थ्यप्रशंसाया हेतुमाहुः **अत्रेदमिति** । **कपिलदेवेति** । तृतीयस्कन्धीयेतिशेषः । **तुच्छां मन्यन्त** इति । अत्र पञ्चमस्कन्धीयभवाटवीवर्णनसमाप्तौ शुकदेववाक्यं प्रमाणयन्ति **तदुक्तमिति** । **अभवोपि** मुक्तिरपि **फल्गु** तुच्छेत्यर्थः । अत एव भरतस्य पूर्वजन्मनि तथाभावोप्युक्तः । **तेनेति** ।

तत्रापि पुष्टिमार्ग एव श्रुतेर्भर इति ज्ञायते। पूर्वमुत्कटभगवद्भाववतां तदर्थं त्यागं निरूप्य गृहिणापसंहारतात्पर्यं पश्चाद् यन्निरूपितवांस्तेन तादृक्सर्वात्मभाववतैव त्यागः कार्यस्तद्रहितेन तु गृह एवोक्तरीत्या प्रभुभजनं कार्यं तेनैव तल्लाभ इति व्यासहृदयमिति ज्ञायते। उक्तभावाभावे त्यागधर्मानिर्वाहादिति। केचन भक्ता भाषणादिलीलादर्शनं विना स्थातुमशक्ताः प्रचुरभावविवशाशया गृहांस्त्यक्त्वा वनं गच्छन्ति। आत्रेयौडुलोमिभ्यां तु भगवदवतारसामयिकभक्तदशोक्ता। एते सर्वे फलमार्गीयाः। वाजसनेय्युक्तास्तु साधनमार्गीया इति नानुपपत्तिः काचित् ॥ ४८ ॥

किञ्च, सन्न्यासिन आवश्यका ये धर्मास्ततोधिकास्ते गृहिणः सिध्यन्तीत्यतोपि हेतोस्तेनोपसंहारः कृत इत्याशयेनाह **मौनवदित्यादि**।

गृहिणः सर्वेन्द्रियसंप्रतिष्ठापनादिकथनेनेत्यर्थः। अत्र व्यासतात्पर्यमाहुः **पूर्वमिति**। नन्वेतादृशदुर्लभत्वे किमर्थमुक्तमत आहुः **केचनेति**। एवं च भगवत्कृपया एतादृशाधिकारे जाते तत्कर्तव्यमिति भावः। ननु "किं प्रजया करिष्यामो येषां नोयमात्मा नायं लोकः" इति वाजसनेयिब्राह्मणोक्तौ आत्मलोककामनायां गृहत्यागः प्रतीयते, **आत्रेयौडुलोमिभ्यां** तु तादृशदशासत्त्वे गृहत्याग उच्यत इति श्रुतिविरुद्धमित्यत आहुः **आत्रेयेति**। **फलमार्गीया** इति। **फलमेव मार्गः** उपायो यत्रेत्येतादृशाः गोपालतापन्युक्ता गान्धर्वीप्रभृतयः। तथा चाधिकारिभेदेनेयं व्यवस्थेतिभावः ॥ ४८ ॥

सूत्रप्रयोजनमाहुः **किंचेति**। सूत्रार्थमाहुः **मौनपदमिति**। मुनेर्भाव

मौनवदितरेषामप्युपदेशात् ॥ ४९ ॥

मौनपदमनीहानिलायामादित्रिदण्डिधर्मोपलक्षकम् । यथा वागिन्द्रियमात्रदेहमात्रचित्तमात्रनियामकास्ते धर्मा न्यासिनस्तथेतरेषामपीन्द्रियनियामकानां धर्माणाम् "आत्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्य" इतिश्रुत्या गृहिणि उपदिश्यन्त इति युक्तो गृहिणोपसंहार इत्यर्थः । तत्र नियमनमात्रमत्र तु भगवति विनियोगादाधिक्यमिति भावः । वस्तुतस्तु केवलनियमनस्याप्रयोजकत्वात् तत्रापि भगवति विनियोग एव तात्पर्यमिति ज्ञेयम् ॥ ४९ ॥

ननु भगवति सर्वेन्द्रियविनियोगाद् गृहिणोपसंहार इति न युज्यते, "शुचौ देशे स्वाध्यायमधीयानः" इत्यादिकर्ममार्गीयसाधनश्रुतेरित्याशङ्क्य तत्तात्पर्यमाहानाविःकुर्वन्निति ।

अनाविःकुर्वन्नन्वयात् ॥ ५० ॥

भगवद्भावस्य रसात्मकत्वेन गुप्तस्यैवाभिवृद्धिस्वभावकत्वादाश्रमधर्मैरेव लोके स्वं भगवद्भावमनाविःकुर्वन् भजेतेत्येतदाशयेन ते धर्मा उक्ताः । गोपने मुख्यं हेतुमाहान्वयादिति । यतो भगवता सममन्वयं सम्बन्धं प्राप्य वर्ततेतो हेतोस्तथा । अत्र ल्यब्लोपे पञ्चमी । एतेन यावदन्तःकरणे साक्षात्प्रभोः प्राकट्यं नास्ति तावदेव

इति योगे विचारात्मकं मौनं न भवति किन्तु रूढमिति भावः । उपसंहार आधिक्यमाहुः तत्रेति ॥ ४९ ॥

सूत्रमवतारयन्ति नन्विति । सूत्रार्थमाहुः भगवद्भावस्येति । भगव-

बहिराविःकरणं भवति, प्राकट्ये तु न तथा सम्भवतीति ज्ञापितम् ॥ ५० ॥

वैदिककर्मकरणे तात्पर्यमुक्त्वा लौकिकस्यानावश्यकत्वेपि तत्समयमाह

ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५१ ॥

प्रस्तुतं प्रभुभजनं तत्प्रतिबन्धासम्भव एवैहिकं कर्म कार्यम् । नन्वैहिकं कर्मास्तु मा वातस्तत्समयोक्तिर्व्यर्थेत्याशङ्क्याह प्रस्तुतं प्रभुभजनं तद्दर्शनादिति । "आचार्यकुलात्" (छा. ८. १५ १.) इत्युपक्रम्यात्र पठ्यते "धार्मिकान विदधद्" इति । अतो धार्मिकपुत्रविधानमैहिकं कर्म श्रुतौ दृश्यतेतस्तत्समयोक्तिरावश्यकी । अन्यथा श्रुतावुक्तमस्तीति प्रस्तुतबाधेपि तत्करणे फलप्रतिबन्धः स्यादितिभावः ॥ ५१ ॥

इति तृतीयाध्याये चतुर्थपादेष्टमं
गृहिणोपसंहार इत्यधिकरणम् ॥ ८ ॥

द्भावोद्रेके कीदृशी स्थितिरित्यत आहुः **एतेनेति** ॥ ५० ॥

सूत्रार्थमाहुः **वैदिकेति** । तथा च प्रभुभजनसमयातिरिक्तसमये श्रुत्युक्तं धार्मिकपुत्रविधानं कर्तव्यम् । समयपरिपालनाभावे पुत्रे धार्मिकत्वं न स्यादिति फलप्रतिबन्ध इति भावः ॥ ५१ ॥ इत्यष्टमाधिकरणम् ॥

ननु " तस्य तावदेव चिरं यावन्न विमोक्ष्येथ सम्पत्स्ये " (छा. ६. १४. २.) इतिश्रुतौ मुक्त्यनन्तरं ब्रह्मसम्पत्तिः श्रूयते। सा तु पुरुषोत्तमसङ्गे लीलारसानुभवातिरिक्ता वक्तुमशक्या। "मुक्तोपसृप्यव्यपदेशात् " (ब्र. सू. १. ३. २.) " मुक्तानामपि सिद्धानां नारायणपरायणः। सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने " (भा. ६. १४. १५.) इतिस्मृतेश्च मुक्तेः फलं भक्तिरसानुभव एव। एवं सत्युक्तगृहिणस्तत् फलं भवति न वेति संशये निर्णयमाह

एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥ ५२ ॥

एवम्भूतस्योक्तरूपस्य मुक्तस्य मुक्तेर्यत् फलं भक्तिरसानुभवस्तस्या**नियमस्तस्य** भगवदिच्छाधीनत्वात् साधनाप्राप्यत्वात्। अत एव " मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगम् " (भाग. ५. ६. १९.) इतिशुकवाक्यम्। अत्रौत्सर्गिकं हेतुमाह तद्-

---

सूत्रमवतारयन्ति **नन्विति**। **सा त्विति**। ब्रह्मसंपत्तिस्त्वित्यर्थः। लीलारसानुभव एव ब्रह्मसंपत्तिरित्यत्र प्रमाणमाहुः **मुक्तेति**। श्रुतौ व्यपदेश उक्तः। स्मृतावाहुः **मुक्तानामिति**। विषयमुक्त्वा संशयमाहुः **एवमिति**। **निर्णयमाहेति**। पूर्वपक्षस्यार्थसिद्धत्वात्समाधानमाहेत्यर्थः। सूत्रार्थमाहुः **एवमिति**। **उक्तरूपस्येति**। गृहिण इत्यर्थः। साधनेनालभ्यत्वे प्रमाणमाहुः **अत एवेति**। **औत्सर्गिकमिति**। अधिकारसामान्यतः प्राप्तं

चस्थेति । " न स पुनरावर्तते " (छा. ८. १५. १.) इत्यस्यावृत्त्यो एव सार्वदिकत्वेन निर्धारः क्रियते । यद्यप्येवं मुक्तिफलाभावनियम एवायाति न तु तदनियमस्तथापि " तस्य तावदेव चिरम् " (छा. ६. १४. २.) इत्यादिप्रमाणैः " न स पुनरावर्तते " (छा. ८. १५. १.) इतिश्रुत्या समं विरोधाभावायौत्सर्गिकी तदवस्था । तत्फलं तु कस्यचिदित्यनुग्रहेण पुष्टौ प्रवेशने भवतीतिस्वाभिप्रायं प्रकटीकुर्वता बादरायणेनानियम इत्युक्तम् । एवं सति " न स पुनरावर्तते " इतिश्रुतिः प्रपञ्चे पुनरावृत्तिं निषेधति न तु तदतीतेपीति ज्ञेयम् । समाप्तिज्ञापनायावृत्तिः ।

हेतुमाहेत्यर्थः । सूत्रे **तदवस्थे**तिपदस्य मुक्त्यवस्थापरत्वमाहुः **न स पुनरि**ति । नन्वेवं रीत्या सार्वदिकत्वेन निर्धारे क्रियमाणे मुक्त्यनन्तरं किमपि नास्तीत्याशङ्कते **यद्यपी**ति । **न तु तदनियम** इति । तथा च नञ्द्वयेन मुक्तिफलाभाव इत्यर्थः । परिहरन्ति **तथापी**ति । तस्य तावदेव चिरमिति, अथ च न स पुनरावर्तते इति श्रुतिः । तत्र पूर्वश्रुतौ मोक्षानन्तरं शीघ्रं पुरुषोत्तमप्राप्तिर्वर्णिता । इदं च फलं भेदसाध्यम् । उत्तरत्र श्रुतौ पुनरावृत्तिनिषेधेनैकीभावः प्रतिपादित इति विरोधः । तदभावाय सामान्यविशेषपरत्वं स्वीकर्तव्यमुभयोरित्यर्थः । **तदवस्थे**ति । मोक्षावस्था औत्सर्गिकी तत्फलं तु विशेषरूपमित्यर्थः । नन्वेवं चेत् सूत्रे **अनियम**ग्रहणं किमर्थमत आहुः **तत्फलं त्वि**ति । पुरुषोत्तमप्राप्तिरूपं मुक्तिफलमित्यर्थः । ननु वरणे भेदः सिध्यति तेन चावृत्तिः सिद्धेति न स पुनरावर्तत इति श्रुतिविरोध इत्यत आहुः **एवं सती**ति । एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते इति उपकोसलब्राह्मणे विशेषनिर्देशात्प्रपञ्चे पुनरावृत्तिनिषेधः न तु प्रपञ्चातीतेपीत्यर्थः ।

अथवा श्रुतौ तदवस्थावधृतेर्हेतोरस्माकमपि तदवस्थावधृतिर्यतोतः फलानियमनिश्चयोपीत्यर्थः । एवं सति मुक्तिपर्यन्तं साधनं भगवद्भाव इतिनिर्णयः सम्पन्नः ॥ ५२ ॥

॥ इति तृतीयाध्याये चतुर्थपादे
नवमं मुक्तिफलानियम इत्यधिकरणम् ॥ ९ ॥

॥ इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते
श्रीमद्ब्रह्मसूत्राणुभाष्ये तृतीयाध्यायस्य चतुर्थः पादः ॥

पूर्वव्याख्याने विशेषो नास्तीत्यतः पक्षान्तरमाहुः **अथवेति**। श्रुतौ न स पुनरावर्तते इति श्रुतौ । **तदवस्थेति** । मोक्षावस्थावधृतेरित्यर्थः । **इत्यर्थ इति** । सूत्रार्थ इत्यर्थः । **एवं सतीति** । भगवद्भाव इति सप्तमी। एवं च भगवद्भावे पुरुषोत्तमप्राप्तौ मुक्तिपर्यन्तसाधनमिति सिद्धम् ॥ ५२ ॥

इति श्रीमन्मुकुन्दरायसहजमाधुरीपरमानिर्वचनीयसरसवदनतामरससुधाह्रदावगाहिश्रीमदाचार्यपदाब्जकृपापारसारश्रीमत्प्रभुचरणात्मजमहाराजयदुनाथकुलोद्भवश्रीगोस्वामिश्रीगोपालात्मजश्री**गिरिधर**विरचिते **अणुभाष्यविवरणे तृतीयाध्यायस्य चतुर्थः पादः** समाप्तिमफाणीत् ॥

॥ श्रीहरिः ॥

श्रीब्रह्मसूत्राणुभाष्यम्

सविवरणम् ।

अथ चतुर्थाध्यायस्य प्रथमः पादः ।

समन्वयेनाविरोधात् साधनैर्ब्रह्मविद् यदि ।
तस्याग्रिमव्यवस्था या सा चतुर्थे विविच्यते ॥ १ ॥
जीवतो म्रियमाणस्य गच्छतः सफलस्य च ।
अतो ब्रह्मविदा कार्यमेवमेव न चान्यथा ॥ २ ॥

इदानीं पूर्वाध्यायसंगतिं बोधयितुमध्यायत्रयार्थस्मरणपूर्वकं चतुर्थाध्यायार्थं सार्धश्लोकेनाहुः **समन्वयेने**त्यादिना । **ब्रह्मविद्यदी**ति । अध्यायत्रयार्थैः विरुद्धधर्माश्रयब्रह्मविषयकशाब्दज्ञानवान् यदि भवतीत्यर्थः। **तस्येति । जीवत** इत्यादिविशेषणविशिष्टस्य तस्येत्यर्थः। **अग्रिमे**ति। ज्ञानानुकूलप्रकारेण फलपर्यन्ता स्थितिः । **चतुर्थे** फलाध्याये । **विविच्यत** इति । प्रकाश्यत इत्यर्थः । तथा चैतादृशसाधनवतो ब्रह्मविदः प्राप्यस्य ब्रह्मणः फलत्वनिरूपणेन कार्यकारणभाव-संगतिः सूचितेति भावः ॥ १ ॥ ननु पूर्वाध्याये जीवतो ब्रह्मविदो यावज्जीवं ज्ञानानुकूलसाधनवत्त्वेन स्थितिर्वर्णितैव पुनरत्रोक्तौ प्रयोजनाभाव इत्यत आहुः **अत** इति । यस्मात् । अयं पुरुषः सिद्धसाधनः न तु तेन फलं प्राप्तमत इत्यर्थः। **एवमेव** प्रथमपादोक्तरीत्या। तथा च तत्त्वेव भयं विदुषोऽमन्वानस्येति-श्रुत्या प्रतिबन्धबोधनात् तूष्णीं न स्थेयमित्येतत्कर्तव्यताबोधनमेव प्रयोजन-मितिभावः ॥ २ ॥ ननु ब्रह्मविदः कार्यकारणशिक्षणं किमर्थं, आत्मन्येव च

तामसीं बुद्धिमाश्रित्य ये मूढाः सर्वविप्लवम् ।
वदन्ति शास्त्रनाशाय सद्भिः शोच्याश्च येनु तान् ॥ ३ ॥

ब्रह्मविद्गमनाभावः शतांशेनापि चेद् भवेत् ।
शास्त्रमेतद् वृथा जातं सर्वसूत्रविनाशतः ॥ ४ ॥

स्वाप्ययस्य च सम्पत्तेरत्र ब्रह्मगतिश्रुती ।
अन्यथा न श्रुतेरर्थः स्याच्चेद् व्यासो वदेन्न किम् ॥ ५ ॥

संतुष्टः तस्य कार्यं न विद्यत इतिगीतावाक्यात् तस्य कर्तव्याभावादितिकेषांचिन्मतं दूषयितुमाहुः **तामसीमिति** । " अधर्मं धर्ममिति या मन्यते तमसावृता । सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसीम् ।" इति गीतोक्तामित्यर्थः । वैयासिक**शास्त्रनाशाय सर्वविप्लवमिति** । सर्वं मायिकं वदन्तीत्यर्थः । **ये च ताननु**सारिणस्तेपि **सद्भिः** एते बोधशून्या इति **शोक**विषयीकार्या इत्यर्थः । न चात्मन्येवेतिवाक्यस्य का गतिरिति वाच्यम् । एतद्वाक्यानन्तरं " तस्मादसक्तः सततं कार्यं कर्म समाचर । असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः ॥ " इति वाक्यपठनेन कर्मकरणे शिक्षाकथनं युक्तमितिमन्तव्यम् ॥ ३ ॥ ननु ब्रह्मज्ञानोत्तरं सद्यो मुक्तिरेव, तस्य तावदेव चिरमितिश्रुतेरित्यत आहुः **ब्रह्मविदिति** । ब्रह्मज्ञानिनोऽर्चिरादिमार्गेण गमनाभावः । **शतांशेन** केनापि प्रकारेण **भवेत् चेत्** तदा **सर्वे**षामर्चिरादिसूत्रादारभ्य विशेषं च दर्शयतीत्यन्तानां **सूत्राणां विनाशात्** वैयर्थ्यात् **एतत्** तृतीयपादरूपं **शास्त्रं वृथा जातमित्यर्थः** ॥ ४ ॥ नन्वेतेषां सूत्राणां परब्रह्मपरत्वं किमर्थं, सगुणब्रह्मपरत्वमेवास्त्वित्यत **आहुः स्वाप्ययस्येति** । **अत्र** दहरविद्यारूपे ब्रह्मविद्गतिप्रकरणे **स्वाप्ययस्य** सुषुप्तेः **संपत्तेः** ब्रह्मप्राप्तेश्च षष्ठ्यर्थः संबन्धः, तदुभयसंबन्धिन्यौ **ब्रह्मगतिश्रुती** ब्रह्मणि गमनबोधिके श्रुती प्रजापतिवाक्यात् पूर्वं वर्तेते, **अतः** प्रजापतिवाक्ये आदर्तव्ये इतिशेषः ।

तामसीं बुद्धिमाश्रित्य या मुक्तिः कैश्चिदुच्यते ।
सा सुषुप्तिश्रुतेरर्थो मोहादेवान्यथामतिः ॥ ६ ॥
अतो ब्रह्मविदः कार्यं जीवतः पूर्वमुच्यते ।
आवृत्तिः श्रवणादीनां नवकृत्वोपदेशतः ॥ ७ ॥
दर्शनार्थत्वतो लिङ्गादपि व्रीह्यवघातवत् ।
आवृत्तौ श्रवणादीनामात्मेति स्याद् दृढा मतिः ॥ ८ ॥

ज्ञेयस्य ब्रह्मण उभयत्रैक्यात् । श्रुतिद्वयं च "अथ या एता हृदयस्य नाडयः" "अथ यत्रैतदस्माच्छरीरादुत्क्रामति" इत्यादिरूपम् । **श्रुतेः** प्रजापतिवाक्यरूपश्रुते**रर्थः** । **अन्यथा न** पूर्वश्रुतिद्वयविरुद्धो न । यदि **स्यात्तदा व्यासः किं न वदेत्** । अपि तु वदेदेव । अतस्तेषा परब्रह्मपरत्वमेवेतिभावः ॥ ५ ॥ ननु न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वात् न तु द्वितीयमस्ति ततोन्यद्विभक्तं यत्पश्येदित्यादिना मुक्तौ भेददर्शनाभावः श्रूयत इत्यत आहुः **तामसी**मिति । या मुक्तिर्निसंबोधा साख्यमतवदिष्यते सा सुषुप्तिश्रुतेरर्थः । शारीरब्राह्मणे तत्समानवाक्यप्रतिपादितत्वात् । तथा च प्रजापतिवाक्यप्रतिपादितमुक्तौ तथाबुद्धिर्न कार्येतिभावः । एवं च तत्त्वेव भयं विदुषोऽमन्वानस्येतिवाक्याज्ज्ञानोत्तरं मननस्य कर्तव्यत्वात् प्रथमे पादे ब्रह्मविदः शिक्षार्थमेवोक्तं, न तु साधनाङ्गत्वेनेतिदिक् ॥ ६ ॥ पादप्रयोजनानन्तरमर्थमाहुः **अत** इति । **कार्य**मिति । परप्राप्तिरूपफलानुरूपं कार्यमित्यर्थः । आवश्यकमितिशेषः । **जीवत** इति । प्राणधारणवत इत्यर्थः । **पूर्व**मिति । अत एतदध्यायस्य प्रथमे पाद इत्यर्थः । तत्कार्यमाहुः **आवृत्ति**रिति । अत्र हेतुत्रयमाहुः **नवकृत्व** इति । इदं प्रथमाधिकरण उच्यते ॥ ७ ॥ द्वितीये तत्फलमाहुः **आवृता**विति । सत्यामितिशेषः । **आत्मे**ति । भगवान् । **स्या**दिति ॥ ८ ॥ इदमवान्तरफलं कथमित्यत आहुः **आपातत** इति । सर्वरूपत्वाद्भग-

आपाततो दर्शनं तदभेदेनापि बोध्यते ।
प्रतीकोपासनादीनां नैवम्भावो हि जायते ॥ ९ ॥
आलम्बनार्थं तत्रापि ब्रह्मदृष्टिर्विशिष्यते ।
आदित्यादिब्रह्मदृष्टेरङ्गत्वं न स्वतन्त्रता ॥१०॥
मनने च निदिध्यासे विशेषश्चोच्यतेऽधुना ।
आसनादिषडङ्गैस्तु चित्तं श्रौतार्थ एव हि ॥११॥
धारयेदामतेरेवं ततः सिद्धिमवाप्स्यति ।
धर्माधर्मभयं तस्य नास्त्येवेतिनिश्चयः ॥१२॥

वत आत्माभेदेन यद्दर्शनं तदापातनो दर्शनमित्युच्यते । अपिशब्देन आत्मोपदेशोऽपि कर्तुं शक्यत इति द्वयं कार्यम् । अन्यदपि तस्य वृत्तेः कार्यमाहुः **प्रतीकेति** । **नैवमिति** । ज्ञानित्वं भक्तिर्वा न जायत इत्यर्थः ॥ ९ ॥ तर्हि किं जायत इत्यत आहुः **आलम्बनार्थमिति** । ध्यानविषयतया ग्रहणार्थमित्यर्थः । **तत्रापि** अन्यैः प्रतीकत्वेनोच्यमाने विषयेऽपि **विशिष्यते** विशेषबोधिका भवति । तृतीयाधिकरणार्थमाहुः **आदित्येति** ॥ १० ॥ श्रवणादीना कार्यमुक्त्वा आपाततः फलस्यानुभवप्रकारं मनननिदिध्यासकार्यं चाहुः **मननेति** । **विशेष इति** । भगवतेऽन्तर्बहिःप्राकट्यरूपः । अधुना भक्तिद्वारा मनने निदध्यासने च विशेषमाहुः इत्यन्वयः । तथा चादित्याद्युपासनया प्रतीकोपासनया वा भक्तौ सत्यां मननादिना प्राकट्ये सति यत्फलं तदाहुः **आसनादीति** । आसनादीना यानि षडङ्गानि । आसनं बहिःप्रकटस्योपवेशनम् । अतः प्रकटस्योपवेशनं लीलाप्राकट्य **चादिपदार्थः** । **षडङ्गानि** च (१) वारंवारं श्रवणं (२) आत्मभेदज्ञानं (३) तथा ग्राहणं (४) अप्रतीकोपासनं (५) सर्वत्र ब्रह्मभावः (६) आदित्यादिषडङ्गबुद्धिरिति ।

अग्निहोत्रादिकं कार्यं सन्न्यासः फल एव हि ।
षोढा चेत् पुरुषो व्यक्तः प्रारब्धान्ते फलं भवेत् ॥१३॥

एतावान् प्रथमे पादे निर्णयः सूत्रकृत्कृतः ।
द्वितीये म्रियमाणस्य सर्वेन्द्रियलयः पुरा ॥१४॥

लिङ्गस्यापि शरीरस्य नाड्योत्क्रान्तिरिहोच्यते ।
दिनायनकृतो नास्य विशेषोऽस्तीति चोच्यते ॥१५॥

तृतीये क्रममुक्तौ यो मार्गो यस्य श्रुतेर्मतः ।
तन्निर्धारोऽन्यमार्गाणामप्राप्यत्वं च वर्ण्यते ॥१६॥

गन्तव्यं च परं ब्रह्म कार्यो लोकस्तु नेति च ।
तुरीये पुष्टिमर्यादाभेदेन फलमुच्यते ॥१७॥

एतैः **श्रौतार्थे** भगवति **आमतेः** मननादारभ्य **एवं चित्तं धारयेत्** । **सिद्धिं** भगवदासनादिसंपादकोत्कटस्नेहोत्पत्तिरूपाम् । एतेनाप्रायण-सूत्रान्तार्थ उक्तः ॥ ११½ ॥ तदधिगमादिसूत्रार्थमाहुः **धर्मेति** ॥ १२ ॥ **प्रारब्धान्ते** प्रारब्धकर्मणां भोगादेव क्षय इति श्रुत्या तदन्त इत्यर्थः ॥ १३ ॥ प्रथमपादार्थमुपसंहरन्ति **एतावानिति** । द्वितीयपादार्थं वदन्ति **सर्वेति** । **पुरा** मरणात्पूर्वम् । मर्यादामार्गीयस्य भूतेषु लयः पुष्टिमार्गीयस्य भगवति इति विशेषः ॥१४॥ **इह** जघन्याधिकारिणि **उत्क्रान्तिः** । **दिनेति** । **दिनं** दिवसः न तु रात्रिः **अयनं** उत्तरायणम् ॥ १५ ॥ तृतीयार्थमाहुः **तृतीयेति** । **यस्य** अधिकारिणः । **अन्ये मार्गाः** उपाया येषाम् ॥ १६ ॥ **लोकस्तु न कार्यः** गन्तव्यत्वेन न परिकल्प्य इत्यर्थः । चतुर्थपादार्थमाहुः **तुरीय इति** ॥ १७ ॥ विशेषमाहुः **प्रभोरिति** । आत्मा प्रकरणादितिसूत्रद्वये **प्रभोः फलत्वं,**

प्रभोरेव फलत्वं तन्निर्दोषत्वं च वर्ण्यते ।
लीलानित्यत्वतः पूर्णगुणत्वं च ततोऽखिलम् ॥१८॥

अस्य फलप्रकरणत्वेऽपि साधनरूपस्यापि श्रवणस्यान्तरङ्गत्वं ज्ञापयितुं तन्निर्धारमप्याह । "आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" (बृ ४. ५. ६.) इत्यादिवाक्यैर्हितं श्रवणादिकं किं सकृदेव कर्तव्यमुतासकृदिति भवति संशयः । किं तावत् प्राप्तम् । सकृदेवेति । तावतैव शास्त्रार्थस्य सम्पत्तेः । न च तण्डुलनिष्पत्तिफलकावघातस्येव दर्शनफलानां श्रवणादीनां तत्सिद्धिपर्यन्तमावृत्तिर्न्यायप्राप्तेति वाच्यम् । अवघातस्य वितुषीकरणात्मकदृष्टद्वारकत्वेन तथात्वमस्तु नाम, प्रकृते त्वदृष्टद्वारकत्वात् सकृत्कृतेनैवादृष्टद्वारा फलसम्पादनसम्भवादावृत्तिरप्रयोजिकेति प्राप्त उच्यते

आवृत्तिरसकृदुपदेशात् ॥ १ ॥

आवृत्तिरेव श्रवणादीनां श्रुत्यभिमता । कुतः । **असकृदुपदेशात्** । छान्दोग्ये श्वेतकेतूपाख्याने "ऐतदात्म्यमिद्ँ सर्वं तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" (छा. ६. ८. ७.) इति-

---

तन्निर्दोषत्वं तत्त्वभावे संध्यवदितिसूत्रद्वये, अधिकं जगद्व्यापारसूत्रेषु । **लीलेति** । लीलाया नियत्वात् तद्विशिष्टं स्वरूपं फलमित्यर्थः ॥ १८ ॥

एवमापाततोऽध्यायार्थं निरूप्येदानीं फलप्रकरणे साधननिरूपणमयुक्तमितिशङ्कां निवारयितुमावृत्त्यधिकरणं वक्तुं सूत्रमवतारयन्ति **अस्येति** । **अन्तरङ्गत्वं** फलोपकारकत्वम् । विषयमाहुः **आत्मेति** । संशयमाहुः **किं**

वाक्येन जडजीवयोर्ब्रह्मात्मत्वं नवकृत्व उपदिष्टवान्। तथा च सकृदुपदेशेनैव चेदर्थसिद्धिः स्यात् तदैकमेवार्थमेकस्मा एकदैवासकृन्नोपदिशेत्। प्रयोजनाभावात्। एतेनावघातवदन्तःकरणदोषनिवर्तनं दृष्टद्वारमन्येषामुपदेशानां चरमस्य तस्य ज्ञानसाधकत्वमिति मन्तव्यम्॥ १॥

लिङ्गाच्च॥ २॥

श्रुत्यनुमापकत्वेन स्मृतिर्लिङ्गमित्युच्यते। सा च "यथायथात्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः। तथातथा पश्यति तत्त्वसूक्ष्मं चक्षुर्यथैवाञ्जनसम्प्रयुक्तम्" (भा. ११. १४. २६) इत्यादिरूपा तदावृत्तिमेव फलसाधकत्वेनाह। अत्र दृष्टान्तेनापि दृष्टद्वारकत्वं श्रवणादीनां सूच्यते।

सकृदिति। पूर्वपक्षमाहुः **सकृदेवेति**। सिद्धान्तमाहुः **उच्यत** इति। कुत्रोपदेश इत्यत आहुः **छान्दोग्य** इति। सकृदुपदेशेन कार्यं न जायत इत्याहुः **तथा चेति**। नवकृत्व उपदेशानां मध्ये चरमस्यैवापरोक्षज्ञानसाधकत्वमित्याहुः **एतेनेति**। **दृष्टद्वारमिति**। अन्तःकरणदोषस्य मानसिकप्रत्यक्षविषयत्वात्तथाबोध्यम्॥ १॥

सूत्रमवतारयन्ति **अत्रैवेति**। **लिङ्गमिति**। यथा वह्न्यनुमापकत्वाद् धूमस्य लिङ्गमितिसंज्ञा तथा लिङ्ग्यते अनुमीयते श्रुतिरनया स्मृत्या इतिस्मृतेर्लिङ्गत्वमित्यर्थः। **रूपेत्यन्ता** स्मृतिः। तस्यां यदात्मपदं तदन्तःकरणपरम्। **तदावृत्तिमेव** श्रवणावृत्तिमेव। **दृष्टान्तेनेति**। अञ्जनदृष्टान्तेनेत्यर्थः। मुख्यं फलं दर्शनं, अवान्तरफलत्वं श्रवणादीना यदुक्तं तत्र कारण-

"आत्मा वारे द्रष्टव्यः" (बृ. ४. ५. ६.) इतिपदेन श्रवणादीनां फलात्मकं पूर्वमुक्त्वा "श्रोतव्यो मन्तव्यः" (बृ. ४. ४. ६) इत्यादिना तत्साधनानि पश्चाद् यदाह तेनात्मनः परोक्षमपि ज्ञानमवान्तरफलरूपमिति भक्तिमार्गे परमफलरूपतत्सजातीयत्वेन च फलमध्यपात्येवेति श्रुत्यभिमतमिति ज्ञायते। तेन सूत्रकृदपि फलप्रकरणेपि साधनविचारं चकारेतिनिगूढाशयः।

तथापि शब्दक्रमादार्थक्रमो बलीयानितिन्यायाद् द्रष्टव्य इतिपदस्य पश्चात्सम्बन्धे तूक्तरीतिर्नावसरं प्राप्नोतीति प्रकृतविचारस्य फलप्रकरणासङ्गतत्वमापततीति प्रकारान्तरेण सूत्रार्थ उच्यते।

श्रुतिर्हि कर्मज्ञानभक्तीः साक्षात्परम्पराभेदेन पुरुषार्थसाधनत्वेन हीनमध्यमोत्तमाधिकारिणः प्रति कर्तव्यत्वेन प्रतिपादयति। तत्र तेषां स्वरूपं तृतीयेध्याये बादरायणेन प्रतिपादितमथ तुरीयेध्याये

माहुः **आत्मा वार** इति। **परमफलरूपेति**। परमफलं साक्षात्कारः। **तत्सजातीयत्वेन** तद्विषयविषयत्वेनेत्यर्थः। अत्रार्थे सूत्रकारसंमतिमाहुः **तेनेति**।

सूत्रस्य प्रकारान्तरेणार्थकथने बीजमाहुः **तथापीति**। 'आत्मा वारे' इत्यत्र निदिध्यासानान्तरमेव साक्षात्कारो जायत इति आर्थक्रमस्य बलवत्त्वं बोध्यम्। नो चेद्दर्शनानन्तरं मोक्षे जाते श्रवणस्यानर्थक्यादितिभावः। पूर्वमीमांसायां शाब्दक्रमादार्थक्रमो बलीयानित्युक्तम्। उदाहरण तु अग्निहोत्रं जुहोति यवागू पचतीत्यत्र बोध्यमितिविस्तरभयाद्विरम्यते। **प्रकारान्तरेण** कर्मज्ञानभक्तिक्रमेण आवृत्तिरितिपूर्वाध्यायनिरूपितां संगति वदन्ति **श्रुतिर्हीति**। **तत्र**

तेषां फलं चिन्त्यते। तत्रादौ कर्ममार्गस्य फलमुच्यते। ज्ञानभक्त्योरेव क्रमेणोत्तमात्युत्तमफलकत्वमतस्तत्साधनत्वेनैव तत् कर्तव्यं न तु स्वातन्त्र्येणेति ज्ञापयितुम् आवृत्तिरिति। कर्ममार्गस्यावृत्तिः पुनर्जन्म फलं तदप्यसकृत्। इदं पदमावृत्त्योभयत्रापि सम्बध्यते। तथा चात्र प्रमाणापेक्षायां तदाह हेतुत्वेनासकृदुपदेशादिति। श्रुतौ कर्ममार्गे पुनर्जन्मासकृदुपदिश्यते यतः। अन्यथा सकृदुपदेशेनैव तदवगमेप्यसकृदुपदेशो व्यर्थः स्यादतस्तथेत्यर्थः। वाजसनेयिशाखायां पठ्यते "एवमेवायꣳ शारीर आत्मैभ्योङ्गेभ्यः सम्प्रमुच्य पुनः प्रतिन्यायं प्रतियोन्याद्रवति प्राणायैव" (बृ. ४. ३. ३६.) इति। तत्रैव पुनः "तेनैव प्रद्योतेनैष आत्मा निष्क्रामति" (बृ. ४. ४. २.) इत्युपक्रम्य पठ्यते "तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च" (बृ. ४. ४. २.) इति। तत्रैवैतदनुपदमेव "तद् यथा तृणजलायुका" (बृ. ४. ४. ३.) इत्युपक्रम्य पठ्यते "एवमेवायं पुरुष इदꣳ शरीरं निहत्याविद्यां गमयित्वान्यन्

साधनविचारे **तेषां** कर्मादीनाम्। **चिन्त्यत** इति। एतेन तुरीयाध्यायस्यार्थ उक्तः। इदानी सूत्रमवतारयन्ति **तत्रादा**वित्यादिना। **तत्साधनत्वेने**ति। ज्ञानभक्तिसाधनत्वेन कर्म कर्तव्यमित्यर्थः। एवं च स्वतः कर्मकरणे पुनः पुनर्जन्मादिरूपं जघन्यं फलमितिभावः। सूत्रं व्याकुर्वन्ति **कर्ममार्गस्ये**ति। **इदंपदमि**ति। असकृदितिपदम्। **आवृत्तौ** उपदेशपि देहलीदीपन्यायेन संबध्यते। एतादृशसंबन्धप्रयोजनमाहुः **तथा चे**त्यादिना **तथेत्यर्थ** इत्यन्तेन। तथा च स्वर्गादिरूपं यत्फलं श्रुतावुक्तं तत्तस्य प्रतिपत्तिः फलं तु जन्मैवेति **असकृत्पदेन** ज्ञायते इति भावः। **वाजसनेयी**ति। बृहदारण्यके

नवतरं कल्याणतरꣳ रूपं तनुते पित्र्यं वा गान्धर्वं वा ब्राह्मं वा प्राजापत्यं वा दैवं वा मानुषं वान्येभ्यो वा भूतेभ्यः " (बृ. ४. ४. ४.) इति । तत्रैवाग्रे पठ्यते " प्राप्यान्तं कर्मणस्तस्य यत् किञ्चेह करोत्ययम् । तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे " (बृ. ४. ४. ६.) इति ।

अत्र हेत्वन्तरमाह लिङ्गाच्च । वेदानुमापकत्वेन स्मृतिर्लिङ्गमित्युच्यते । सा च भगवद्गीतासु " त्रैविद्या माम् " (भ. गी. ९. २०.) इत्युपक्रम्य पठ्यते " एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते " (भ. गी. ९. २१.) इति " आ ब्रह्मभवनाल्लोकाः पुनरावर्तिनोऽर्जुन " (भ. गी. ८. १६.) इति च । अथवा " यथाकारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेन " (बृ. ४. ४. ५.) इतिश्रुतिर्वर्तमानजन्मकर्मणोः पूर्वजन्मसम्बन्धिकर्मानुमापकत्वं वदतीति कर्मिणः पुनर्जन्मावश्यकमिति ज्ञायते ।

शारीरब्राह्मणे । **तत्रैवेति** शारीरब्राह्मणे । अस्यार्थस्तूत्तान एव तथापि तद्भाष्यादनुसंधेयः ।

लिङ्गाच्च । वेदानुमापकत्वमिति । स्मृतेर्वेदानुमापकत्वाल्लिङ्गत्वमित्यर्थः । **सा चेति ।** स्मृतिश्चेत्यर्थः । लिङ्गपदस्यार्थान्तरमाहुः **अथवेति । अनुमापकत्वं वदतीति ।** यथाचारीत्युक्तमेव, पुनः पुण्यः पुण्येनेत्युक्त्या एतज्जन्मसंबन्धिकर्मानुमापकत्वम् तथा च **लिङ्गपदेन** कर्मापि बोध्यत इति भावः । सूत्रार्थमाहुः **एवं सतीति ।** ननु निवृत्तिमार्गीयेनापि कर्म कर्तव्यमित्युक्तम् ।

एवं सति लिङ्गत्वेन निरूपणादित्यर्थः सम्पद्यते। निवृत्तिमार्गीयस्यापि तस्य ज्ञानोपकर्तृत्वमात्रं न तु जन्मनिवर्तकत्वं मानाभावात् ॥२॥१॥

॥ इति चतुर्थाध्याये प्रथमपादे प्रथममावृत्त्यधिकरणम् ॥ १ ॥

एवं कर्मफलं विचार्य ज्ञानफलं विचारयति ।

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥

पूर्वार्थनिरूपणव्यवच्छेदाय तुशब्दः। ज्ञानिनो हि भगवन्तमात्मत्वेनैवोपासते। तस्या नैरन्तर्येनेकजन्मभिस्तथैव तेषां हृदि भगवान् स्फुरति। तदा स्वानन्दांशस्याप्याविर्भावाद् ब्रह्मभूतः सन्नात्मत्वेनैव ब्रह्म स्फुरितमिति तदानन्दात्मकः संस्तमनुभवति। एवं स्थितः प्रारब्धसमाप्तौ देहापगमे तत्रैव प्रविष्टो भवति।

तथा च तस्य पुनर्जन्माभावात्कर्म व्यर्थं स्यादित्यत आहुः **निवृत्तीति**। **तस्य** ज्ञानभक्त्युपकारकत्वान्नैव व्यर्थमित्यर्थः। अस्मिन्पक्षे संशयाद्यभावान्नाधिकरणरूपमितिज्ञेयम् ॥ २ ॥ इति प्रथमाधिकरणम् ॥

सूत्रं व्याकुर्वन्ति **पूर्वेति**। सूत्र **उपगच्छन्तीत्यस्य** ज्ञानार्थकत्वम्। **तथा** चात्मज्ञानं मोक्षस्य साधनमित्यर्थे साधनविचार एव प्रतीयते न तु फलविचार इत्यत आहुः **ज्ञानिन** इति। **उपासत** इति। आत्मेत्येवोपासीतेतिश्रुतेर्भगवन्तमात्मत्वेनैवोपासते, उपासना कुर्वन्तीत्यर्थः। **तस्याः** उपासनायाः। **स्फुरतीति**। 'बहूनां जन्मनामन्ते' इति गीतावाक्यादित्यर्थः। **आनन्दांशस्यापीति**। जीवानन्दस्यापीत्यर्थः। **ब्रह्मभूतः सन्निति**। त्रयाणा प्राकट्ये ब्रह्मैव सन् ब्रह्माप्येतीतिश्रुत्या ब्रह्मभूत इत्यर्थः। **प्रविष्टो भवतीति**। ज्ञानिनो यन्मुख्यं फलं तदुपगच्छन्तीत्यर्थः। एवं च फलप्रकरणमेवैतदिति

एतादृशः सर्वोपकारीति परार्थमपि तस्मै भगवता ज्ञानं दत्तमिति प्रवचनमपि तस्य फलान्तःपातीत्यविकारिण्युपस्थिते तथैवोपदिशति च । एतदेवाहात्मेत्यादिना । उप समीपे गमनं प्रवेश इति यावत् ।

अथ वा ननु ज्ञानभक्त्योरनावृत्तिः फलमत उत्तमे ते न तु कर्मेत्याशयेन कर्मणः फलमावृत्तिरिति यन् निरूपितं तत्रेदं चिन्त्यते । "न स पुनरावर्तते" (छा. ८. १५. १.) इतिश्रुतिः सर्वथानावृत्तिमाहोत सावधिकीं ताममरशब्देन तन्निवृत्तिमिव । किमत्र युक्तम् । सावधिकीमेवेति । तथा हि पूर्वं कर्मनैयत्यस्य त्वयाप्यङ्गीकार्यत्वात् तस्य प्ररोहैकस्वभावत्वात् तस्य दुरतिक्रमत्वात् तत्फला-

---

सूचयितुमाहुः **तस्य फलान्तःपातीति** । भगवत्कृपयेति शेषः । ननु आत्मत्वेन ग्रहणमात्मज्ञानानन्तरमेव जायत इति **उपगच्छन्तीत्यस्य** ज्ञानार्थकत्वमेव न तु प्रवेशार्थकत्वमत आहुः **उपेति** । एवं च ज्ञानिन उपगच्छन्ति ग्राहयन्तीत्यर्थद्वयसग्राहकत्वं सूत्रे ज्ञानिनामुक्तम् । तेन च पुनरावृत्त्यभाव एव फलमिति फलप्रकरणाद्बोध्यमिति भावः । पूर्वसूत्रयोर्वर्णकान्तरे कर्मण एव विचारः कृतः । स एवाधुना कर्तुं पक्षान्तरमाहुः **अथवेति** । **उत्तमे ते** । ज्ञानभक्ती इत्यर्थः । **तत्रेदमिति** । अनावृत्तिविचारः क्रियत इत्यर्थः । एतेन विषय उक्तो भवति । संशयमाहुः **न स पुनरिति** । संदेहबीजं तु ज्ञानिभिरपि कर्म कर्तव्यमितिव्यवस्थापितं तेन चानावृत्तिः फलं कर्मिणः सावधिकामरभावपर्यन्तमितिकथनाद् बोध्यम् । पूर्वपक्षमाहुः **किमत्रेति** । **पूर्वमिति** । अनावृत्तेः पूर्वं जीवदशायामित्यर्थः । त्वया सिद्धान्तिना यावदायुषमेवं वर्तयन्नितिश्रुत्या अङ्गीकार्यत्वादित्यर्थः । **तस्य** कर्मणः **प्ररोहैकस्वभावत्वात्** जन्मैकस्वभावत्वात् **तस्य** स्वभावस्य **दुरतिक्रमत्वात्** दुर्लङ्घ्यत्वात् । **तत्फलेति** । जन्मान्तरीणकर्मफलेत्यर्थः ।

नुभवस्यावश्यकत्वात् । अपि च " य एनं विदुः " (बृ. ४. ४. २२.) इतिश्रुतेः सति ज्ञाने हि सा । " यतो वाचः " (तै. २. ९.) " अगृह्यो न हि गृह्यते " (बृ. ४. ४. २२.) इत्यादिश्रुतिभ्यो ब्रह्मज्ञानासम्भवात् । इत एव भक्तिरपि प्रत्युक्ता वेदितव्या। ज्ञानाविषये स्नेहासम्भावत् । किञ्च " सर्वस्य वशी सर्वस्येशानः " (बृ. ४. ४. २२.) इत्यादिश्रुतिभ्यो " यस्यावतारकर्माणि गायन्ति ह्यस्मदादयः । न यं विदन्ति तत्त्वेन " (भाग. २. ६. ३७) इत्यादिस्मृतिभ्यश्च का प्रत्याशा जीवस्यातिहीनस्य तत्प्राप्तावत एवोपदेशासम्भवोपीति प्राप्ते प्रत्याहात्मेतीत्यादिना । तुशब्दः पूर्वपक्षनिरासकः ।

अत्रायमाशयः । सत्यमुक्तं भवता । तत्रोच्यते । यथागृह्यत्वातिमहत्त्वादिधर्मा भगवति सन्ति तथा सर्वात्मत्वमपि " य आत्मनि तिष्ठन् " इत्यादिश्रुतिष्वात्मत्वेनैवोक्तेः । सर्वधर्माश्रयत्वेपि यदा यं धर्मं पुरस्कृत्य लीलां करोति तत्कार्यमेव तदा सम्पद्यते ।

एवं चावृत्तौ साधकमेवेतिभाव. । बाधकमाहुः **अपि चेति** । **सा** अनावृत्तिः । ननु कुतो ज्ञानं न जायत इत्याहुः **यत** इति । यतो वाचो निवर्तन्त इत्यादि श्रुत्या ज्ञानाभावादित्यर्थः । ननु भक्तौ वानावृत्तिर्भविष्यतीत्यत आहुः **इत एवेति** । प्रमेयबलेन बाधकमाहुः **किं चेति** । अत्र श्रुत्या प्राप्तिर्नास्ति स्मृत्या च ज्ञानं नास्तीति बोध्यते । **अत एवेति** । गुरोरेव ज्ञानाभावादितिभावः ।

सिद्धान्तं विशदयन्ति **अत्रायमिति** । **आत्मानं प्रापयति** । एवं च सर्वात्मनियामकत्वाद् भगवत्स्वभावस्यापि कर्मस्वभाववद् दुरतिक्रमत्वाज्ज्ञा-

हितकारित्वस्वभावत्वात् तस्य । एवं सति यस्मिन् पुरुषे यदात्मत्वेन लीलां करोति तदा स्वप्राप्त्यनुकूलप्रयत्नवन्तं विधायात्मानं प्रापयति । ननूक्तं दुरतिक्रमः कर्मस्वभाव इति । नैष दोषः । न ह्यन्नरसपाकाय जग्धमौषधमपि गौरवाय भवति । तेन न तन्निवृत्तिर्वा । व्यापादनैक-स्वभावमपि विषमाशीविषं तदपगमपटुतरनिगमसङ्गमो नापगमयति वा । तथा भगवदर्पितं तदर्थं च कृतं कर्म न कर्मनाशाय भवतीति न वक्तुं शक्यम् । " कर्मनाशाय कर्माणि विधत्ते ह्यगद यथा " भाग. ११. ३. ४४.) इतिवाक्यात् । अगृह्यत्वगृह्यत्वविरोधा-पहारस्तु जीवसामर्थ्येश्वरेच्छाभ्यां पुरैव कृत इति नाधिकमत्र निरूप्यम् । इतिशब्दो हेत्वर्थे । तथा च भगवानात्मा भवति सर्वेषां जीवानामतो हेतोरुक्तरीत्या तदनुग्रहेण तमुपगच्छन्ति ।

नाश्रयं भक्त्याश्रयं वा पुरुषं विधाय सर्वं करोतीति न दौर्घट्यमितिभावः । उभयोरात्मकर्मणोः स्वभावस्य दुरतिक्रमात् सावधिकत्वसंशय इत्याशये-नाशङ्कते **न चेति** । निराकुर्वन्ति **नैष दोष** इति । **भवतीति** । **न हीति**-पूर्वेणान्वयः । **तन्निवृत्तिरिति** । अन्नरसपाकनिवृत्तिर्नेति न हीत्यर्थः, किंतु अन्नरसपाको भवतीत्यर्थः । एवं विषस्य विषमौषधमित्युक्त्या विषस्य **व्यापादनं** दूरीकरण, तत्र पटुर्यद्विषं तत्किम**माशीविषं नापगमयति** न दूरीकरोति, अपि तु दूरीकरोत्येव । एवं विषापगमे समर्थः यः आगमोऽपि मन्त्रोऽपि तथा । दार्ष्टान्तिके योजयन्ति **तथेति** । **वाक्यादिति** । एकादश-स्कन्धीययोगेश्वरवाक्यादित्यर्थः ।

एवंरीत्या कर्मस्वभावनाशो यथा तथा विरुद्धधर्मस्याप्यात्मस्वभावनाशक-त्वमित्याशङ्क्य परिहरन्ति **अगृह्यत्वेति** । एवं बाधकपरिहारोत्तरं सूत्रार्थमाहुः **इतिशब्द** इति । **तमुपगच्छन्तीति** । ज्ञानिनस्तु प्रत्यग्रसत्वेन भक्तास्तु

ज्ञानमार्गेऽङ्गीकृतास्त्वात्मत्वेनैव ज्ञानादुप समीप एव गच्छन्त्युक्तरीत्याक्षरात्मके तत्रैव प्रविष्टा भवन्तीत्यर्थः। भक्तिमार्गेऽङ्गीकृतास्तु साक्षात् प्रकटे पुरुषोत्तमे सति तद्भजनार्थमुप समीपं गच्छन्तीत्यर्थः। एवं श्लेषोक्तिरियमिति ज्ञायते। सम्प्रदायानुवृत्तिरपि भगवदिङ्गितेत्येतादृशाः स्वयं येन मार्गेण फलं प्राप्तास्तं मार्गमन्यानपि ग्राहयन्त्युपदेशैः अत्रोभयत्राप्यात्मत्वमेव हेतुः अन्यथात्मारामस्य सर्वनिरपेक्षस्यैवं करणासम्भवेन मोक्षमार्गाप्रसिद्धिरेव स्यात्। तस्मात् सर्वथानावृत्तिरेव श्रुत्यभिमतेति ज्ञेयम् ॥ ३ ॥

नन्वात्मत्वेनोक्तिरुपासनार्थेति नोक्तं साधीय इत्यत उत्तरं पठति

न प्रतीकेन हि सः ॥ ४ ॥

अतद्रूपे तत्त्वेनोपासनं हि प्रतीकमित्युच्यते। तथा च

सर्वात्मत्वाद्यानन्दप्राधान्येनोपगच्छन्तीत्यर्थः। उपगमनस्य विभागमाहुः **ज्ञानमार्ग** इति। अयमेव सूत्राशय इत्याहुः **एवमिति**। **उपगच्छन्तीत्युक्तं** गृह्णन्तीति नोक्तं, तेन कृत्वा विभागः सूत्रकृदभिप्रेत इति ज्ञायत इत्यर्थः। एतावता मार्गद्वयस्य मुख्यं फलमुक्तम्। इदानीमवान्तरफलं वक्तुं सूत्रैकदेशार्थमाहुः **संप्रदायेति**। ज्ञानभक्तिसम्प्रदायेत्यर्थः। **उभयत्रेति**। मार्गद्वयोपदेश इत्यर्थः। उपसंहरन्ति **तस्मादिति**। कर्मणोऽङ्गत्वेनानावृत्तिफलकत्वं ज्ञानभक्त्योस्तु स्वत एवेति तयोरुत्तमत्वमित्यलं विस्तरेण ॥ ३ ॥

सूत्रमवतारयन्ति **नन्विति**। **उपासनार्थेति**। आत्मेत्येवोपासीतेतिश्रुत्या स्वात्मा परमात्मत्वेनोपासनार्थं स्तूयत इत्यर्थः। तथा च जीवस्यांशत्वात्तद्भेदेनोपासने अनावृत्तिः फलं न भवतीतिभावः। सूत्रार्थमाहुः **अतद्रूपेति**।

तादृशेन तेन स मोक्षो न भवतीत्यर्थः। श्रुतिसिद्धत्वान्नास्ति मोक्ष इति न वक्तुं शक्यमितिभावः।

अथ वात्मत्वेनोक्तिरुपासनार्थेति वदन् वादी प्रष्टव्यः। फलार्थमेव तत्। फलं च श्रुत्युक्तस्तत्प्रवेश एवेति त्वयापि वाच्यम्। एवं सत्यादौ ज्ञानमार्गेनुपपत्तिमाह न प्रतीकेनात्मभूते ज्ञानिन

कृत्स्नरूपस्य एकदेशरूपेणोपासनं प्रतीकोपासनम्। प्राणन्नेव प्राणो भवतीतिश्रुत्या सर्वरूपस्यात्मन एकदेशप्राणादिरूपेणोपासनाया एव प्रतीकत्वेन प्रतिपादनात्। तादृशेन मोक्षो न भवतीत्यर्थः। **श्रुतिसिद्धत्वादिति**। परमात्मत्वेनोपासनं तु अकृत्स्नत्ववारणार्थं, आत्मेत्येवोपासीतेतिश्रुत्या प्रतिपादितम्। तथाचात्मत्वेनोपासनायाः फलं कृत्स्नभावः, तस्य फलं सर्वात्मभावः, तस्य फलं मोक्ष इतिश्रुतिसिद्धत्वादित्यर्थः। तथा चेयं न प्रतीकोपासनेति वा भावः। अथवा **श्रुतिसिद्धत्वादिति**। आत्मेत्येवोपासीतेत्यनेनोपासना विधीयते, न तु पूर्वोक्तमात्मज्ञानस्य फलं निषिध्यते। य एनं विदुरमृतास्ते भवन्तीतिश्रुत्यात्मज्ञानेन मोक्षस्य श्रुतिसिद्धत्वादितिसूत्रभाव इत्यर्थः।

नन्वेतादृशप्रतीकोपासनस्य ज्ञानं फलं तेन मोक्ष इत्युक्तं न तु भक्त्येत्यर्थतः प्रकारान्तरमाहुः **अथवेति**। अस्मिन्पक्षे सूत्रस्य भागद्वयं न प्रतीके न हि स इति। पूर्वभागे शेषपूरणेन ज्ञानपरत्वेन व्याख्यानमुत्तरभागे भक्तिपरत्वेनेति। **प्रष्टव्य** इत्यनेन फलार्थमेवोपासने प्रतीकत्वे स्वीकृते दोष इति ध्वनितम्। **तत्** उपासनमित्यर्थः। **श्रुत्युक्त** इति प्रवेशस्य विशेषणम्। ब्रह्मैव सन्ब्रह्माप्येतीतिश्रुत्युक्तो ब्रह्मणि लय इत्यर्थः। **एवं सति** अस्या उपासनाया एतादृशफलवत्त्वे सिद्धे प्रतीकत्वे स्वीक्रियमाणे सतीत्यर्थः। **अनुपपत्तिम्**। यत्र प्रतीकत्वं तत्रैतादृशफलवत्त्वं नास्तीत्यनुपपत्तिमित्यर्थः। प्रतीक इत्यस्य विशेषणमाहुः **अनात्मभूत** इति। मनोब्रह्मेत्युपासीतेतिश्रुति-

उपगमः पूर्वोक्तः प्रवेशः सम्भवतीतिशेषः । भक्तिमार्गेपि तामाह न हि स इति । न हि प्रतीकोपासने स लोकवेदप्रसिद्धः पुरुषोत्तमोस्त्युपास्यत्वेन येन तत्प्राकट्यं स्यात् तदुपगमनं चेत्यर्थः । एवं ज्ञानभक्त्योः फलसत्ता साधिता ॥ ४ ॥

ननु "सर्वं खल्विदं ब्रह्म" (छा. ३. १४. १.) "आत्मैवेदꣳ सर्वम्" (छा. ६. २५. २.) इत्यादिश्रुतयः सर्वत्र ब्रह्मदृष्टिं मुक्तिसाधनत्वेनोपदिशन्ति । सा च प्रतीकात्मिकैवेति कथं प्रतीकोपासनस्य न मोक्षसाधकत्वमिति प्राप्त उत्तरमाह

ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥

प्रतिपाद्ये ब्रह्मत्वेन मनउपासनाविषय आत्मभिन्ने मनसीत्यर्थः । तथा च परमात्मत्वेनात्मोपासने ज्ञानिनस्तत्र पुरुषोत्तमे प्रवेशात् नेयं प्रतीकोपासनेतिभावः । एवं चात्मत्वेन ज्ञानं मया उच्यते त्वया उपासनेति फलमेकमेवेतिहृदयम् ।

सूत्रोत्तरभागमवतारयन्ति **भक्तिमार्गेपीति** । **तां** अनुपपत्तिम् । न हि सः प्रतीके इत्यस्यान्वयः । तथा च प्रतीकोपासने पुरुषोत्तम उपास्य एव न भवतीत्यात्मत्वेन पुरुषोत्तमोपासनायाः प्रतीकत्वं नास्तीतिभावः । एतावान् विशेषः । ज्ञानिनामात्मत्वेनोपासनाया अकृत्स्नत्ववारणार्थत्वात् भक्तानां त्वात्मत्वेनोपासनायाः पुरुषोत्तमपर्यवसायित्वाच्च न प्रतीकत्वमुभयोरितिहृदयम् ॥४॥

सूत्रमवतारयन्ति **ननु सर्वमिति** । इदं वाक्द्वयं छान्दोग्ये क्रमेण शाण्डिल्यविद्यायां सनत्कुमारनारदसंवादे च बोध्यम् । **सा चेति** । सर्वत्र ब्रह्मदृष्टिश्चेत्यर्थः । तथा चात्मनि प्राणाद्येकदेशदृष्टिवत् ब्रह्मकार्ये जगति ब्रह्मदृष्टिः

सर्वत्र ब्रह्मदृष्टिर्न प्रतीकात्मिका। सर्वस्य वस्तुतो ब्रह्मात्मकत्वात्। सा च नोपदेशसाध्यातो नोपदिश्यते किन्त्वनूद्यते। सा त्वधिकारोत्कर्षात् स्वत एव भवतीति प्रतीकोपासनस्य न मुक्तिसाधनत्वमिति साधूक्तम्। एतदेवोक्तमनेन सूत्रेण ॥ ५ ॥ २ ॥

॥ इति चतुर्थाध्याये प्रथमपादे
द्वितीयमात्मेतीत्यधिकरणम् ॥ २ ॥

छान्दोग्ये " अथ होवाच सत्ययज्ञं पौलुषिं प्राचीनयोग्य कं त्वमात्मानमुपास्से " (५. १३. १.) इति " आदित्यमेव भगवो राजन्निति होवाच " इति " अथ होवाचेन्द्रद्युम्नम् " (५. १४. १.) इत्युपक्रम्य " कं त्वमात्मानमुपास्से " इति " वायुमेव भगवो राजन्निति होवाच " इति। एवमेवाग्रे प्रश्नभेदेन वक्तृभेदेनाकाशाप्प्रभृतय आत्मत्वेनोपासनाविषया उक्ताः। तत्रैव " असौ वा आदित्यो देवमधु " (३.

प्रतीकात्मिकैवेतिभावः। सूत्रं व्याकुर्वन्ति **सर्वत्रे**ति। **वस्तुत** इति। सर्वं खल्विदमिति वाक्येन कार्यस्य कारणात्मकत्वमुक्तम्। तथा चेयं मननात्मिका उपासना। स क्रतुं कुर्वीतेति मननोपदेशात्। तेन चाभेदज्ञाने जाते भेदजनितभयाभावरूपमोक्षोपपत्तिरिति भावः। **सा चे**ति। मननात्मिका उपासना चेत्यर्थः। **किन्त्वि**ति। सनत्कुमारनारदविद्यासु अनूद्यत इत्यर्थः ॥ ५ ॥ इतिद्वितीयाधिकरणम् ॥

इदानीं ज्ञानभक्त्यङ्गभूतानामुपासनानां फलं विचारयितुमादित्याधिकरणमाहुः **आदित्यादिमतय** इति। विषयवाक्यमाहुः **छान्दोग्य** इति। भक्तिमार्गीयस्यान्यदेव विषयवाक्यमाहुः **तत्रैवे**ति। छान्दोग्ये। संशयमाहुः

१. १.) इत्युपक्रम्यान्ते पठ्यते " य एतमेवं विद्वानादित्यं ब्रह्मेत्युपास्ते " (३. १९. ४.) इति । अत्रेदं चिन्त्यते । अत्र प्रतीकोपासनत्वमस्ति न वेति ; अस्तीति पूर्वः पक्षः । तथा हि " सर्वं खल्विदं ब्रह्म " (३. १४. १) इतिश्रुतौ सर्वमनूद्य ब्रह्मत्वं तत्र बोध्यत इति न क्वचित् प्रतीकोपासनमस्तीति हि पूर्वं निरूपितम् । तच्चोक्तश्रुतिभिः प्रत्येकं तत्त्वेनोपास्यत्वेनोक्त्या नोपपद्यते । ब्रह्मण एकत्वादेकप्रकारकेणैवोपासनेन सर्वेषां फलसिद्धेः पृथक्पृथगुक्तौ गौरवात् प्रयोजनविशेषाभावाच्च । तादृशाधिकाराभावात् पृथक् तदुक्तिरिति चेन्न । सर्वत्र सदा तद्भावनायां तथानुभवस्यपि सम्भवात् । एवं सति वस्तुतः सर्वस्य ब्रह्मत्वं नाभिमतं किन्तु यथादित्यादीनां तत् तथा तथा सर्वस्यापीति प्रतीकोपासनत्वमेव सर्वत्र । तेनैव फलमिति प्राप्ते प्रतिवदति

आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥

अत्रेति । पूर्वपक्षं विशदयन्ति **तथा ही**ति । **पूर्व**मिति । पूर्वाधिकरणे । **तत्त्वेने**ति । ब्रह्मत्वेनेत्यर्थः । **उपासने**नेति । सर्वं खल्विदमितिश्रुत्युक्तेनेत्यर्थः । अस्ति प्रयोजनमितिशङ्कते **तादृशे**ति । एवं च सर्वत्र ब्रह्मानुसंधानरूपोत्कृष्टाधिकारो येषां नास्ति तान् प्रति आदित्याद्युपासनमितिभावः । समाधानमाहुः **सर्वत्रे**ति । **सदा** सर्वदा मननेन । **तथानुभवस्य** सर्वत्र ब्रह्मानुभवस्य । **एवं सति** उक्तप्रकारेण सर्वत्र ब्रह्मदर्शनसत्त्वेपि पुनः पृथगुपदेशे सतीत्यर्थः । **तत्** ब्रह्मत्वेनोपासनं **तथा** प्रतीकम् । **तथा** तया रीत्या । **तेनैवे**ति । प्रतीकोपासनेनैवेत्यर्थः । **फल**मिति । चित्तशुद्धिद्वारा मुक्तिरूपं फलमित्यर्थः । सिद्धान्तमाहुः **प्रतिवदती**ति ।

आदित्यादौ या ब्रह्मत्वमतय उच्यन्ते तास्तु साकारस्यैव ब्रह्मणो व्यापकत्वात् तस्य प्रत्येकमप्यङ्गमुपासितं फलदमित्येकैकाङ्गविषयिण्यस्ता विधीयन्ते। उपपन्नं चैतत्। न हि साकारव्यापकब्रह्मणोऽङ्गं न ब्रह्मातो न प्रतीकोपासनत्वं तत्र। अपरं च "असौ वा आदित्यो देवमधु" (छा. ३. १. १.) इत्युक्त्वा तस्य प्रतिदिक्करश्मीनां कृपावलोकनरूपाणां मधुत्वं निरूप्य "तद् यत् प्रथममममृतं तद् वसव उपजीवन्त्यग्निना मुखेन न वै देवा अश्नन्ति न पिबन्तीत्येते देवा अमृतं दृष्ट्वा तृप्यन्ति त एतदेव रूपमभिसंविशन्त्येतस्माद् रूपादुद्यन्ति" (३. १०. २.) इति पठ्यते। तथा च दर्शनमात्रेणान्यधर्मनिवृत्तिस्तस्यैव स्वतन्त्रपुरुषार्थत्वेन ज्ञानमतिशयितस्नेहजविगाढभावेन तत्रैव लयः। पुनस्तद्दर्शनानन्दानुभवार्थं भगवानेव कृपया पुनः पूर्वभावं सम्पादयतीति तस्माद्

सूत्रार्थमाहुः **आदित्यादाविति**। **साकारस्यैवेति**। अङ्गोपासनैव प्रतीकोपासना। अङ्गं प्रतीकोऽवयव इतिकोषात्। तथा चास्मदुक्तप्रतीकोपासनैव फलदेतिभावः। हेत्वर्थमाहुः **उपपन्नमिति**। परोक्षवादेन द्वितीयवाक्यस्यार्थमाहुः **अपरं चेति**। **प्रतिदिक्करश्मीनामिति**। प्राचां मधुप्रधानत्वान्मधुत्वं मधुनाडीत्वम्। प्राच्यो मधुनाड्य इतिश्रुतेः। ऋचां मधुकृत्त्व, ऋग्वेदस्य पुष्पत्वं तासामेव ऋचाममृतता ब्रह्मरूपत्वं ताभिर्ऋग्वेदतापं ताभिस्ततस्य ऋग्वेदस्य यशआदिरसजननं तस्य रसस्यादित्यमभितः श्रयणं तस्यादित्यरोहितरूपत्वम्। एवं रीत्या प्रतिदिक्करश्मीनां मधुत्वं निरूप्येत्यर्थः। इदं छान्दोग्ये स्पष्टम्। अत्र कल्पनायाः सत्त्वात्परोक्षत्वम्। सिद्धमाहुः **तथा चेति**। **अन्यधर्मेति**। प्राणधर्मस्ज क्षुदादेर्निवृत्तिः। **ज्ञेय इति**।

रूपादुदयश्चैतत् सर्वं भगवदङ्गत्व एवोपपद्यत इत्यपि हेत्वभिप्रेतोऽर्थो ज्ञेयः। न हि प्रतीकत्व इदं सर्वं सम्भवति। भक्तिमार्गीयत्वादस्यार्थस्येतिभावः। अङ्गानां भगवत्स्वरूपात्मकत्वेनैक्यमितिज्ञापनायैकवचनम्। एतेन स्वरूपस्यैव फलत्वमुक्तं भवतीति मुख्यः सिद्धान्तः सूचितो भवति ॥ ६ ॥

पूर्वसूत्रेण धर्ममात्रस्य फलत्वमुक्त्वाधुना धर्मिणः फलत्वं तत्साधनं चाह

आसीनः सम्भवात् ॥ ७ ॥

सम्भवादुत्कटस्नेहात्मकसाधनस्य सम्भवात् तदधीनः संस्तदग्र आसीनो भगवान् भवति। एतेन भक्तवश्यतोक्ता ॥ ७ ॥

एवं बहिःप्राकट्यमुक्त्वान्तरं तदाह

ध्यानाच्च ॥ ८ ॥

भावानौत्कट्यदशायां व्यभिचारिभावात्मकसततस्मृतिरूपध्यानादपि हृदि प्रकटः सन्नासीनो भवतीत्यर्थः। तेन स्थैर्यमुक्तं भवति ॥ ८ ॥

हेतुबोधक यदुपपत्तिपदं तस्यार्थ इत्यर्थः। एतेनान्तस्तद्धर्मादिसूत्रेषूक्तोपासना वेदितव्या। अग्रे स्पष्टम् ॥ ६ ॥

सूत्रमवतारयन्ति **पूर्वेति**। **धर्मेति**। आदित्यादेः। **धर्मिण** इति। भगवत इत्यर्थः ॥ ७ ॥

सूत्रमवतारयन्ति **एवमिति**। सूत्रार्थमाहुः **भावेति**। **व्यभिचारिभावेति**। भगवदभेदाभावाद् व्यभिचारिभावात्। **हृदि प्रकट** इति। "रसो वै सः" इतिश्रुत्या व्यभिचारिभावाद्रसनिष्पत्तिरितिभरतसूत्रेण च हृदि प्रकट इत्यर्थः ॥ ८ ॥

एवं भक्तेच्छयैव स्वरूपप्राकट्यमित्युक्त्वा लीलानाविष्काराविष्करणं चापि तदिच्छयैवेत्याह

अचलत्वं चापेक्ष्य ॥ ९ ॥

भक्तेच्छामपेक्ष्याचलत्वम् । चकाराच्चलत्वमपीत्यर्थः ॥ ९ ॥

स्मरन्ति च ॥ १० ॥

केचन भक्ताः स्वरूपनिरपेक्षास्तत्स्मरणजनितानन्देनैव विस्मृतापवर्गान्तफला भवन्ति । चकाराच्छ्रवणकीर्तनादयोपि समुच्चीयन्ते । तदुक्तं "अथ ह वाव तव महिमामृतसमुद्रविप्रुषासकृल्लीढया स्वमनसि निष्यन्दमानानवरतसुखेन विस्मारितदृष्टश्रुतसुखलेशाभासाः परमभागवताः" (भाग. ६. ९. ४९.) इति ।

अथ वा "अहं भक्तपराधीन" (भाग. ९. ४. ६४.) इत्यादिस्मृतिः पूर्वोक्ते प्रमाणत्वेनोक्ता ॥ १० ॥ ३ ॥

इति चतुर्थाध्याये प्रथमपादे तृतीयमादित्याधिकरणम् ॥ ३ ॥

सूत्रमवतारयन्ति **एवमिति** । **तदिच्छयैवेति** । भक्तेच्छयैवेत्यर्थः । **अत्रापेक्ष्येत्युक्तम्** । तेन ज्ञानमार्गीयाणामपि भक्त्यैवाथर्वोपासनया चलत्वं बोध्यते ॥ ९ ॥

अत्र भाष्यं स्पष्टम् ॥ १० ॥ इतितृतीयाधिकरणम् ॥

अथेदं विचार्यते । बहिराविर्भावो येभ्यो येभ्यश्चान्तस्तेषां तेषां च मिथस्तारतम्यमस्ति न वेति । तत्र निर्णयमाह

यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥

यत्र भक्तेष्वेकाग्रता भगवत्स्वरूपे प्रकट एवैकस्मिन् ग्राहकचित्तधारा न त्वन्तर्बहिर्विज्ञानं तत्रोभयोरन्तःपश्यतो बहिःपश्यतश्च भावे भगवत्स्वरूपे च **विशेषा**भावान्न तारतम्यमस्तीत्यर्थः ॥११।४॥

॥ इति चतुर्थाध्याये प्रथमपादे चतुर्थं यत्रैकाग्रताधिकरणम् ॥४॥

उक्तेर्थ एवायं संशयः । अन्तःप्राकट्यवतो यदा बहिःसंवेदने सत्यपि पूर्वानुभूतभगवत्स्वरूपानुभवस्तदा पूर्वमन्तरन्वभूवमधुना बहिरनुभवामीत्यनुव्यवसायो भवति न वेति । तत्र वैलक्षण्याद् भवितुमर्हतीति पूर्वः पक्षः । तत्र सिद्धान्तमाहाप्रायणादिति ।

आप्रायणात् तत्रापि हि दृष्टम् ॥ १२ ॥

अधिकरणमवतारयन्ति अथेति । अङ्गोपासनया भक्तौ सत्यां भगवतोऽन्तर्बहिः प्राकट्यविचारानन्तरम् । **येभ्य** इति तादर्थ्ये चतुर्थी । तारतम्यविषयकसंशयानन्तरं पूर्वपक्षोऽयम् । प्राकट्ये प्रकारभेदः । तेन च भक्तयोस्तारतम्यम् । सिद्धान्तमाहुः **यत्र भक्ते**ष्विति । एवं च यत्रैकाग्रता नास्ति तत्र तारतम्यं न त्वन्तर्बहिःप्रकारकृततारतम्यमिति बोध्यम् ॥ ११ ॥ इतिचतुर्थाधिकरणम् ॥

अधिकरणान्तरं बोधयितुं संशयादिकमाहुः **उक्तेर्थ** इति । अन्तः प्राकट्यकाले बहिः प्राकट्यं तदानुभवविषयकसंशयमाहुः **तदा पूर्वमिति** । पूर्वपक्षमाहुः **तत्रे**ति । **भवितुमिति** । भूतवर्तमानकालवैलक्षण्यादितिशेषः

श्रीभागवते "प्रायणं हि सतामहम्" (भाग. ११. ११. ४८) इतिभगवद्वाक्यात् प्रायणशब्देन स्वतःपुरुषार्थत्वेन प्राप्यं परमं पारलौकिकं फलमुच्यते। तथा च तन् मर्यादीकृत्य तस्य सैवावस्था सार्वदिकी न तु बहिःप्राकट्येपि बहिष्ट्वानुसन्धान मित्यर्थः। ततस्तस्य तत्र सायुज्यं भवति न वेतिसंशये निर्णयमाह। तत्रापि प्रायणेपि प्राप्ते तस्य पूर्ववत् प्रभुणा सममालापावलोकन-श्रीचरणनलिनस्पर्शादिकं दृष्टमेव फलं न त्वदृष्टं सायुज्यमित्यर्थः। यतः शुद्धपुष्टिमार्गेऽङ्गीकृतः, अन्यथा पूर्वोक्तभावसम्पत्तिः कथं स्यादि-त्युपपत्तिर्हिशब्देन सूच्यते। एतच्च "तद्भूतस्य तु नातद्भावः" (ब्र. सू. ३. ४. ४०.) इत्यत्र निरूपितम् ॥ १२ ॥ ५ ॥

॥ इति चतुर्थाध्याये प्रथमपादे पञ्चममाप्रायणाधिकरणम् ॥५॥

पुष्टिमार्गीयभक्तस्य फलं निरूप्य मर्यादामार्गीयस्य तस्य फलं चिन्त्यते। तत्र तु ज्ञानपूर्वकत्वं भक्तेरावश्यकम्। कर्ममर्यादाया

सिद्धान्तमाहुः **आप्रायणादि**ति। **भागवत** इति। एकादशस्कन्ध एकादशा-ध्यायोपान्ते। **फलमुच्यत** इति। प्रकृष्टमयनं प्रायणमितियोगेन प्रकृष्टं फल-मुच्यत इत्यर्थः। नान्यः पन्था विद्यतेऽयनायेति श्रुतेः। भवतु, तर्हि फले वैलक्षण्यं स्यादित्यत आहुः **तत** इति। अग्रे स्पष्टम् ॥ १२ ॥ इतिपञ्चमा-धिकरणम् ॥

अधिकरणकारणमाहुः **पुष्टी**ति। **तस्य** भक्तस्य। **फलमि**ति अलौकिक-देहेन सेवारूपं फलमित्यर्थः। संशयस्तु स्फुट एवेति। पूर्वपक्षमाहुः **तत्रे**ति। **तत्र तु** मर्यादामार्गे तु। **ज्ञानपूर्वकमि**ति। "तस्माज्ज्ञानेन

अपि स्वकृतत्वात् तामनुल्लङ्घ्यैव भगवता फलं दीयते। तच्च "नाभुक्तं क्षीयते" (ब्रह्मवै. प्र. ख. २६. ७०)। तद्भोगानुकूलकर्मणा स्वसजातीयतत्सन्तानजननादनिर्मोक्ष एव सर्वस्य सम्पद्यते। न च प्रायश्चित्तवज् ज्ञानस्य कर्मनाशकत्वं वक्तुं शक्यम्। तद्वत् तस्य तदुद्देशेनाविहितत्वात्। तथाकथने चान्योन्याश्रयः। दुरितस्य चित्ताशुद्धिहेतुत्वेन तन्नाशे ज्ञानोदयो यतः। अतो मर्यादामार्गे मुक्तिरनुक्तिविषयेति प्राप्त उच्यते

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥

तदधिगमे ब्रह्मज्ञाने सति तज्ज्ञानस्वभावादेवो**त्तरा**घस्या**श्लेषो**सम्बन्धः **पूर्व**स्य तस्य **विनाशो** भवतीत्यर्थः। अत्रोत्तरस्यो-

---

सहितं ज्ञात्वा स्वात्मानमुद्धव। ज्ञानविज्ञानसहितो भज मा भक्तिभावतः॥" इत्येकादशस्कन्धे ज्ञानपूर्वकत्वोक्तेः। **दीयते** मर्यादायामितिशेषः। **तच्चे**ति। कर्मेत्यर्थः। **तद्भोग** इति। पूर्वकर्मभोगकालेऽवश्यं कर्मान्तरं कर्तव्यमेवेत्येव **संतान** इत्यर्थः। ज्ञानाग्निः भस्मसात्कुरुत इत्याशयेन सिद्धान्तो शङ्कते **न चे**ति। समादधते **तद्वदि**ति। पापनाशोद्देशेन यथा प्रायश्चित्तविधानं तथा ज्ञानविधानाभावादित्यर्थः। विधानाभावेपि ज्ञानस्वाभाव्यादेव पापनाश इत्यतो दूषणान्तरमाह **तथे**ति। पापनाशानन्तरं ज्ञानोदयः, तदनन्तरं पापनाश इत्यन्योन्याश्रयः।

सिद्धान्तमाहुः **उच्यत** इति। सूत्रार्थमाहुः **तदधिगम** इति। अत्राश्लेषदस्यासंबन्धार्थकत्वे कारणमाहुः **अत्रे**ति। **अनुत्पत्तिरेवे**ति। श्लेषपदस्य

त्पन्नस्याश्लेष इति नार्थः, तस्यात्मन्येवोत्पत्तेस्तदतिरिक्तस्य श्लेषस्याभावात् । अतोनुत्पत्तिरेवार्थः । न चैवं मर्यादामार्गीयत्वभङ्गः । **साधनं विना स्वस्वरूपबलेनैव कार्यकरणे हि पुष्टिः** । इह तु नियतकर्मविरोधित्वस्वभावेन ज्ञानेनैव तथासम्पत्तेः । अत एव " तद् यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते " (छा. ५. २४. ३.) इति श्रुतिरग्निदृष्टान्तमाह । स्मृतिरपि " यथैधांसि समिद्धोग्निर्भस्मसात्कुरुतेर्जुन । ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ " (भ. गी. ४. ३७.) इति । " सर्वं पाप्मानं तरति " (बृ. ४. २३.) " तरति ब्रह्महत्यां योश्वमेधेन यजते " (तै. सं. ५. ३. १२.) इत्यादिश्रुतिभ्यस्त्वयापि न तद्भोगनियमो वक्तुं शक्यः । एतेनाभुक्तस्याक्षयाद् भोगे च कर्मान्तरजननान् मोक्षासम्भव इति निरस्तं वेदितव्यम् । न चान्योन्याश्रयः । अनाद्यविद्याजनितसंसारवासनात्मिका हि सा । सा च गुरूपसत्तिश्रवणमनन-

---

संयोगार्थकत्वं पापस्य तु आत्मनि समवेतत्वं न तु संयुक्तत्वमितिप्रतियोग्यभावादुत्पन्नस्य पापस्यासंभोग इति नार्थः, किंतु पापस्यानुत्पत्तिरेवेत्यर्थः । अत्र मर्यादाभङ्ग इति शङ्कते **न चैवमिति** । पापजनकं कर्म कृत तदनन्तर भगवत्कृपया ज्ञानमुत्पन्नं, तदनन्तरं पापजनककर्मणा पापं नोत्पन्नमितिमर्यादाभङ्ग इत्यर्थः । समाधानमाहुः **साधनं विनेति** । **इहत्विति** । मर्यादायां तु ज्ञानेन कर्मासम्बन्धे तद्भङ्गो न भवतीत्यर्थः । अत्रार्थे प्रमाणमाहुः **अत एवेति** । **श्रुतिरिति** । छान्दोग्ये वैश्वानरविद्यायाम् । भोगं विना कर्मक्षयो न भवतीत्यत्र श्रुतिविरोधमाहुः **सर्वपाप्मेति** ।

अन्योन्याश्रयं परिहरन्ति **न चेति** । **सा** चित्ताशुद्धिः । **अविद्या परमिति** ।

विष्णूपासनादिरूपया ज्ञानसामग्र्यैव नाश्यते । अविद्या परं ज्ञानेन नाश्यत इति क्व तत्प्रसङ्गः । ज्ञानसामग्र्या बलिष्ठत्वात् कर्मणो दुर्बलत्वान्न तत्प्रतिबन्धकत्वमिति ज्ञाननाश्यत्वबोधकश्रुतिस्मृतिमता त्वयाप्यूरीकार्यम् । इममेव हेतुमाहाचार्यस्तद्व्यपदेशादिति ॥ १३ ॥

पापस्य शास्त्रविरोधित्वेन शास्त्रीयज्ञानेन समं विरोधो भवतु नाम । धर्मस्यातथात्वेनाविरोध एवेत्याशङ्कानिरासाय पूर्वन्यायातिदेशमाह

इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥

इतरस्य पुण्यस्याप्येवं पूर्वस्य नाश उत्तरस्याश्लेष इत्यर्थः । अतिदेशाद्धेतुरपि स एव ज्ञेयः । तथा हि " उभे उ हैवैष एते तरति " (बृ. ४. ४. २२.) " क्षीयन्ते चास्य कर्माणि "

परस्पराधीनोत्पत्तिकत्वेनान्योन्याश्रयो जायते, इह तु श्रवणेन ज्ञानोत्पत्तिः । तथा च चित्ताशुद्धिनाश इति क्व तस्यावकाश इति । ननु भोगं विना कर्मक्षयाभावे ज्ञानोत्पादकसामग्र्यभाव इत्यत आहुः **ज्ञानसामग्र्येति** । **श्रुतिरिति** । वेदश्रवणमित्यर्थः । भोगं विना कर्मणो नाशो न स्यात् तदा प्रायश्चित्तविधायकश्रुतिविरोधः । कर्मैव धारावाहिकं स्यात् तदा ज्ञानानुत्पत्त्या तद्बोधकश्रुतिविरोधः । तस्मात् प्रारब्धस्य भोगः, क्रियमाणसंचितयोः प्रायश्चित्तादिना क्षय इति स्वीकर्तव्यमिति ॥ १३ ॥

सूत्रमवतारयन्ति **पापस्येति** । **अतथात्वेनेति** । शास्त्राविरोधित्वेनेत्यर्थः । तथा च पूर्वपुण्यस्यानाश उत्तरस्यासंश्लेष इतिशङ्कानिरासायेतिभावः । अत्रार्थे हेतुमाहुः **अतिदेशादिति** । **स एव** पूर्वसूत्रोक्त एव । **उभे उ एवेति**

(मुण्ड. २. २. ८.) इति सामान्यवचनात् "ज्ञानाग्निः सर्वकर्माणि" (भ. गी. ४. ३७.) इतिस्मृतौ सर्वशब्दाच्च तथा। **अथेदं शङ्कयते।** मर्यादामार्गीयत्वाज् ज्ञानानन्तरं भरतवत् सङ्गदोषेण भगवद्भावाच् च्युतौ सङ्गजदोषोत्पत्तिवदग्रे विहितनिषिद्धकर्मणोरप्युत्पत्तिर्वक्तुं शक्येति ज्ञानस्य न सर्वात्मना कर्मविरोधित्वमिति। तत्र निर्णयमाह **पाते।** भक्तिमार्गे भगवद्भावाच्च्युतिः पात इत्युच्यते। **तुरप्यर्थे।** अपिशब्दे वाच्ये व्यवच्छेदार्थकतुशब्दोक्त्यास्मिन् मार्गे **पापस्य** व्यवच्छेद एव। "न कर्हिचिन् मत्पराः" (भाग. ३. २५. ३८.) इति वाक्यात्। परन्तु मर्यादामार्गीयत्वात् प्रारब्धभोगार्थं प्रभुश्चेत् तथा करोति, तद्भावे पूर्णे सति तद्भोगोसम्भावित इति, तदैवं भवतीति व्यासाभिप्रायो ज्ञायते। तथा च तस्मिन् सत्यप्युत्तरस्य कर्मणोसंश्लेष एवेत्यर्थः। पूर्वसूत्र

शारीरब्राह्मणे। द्वितीयं मुण्डके। सूत्रांशमवतारयितुमाहुः **अथेदमिति।** **वक्तुं शक्येतीति।** भरते संगजदोषोत्पत्तिवदुभयविधकर्मणोरप्युत्पत्तिरित्यर्थः। सूत्रशेषं व्याकुर्वन्ति **भक्तिमार्गे** इति। **वाक्यादिति।** "न कर्हिचिन्मत्पराः शान्तरूपे नङ्क्ष्यन्ति नो मेऽनिमिषो लेढि हेतिः। येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम्" इति तृतीयस्कन्धोक्तकपिलवाक्यादित्यर्थः। मर्यादामार्गे विशेषमाहुः **परं त्विति। तथाकरोतीति।** भक्तिभावापूर्तिं करोतीत्यर्थः। एतेन पुष्टिमार्गे तथा न जायत इतिसूचितम्। ननु प्रभुणा किमर्थं च्युतिः कर्तव्येत्यत आहुः **तद्भाव इति। भगवद्भाव** इत्यर्थः। **तद्भोगः** प्रारब्धकर्मभोग इत्यर्थः। **इतीति।** इति हेतोरित्यर्थः। **एवं भवतीति।** भक्तिभावाद् यदा च्युतिर्भवति तदा भरतवदन्यासक्ति-

एवमेवाश्लेषशब्दस्य व्युत्पत्तेः । अतिदेशस्यैवम्पदेनैव प्राप्तेः सर्वं सूत्रं तत्परत्वेन न व्याख्येयम् । पातशब्दस्य देहपातं तुशब्दस्यावधारणमर्थमुक्त्वा देहपाते मुक्तेरावश्यकत्वावधारणं वाक्यार्थ इति चोक्तिर्न साधीयसी । मुक्तिप्रापकपदाभावाद् " भोगेन त्वितरे क्षपयित्वाथ सम्पद्यते" (ब्र. सू. ४. १०. १९.) इत्यग्रे वक्तव्यत्वाच्च ॥ १४ ॥

ननु देहस्य कर्मजन्यत्वात् तन्नाशे तन्नाशस्यावश्यकत्वाद् ब्रह्मविदः प्रवचनानुपपत्तिः । एवं सति ब्रह्मजिज्ञासोर्गुरूपसत्त्यादिसाधनासम्भवः " आचार्यवान् पुरुषो वेद " (छा. ६. १४. २.) इतिश्रुतेः तदभावेन ज्ञानमार्गोच्छेदेन मुक्त्युच्छेदप्रसङ्ग इत्याशङ्क्य समाधत्ते

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥

र्भवतीतिभावः **असंश्लेष** इति । अनुत्पत्तिरित्यर्थः । ननु सर्वं सूत्रमतिदेशपरत्वेनैव कुतो नोच्यत इत्यत आहुः **अतिदेशश्चेति** । **तत्परत्वेन** अतिदेशपरत्वेन । एवं सति शेषवैयर्थ्यं स्यादितिभावः । अन्येषां व्याख्यानमाहुः **पातशब्दस्येति** । दूषयन्ति **उक्तिर्नेति** । ननु फलप्रकरणे तादृशपदकल्पने दोषाभाव इत्यत आहुः **भोगेनेति** । एवं चैव तादृशमुक्तेरत्र सिद्धौ **भोगेनेति** व्याख्यानं व्यर्थं स्यादितिभावः ॥ **१४** ॥

सूत्रमवतारयन्ति **नन्विति** । **तन्नाशे** कर्मनाशे । **तदभावेन** गुर्वभावेन । **भक्त्युच्छेद इतिवा पाठः** । ज्ञानाभावेन भक्त्यभावादितिभावः । सूत्रं

पूर्वे पूर्वसूत्राभ्यां ज्ञाननाश्यत्वेन ये प्रोक्ते पापपुण्ये ते नाशेषे किन्त्वनारब्धं भोगायतनलक्षणं कार्यं याभ्यां ते एवेत्यर्थः। नन्वितरनिरपेक्षं हि ज्ञानं स्वशक्त्यैवाग्निरेध इव कर्माणि दहतीति पूर्वमुक्तम्। तथा सत्यशेषमेव तद् दहतीति वक्तुं युक्तं न तु सशेषम्। शक्तेरविशिष्टत्वात्। न च कर्मनाशेपि संस्कारवशात् कुलालचक्रभ्रमिवत् तद्वासनावशाद् देहादिसत्तया प्रवचनाद्युपपत्तिरिति वाच्यम्। ज्ञानस्य सर्वतो बलवत्त्वात् सवासनस्य तस्य नाशनात्। न हि महाशिलानिपाते चक्रभ्रमिरनुवर्तितुं शक्नोतीत्याशङ्क्यारब्धकार्यादहने हेतुमाह **तदवधेः**। तत् ज्ञानेनारब्धकार्यादहनं यत् तदखिलकारणकारणत्वेनाखिलस्य पूर्वावधिरूपभगवदिच्छालक्षणाद्धेतोरित्यर्थः। यत्र तस्यापि दहनेच्छा तत्र तथैवेतिनिगूढाशयः। अत एवाग्रे तथा वक्ष्यते। अत एव श्रीभागवते "मृगदारकाभासेन स्वारब्धकर्मणा योगारम्भणतो विभ्रंशितः" (भाग. ५ ८. २६.) इति, उपभोगेन "कर्मारब्धं व्यपनयन्" (भाग. ५. १०. १४.) इति च भरतं प्रति वचनं गीयते। एवं

व्याकुर्वन्ति **पूर्वे** इति। **त एवेति**। नश्येते इति शेषः। शरीरं येन कर्मणा संपद्यते तत्सत्त्वेन प्रवचनं भविष्यतीति भावः। हेतुमवतारयन्ति **नन्विति**। **तदवधेरिति**। हेत्वर्थमाहुः **तदिति**। **निगूढाशय** इति। यत्र भगवदिच्छा तत्र प्रारब्धकर्मणोऽपि दाह एवेति गूढाभिप्राय इत्यर्थः। **अत्र** प्रमाणमाहुः **अत एवेति**। **अग्रे अतोन्यापीतिसूत्रे**। मर्यादायां प्रारब्धसत्त्वे मानमाहुः **अत एवेति**। **भरतं प्रतीति**। भरतं लक्षीकृत्येत्यर्थः। **न**

सति मणिमन्त्रादिप्रतिबद्धशक्तेरग्नेरिव ज्ञानस्याप्यदाहकत्वे न काचिद्धानिरिति सर्वमनवद्यम्। इच्छाप्रतिबद्धतादशायां न प्राचीना दशास्तीति तद्व्यवच्छेदज्ञापनाय तुशब्दः। एतेन भगवद्भावस्य सर्वतो बलवत्त्वात् कथं तस्य पात इतिशङ्का निरस्ता। भगवदिच्छाया मूलकारणत्वेनोक्तेस्तस्याः सर्वतो बलिष्ठत्वात्। तथेच्छा च स्वकृतमर्यादापालनाय पुष्टावङ्गीकृते न तथेति सर्वमनवद्यम्॥१५॥

ननु प्रारब्धं हि प्राचीनम्। तन्नाशाय तद्भोग एव कर्तव्यो ब्रह्मविदा। न तु विहितमन्यदप्यग्निहोत्रादि। प्रयोजनाभावात्। दृश्यते च तादृशानां तत्करणमत उत्तरस्य कर्मणः संश्लेष आवश्यक इत्याशङ्क्य तत्प्रयोजनमाह

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्॥ १६ ॥

तुशब्दः शङ्काव्युदासकः। अग्निहोत्रादिविहितकर्मकरणं तत्कार्यायैव भोगकार्याय प्रारब्धनाशायैवेत्यर्थः। येषामग्निहोत्रादिकारकं प्रारब्धमस्ति तैरेव तन्नाशाय भोगवत् तदपि क्रियते न त्वतादृशैरत एव न सनकादीनां तथात्वम्। कुत एतत्। तद्दर्शनात्। "यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति

काचिद्धानिरिति। न काचिदनुपपत्तिरित्यर्थः। **तथेच्छेति**। मर्यादायां भगवदिच्छा। **न तथेति**। पुष्टौ भगवदिच्छा नेत्यर्थः॥ १५॥

सूत्रमवतारयन्ति **नन्विति**। सूत्रार्थमाहुः **अग्निहोत्रादीति**। हेतुं व्याकुर्वन्ति **यथाकारीति**।

पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेन " (बृ. ४. ४. ५.) इतिश्रुतिः पूर्वकर्मणोऽग्रिमकर्महेतुत्वं दर्शयतीति नानुपपत्तिः काचित् ।

केचित्तु ज्ञानस्य यत् कार्यं तदेवाग्निहोत्रादेरिति तत्कार्यायेतिपदस्यार्थं वदन्ति । न स साधुः । " तदधिगमे " (ब्र. सू. ४. १. १३.) इत्युपक्रमाद् ब्रह्मविदः प्रारब्धात्मकप्रतिबन्धनाशे मोक्षस्य पूर्वज्ञानेनैव सम्पत्तेः कर्मणो वैयर्थ्यापातात् । " तमेतं वेदानुवचनेन " (बृ. ४. ४. २२.) इत्यादिश्रुतिदर्शनं दर्शनपदार्थ इत्यादि पूर्वविरोधादुपेक्ष्यः ॥ १६ ॥ ६ ॥

॥ इति चतुर्थाध्याये प्रथमपादे षष्ठं तदधिगम इत्यधिकरणम् ॥६॥

तदेवं पूर्वसूत्रचतुष्टयेन मर्यादामार्गीयभक्तस्य मर्यादयैव मुक्तिप्रतिबन्धसम्भवस्तयैव तन्नाशश्चेति निरूपितम् ।

अथ पुष्टिमार्गीयस्य विनैव भोगं प्रारब्धं नश्यति न वेति

परमतमाहुः **केचिदिति**। दूषयन्ति **न स साधुरिति**। **प्रतिबन्धनाश इति**। तस्य तावदेव चिरमितिश्रुत्या तस्य नाशे। अत्राशङ्कामाहुः **तमेतमिति**। निराकुर्वन्ति **पूर्वेति**। एतस्याः श्रुतेः पूर्वं मनसैवानुद्रष्टव्यमित्यस्ति। **व्यासचरणैस्तु** तदधिगमसूत्रे ज्ञानादेव कर्मनिवृत्तिरुक्तेति पूर्वविरोधादित्यर्थः। उक्तश्रुतौ ज्ञानपर्यन्तत्वबोधनेनापि विरोधोऽपोति द्रष्टव्यम्। प्रारब्धनाशकत्वेन सहकारिसूत्रविरोधः निराकर्तव्य इति सर्वमनवद्यम् ॥१६॥ इति षष्ठाधिकरणम्॥

अस्मिन्नधिकरणे पुष्टिमार्गीयं विचार्यते **तदेवमिति**। संशयमाहुः **अथेति**।

विचार्यते । तत्र भोगैकनाश्यस्वभावत्वात् तस्य न तं विनास्यापि तन् नश्यतीति प्राप्ते निर्णयमाह

अतोन्यापि ह्येकेषामुभयोः ॥ १७ ॥

एकेषां पुष्टिमार्गीयाणां भक्तानामुभयोः प्रारब्धाप्रारब्धयोर्भोगं विनैव नाशो भवति । कुत एतत् । तत्राह अतः श्रुतेः कर्मणो ज्ञाननाश्यत्वनिरूपिकायाः, ब्रह्मविद एव प्रवचनादिनिरूपणेन तदनाश्यप्रारब्धाख्यकर्माक्षेपकश्रुतेश्चान्यापि श्रुतिः पठ्यते, "तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्" इति । ज्ञानभोगाभ्यां कर्मनाशनिरूपकश्रुत्यास्याः श्रुतेर्विरोधपरिहारायावश्यं विषयभेदो वाच्यः । न च काम्यकर्मविषयेयं श्रुतिरिति वाच्यम् । "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ" (ब्र. सू. ४. १. १३.) इतिसूत्रणेतरस्याप्यवेमितिसूत्रावयवेन (ब्र. सू. ४. १. १४.) चाविशेषेणारब्धातिरिक्तकर्मणोरखिलयोर्नाशनिरूपणात् । पापकृत्यायां

पूर्वपक्षमाहुः **तत्रेति** । **तस्य** प्रारब्धस्य । **न तं विनेति** । भोगं विना पुष्टिमार्गीयस्यापि प्रारब्धं न नश्यतीत्यर्थः । स्वभावस्य दुरतिक्रमत्वादितिभावः । **निर्णयं** सिद्धान्तम् । सूत्रार्थमाहुः **एकेषामिति** । **अत** इत्यस्यार्थमाहुः **श्रुतेरिति** । कीदृशश्रुतेरत आहुः **कर्मण** इति । **निरूपिकाया** इत्यस्य श्रुतेरित्यत्रान्वयः । आक्षेपलभ्यश्रुत्यन्तरमाहुः **ब्रह्मविद** इति । **तदनाश्येति** । ज्ञानानाश्येत्यर्थः । शाट्यायनशाखिनां श्रुतिमाहुः **तस्य पुत्रा** इति । अन्यथानुपपत्तिमेकेषामितिपदेन पुष्टिमार्गीयाणा ग्रहणे प्रमाणत्वेनाहुः **ज्ञानभोगाभ्यामित्यादिना** । शङ्कते **न चेति** । उत्तरयन्ति **तदधिगम** इति ।

काम्यत्वासम्भवाच्च । तस्मादस्यनुग्रहभाजनस्य भक्तस्य स्वप्राप्तिविलम्बमसहिष्णुर्भगवानस्य प्रारब्धमेतत्संबन्धिगतं कृत्वा तस्य तेन भोगं कारयति । प्रारब्धं भोगैकनाश्यमितिस्वकृतमर्यादापालनाय न नाशयति । न च तयोरमूर्तत्वेनाकृताभ्यागमप्रसङ्गेन च नैवं वक्तुमुचितमिति वाच्यम् । ईश्वरत्वेनान्यथापि करणसम्भवात् । **मर्यादाविपरीतस्वरूपत्वात् पुष्टिमार्गस्य** न काचनात्रानुपपत्तिर्भावनीया । तस्या अत्र भूषणत्वात् । अत **एवैकेषा**मिति दुर्लभाधिकारः सूचितः ॥ १७ ॥

ननु " यदेव विद्यया करोति " (छा. १. १. १०.) इतिश्रुत्या विद्यापूर्वकं कर्मकरणे वीर्यातिशयः फलं श्रूयते, अतो ब्रह्मविद्यावतोपि तथात्वस्योचितत्वादुत्तरस्याश्लेष इति यदुक्तं तन्नोपपद्यत इति प्राप्त आह **यदेवे**ति ।

यदेव विद्ययेति हि ॥ १८ ॥

काम्यत्वासंभवाच्चेति । तथा च विषयश्रुतिविरोधपरिहारस्यावश्यकत्वमितिभावः । प्रकृते यत्सिद्धं तदाहुः **तस्मादि**ति । **अस्य** पुष्टिभक्तस्य । **एतत्संबन्धी**ति । भगवत्सेवासंबन्धीत्यर्थः । इदं च सर्वं चतुर्थस्कन्धे **तत्त्वदीपप्रकाशे** स्पष्टमेवोक्तमिति विस्तरभयान्नोक्तमत्र ॥ १७ ॥

सूत्रमवतारयन्ति **नन्विति** । **वीर्यातिशय** इति । तदेव वीर्यवत्तरं भवतीतिश्रुतौ श्रूयत इत्यर्थः । **उचितत्वादि**ति । कर्मणोऽतिशयितवीर्यवत्त्वस्योचितत्वादित्यर्थः । **तन्नोपपद्यत** इति । कर्मणो वीर्यवत्त्वमश्लेषश्चोभयमेकत्र नोपपद्यत इत्यर्थः । तथा चाश्लेषश्रुतेर्विद्यास्तावकत्वमेव वक्तव्यमिति-

हि यस्माद्धेतोस्त्वया "यदेव विद्यया करोति श्रद्धयोपनिषदा" (छा. १. १. १०.) इतिश्रुतिरेव ब्रह्मविदोपि कर्मोत्पत्तिप्रसञ्जिकात्वेनोदाहृता। सा तु न तत्समर्था। तथा हि "ओमित्येतदक्षरमुद्गीथमुपासीत" (छा. १. १. १.) इत्युपक्रम्य तस्य रसतमत्वं मिथुनरूपत्वमनुज्ञाक्षरत्वं त्रयीप्रवृत्तिहेतुत्वं च निरूप्यैतदग्रे "यदेव विद्यया" इत्याद्युक्त्वा "इति खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति" इत्युपसंहारादुद्गीथोपासनाविषयमेव "यदेव विद्यया" इतिवाक्यमिति ज्ञायते। तेनोक्तरसतमत्वादिप्रकारकोपासनानां मध्ये "यदेव विद्यया करोति तदेव वीर्यवत्तरं भवति" इति तदर्थ इति न ब्रह्मविद्यागन्धोपीति न सा शङ्कात्र सम्भवतीत्यर्थः।

यद्वा उक्ताशङ्कानिरासायैवाह यदेवेति। ब्रह्मविद्धि प्रारब्धक्षयायैव कर्म कुरुते तत्त्वन्यकृतात् कर्मणः सकाशात् सवासनतन्नाशनाद् वीर्यवत्तरं भवत्येवेति नानुपपत्तिः काचिदित्यर्थः।

भावः। परिहरन्ति **यदेवेति**। सूत्रार्थमाहुः **हीति**। **न तत्समर्थेति**। कर्मोत्पत्तौ समर्था नेत्यर्थः। इदमेव विशदयन्ति **तथा हीति**। **तस्य** उद्गीथस्य। **ज्ञायत** इति। उपसंहारेण ज्ञायत इत्यर्थः। **तेनेति**। प्रकरणार्थकरणेन। तथा चानुपपत्तिर्नास्तीति भावः।

ननु श्रद्धया करोति उपनिषदा करोतीत्युक्तं तत्समभिव्याहारेण विद्यया करोतीत्यप्यस्ति। तथा चोभयोः साधारणत्वादेतस्या अपि साधारणत्वं वक्तव्यं न तु उद्गीथादिपरत्वेन संकोच इत्यतः प्रकारान्तमाहुः **यद्वेति**। **उक्ताशङ्केति**। तन्नोपपद्यत इत्याशङ्कानिरासायेत्यर्थः। **तन्नाशनादिति**। प्रारब्धनाशनादित्यर्थः। तथा च नोक्तदोष इतिभावः।

यद्वा । ननु पुष्टिमार्गीयस्य प्रारब्धस्यापि भोगं विनैव नाश इति श्रुत्वासम्भावनां कुर्वाणं प्रति कैमुतिकन्यायेन तत्परिहारमाह यदेवेत्यादि । जीवनिष्ठा विद्या हि भगवज्ज्ञानशक्तेरंशभूता । एवं सति यत्र धर्मसम्बन्धिसम्बन्धादन्येभ्योतिशयं कर्मणि वदति श्रुतिस्तत्र साक्षाद्धर्मिसम्बन्धेतिशयितकार्यसम्पत्तौ कथमसम्भावना कर्तुमुचितेतिनिगूढाशयः । अत एव हेतुवाची हिशब्दः ॥ १८ ॥

पुष्टिमार्गीयफलप्राप्तौ प्रतिबन्धाभावं सोपपत्तिकमुक्त्वा तत्प्राप्तिप्रकारमाह

भोगेन त्वितरे क्षपयित्वाथ सम्पद्यते ॥ १९ ॥

इतरेऽग्रे प्राप्यालौकिकदेहाद् भिन्ने स्थूललिङ्गशरीरे क्षपयित्वा

एतत्सूत्रस्य पुष्टिमार्गे तात्पर्येण प्रकारान्तरमाहुः **यद्वेति** । सूत्रावतरणमाहुः **नन्विति** । **तत्परिहारमिति** । असंभावनापरिहारमित्यर्थः । असंभावनापरिहारं विशदयन्ति **एवं सतीति** । **यत्र** तत्त्वज्ञानिजीवे । **धर्मसंबन्धीति** । **धर्मः** भगवद्धर्मः ज्ञानशक्तिः, तस्याः संबन्धिनी विद्या तत्संबन्धादित्यर्थः । **अन्येभ्य** इति । तत्त्वज्ञानरहितजीवकृतकर्मभ्य इत्यर्थः । **कर्मणि** विद्याविशिष्टजीवकृतकर्मणीत्यर्थः । **श्रुतिः** यदेव विद्ययेतिश्रुतिः । कैमुतिकन्यायमाहुः **तत्रेति** । पुष्टिमार्गीयजीवे । **धर्मिसंबन्धे धर्मी** भगवान् तत्संबन्धो पुष्टिमार्गीयजीवे अस्तीति तत्रातिशयोऽस्तीति किं वाच्यमित्यर्थः । **हेतुवाचीति** । पुष्टिमार्गीयस्य भोगं विनैव प्रारब्धनाशे कैमुतिकन्याय एव हेतुरिति बोधयितुं हेतुवाची **हिशब्द** इत्यर्थः ॥ १८ ॥

सूत्रं व्याकुर्वन्ति **पुष्टीति** । **तत्प्राप्तीति** । फलप्राप्तीत्यर्थः । सूत्रान्तर्गतं **इतरे** इत्यस्यार्थमाहुः **अग्र** इति **शरीर** इत्यन्तम् । अग्रे सूत्रार्थः स्पष्ट एव ।

दूरीकृत्य, अथ भगवल्लीलोपयोगिदेहप्राप्त्यनन्तरं, भोगेन सम्पद्यते " सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता " (तै. २. १) इतिश्रुत्युक्तेन भोगेन सम्पद्यत इत्यर्थः । श्रुत्यर्थस्त्वानन्दमयाधिकरणे निरूपितः । अलौकिकत्वं विनोक्तदेहं विना चोक्तफलप्राप्तेर्व्यवच्छेदकस्तुशब्दः ॥ १९ ॥ ७ ॥

॥ इति चतुर्थाध्याये प्रथमपादे सप्तममतोऽन्यापीत्यधिकरणम् ॥७॥

॥ इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते
ब्रह्मसूत्राणुभाष्ये चतुर्थस्याध्यायस्य प्रथमः पादः समाप्तः ॥

श्रीप्रकाशकृतस्तु " अत्र क्षपणं च कुरुक्षेत्रप्रसङ्गे व्रजभक्तानां जीवकोशध्वंसरूपम् । भोगश्च तदनन्तरदर्शनादिरूपो जीवद्दशायामेव भवतीत्यवान्तरफलपरिसमाप्तिरिति मम प्रतिभाति । अत्यन्तानुग्रहे तु स्थलस्य लोकवत् क्षपणं सूक्ष्मस्य वाङ्मनसीतिवक्ष्यमाणरीत्या, ततस्तदव्यवहितमेवालौकिकदेहप्राप्त्या भोगसंपत्तिरितिज्ञेयम् " इत्याहुः ॥ १९ ॥ इति सप्तमाधिकरणम् ॥

इतिश्रीमन्मुकुन्दरायसहजमाधुरीपरमानिर्वचनीयसरसवदनतामरसमुधाह्रदावगाहिश्रीमदाचार्यपदाब्जकृपापारसारश्रीमत्प्रभुचरणात्मजमहाराजयदुनाथकुलोद्भवगोस्वामिश्रीगोपालात्मजगिरिधरविरचिते
अणुभाष्यविवरणे चतुर्थाध्यायस्य प्रथमः
पादः समाप्तिमफाणीत् ॥

अथ चतुर्थाध्यायस्य द्वितीयः पादः ।

पूर्वपादे लौकिकशरीरे क्षपयित्वालौकिकं तत् प्राप्य फलेन सम्पद्यत इति निरूपितम् । अथात्रेदं चिन्त्यते । भक्त्या सूक्ष्मशरीरस्य क्षपणं नाम किं तत्स्वरूपनाशनमुत मणिस्पर्शादयश्चामीकरत्वमिव तस्यैवालौकिकत्वसम्पादनं भगवदनुग्रहादिति । तत्रोत्तर एव पक्षः साधीयानिति भाति । तथा हि । यथा पूर्वं संसारिण एव जीवस्य तदनुग्रहात् पूर्वावस्थापगमो मुक्त्यवस्था चोच्यते तथात्रापि वक्तुमुचितत्वात् । " न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते " (बृ. ४. ४. ६.) इतिश्रुतिस्तु जीवस्य सायुज्यमुक्तिकाले तत्प्राणादीनामपि तथैवाह । अत एवाग्रे " ब्रह्मैव सन् ब्रह्माप्येति " (बृ. ४. ४. ६.) इत्युच्यते । पुष्टिमार्गीयस्योक्त-

---

अथेदानीं द्वितीयपादार्थमनुवदन्ति **पूर्वपाद** इति । एतेनाधिकरणसंगतिः सूचिता । **तत्प्राप्येति** । शरीरं प्राप्येत्यर्थः । तच्चाग्रे वक्ष्यते **ब्राह्मेण जैमिनिरित्यादौ** । **अथेति** । **चिन्त्यते** प्रकृतं चिन्त्यते । विचारमेवाहुः **भक्त्येति** । **क्वचित् भक्तस्येतिपाठः** । **क्षपणमिति** । क्षपयित्वेत्यनेनोक्तं क्षपणमित्यर्थः । संशयमाहुः **किं तदिति** । **मणिरिति** । पार्षदमणिस्पर्शेन लोहस्य सुवर्णत्वं यथेत्यर्थः । पूर्वपक्षमाहुः **तत्रेति** । **तथेति** । सूक्ष्मशरीरेपीत्यर्थः । प्राप्तेन्द्रियादिरूपस्य सूक्ष्मशरीरस्य नित्यत्वमितिपूर्वपक्षस्याशयः । श्रुतौ प्राणानां लय उच्यत इति कथमेतदित्यत आहुः **न तस्मादिति** । पुष्टिमार्गविषयो भिन्न इत्याहुः **पुष्टीति** । सिद्धान्तमाहुः **प्रतिवदाम**

मुक्त्यभावान्नेयं तद्विषयिणीति प्राप्ते प्रतिवदामः। ब्रह्मांशत्वेन जीवस्यानन्दात्मकत्वान्निर्दोषस्वरूपत्वान्नित्यत्वाच्च दोषाणां चागन्तुकत्वात् तदपगमे तस्य तथात्वमुचितम् । प्राणादयस्तु न तादृशा इति तद्दृष्टान्तेनात्रापि तथात्वं न वक्तुं शक्यम् । " देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनाम् " (भाग. ७. १. ३४) इतिश्रीभागवतवाक्याच्च ।

न च लौकिकत्वविशिष्टदेहादिरत्र निषिध्यत इति वाच्यम् । सामान्यनिषेधे बाधकाभावात् । न च तदनुभव एव बाधक इति वाच्यम् । भगवत इव तदीयानामपि तेषां तथात्वे बाधकाभावात् । नन्वागन्तुकत्वमेव बाधकमिति चेन् मैवम् । यथा व्यापिवैकुण्ठस्याक्षरात्मत्वेनानागन्तुकत्वेन नैसर्गिकतद्गताखिलवस्तुरूपत्वेन सामीप्यादिमुक्तिं प्राप्नुवतां भक्तानां देहेन्द्रियादिरूपमप्यनागन्तुकमेव

इति । **तस्य** जीवस्य **तथात्व**मानन्दमयत्वम् । **न तादृशा** इति । न ब्रह्मांशा इत्यर्थः । एतच्च **श्रीमदाचार्यपुष्टिप्रवाहमर्यादाग्रन्थे** सृष्टित्रयविवेचने सूचित तद्विवरणे च स्पष्टमेवोक्तमिति विस्तरभयाद्विरम्यते । **न तादृशा** इति । न जीववन्निर्दुष्टा इत्यर्थः । असद्वा इदमग्र आसीदित्यादिश्रुतौ असत्पदेन प्राणादीनामुक्तत्वादितिभावः । सूक्ष्मशरीरे लौकित्वमेवेत्यत्रोपष्टम्भकसप्तमस्कन्धीयवाक्यमाहुः **देहे**ति ।

अत्राशङ्कते **न चे**ति । **अत्र** श्रीभागवतवाक्ये । **निषिध्यत** इति । न तु सूक्ष्मशरीरमितिशेषः । **सामान्ये**ति । शरीरत्वेनेत्यर्थः । पुनः शङ्कते **न चे**ति । **तदनुभव** इति । देहेन्द्रियाद्यनुभव इत्यर्थः । **तथात्वे** ब्रह्मरूपत्वे । पुनः शङ्कते **नन्वि**ति । परिहरन्ति **मैवमि**ति । **यथे**ति । इदं चाग्रे **यावदि**-

वैकुण्ठप्राप्तिमात्रेण शुद्धजीवानां सम्पद्यते, तदीयत्वेन तत् फलतीति यावत्, तथा पुरुषोत्तमलीलाया अपि पुरुषोत्तमात्मकत्वात् तत्राङ्गीकारमात्रेण प्राचीनाशेषप्रावाहिकधर्मनिवृत्तौ शुद्धजीवस्य पुरुषोत्तमलीलात्मकदेहादिरपि तदीयत्वेन सम्पद्यत इति नानुपपन्नं किञ्चिदित्यवहितोवेहि। अयमेवार्थो वाजसनेयिशाखायाम् "अथाकामयमानः" (बृ. ४. ४. ६.) इत्युपक्रम्य "आत्मकाम आप्तकामो भवति न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते ब्रह्मैव सन् ब्रह्माप्येति" इत्यन्तेन वाक्येन निगद्यते। अत्र प्राणशब्देन प्राणाः सर्वेन्द्रियाणि चोच्यन्ते। आत्मकामशब्देन भगवद्वाचकात्मपदग्रहणेन भक्तस्य स्नेहातिशयजनितप्रभुदिदृक्षार्त्यतिशयस्तादृशो जातो येन मरणमेव सम्पद्येत यदि प्रभुप्राकट्ये क्षणमपि विलम्बः स्यादतो भगवत्प्राकट्येनैवात्मस्थितिरिति ध्वन्यते। भक्तिमार्गे प्राकट्यस्यैव

त्यन्ते तथेत्यनेनान्वेति। दृष्टान्तेनागन्तुकत्वं निवारयन्ति **यथा व्यापिवैकुण्ठस्येति**। **शुद्धजीवनामिति**। प्राकृतधर्मरहितानामित्यर्थः। अत्रायं दृष्टान्तः। यथा मूलप्रकृतिः लौकिकदेहे कारणत्वेनान्वेति एवं जीवे अक्षरं व्यापिवैकुण्ठरूपमन्वेति। अत्र प्रमाण "यदक्षरे परमे प्रजाः" "यथा प्रदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः" इति श्रुतिवाक्यद्वयम्। तथा चैतादृशमक्षरं सर्वात्मकं सर्वत्रास्तीति तदंशे जीवे तस्याक्षरस्याकारो नैसर्गिक एव प्रवर्तते। इदं चाग्रे **ब्राह्मेण जैमिनिरि**तिसूत्रे स्पष्टं भविष्यति। दार्ष्टान्तिके योजयन्ति **पुरुषोत्तमलीलाया** इति। **प्राचीनाशेषे**ति। दृष्टान्ते नैसर्गिकत्वमत्राङ्गीकार इति विशेषः। अयं च बादरायणसूत्रोक्तः पुरुषोत्तमात्मक इतिज्ञेयम्। अत्र श्रुतिमाहुः **अयमेवे**ति। एतादृशश्रुतेस्तात्पर्यमाहुः **अत्रे**त्यादिना **ध्वन्यते** इत्यन्तेन। श्रुतितात्पर्यं च विस्तरेण

परमफलत्वेन तद्दर्शनेनाप्तकामो भवति । ततः साक्षादाश्लेषादिकामनायां प्राचीनदेहप्राणादेस्तदयोग्यत्वात् ते तत्रैव लीना भवन्ति । बहिः प्रकटस्यैवान्तरपि प्राकट्यादुत्क्रमणाभाव उच्यते । आत्मातिरिक्तस्य गतिमुक्त्वा तस्य तामाह " ब्रह्मैव सन् ब्रह्माप्येति " इत्यनेन । उक्तरीत्या पुरुषोत्तमात्मकतल्लीलोपयोगिदेहेन्द्रियादिसम्पत्त्या 'ब्रह्मैव सन्' न तु ब्रह्मातिरिक्तदेहादिमानपि । तादृशः सन् 'ब्रह्म' बृहत्त्वाद् बृंहणत्वात् पुरुषोत्तमस्वरूपं प्राप्तो भवतीत्यर्थः । अन्यथा जीवस्य ब्रह्मांशत्वेनानन्दांशाविर्भावेन च ब्रह्मत्वे प्राणादिलयोक्त्या तदितरव्यवच्छेदे चानुक्तसिद्धे सति 'ब्रह्मैव सन्' इति न वदेत् । अत एवैतदग्रे श्लोकोक्तिः " अथ मर्त्योमृतो भवत्यत्र ब्रह्म समश्नुते " (बृ. ४. ४. ७.) इति । मृतिधर्मवच्छरीरं हि मर्त्यं, तद्वत्त्वेन जीवोपि तथोच्यते । तथा चायं पूर्वं तादृश एव । अथ पुष्टिलीलाप्रवेशानन्तरममृत उक्तरूपशरीरवान् भवति, ततोत्रास्मिन्नेव शरीरे ब्रह्म 'सम्यगश्नुते' भगवता क्रियमाणलीलारसमनुभवतीत्यर्थः । भगवान् बादरायण इमामेव श्रुतिं

प्रस्थानरत्नाकरे श्रीपुरुषोत्तमगोस्वामिभिः व्युत्पादितमिति विस्तरभयाद्विरम्यते । **तदयोग्यत्वादिति** । आश्लेषायोग्यत्वात् । **तत्रैवान्तः** प्रकटे पुरुषोत्तमस्वरूपे **लीना** भवन्तीत्यर्थः । **तस्य** जीवस्य **तां** गतिम् **बृहत्त्वात्** महत्त्वात् । **बृंहणत्वात्** वर्धकत्वात् ।

लीलोपयोगिदेहप्राप्त्यनन्तरं ब्रह्मभाव इतिश्रुत्यर्थे गमकमाहुः **अन्यथेति** । अन्यदपि गमकमाहुः **अत एवेति** । **अत्र ब्रह्मेति** । चतुर्थपादोक्तो ब्रह्मभूतः प्रसन्नात्मेत्युक्तिरीतिको ब्रह्मभावो नास्तीत्यर्थः । एतदेव विशदयन्ति **अथेति** । **इत्यर्थ** इति । श्रुत्यर्थ इत्यर्थः । एतेन प्राणादीनां ब्रह्मणि लय एव पुष्टि-

विषयीकृत्य तत्रोक्तप्राणानां लय एकदैवोत क्रमनियमोस्तीतिसंशये निर्णयमाह वाङ्मनसीति ।

वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥

तत्र हेतुर्दर्शनादिति । एतदुक्तं भवति । भक्तेः स्नेहात्मकत्वात् तस्य प्रभुप्राकट्यफलकत्वात् तदौत्कट्ये तस्यावश्यकत्वादयं मां पश्यत्विति प्रभ्विच्छया तस्मिन् सम्पन्ने चक्षुर्भ्यां मनसा च तद्रूपामृतमनुभवतः स कोप्युत्कटो भावः समजनि येन प्रभुणा सह सर्वेन्द्रियव्यापारकृतीच्छा समभूत् । तत्र तेषामसामर्थ्याद् भगवदानन्दसम्बन्धिमनःसम्बन्धेन तं प्राप्स्याम इति तत्रैव सङ्गतास्तेनानन्देन सम्पन्ना जाताः । अयमेवार्थोनेन सूत्रेणाग्रिमेण च ' अत एव सर्वाण्यनु ' इतिसूत्रेण निरूप्यते । दर्शनानन्तरमादौ सह सम्भाषणेच्छैव जन्यत इति " वाङ्मनसि सम्पद्यते " (छा. ६. ८. ६.) इति छान्दोग्ये स्फुटोक्ते सम्मत्या चादौ सैवोक्ता । एवं सति वाङ्मनसि सङ्गता सती भगवदानन्देन सम्पद्यत इति सूत्रार्थः

मार्गीयस्य लौकिकदेहक्षपणं बोध्यमिति सूचितम् । एतादृशविचारस्य प्रकृतसूत्रप्रणयने हेतुत्वमिति सूचयितुमवतारयन्ति **भगवानिति** । **संशय** इति । एकदैव उत क्रमनियम इतिसंशय इत्यर्थः । **निर्णयमिति** । श्रुतौ सामान्येन लयश्रवणमस्ति, तेन किं ज्ञायते । युगपल्लय एवेति **पूर्वपक्षे सिद्धान्तमाहे**त्यर्थः । क्रमनियमे दर्शनस्य हेतुत्वं प्रतिपादयन्ति **एतदि**त्यादिना । **तदौत्कट्ये** स्नेहौत्कट्ये । तदौत्कण्ठ्ये इति वा पाठः । भक्तस्योत्कण्ठायामिति तदर्थः । **तेषां** सर्वेन्द्रियाणां प्राणाना च । **तत्रैव** मनस्येव । हेत्वन्तरमवतारयन्ति

सम्पद्यते । दर्शनाभावेपि वेण्वादिशब्दादपि तथा सम्पद्यत इति हेत्वन्तरमाह शब्दाच्चेति ॥ १ ॥

अत एव सर्वाण्यनु ॥ २ ॥

अत एव दर्शनाच्छब्दाच्च हेतोः सर्वाणीन्द्रियाणि, अनु सान्निध्याद् वाचः पश्चात्, मनसि सङ्गतानि भगवदानन्देन सम्पद्यन्त इत्यर्थः ।

केचित्त्वत्र छान्दोग्यस्थं " वाङ् मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम् " (छा. ६. ८. ६.) इतिवाक्यं विषयत्वेनोक्त्वा सूत्रे वाक्पदस्य तद्वृत्तिपरत्वं वदन्ति, 'सम्पत्तिं' तन्नाशं च । तन्न साधीयः । तथा हि । वाक्पदस्य वृत्तिपरत्वं चेच्छ्रुत्यभिमतं स्यात् सूत्रकारस्तदा तथैव वदेत् । न तु तत्सरूपमेव वाक्यम् । तन्निर्णयार्थमेव प्रवृत्तेः । मुख्यार्थत्यागो लक्षणा-

---

दर्शनाभावेपीति । **वेण्वादीति** । वेणुनादादित्यर्थः । **आदिपदात्साङ्केतिक**शब्दानां संग्रहः ॥ १ ॥

सूत्रार्थमाहुः **अत एवेति** । विषयवाक्येपि वागितीन्द्रियान्तरोपलक्षकम् । **केचिद्वागिति** अन्यार्थकं वदन्ति । तन्मतमाहुः **केचित्त्विति** । **संपत्ति-मिति** । संपद्यत इत्यत्र संपत्तिपदमिदमित्यर्थः । दूषयन्ति **तत्रेति** । एकं **तथैव वदेत्**, **मुख्यार्थत्यागेति** द्वयमिति दूषणत्रयं बोध्यम् । तत्त्वप्रलयस्तु विभागोवचनादितिसूत्रे वक्ष्यते, वृत्तिप्रलयस्त्वत्रोच्यत इतिसूत्रकाराशय-

पत्तिश्च । किञ्चैवं मनसीतिपदवैयर्थ्यं स्याद् विषयवाक्योक्तक्रम-त्यागानुपपत्तिश्चेति ॥ २ ॥

तन् मनः प्राण उत्तरात् ॥ ३ ॥

पूर्वोक्तसर्वेन्द्रियवैशिष्ट्यवन् मनः प्राणे सम्पद्यते न तु केवलम् । तत्र हेतुरुत्तरादिति । " स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपश्रयत एवमेव खलु सोम्य तन् मनो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राण-मेवोपश्रयते " (छा. ६. ८. २.) इत्युक्त्वा तत्र हेतुमुत्तरेण वाक्येनाह " प्राणबन्धनं हि सोम्य मनः " (छा. ६. ८. २) इति । तस्माद्धेतोस्तथेत्यर्थः ॥ ३ ॥

सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥

सर्वेन्द्रियविशिष्टमनोविशिष्टः प्राणोऽध्यक्षे पुरो हृदि वा प्रकटे भगवति सम्पद्यत इत्यर्थः । अत्र हेतुरुपगमादिभ्य इति । उप-गमोऽभ्युपगमः पुष्टिमार्गेऽङ्गीकार इति यावत् । ततस्तथेत्यर्थः ।

स्वीकारे दोषत्रयं नास्तीत्यत आहुः **किञ्चेति** । **क्रमत्यागेति** । प्राणस्य जीवे लय उक्तः तेजसस्त्यागः कृतः । तेन कृत्वा किं ज्ञायते । इदं विषयवाक्य-मेव नास्तीत्यर्थः ॥ २ ॥

सूत्रं व्याकुर्वन्ति **पूर्वोक्तेति** । छान्दोग्ये श्वेतकेतूपाख्यानस्थं विषयवाक्य-माहुः **स यथेति** । सूत्रे **उत्तरादि**त्युक्तं तदेवोत्तरवाक्यमाहुः **प्राणेति** ॥ ३ ॥

सूत्रं व्याकुर्वन्ति **सर्वेन्द्रियेति** । अध्यक्षपदार्थमाहुः **पुर इति** ।

आदिपदाद् भगवद्वशीकरणसमर्थः स्नेहः प्रभ्वनिङ्गितार्थत्यागस्तदनुरूपं भजनं च । अभ्युपगमे सिद्धे स्नेहादयोवश्यं भवन्त्येवेत्याशयेन तदादित्वमुक्तं नोद्देशः कृतः । मर्यादामार्गेङ्गीकृतानां तु मुक्तिपर्यवसायित्वेन मुमुक्षुत्वादुत्कटस्नेहासम्भवेन प्रभुप्राकट्यासम्भवात् स्वस्वप्रकृतौ सङ्घातलये शुद्धजीवस्य भगवदनुग्रहेण श्रवणादिरूपया तथाविधस्नेहरूपया च भक्त्या मुक्तिः सम्पद्यत इति बह्वेव तारतम्यमिति निगूढाशयेनेदमुक्तम् । अभ्युपगमादयस्तु मुण्डकोपनिषत्सु पठ्यन्ते "नायामात्मा" (मुण्ड. ३. २. ४.) इत्युपक्रम्य " यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वाम् । नायमात्मा बलहीनेन लभ्यो न च प्रमादात् तपसो वाथ लिङ्गात् । एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधाम " इति ॥ ४ ॥ १ ॥

॥ इति चतुर्थाध्याये द्वितीयपादे
प्रथमं वाङ्मनसीत्यधिकरणम् ॥ १ ॥

उक्तं निगूढमाशयं प्रकटयति

भूतेषु तच्छ्रुतेः ॥ ५ ॥

ननु मर्यादामार्गीयाणामप्येवमेव वागादिलय उतान्यथेतिसंशये

नोद्देश इति । न कथनं कृतमित्यर्थः । पुष्टिमर्यादयोस्तारतम्यमाहुः **मर्यादामार्गेति** । अग्रे स्पष्टम् ॥ ४ ॥ इतिप्रथमाधिकरणम् ॥

अधिकरणमवतारयन्ति **नन्विति** । **इति संशय** इत्यनेन सशय उक्तः ।

निर्णयमाह । तेषां ते भूतेषु लीयन्ते न तूक्तरीत्या भगवति । तत्र प्रमाणमाह तच्छ्रुतेः । " यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीं शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन् केशा अप्सु लोहितं च रेतश्च निधीयते " (बृ. ३. २. १३.) इतिश्रुतेः । न चाविद्वद्विषयिणीयं श्रुतिरिति वाच्यम् । " याज्ञवल्क्येति होवाच । यत्रायं पुरुषो म्रियत उदस्मात् प्राणाः क्रामन्त्याहो नेति. नेति होवाच याज्ञवल्क्योत्रैव समवनीयन्ते स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते " (बृ. ३. २. ११.) इतिपूर्ववाक्यात् । न ह्यविदुषः प्राणानामनुत्क्रमः । " तमुत्क्रामन्तं प्राणोनूत्क्रामति " (बृ ४. ४. २.) इत्यादिश्रुतेः । ननु " यत्रास्य पुरुषस्य " (बृ. ३. २. १३.) इत्युपक्रम्य " रेतश्च निधीयते " इत्यन्ता श्रुतिरविद्वद्विषयिणीति मन्तव्यम् । यत एतदग्रे " क्वायं तदा पुरुषो भवति " इतिप्रश्ने याज्ञवल्क्यार्तभागाभ्यां विचारितमुत्तरमुच्यते " तौ ह यदूचतुः कर्म हैव तदूचतुरथ ह यत् प्रशशंसतुः कर्म हैव तत् प्रशशंसतुः पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन" इति । एतेन कर्माश्रयस्तिष्ठतीतिनिर्णयः सम्पद्यते ।

पूर्ववदेव वागादिलयः भगवन्मार्गत्वस्योभयत्र तुल्यत्वादिति पूर्वः पक्ष ऊहनीयः । सिद्धान्तमाहुः तेषामिति । तच्छ्रुतेरितिहेतुबोधिकां बृहदारण्यके आर्तभागब्राह्मणस्थां श्रुतिमाहुः यत्रास्येति । शङ्कते न चेति । श्रुतिरिति । अन्यैर्व्याख्यातेतिशेषः । समाधानमाहुः याज्ञवल्क्येतीतिश्रुतेरित्यन्तम् । अस्या श्रुतौ विद्वद्विषयकत्वसंदेहं शङ्कते नन्विति । संपद्यत इति । निर्धारितवाक्येन निर्णयः संपद्यत इत्यर्थः ।

एवं सति प्राणानुत्क्रमणोक्त्या सङ्घातलयोक्त्या च विद्वद्विषयत्वमत्रावसीयते। यतस्तस्यैवोक्तद्वयं सम्भवति। अग्रिमश्रुत्युक्तकर्माश्रयत्वं च तस्मिन् विरुद्धमतः पूर्वोत्तरविरोधाद् विषयानिश्चये प्राप्ते प्रतिवदामः। मर्यादामार्गीयविद्वद्विषयिण्येवेयं श्रुतिरिति। अत एव प्रश्ने "क तदा पुरुषो भवति" इत्येतावतैव चारितार्थ्येपि साधारणपुरुषव्यावृत्त्या मर्यादामार्गीयतत्प्रापकमयमिति पदम्। तस्यैवोपक्रान्तत्वात्। तथाग्रिमविचारितोर्थोपि तद्विषयक एवेति बुध्यस्व। ननूक्तं बाधकमिति चेत्, हन्त श्रुतिशिरःसमाकलितमाकलय। मर्यादामार्गे हि विधिप्राधान्यम्। तथैव तन्निर्माणात्। तत्र ह्येवं कृत एवं फलं दास्ये न त्वकृतेपीति भगवदिच्छा। अतः कर्म प्रधानम्।

एवं सत्यार्तभागस्यायमाशयः। वागादिरेतोन्तलयेन प्रारब्धस्यापि तदा नाशाच्छुद्धं जीवं विध्यविषयं कदाचित् पुष्टौ प्रवेशयति न

एवं सतीति। एकस्मिन्प्रकरणे विरुद्धवाक्यद्वये श्रूयमाणे सति। **तस्मिन्नि**ति। तत्र विरुद्धमवसीयत इत्यर्थः। समाधानमाहुः **प्रतिवदाम** इति। **तस्यैवे**ति। प्राणानुत्क्रमहेतुना विदुष एवेत्यर्थः। **अग्रिमे**ति। तौ ह यदूचतुरित्यादिना विचारितोऽर्थ इत्यर्थः। अग्रिमे पुनः शङ्कते **नन्वि**ति। **उक्तमि**ति। विद्वत्ताया कर्माश्रयेणावस्थानं बाधकमित्यर्थः। तथा चेयं श्रुतिरविद्वद्विषयिणीतिभावः। समाधानमाहुः **हन्ते**ति। हन्तेत्यनेन भ्रान्तत्वं पूर्वपक्षिणो द्योतयन्ति **श्रुती**ति। वेदान्ततात्पर्यबोधितमित्यर्थः। **मर्यादे**ति। एवं चात्र कर्मैव प्रधानमिति भावः।

एवं सतीति। आर्तभागस्य उपनिषदो वक्ष्यमाण आशयः। **संशयेने**ति।

वेतिसंशयेन तदाऽयं क्व मर्यादामार्गे एवोत पुष्टावपि प्रवेशितो भवतीतिप्रश्नः। तदाऽस्यार्थस्येश्वरेच्छारीतिमविदुषो दुर्ज्ञेयत्वं जानन्तौ स्वयमेव यदवधारितवन्तौ तदपि रहस्यमिति स्फुटमनुक्त्वा श्रुतिः पर्यवसितमर्थमुक्तवती तौ हेत्यादिना। अत्र कर्मपदं मर्यादामार्गपरम्। तथा च मर्यादामार्ग एव तस्य स्थितिरित्यर्थः सम्पद्यते। मुक्त एव भवतीति यावत्। अत एव तत्प्रशंसापि। यत ईश्वरत्वेन सर्वकरणसमर्थोऽपि तद्दाने तदपेक्षते। अत्र हेतुत्वेन मर्यादामार्गस्वरूपमुक्तं पुण्यो वेत्यादिना ॥ ५ ॥

ननु मर्यादामार्गीयो भक्तो ज्ञानी च भवतः। उक्तनिर्णयस्तु ज्ञानमार्गीयविषय एव। भक्तं तु तादृशमपि कदाचित् पुष्टावपि प्रवेशयतीत्याशङ्क्य तन्निर्णयमाह

नैकस्मिन् दर्शयतो हि ॥ ६ ॥

प्रश्न इत्यनेनान्वयः। **तदाऽयं क्वेति**। **तदा** शुद्धत्वदशायामयं विध्यधीनो जीवः, क्व कस्मिन्मार्गे। सामान्यप्रश्नमुक्त्वा विशेषमाह **मर्यादेति**। एवं विद्वद्विषयकप्रश्न उत्तरमपि तथैवाहुः **तदेति**। **अस्यार्थस्य दुर्ज्ञेयत्वमित्यनेनान्वयः**। **अत्रेति**। श्रुतावित्यर्थः। **कर्मपदस्य** कर्मवति लक्षणार्थमाहुः **मर्यादेति**। **संपद्यत** इति। तथा च विद्वद्विषयिण्येवेयं व्यवस्थेतिभावः। अत्र गमकमाहुः **अत एवेति**। निवृत्तिमार्गीयप्रशंसैव गमिकेतिभावः। अत्र कारणमाहुः **यत** इति। **तद्दाने** मुक्तिदाने। **तदिति**। ज्ञानसहितं कर्मेत्यर्थः। नन्वेवं चेत्पुण्यो वेतिश्रुतिः कथं वदेदित्यत आहुः **अत्रेति**। **हेतुत्वेन** फलदाने हेतुत्वेन। तथा च पुण्यो वेत्यनेन मर्यादामार्गस्येदं स्वरूपमुक्तं कर्मकृते फलं भविष्यतीति। न तु तावता अविद्वद्विषयकत्वं श्रुतेर्वक्तव्यमितिभावः ॥५॥

एकस्मिन् ज्ञानिनि भक्ते वा मर्यादानियमो न किन्तूभयोरपि। तत्र हेतुं दर्शयत इति। यतो याज्ञवल्क्यार्तभागौ ज्ञानिभक्तसाधारण्येन मर्यादानियमं दर्शयत उक्तरीत्या तौ हेत्यादिना। अन्यथाऽप्राकृताङ्गीकारोऽन्यथा भवेदित्युपपत्तिर्हिशब्देन सूच्यते। पूर्वोक्तपूर्वोत्तरश्रुतिविरोधपरिहारान्यथानुपपत्तिरत्र मूलमिति ज्ञेयम्।

केचित्तूपसंहृतेषु वागादिषु शरीरान्तरप्रेप्सासामयिको जीवः "क्वायं तदा पुरुषः" इतिप्रश्नविषय इति वदन्ति। तन्न साधीयः। "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तꣳ सर्वे प्राणा अनूत्क्रामन्ति" (बृ. ४. ४. २.) इतिश्रुतिर्भाविदेहान्तरजीवस्य प्राणानामिन्द्रियाणां च सहैवोत्क्रमणं वदतीति वागादिलयस्य तत्रासम्भवान्नोक्तस्य प्रश्नविषयत्वं वक्तुं शक्यम्। पूर्ववाक्ये

सूत्रं व्याकुर्वन्ति **एकस्मिन्निति**। **दर्शयत** इति। सामान्येन निर्देशात् कर्मोक्त्या कर्मप्रशंसया च दर्शयत इत्यर्थः। ननु ज्ञानिनि तु अस्तु नाम परंतु भक्तत्वं भक्ते पुष्टिमर्यादाभक्तिमति तुल्यमेवेति कथं मर्यादायां वागादीनां भूतेषु लयः, पुष्टौ तु भगवतीत्यत आहुः **अन्यथेति**। **अप्राकृतेति**। प्रकृतिसंबन्धरहितानाम**ङ्गीकारः** स्वीयत्वेन वरणं तत् **अन्यथा** भवेत् इतरतुल्यं भवेदित्यर्थः। श्रुतेरेतादृशतात्पर्यकल्पने बीजमाहुः **पूर्वोक्तेति**। **श्रुतिरिति**। न तस्मात्प्राणा उत्क्रामन्तीतिश्रुतिरित्यर्थः।

अत्र मतान्तरमाहुः **केचित्त्विति**। **उपसंहृतेषु** उपसंहारं प्राप्तेषु। दूषयन्ति **तन्नेति**। **वदन्तीति**। श्रुतिः अमुच्यमानस्य प्राणोत्क्रमं वदतीत्यर्थः। **वागादिलयस्येति**। अग्निं वागप्येतीत्यादिवागादिलयस्य। **तत्रेति**। तस्मिञ्जीवे। **असंभवादिति**। साधनाभावादसंभवादित्यर्थः। तथा च तस्य

"अत्रैव समवनीयन्ते" इत्युक्तत्वाच्च । अतोऽस्मदुक्त एव मार्गोऽनुसर्तव्यः । एतेन नायं परविद्यावान् यतोऽमृतत्वमेव तत्फलमिति । तच्च देशान्तरानायत्तमित्युत्क्रमणापेक्षा कर्माश्रयत्वं च न स्यात् किन्त्वपरविद्यावान् । तस्यास्तु ब्रह्मलोकावधि फलमिति कर्माश्रयत्वोत्क्रमणादिकं सम्भवतीत्यपि निरस्तं वेदितव्यम् ॥ ६ ॥ २ ॥

॥ इति चतुर्थाध्याये द्वितीयपादे द्वितीयं भूतेष्वित्यधिकरणम् ॥ २ ॥

मर्यादापुष्ट्योर्न कदाचिदन्यथाभाव इति यदुक्तं तत्र हेत्वपेक्षायां वस्तुस्वरूपमेव तथेति बोधयितुमाह समानेत्यादि ।

समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ७ ॥

अत्रायमाशयः । साधनक्रमेण मोचनेच्छा हि मर्यादामार्गीया मर्यादा । विहितसाधनं विनैव मोचनेच्छा पुष्टिमार्गमर्यादा ।

मुक्त्यभावाद् वागादिलयस्य मुच्यमानजीव एवेतिभावः । **नोक्तस्येति** । शरीरान्तरप्रेक्षासामयिको जीवः क्वायं तदेतिप्रश्नविषय इत्यर्थः । एतावता प्रश्नाशयो दूषितः । इतः परं सिद्धान्ताशयं दूषयन्ति **एतेनेति** । अत्र जीवस्य देहान्तरप्रेप्साकालीनत्वसमर्थनेन **निरस्तमिति** । स्पष्टं चैतत् । इदं चार्तभागब्राह्मणावलोकनेन स्पष्टं भविष्यतीत्यवधेयम् । अधिकं तु **प्रकाशेऽनुसन्धेयम्** । विस्तरभयाद्विरम्यते ॥ ६ ॥ इतिद्वितीयाधिकरणम् ॥

इदानीं नवभिः सूत्रैः पुष्टिमर्यादामार्गस्वरूपे यो विशेषः स एव विशेष इति बोधयितुं सूत्रमवतारयन्ति **मर्यादेति** । **यदुक्तमिति** । पुष्टिमर्यादाविद्यमानयोर्वागादिलयो युक्त इति बोध्यम् । सूत्रं व्याकुर्वन्ति **साधनेति** । सदेक-

तथा सति सदैकरूपत्वं तयोर्युक्तमिति । एतदेवाह । **सृतिः** संसृति-र्जीवानां स्वस्मात् पृथक्कृतानामविद्ययाहन्ताममतास्पदीकरणं तदुपक्रम आरम्भस्तं मर्यादीकृत्य मुक्तिपर्यन्तमुक्तरूपा समाना सदैकरूपा । मध्ये नान्यथा भवतीत्यर्थः । एवमेवानुपोष्य व्रतमकृत्वामृतत्वमपि पुष्टिमार्गे समानमित्यर्थः । अत्रोपोषणपदमशेषमुक्तिसाधनोपलक्षकम् ॥ ७ ॥

एवं प्रासङ्गिकमुक्त्वा प्रकृतं परामृश्यते । "सोध्यक्षे" (ब्र. सू. ४. २. ४.) इतिसूत्रेण पुष्टिमार्गीयभक्तसङ्घातस्य भगवत्येव लय इत्युक्तमग्रिमेण तेन मर्यादामार्गीयभक्तसङ्घातस्य भूतेषु लयमुक्त्वा प्रश्नानन्तरं शुद्धजीवस्य तस्य मुक्तिरेव भवतीति वक्तव्ये सति "आहर सौम्य हस्तम्" (बृ. ३. २. १३.) इत्यादिना स्वाशयमन्येष्वप्रकटयन्तौ कर्म यत् निरूपितवन्तौ तत् कुत इत्याशङ्क्य तयोराशयं निगूढं प्रकटयति ।

रूपत्वं यदुक्तं तदेव स्पष्टीकुर्वन्ति **संसृतिरिति** । **संसृतिः** संसारः । एतस्य संसारपदस्यार्थमाहुः **जीवानामिति** । **तदुपक्रम** इति । संसारोपक्रम इत्यर्थः । **एवमेवेति** । एवंरीत्या अमृतत्वमित्यर्थः । तथा च मर्यादा-मार्गे मोक्षसाधनं कृत्वा मोक्षः । पुष्टिमार्गे तस्यापेक्षा नास्तीतिभावः ॥७॥

सूत्रमवतारयन्ति **एवमिति** । **प्रासङ्गिकमिति** । मार्गद्वयेनाप्येकत्रैव प्राप्तिः एका एकपदी, एका तदन्या सर्वैर्गम्या इत्येवंरीत्या मर्यादापुष्ट्योर्भेद इति प्रासङ्गिकमित्यर्थः । **प्रकृतमिति** । आर्तभागब्राह्मणमित्यर्थः । एकवारं विचारः कृत एव पुनः किमर्थमत आहुः **सोध्यक्ष** इति । अग्रिमेण भूतेषु तच्छ्रुतेरित्यनेन । **प्रश्नानन्तरमिति** । **तत्कुत इत्याशङ्क्येत्य**नेनान्वयः । **आशयमिति** । एकान्तगमनाशयमित्यर्थः ।

तदापीतेः संसारव्यपदेशात् ॥ ८ ॥

तदा नित्यलीलान्तःपातलक्षणपुष्टिमार्गीयमुक्तिदशायां मर्यादामार्गीयाया अपीतेर्मुक्तेः संसारत्वाभावेपि पुरुषोत्तमभजनानन्दानुभवाभावात् संसार इत्येव पुष्टिमार्गे व्यपदेशो यतः क्रियतेतस्तदभिसन्धाय तया रीत्या निरूपणम् । अत एव श्रीभागवते श्रीशिववचनं गीयते "नारायणपराः सर्वे न कुतश्चन बिभ्यति । स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥" (भाग. ६. ७. २८.) इति । श्रीभगवद्गीतास्वपि "देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि" (भ. गी. ७. १३.) इतिवाक्येन मर्यादामार्गीयभक्तेरितरसाधारण्यमुच्यते ॥ ८ ॥

ननु संसारवन् मुक्तेरपि हेयत्वं यत्र तादृशं चेत् पुष्टिमार्गीयं तत्त्वं तदा मुक्तेः पुरुषार्थत्वबोधिकायाः श्रुतेः प्रतारकत्वमापतीति तद्बोधकप्रमाणानां तत्स्तुतिमात्रपरत्वमेवेति प्राप्त आह

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥

सूत्रं व्याकुर्वन्ति **तदेति** । **निरूपणमिति** । पुष्टिमार्गीयमुक्त्यपेक्षया मर्यादामार्गीयमुक्तेन्यूनत्वबोधनाय पुनर्विचार इत्यर्थः । **अत एवेति** । अत्र श्रीभागवतमुपष्टम्भकं, न बिभेति कुतश्चनेति तैत्तिरीयश्रुतिरप्युपष्टम्भिका बोध्या । मर्यादामार्गीयमुक्तौ न्यूनत्वमाहुः **श्रीभगवद्गीतास्विति** ॥ ८ ॥

सूत्रमवतारयन्ति **नन्विति** । **प्रतारकत्वमिति** । श्रुतेः प्रतारकत्वभिया भजनानन्दोत्कर्षप्रमाणानां स्तावकत्वमङ्गीकर्तव्यमित्यर्थः । व्याकुर्वन्ति **पुष्टीति** ।

पुष्टिमार्गीयं तत्त्वं सूक्ष्मं दुर्ज्ञेयमित्यर्थः । अत्रायमाशयः । पुष्टिमर्यादामप्यतिक्रम्य पुष्टिपुष्टौ प्रवेशे तत्तत्त्वमनुभवविषयो भवति । नान्यथा । तत्र प्रवेशस्त्वतिदुरापोतिशयितानुग्रहेतरासाध्यत्वादत उक्तेतराज्ञेयमेव तद् भवति । तेषां तु मुक्तिरेव फलम् । तस्या एवेष्टत्वाद् रागिणां स्वर्गादिवत् । इष्टफलाप्राप्तौ हि प्रतारकत्वम् । अन्यथा प्रवृत्तिमार्गीयफलबोधिकाया अपि श्रुतेः प्रतारकत्वं स्यात् । इच्छा चाधिकारानुसारिणीति नानुपपन्नं किञ्चिदिति । नन्वेवंविधार्थास्तित्वे किं मानमित्याकाङ्क्षायामाह प्रमाणत इत्यादि । प्रमाणं श्रुतिः । सा तु " यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन ॥ " (तै. २. ९.) इति " एतꣳ ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवम् " (तै. २. ९.) इति । अत्र

यदीदं दुर्ज्ञेयं तदा तस्य ज्ञानाभावाच्छ्रुतेः प्रतारकत्वं तदवस्थमेवेत्यत आहुः **अत्रायमिति** । पुष्टिमार्गो द्विविधः । एकः पुष्टिमर्यादारूपः । अपरः पुष्टिपुष्टिरूपः । तत्र पुष्टिपुष्टौ प्रवेशश्चेत् पुष्टिमार्गीयं तत्त्वमनुभवविषयो भवतीत्यर्थः । **अनुग्रहेतरेति** । अनुग्रहं विना साध्यत्वमेव नास्तती तादृशानुगृहीतपुरुषेतरैर्दुर्ज्ञेयत्वमित्यर्थः । **तेषां तु** । येषामतिशयानुग्रहो नास्ति **तेषां** भक्तानां भक्तिरहितज्ञानिनां चेत्यर्थः । श्रुतेः प्रतारकत्वं निवारयन्ति **इष्टेति** । **इच्छा चाधिकारानुसारिणीति** । तथा च येषां स्वर्गेच्छा तेषां निवृत्तिमार्गतत्त्वं दुर्ज्ञेयम् । एवमेषां मोक्षेच्छा तेषां पुष्टिमार्गतत्त्वम् । एवं चोत्कृष्टाधिकारिणं प्रत्येव श्रुतेः भजनानन्दोत्कर्षबोधकत्वमिति न प्रतारकत्वमितिभावः । सूत्रांशमवतारयन्ति **नन्विति** । **एवंविधेति** । अतिशयानुग्रहातिरिक्तसर्वदुर्ज्ञेयार्थ-

पूर्वार्धेन दुर्ज्ञेयत्वमुत्तरार्धेन तत्सत्ता च बोध्यते । अन्यथा मनसोऽप्यप्राप्यस्य वेदनकथनं विरुद्धं स्यात् । अतो दुर्ज्ञेयत्वेनैव धर्मिग्राहकमानसिद्धं तदित्यर्थः । चकारात् तादृशानामनुभवः परिगृह्यते ॥ ९ ॥

तर्हि ब्रह्मविदामिव तादृशानां भक्तानामपि स्वमार्गोपदेशनं क्वचित् श्रूयेत । न चैवमतः पूर्वोक्तं न साधीय इति भातीत्युत्सूत्रमाशङ्क्य तत्र हेतुमाह

नोपमर्देनातः ॥ १० ॥

उपदेशनं तदा स्याद् यदि ब्रह्मविदामिव तेषां स्वास्थ्यं स्यात् । यतस्तेषां विरहदशा प्रियसङ्गमदशा चेति दशाद्वयमेव भवति नान्या । पूर्वस्यास्तस्यास्त्वतिदुःसहत्वेन सर्वेषां भावानामुपमर्देन तिरोधानेनोपदेशो न भवतीत्यर्थः । सङ्गमे तु अतः पुरःप्रकटपरमानन्दस्वरूपाद् भगवत एव हेतोरुपदेशोऽन्यस्मै न भवतीत्यर्थः । न हि भगवदग्रे स सम्भवतीतिभावः ॥ १० ॥

सत्त्वे किं मानमित्यर्थः । प्रमाणं श्रुतिमाहुः **यतो वाच** इति । इयं श्रुतिः तैत्तिरीयोपनिषदि स्पष्टार्था च ॥ ९ ॥

सूत्रमवतारयन्ति **तर्हीति** । **उत्सूत्रमिति** । सूत्राद्बहिरित्यर्थः । सूत्रं व्याकुर्वन्ति **उपदेशनमिति** । सूत्रांशमतारयन्ति **संगमे त्विति** । सूत्रांश**स्यात** इत्यस्यार्थमाहुः **पुरः प्रकटेति** ॥ १० ॥

ननु " रसो वै सः रसꣳ ह्येवायं लब्ध्वानन्दीभवति " (तै. २. ७.) इत्युपक्रम्य " एष ह्येवानन्दयाति " इतिश्रुतेरुक्तरूपानन्दप्राप्तौ दुःसहविरहतापोशक्यवचनः। आनन्दतिरोधान एव तत्सम्भवात्। तद्धेतोरसम्भवात्। सम्भवे तु तत्प्राप्तिरेव न स्यादिति प्राप्त उत्तरं पठति

अस्यैव चोपपत्तेरूष्मा ॥ ११ ॥

आनन्दात्मकरसात्मकस्यास्यैव भगवत एव धर्म ऊष्मा विरहताप इत्यर्थः। विरोधपरिहारायाहोपपत्तेरिति। इदमुक्तं भवति। भगवद्विरहस्य सर्वसाधारणत्वेपि स्थायिभावात्मकरसरूपभगवत्प्रादुर्भावो यस्य हृदि भवति तस्यैव तदप्राप्तिजस्तापस्तदनन्तरं नियमतस्तत्प्राप्तिश्च भवति न त्वतथाभूतस्येत्यन्वयव्यतिरेकाभ्यामुक्तरसस्यैवैष धर्म इति निश्चीयते। तस्य वस्तुन एव तथात्वात् स तापोपि रसात्मक एव ॥ ११ ॥

प्रतिषेधादिति चेन्न शारीरात् ॥ १२ ॥

सूत्रमवतारयन्ति **ननु रस** इति। **तत्संभवादिति**। दुःसहतापसंभवात्। **तद्धेतोरिति**। अविद्याकामकर्मादीनामानन्दतिरोधाने कारणीभूतानामसंभवात्। सूत्रं व्याकुर्वन्ति **आनन्देति**। यः परं प्राप्तस्तस्यायम्। **उक्तरसस्य** उक्तानां यो रसस्तस्येत्यर्थः। **रसात्मक एवेति**। विप्रलम्भरसात्मक एवेत्यर्थः। एवं च यः परं प्राप्तस्तस्यायमुक्तरसस्तस्य प्रकारो भिन्न एव। अन्तः प्राप्त्या आनन्दानुभवः, बाह्याप्राप्त्या विरहजन्यस्ताप इति द्वयोरुपपत्तिरितिभावः ॥ ११ ॥

ननु "न पश्यो मृत्युं पश्यति न रोगं नोत दुःखम्" (छा. ७. २६. २.) इतिश्रुत्या दुःखप्रतिषेधस्तादृशे भक्ते क्रियत इति तस्य दुःखित्वं न वक्तुं शक्यमित्याशङ्क्य प्रतिषेधति नेति । कुतः । **शारीरात्** । शरीरसम्बन्धिनो हेतोर्यद् दुःखं, कर्मजनितमितियावत्, तस्यैव श्रुतौ **प्रतिषेधा**न्नात्रानुपपत्तिरित्यर्थः । एतेन दुःखत्वेन कर्मजन्यत्वानुमानमपि निरस्तं वेदितव्यम् । लौकिक एव दुःखे तज्जन्यत्वनियमात् ॥ १२ ॥

स्पष्टो ह्येकेषाम् ॥ १३ ॥

एकेषां शाखिनां भगवत्स्वरूपलाभानन्तरं दुःखतन्निवर्तनलक्षणोर्थः **स्पष्टः** पठ्यते । तथा हि । " रसो वै स रसꣳ ह्येवायं लब्ध्वानन्दीभवति को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यादेष ह्येवानन्दयाति " (तै. २. ७.) । अत्र रसात्मकभगवत्स्वरूपलाभे सत्यानन्दवत्त्वमुक्त्वा तस्यैव जीवनहेतुत्वं परमानन्दहेतुत्वं चोच्यते । मरणहेतूपस्थित्यभावे जीवनहेतुत्वं न वदेत् । स रसस्तु संयोगविप्रयोगभावाभ्यामेव पूर्णो भवत्यनुभूता

सूत्रपूर्वभागे पूर्वसूत्राभ्यां नास्यैवोष्मेति पदत्रयमनुवर्त्य व्याकुर्वन्ति **नन्विति** । **तस्य दुःखित्वमिति** । भगवत्प्राप्तस्य विरहजन्यदुःखित्वमित्यर्थः ।। १२ ॥

भगवद्विरहजं दुःखं कर्मजन्यं न भवतीत्यत्र प्रमाणमाहुः **एकेषामिति** । तैत्तिरीयाणाम् । कुत्र पठयत इत्यतस्तैत्तिरीयश्रुतिमाहुः **तथाहीति** । व्या·

नैकतरेण । तत्र विरहतापस्यात्युग्रमर्दित्वेन तदा प्राणस्थितिरपि न स्याद् यदि रसात्मको भगवान् हृदि न स्यादित्याशयेनाह को ह्येवान्यादिति ।। यद् यदि एष हृदिस्फुरद्रूप आकाशो भगवान् न स्यात् कस्तदान्यात् । अन प्राणने । को जीवयेत् । न कोपी-त्यर्थः । तादृशस्य भगवत्स्वरूपातिरिक्तान्न जीवनमिति ज्ञापनाय सामान्यपदम् । ब्रह्मानन्दाधिकपूर्णानन्दविरहासन्नमरणनिवारणासाम-र्थ्यमतादृशस्योचितमेवेतिज्ञापनाय हिशब्दः ।

तादृशस्य जीवनसम्पादनं प्रभोरावश्यकमितिज्ञापनायैवकारः । तापात्मकस्याप्यानन्दात्मकत्वमेवेतिज्ञापनायानन्दपदम् । तदा प्रला-पगुणगानादयो ये भवन्ति तेपि तद्धर्मा एव । नीलाम्बुदश्यामोति-क्लेशवशाद्धृदयादपगच्छत्विितिभावेपि हृदयान्नापसारयितुं शक्य इति-ज्ञापनाय चाकाशवत्त्वमुक्तम् । तदनन्तरं प्रकटीभूय तदन्यः को वा प्रकर्षेण दर्शनस्पर्शाश्लेषभाषणादिभिः स्वरूपानन्ददानेनान्यात् पूर्वतापनिवृत्तिपूर्वकमानन्दपूर्णं कुर्यादित्यर्थः । "रस१ ह्येवायं लब्ध्वानन्दीभवति" (तै. २. ७.) इतिपूर्ववाक्येनैवान्यव्यव-

---

ख्यानमाहुः अत्रेति । तत्र विप्रयोगात्मके रसे । सामान्यपदमिति । को ह्येवान्यादित्यत्र क इति पदम् । ब्रह्मानन्देति । अक्षरानन्देत्यर्थः । तद्धर्मा एव । वियोगरसरूपभगवद्धर्मा इत्यर्थः । आकाशस्तल्लिङ्गाधिकरण आकाशस्य ब्रह्मवाचकत्वमुक्तमत्र तु व्यापकत्वसूचनार्थमुक्तमिति तात्पर्यमाहुः नीला-म्बुदेति । इतिभावेपीति । अतिक्लेशादिभावेपीत्यर्थः । श्रुतौ प्राण्यादिति-पदस्यार्थमाहुः तदनन्तरमिति । अत्र गमकमाहुः रसमिति । यत्पुनरिति ।

च्छेदपूर्वकं भगवत्प्राप्तेरानन्दहेतुत्वप्राप्तावपि यत् पुनराह तत्रापि व्यतिरेकमुखेन तत्रापि जीवनहेतुत्वं तदपि सामान्यविशेषाभ्यां वारद्वयं तेन विरहसामयिकोक्तरूप एवार्थः श्रुतेरभिप्रेत इति निश्चीयते । अन्यथा मरणहेत्वनुपस्थितौ जीवनहेतुत्वं न वदेदित्युक्ततदवस्थापन्नः को वा पुरुषो जीवेदिति वार्थः ॥ १३ ॥

स्मर्यते च ॥ १४ ॥

भगवद्भावस्य मरणहेतुत्वं तेनैव च जीवनं तस्य ब्रह्मादिदुरापत्वं च श्रीभागवते स्मर्यते । " ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः । ये त्यक्तलोकधर्माश्च मदर्थे तान् बिभर्म्यहम् ॥ " (भाग. १०. ४३. ४.) इत्युपक्रम्य " धारयन्त्यथ कृच्छ्रेण प्रायः प्राणान् कथञ्चन " (भाग. १०. ४३. ६.) इत्यादि श्रीप्रभुवचनम् । श्रीमदुद्धवचनं " एताः परं तनुभृतो भुवि गोपवध्वो गोविन्द एव निखिलात्मनि रूढभावाः । वाञ्छन्ति तं भवभियो मुनयो वयं च किं ब्रह्मजन्मभिरनन्तकथारसस्य ॥ " (भाग. १०. ४४. ८६.) इत्यादि । तेन भगवत एव जीवनहेतुत्वं भावस्य च परमपुरुषार्थत्वं दुरापत्वं च स्फुटमवगम्यते ॥ १४ ॥

को ह्येवान्यादित्येनेनानन्दनं पुनराहेत्यर्थः । **अन्यथा** विरहावस्थाया अभिप्रेताभावत्वे । प्राण्यादित्यस्यार्थान्तरमाहुः **तदवस्थेति** ॥ १३ ॥

सूत्रं व्याकुर्वन्ति **भगवदिति** । **श्रीभागवते** स्पष्टम् । **स्फुटमवगम्यत** इति । को ह्येवान्यादितिश्रुतिः सामान्यजीवनपरेतिशङ्का स्यात्तदर्थं भगवत एवेत्यादिस्फुटमवगम्यगत इत्यर्थः ॥ १४ ॥

ननु हृदि बहिश्च रसात्मकभगवत्प्राकट्यं तददर्शनजनितो विरहभावस्तज्जनितस्तापस्तेन मरणोपस्थितिस्तन्निवर्तनं तदौत्कट्यं तदा प्राकट्यं पूर्णस्वरूपानन्ददानादिकं च लोके क्वचिदपि न दृष्टं श्रुतं वा। वैकुण्ठेपीति कुत इत्याशङ्कायामाह

तानि परे तथा ह्याह ॥ १५ ॥

तान्युक्तानि वस्तूनि । **परे** प्रकृतिकालाद्यतीते वैकुण्ठादप्युत्कृष्टे श्रीगोकुल एव । सन्तीतिशेषः । तत्र प्रमाणमाह **तथा ह्याह** श्रुतिः । ऋग्वेदे पठ्यते " ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः । अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि ॥" (ऋक्सं २. २. २४.) । **ता** तानि **वां** भगवत्तदन्तरङ्गभक्तयोः सम्बन्धीनि **वास्तूनि** वस्तूनि **गमध्यै** प्राप्तु**मुश्मसि** कामयामहे । तानि कानीत्याकाङ्क्षायां गूढाभिसन्धिमुद्घाटयति । **यत्र** श्रीगोकुले **गावो भूरिशृङ्गा** बहुशृङ्गा रुरुप्रभृतयो मृगाश्च वसन्तीतिशेषः । **अयासः** शुभावहाः । तदुक्तगुणविशिष्टमुरु गीयत इत्युरुगायस्तस्य । गोप्यो हि सततं तं गायन्ति । अत एव तदादिभक्तेषु कामान् वर्षतीति **वृषा** । **तस्य परमं** प्रकृतिकालाद्यतीतं

सूत्रमवतारयन्ति **नन्विति** । **प्राकट्यमिति** । साधनं विनेतिशेषः । इच्छयेति वा । ' निःसाधनफलात्मायं प्रादुर्भूतोस्ति गोकुले " इति वचनात् । **लोक** इति । भुवनत्रयेपि फलांशेन दृष्टमित्यर्थः । स्वर्गातीतेपि वारयन्ति **वैकुण्ठमिति** । **इति कुत** इति । इत्यतः कारणात् कुतः एवमुच्यत इत्यर्थः । **आह** स्थानं प्रमाणमप्याहेत्यर्थः । सूत्रार्थमाहुः **उक्तानीति** । श्रुतिमाहुः

पदं स्थानं भगवतो वैकुण्ठं भवति । तत्रैतादृशलीलाभावेन तस्मादपि परममुत्कृष्टमत्र भूमाववभाति प्रकाशत इत्यर्थः । तथापि स्वदृग्गोचरो न भवतीति खेदेनाहेत्याह श्रुतिः । उरु गीयते परं सर्वत्र कामवर्षणं भक्तेष्वत्रैवेतितात्पर्येण वा विशेषणद्वयमुक्तम् । यमुनापुलिनतदुपवननिकुञ्जगह्वरप्रदेशाद्रिसान्वाद्यात्मकत्वेन भूरि बहुरूपम् । तथा चैतादृशं यत् परमं पदमवभाति तत्सम्बन्धीनि वास्तूनि कामयामह इतिवाक्यार्थः सम्पद्यते । ते पदार्था इति वक्तव्ये सति तानीत्युक्तिर्या सा विषयवाक्यानुरोधादिति ज्ञेतम् । पुरुषोत्तमसम्बन्ध्यर्थानां तत्प्राकट्यस्थान एव प्राकट्यं युक्तमिति हिशब्देनाह ॥ १५ ॥ ३ ॥

इति चतुर्थाध्याये द्वितीयपादे तृतीयं समानाधिकरणम् ॥ ३ ॥

ननु लीलाया नित्यत्वेन तन्मध्यपातिनां तद्दर्शनं यथा नित्यं तथा तादृक्साधनाभावेपि निजानुकम्पया कदाचित् कमपि भक्तं तत्र नयति चेत् तदा कञ्चित् कालं स्थापयित्वा ततस्तं वियोजयति न वेति संशयः । तोषस्य कादाचित्कत्वात् तत्साध्या तत्र स्थितिरपि तथैवेति वियोजयतीति पूर्वः पक्षः । तत्र सिद्धान्तमाह

अविभागो वचनात् ॥ १६ ॥

ता वामिति । श्रुत्यर्थमाहुः **तानीति** । **वामिति** षष्ठीद्विवचनं मनसि निधायाहुः **भगवदिति** । अन्यत्सर्वं स्पष्टम् ॥ १५ ॥ इति तृतीयाधिकरणम् ॥

अधिकरणमवतारयन्ति **नन्विति** । संशयमाहुः **तादृगिति** । पूर्वपक्षमाहुः

तत्र प्रवेशितस्य तस्मादविभाग एव । कुतः । वचनात् । तैत्तिरीयक उक्तगानन्तरमेव " विष्णोः कर्माणि पश्यत " (तै. सं. १. ३. ६.) इत्यृचा तत्र कृतानि कर्माण्युक्त्वा तदग्रे वदति " तद् विष्णोः परमं पदॸ् सदा पश्यन्ति सूरयः " (तै. सं. १. ३. ६.) इति । पुरुषोत्तमस्वरूपवित्त्वं सूरित्वम् । तच्च भक्त्यैवेति सूरयो भक्ता एव । तेषाँ सदा दर्शनमुच्यते । अन्यथा लीलानित्यत्वेनैव पूर्वगभ्याँ तत्र स्थितगवादीनां प्रभुकर्मविषयाणां च भक्तानां सदा तद्दर्शनस्य प्राप्तत्वादिदं न वदेत् । तस्मादविभाग एव । एतेनापि लीलानित्यत्वं सिध्यति । एतद् यथा तथा विद्वन्मण्डने प्रपञ्चितम् ॥ १६ ॥ ४ ॥

॥ इति चतुर्थाध्याये द्वितीयपादे चतुर्थमविभागाधिकरणम् ॥४॥

एवं पुष्टिमार्गीयभक्तवृत्तान्तमुक्त्वा ज्ञानमार्गीयस्य तमाह

तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ १७ ॥

तोषस्येति । सिद्धान्तं विशदयन्ति **तत्रेति** । **विद्वन्मण्डन** इति । भक्तानां यत्र कुत्रचिन्मरणेपि तत्रैव हृदि वा बहिर्वा भगवत्प्राकट्ये तत्र गोकुलादिस्थानस्य व्यापकत्वेन प्राकट्यात् सर्वं समञ्जसमिति तत्रैव स्पष्टम् ॥ १६ ॥ इतिचतुर्थाधिकरणम् ॥

अधिकरणमवतारयन्ति **एवमिति** । **तमाहेति** । क्रममुक्तिप्रकारं पित-

पूर्वं " भूतेषु तच्छ्रुतेः " (ब्र. सू. ४. २. ५.) इत्यादिना मर्यादामार्गीयस्य वागदिलय उक्तः । अधुना तस्य जीवात्मन उत्क्रमणप्रकार उच्यते । " स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति " (बृ. ४. ४. १.) इतिश्रुतेस्तस्यात्मन ओक आयतनं हृदयं तदग्रं पूर्वं प्रज्वलति । पूर्वं तथाप्रकाशमानमपि तदा प्रकाशत इतियावत् । तदा तत् प्रकाशितं द्वारं निर्गमनमार्गो यस्य तादृश उत्क्रामति । यतः श्रुतिस्तथाह " तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वा " (छा. ४. ४. २.) इत्यादि । यद्यप्येतावत् सर्वजीवसाधारणं तथापि विद्वांस्तु नेतरवदितरनाड्या निष्क्रामति किन्तु शताधिकया । एकशततम्या नाड्या मूर्धन्या निष्क्रामति । " शतं चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति " (छा. ८.

यानेन भ्रमणं चाहेत्यर्थः । ज्ञानमार्गीयवृत्तान्तमाहुः **पूर्वमिति** । **उत्क्रमणप्रकार** इति । यस्य ज्ञानसामर्थ्यादेव हृदये ब्रह्म स्फुरति सा एका सद्योमुक्तिः । तत्रोत्क्रमणाभाव एव । यस्य तादृशं साधनं नास्ति एतज्जन्मनि जन्मान्तरे वा योगज्ञानसामर्थ्याद्दशमद्वारान्निर्गमनं तस्य ब्रह्माण्डमध्य एव ब्रह्मप्राप्तिः । सा अपरा सद्योमुक्तिः । तत्रोत्क्रमणमस्तीति । क्रममुक्तिस्तु ब्रह्माण्डभेदनान्तरमेव । तत्र ब्रह्माण्डाद्बहिरेव ब्रह्मप्राप्तिः । तत्रोत्क्रमणमस्तीत्यतः स्थलद्वय उत्क्रमणप्रकार उच्यत इत्यर्थः । सूत्रार्थमाहुः **स इत्यादिना** । श्रुतेरिति । बृहदारण्यके शारीरब्राह्मणस्थश्रुतेरित्यर्थः । **तदोकोग्रेति** सूत्रांशं व्याकुर्वन्ति **तस्येति** । **द्वारान्तं** व्याख्याय **शताधिकयेतिपदं** व्याख्यातुमाहुः

६. ६.) इति यतः श्रुतिराह । अत्र हेतुमाह हार्दानुगृहीत इति । हेत्वन्तर्गर्भं विशेषणम् । " गुहां प्रविष्टौ परमे परार्धे " (कठ. ३. १.) इति श्रुतेर्हृदयाकाशसम्बन्धी यः परमात्मा तदनुग्रहे हेतुर्विद्यासामर्थ्यादिति । तस्या विद्याया शेषभूताङ्गभूता या गतिः प्रव्रजनरूपा तच्छेषभूतैव या भगवत्स्मृतिपरम्परा च ताभ्यां च यो भगवदनुग्रहस्तेन तथेत्यर्थः ॥ १७ ॥ ५ ॥

॥ इति चतुर्थाध्याये द्वितीयपादे पञ्चमं तदोकोधिकरणम् ॥ ५ ॥

" अथ या एता हृदयस्य नाडयस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिङ्गलः " (छा. ८. ६. १.) इत्युपक्रम्याग्रे पठ्यते " तमभित आसीना आहुर्जानासि मां जानासि माम् " (छा. ८. ६. ५.) इति " स यावदस्माच्छरीरादनुत्क्रान्तो भवति तावज् जानात्यथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्व आक्रमते " इति । अत्र तमभित इत्याद्युक्तेः सर्वसाधारण्युत्क्रान्तिः प्राप्यते । पूर्वमादित्यत्वेनोक्तस्य पिङ्गलस्य रश्मिभिरूर्ध्वाक्रमणं च तथा । अत्र संशयः,

---

यद्यपीति । हार्देतिपदं व्याख्यातुमाहुः **अत्रेति** । अग्रे स्पष्टम् । अस्मिन्नधिकरण उत्क्रमणप्रकारः विद्वदविद्वत्साधारणो वा न वेतिसंशयः । साधारणेतिपूर्वः पक्षः । अतिरिक्त इतिसिद्धान्तो बोध्यः ॥ १७ ॥ इतिपञ्चमाधिकरणम् ॥

अधिकरणमाहुः **रश्म्यनुसारी** । विषयमाहुः **अथेति** । इयं छान्दोग्ये दहरविद्यायाम् । संशयमूलमाहुः **अत्रेति** । पिङ्गलस्य वर्णविशेषविशिष्टस्य

ओकोग्रज्वलनादेरितरसाधारण्येपि यथा हार्दानुग्रहाद् विलक्षणा गतिर्विदुष उक्ता तथा रश्म्यनुसारित्वमपीतरसाधारणमुतास्मिन्नेवेति। तत्रावधारणमाह

रश्म्यनुसारी ॥ १८ ॥

रश्म्यनुसारी निष्क्रामत्ययमेवेति ॥ १८ ॥

विदुष उत्क्रमणे हार्दानुग्रहकृतो यथा विशेषस्तथा कालविशेषकृतोपि विशेषो भविष्यतीत्याशङ्क्य तन्निरासमाह। तत्राहोरात्रकृतोयनकृतो वा स भवेत्। तत्राद्यकृतो नास्तीत्याह निशि नेति।

निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वाद् दर्शयति च ॥ १९ ॥

तत्र हेतुः सम्बन्धस्येत्यादि। अनुग्रहहेतुभूतो यः पूर्वोक्तो गत्यनुस्मृतिसम्बन्धस्तस्य यावद्देहभावित्वात् तत्कार्यस्यानुग्रहस्यापि

सूर्यांशस्यापि तस्य तथैति प्राप्यते। सशयमाहुः **ओकोग्रेति**। **अस्मिन्नेवेति**। विदुषीत्यर्थः। पूर्वपक्षस्तूहनीयः। स चेत्थम्। ओकोग्रज्वलनस्ययथासाधारण्यं तथा रश्म्यनुसारित्वस्यापीति। सिद्धान्तमाहुः **तत्रेति**। **अयमेवेति**। विद्वानेवेत्येवकाराऽवधारणे ॥ १८ ॥

सूत्रं व्याकुर्वन्ति **विदुष** इति। **विशेषोपि भविष्यतीति**। भविष्यति चेत् **निशि** रात्रो न सूर्यद्वारागमनं नेत्याशङ्केत्यर्थः। तथा च रात्रावथ च दक्षिणायने मृतानां सूर्यद्वारा गमनाभावाद्विदुषां हार्दानुग्रहवत् अहरुत्तरायणं चापेक्षितमिति तदर्थं योगादिना शान्तनवभीष्मवत् तयोः प्रतीक्षा कर्तव्येतिगूढाभिसंधिराशङ्काकर्तुरितिभावः। सिद्धान्तं व्याकुर्वन्ति **तत्राहोरात्रकृत** इति। **तत्र** कालकृतविशेषे **स भवेदिति**। विशेषो भवेदित्यर्थः। **आद्यकृत** इति।

तथात्वात् कालस्याप्रयोजकत्वमित्यर्थः । अत्र प्रमाणमाह । **दर्शयति** यतः श्रुतिः । " तमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रजन्ति " (बृ. ६. ४. २२.) इति ॥ १९ ॥

हार्दानुग्रहस्य मुक्तिहेतोर्विद्यमानत्वादयनविशेषोऽप्यप्रयोजक इत्याह— **अतश्चायनेऽपि दक्षिणे** ॥ २० ॥

स्पष्टार्थमिदम् ॥ २० ॥

ननु " यत्र काले त्वनावृत्तिम् " (भ. गी. ८. २३.) इतिकालप्राधान्येनोपक्रम्य " अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् । तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः " ॥ (भ. गी. ८. २४.) इतिभगवद्वाक्याद् ब्रह्मविदोऽप्युक्तकालापेक्षास्तीत्याशङ्क्य विषयभेदेन समाधत्ते

योगिनः प्रति स्मर्यते स्मार्ते चैते ॥ २१ ॥

ज्ञानमार्गाद् योगमार्गो हि भिन्नः । तथा च **योगिनमुद्दिश्यैव** कालविशेषस्य गतिविशेषहेतुत्वं **स्मर्यते** न तु ज्ञानमार्गीयस्य

अहोरात्रकृत इत्यर्थः । **अप्रयोजकत्वमिति** । परमुखनिरीक्षणवदितिशेषः । तथा च मुक्तिं प्रति दिवसस्य कारणत्वं रात्रेश्च प्रतिबन्धकत्वमित्युभयमपि नास्तीतिभावः । स्पष्टमन्यत् ॥ १९ ॥

अयनस्याप्रयोजकत्वप्रतिपादकसूत्रमवतारयन्ति **हार्दानुग्रहस्येति** । पूर्वसूत्रान्नेतिचेन्नेत्यनुवर्तते । तथा च दक्षिणेऽयनेऽपि सूर्यं भित्त्वा गमनं नेति चेन्न । कुतः । **अतश्च** पूर्वोक्ताद्धेतोरिति सूत्रार्थः स्पष्ट एवेत्याहुः **स्पष्टार्थमिति** ॥ २० ॥

सूत्रमवतारयन्ति **यत्रेति** । **आशङ्क्येति** । सूत्राद्बहिरियमाशङ्का । व्याकुर्वन्ति **ज्ञानमार्गादिति** । **इतरनिरपेक्षत्वादिति** । कालापेक्षत्वा-

श्रौतस्य । इतरनिरपेक्षत्वात् । न च योगसाङ्ख्ये अपि श्रौते एवेति वाच्यम् । यतः स्मार्ते एते । चो हेत्वर्थे । एते योगसाङ्ख्ये "अग्निर्ज्योतिः धूमो रात्रिः" (भ. गी. ८. २४. २५.) इतिवाक्यद्वयोक्तगती वा । इमं तु श्रुत्युक्तदेवयानपितृयानातिरिक्तमार्गमभिप्रेत्य समाहितम् । ते एव चेदत्राप्युच्येते शब्दभेदेन तदा न विरोधः ॥ २१ ॥ ६ ॥

॥ इति चतुर्थाध्याये द्वितीयपादे षष्ठं रश्म्यधिकरणम् ॥ ६ ॥

॥ इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये चतुर्थस्याध्यायस्य द्वितीयः पादः समाप्तः ॥

भावात् विद्यायाः पाक्षिकफलत्वं नास्तीतिभावः । अत्राशङ्कते **न चेति** । सूत्र एव समाधानमित्याहुः **यत** इति । ननु सूत्रे योगिपदमेवास्ति न तु सांख्यपदमतः कथमेते इतिपदेन योगसांख्ययोर्ग्रहणमत आहुः **अग्निर्ज्योरिति** । ननु छान्दोग्योक्तदेवयानपितृयानगती एव एते गती भवतः । किञ्चिच्छब्दवैलक्षण्येपि श्रौतत्वानपायात् कथमेतयोः स्मार्तत्वमत आहुः **इद त्विति** । तथा च स श्रुत्युक्तो मार्गो भिन्नः, अयं च भिन्न इति भावः । न चैवं चेच्छ्रुतिस्मृत्योर्विरोधः । स्मृतौ श्रुत्युक्तमार्गकथनात् । न च तत्र विद्वान्, अत्र तु योगीतिविषयभेदान्न विरोध इतिवाच्यम् । योगिविदुषोर्मार्गैक्यमेव । तत्र कालापेक्षा, अत्र सा नास्तीत्यतस्तथैवास्त्वित्याहुः **ते एवेति** ॥ २१ ॥

इतिश्रीमन्मुकुन्दरायसहजमाधुरीपरमानिर्वचनीयसरसवदनतामरससुधाह्रदावगाहिश्रीमदाचार्यपदाब्जकृपापारसारश्रीमत्प्रभुचरणात्मजमहाराजयदुनाथकुलोद्भवगोस्वामिश्रीगोपालात्मज**गिरिधररचिते अणुभाष्यविवरणे चतुर्थाध्यायस्य द्वितीयः पादः** समाप्तिमफाणीत् ॥

अथ चतुर्थाध्यायस्य तृतीयः पादः ।

ननु ज्ञानमार्गीयस्येव मर्यादामार्गीयभक्तस्याप्यर्चिरादिमार्गेणैव गमनमुत सद्योमुक्तिरेव भवतीतिसंशयः । तत्र यथा ज्ञानिनो नियमाभावस्तथात्रापीति प्राप्त आह—

अर्चिरादिना तत्प्रथितेः ॥ १ ॥

अर्चिरादिमार्गेण तस्य ज्ञानमार्गीयस्यैवोत्कर्षकथनात् स एव तेन मार्गेण गच्छति न तु भक्तोपीत्यर्थः । तथाहि पञ्चाग्निविद्याप्रकरणे "तद् य इत्थं विदुर्ये चेमेरण्ये श्रद्धा तप इत्युपासते तेर्चिषमभिसम्भवन्त्यार्चिषोहरह आपूर्यमाणपक्षम् (छा. ५. १०. १.) इत्यत्रोपक्रमे भक्तातिरिक्तानेवाधिकृत्य तथागतिरुच्यते ।

पूर्वं सद्योमुक्तिप्रकार उत्क्रमणविचारो दर्शितः । इदानीं ब्रह्मप्राप्तिप्रकार उच्यते । तत्र प्रथमाधिकरणं वक्तु संशयादिकमाहुः **नन्विति** । ज्ञानापेक्षया भक्तेराधिक्याद्भक्तः साधनाधिकोर्चिरादिनैव गमिष्यतीत्युत्कटकोटिकोऽयं संशयोऽपि बोध्यः । पूर्वपक्षमाहुः **तत्रेति** । यत्र साधनाधिक्यं तत्रार्चिरादिरिति भक्तावपि सत्त्वात् स एव तत्र मार्ग इति पूर्वः पक्षः । सिद्धान्तमाहुः **आहेति** ।

सूत्रार्थमाहुः **अर्चिरादीति** । सूत्रे **अर्चिरादिने**त्यस्य व्याख्यानमाहु **अर्चिरादिमार्गेणे**ति । **तत्प्रथिते**रित्यस्य व्याख्यानमाहुः **तस्येति** । प्रथ प्रख्याने । प्रथनं प्रख्यातिः प्रसिद्धिः । तथा च **तस्य** ज्ञानमार्गीयस्य उपनिषदि **प्रथितेः** उत्कर्षकथनादित्यर्थः । उपनिषदाहुः **तथा हीति** । **उपक्रम**

स्मृतावपि " अग्निर्ज्योतिरहः शुक्लः " (भ. गी. ८. २४.) इत्यत्र 'ब्रह्मविदो जनाः' इति वचनेन ज्ञानमार्गीयस्यैव स पन्था उच्यते ।

अथेदं चिन्त्यते । सामोपनिषत्सु पठ्यते " अथ या एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिङ्गलः " (छा. ८. ६. १.) इत्युपक्रम्यादित्यरूपस्य पिङ्गलस्य रश्मिरूपत्वं नाडीनामुक्त्वाग्रे वदति " अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्व आक्रमते " (छा. ८. ६. ५.) इति नाडीरश्मिसम्बन्धेनैका परलोकगतिः श्रूयते । आर्चिरादिका चान्या " तेर्चिषमभिसम्भवन्त्यर्चिषोहः " (छा. ५. १०. १.) इत्यादि श्रुत्युक्ता । " स एनं देवयानं पन्थानमापद्याग्निलोकमागच्छति " (कौशी.

इति । तत्र इत्थमित्यादिना तपसः श्रवणात् कर्मणः प्रतिपादनं न तु भक्तेः । तेन कृत्वा किं ज्ञायते । विदुषामेवार्चिरादिर्न तु भक्तानामित्यर्थः । ननु भवतु तथापि मर्यादाभक्तानां सद्योमुक्तिः । किमर्थम् । अर्चिराद्यतिरिक्तानामपि मार्गाणां श्रुतौ श्रवणात् । किं च सूत्रकृतापि एक एवार्चिरादिः किमर्थमुक्त इत्याशङ्क्याहुः **अथेदमिति** । ननु कुत्र कुत्र मार्गबहुत्वं श्रुतमित्यत आहुः **सामोपनिषत्स्विति** । **पठ्यते** विद्याभेदेन मार्गभेदः पठ्यते । तत्र प्रथमतो दहरविद्यास्थं वाक्यमाहुः **अथ या एता** इत्यादिना **श्रूयते** इत्यन्तेन ।

द्वितीयां गतिमाहुः **अर्चिरादिकेति** । तत्र पञ्चाग्निविद्यास्थं वाक्यमाहुः **तेऽर्चिषमिति** । तृतीयां गतिमाहुः **स एनमिति** । इदं च वाक्यं कौषीत-

१. १३.) इति चापरा । " स यदा वै पुरुषोऽस्माल्लोकात् प्रैति वायुमागच्छति " (बृ. ५. १०. १.) इति चेतरा । " सूर्यद्वारेण ते विरजाः प्रयान्ति " (मुण्ड. २. १३.) इति चान्या । एवमनेकेषु मार्गेषु सत्स्वर्चिरादेरेवोक्तिः कुत इति । तत्र सर्वेषां पारिभाषिकमर्चिरादित्वमत एव " अथैतयोः पथोर्न कतरेणचन " (छा. ५. १०. ८.) इति मार्गद्वयभ्रष्टानामतिकष्टं "जायस्व म्रियस्वेति तृतीयं स्थानम् " (छा. ५. १०. १०.) इत्युक्तम् । अन्यथानेकेषां मार्गाणामुक्तानां श्रूयमाणत्वादस्य तृतीयत्वं नोच्येत । अतः प्रकरणभेदाद् भिन्नोपासनशेषत्वान् मिथोनपेक्षा भिन्ना एवैते मार्गा ब्रह्मप्रापका इति मन्तव्यमिति चेत् । तत्रोच्यते । न

किब्राह्मणे पर्यङ्कविद्यास्थम् । चतुर्थीमाहुः **स यदेति** । इदं वाक्यं बृहदारण्यके अनात्मोपासनगतिफलकथने । पञ्चमीमाहुः **सूर्यद्वारेणेति** । इदं च वाक्यं प्रथममुण्डके अन्ते । एतावता श्रुत्युक्तमार्गभेदो दर्शितः ।

इदानीं सूत्र एक एव मार्ग उक्तः, तत्र किं कारणमिति पृच्छति **एवमिति** । मार्गास्तु पञ्चैव । सूत्रे एक एव मार्गोयमुक्तः । तत्र एकत्वं पारिभाषिकमितिपूर्वपक्षमाहुः **तत्रेति** । **पारिभाषिकमिति** । एते पञ्च मुक्तिमार्गा अर्चिरादिपदेन व्यवहर्तव्या इत्याधुनिकसंकेतः परिभाषा तत्सिद्धमित्यर्थः । तथा च वास्तवे अर्चिरादिरेको नास्तीतिभावः । अत्रोपष्टम्भकमाहुः । **अत एवेति** । पारिभाषिकत्वादेवेत्यर्थः । **अन्यथे** त । वास्तवार्चिरादित्वे स्वीकृते । **श्रूयमाणत्वादिति** । ब्रह्मप्रापकतयेतिशेषः ।

पूर्वपक्षिणा एवं स्वमत उद्भाविते तत्र एकदेशिकृतं समाधानमाहुः **तत्रोच्यत** इति । **श्रुतास्तीति** । एतादृशपरिभाषायाः सर्वत्र श्रवणाभावात्

हीयं परिभाषा सर्वेषु श्रुतास्ति यतस्तथोच्येत । अतो लाघवादनेकपर्वविशिष्ट एक एव मार्ग इति मन्तव्यम् । न तु पर्वभेदेन मार्गभेद इति । गौरवप्रसङ्गात् । न चैवमथैतैरेव रश्मिभिरित्यवधारणानुपपत्तिरिति वाच्यम् । तस्याः श्रुतेरुत्क्रमणमात्रमार्गनिरूपकत्वात् । तथा हि । तत्रोपक्रमे हि " अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्व आक्रमते " (छा. ८. ६. ५.) इत्युच्यते । एतस्मात् पुरस्तात् " अथ या एता हृदयस्य नाड्यः " (छा. ८. ६. १.) इत्युपक्रम्य पिङ्गलस्यादित्यत्वमुक्त्वा " तद् यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं चैवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चामुं चामुष्मादादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः " (छा. ८. ६. २.) इत्यन्तेन वाक्येन नाडीषु रश्मिप्रचारमुक्त्वाग्रे " अथ यत्रैतदस्मात् " (छा. ८. ६. ५.) इत्याद्युक्तम् ।

पारिभाषिकत्वं न वक्तव्यमित्यर्थः । तर्हि कथं वक्तव्यमित्यत आहुः **अतो लाघवादिति** । पर्वप्रत्यभिज्ञानलिङ्गेन मार्गैकाङ्गीकारे लाघवादित्यर्थः । **गौरवप्रसङ्गादिति** । मार्गाणामनेकत्वं, कस्यचिन्निकटत्वं कस्यचिद्दूरत्वकल्पनेन गौरवप्रसङ्गादित्यर्थः । अनेकत्व शङ्कते **न चेति** । निषेधति **तस्या इति** । तदेव विशदयन्ति **तथा हीत्यादिना** । **तत्र** अथैतैरेवेतिरश्मिवाक्ये । **आक्रमत इति** । शरीरादूर्ध्वमुत्क्रम उच्यत इत्यर्थः ।

ननु तद्यथा महापथेत्यादिना महापथदृष्टान्तेन मार्गत्वं बोध्यत इत्याशङ्कायामाहुः **एतस्मात्पुरस्तादित्यादिना** । महापथदृष्टान्तान्ते उक्तत्वादुत्क्रान्ति-

उपसंहारे च " शतं चैका हृदयस्य नाडयस्तासां मूर्धानमभिनिःसृतैका। तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति " (छा. ८. ६. ६.) इति। एवमुपक्रमोपसंहाराभ्यामुत्क्रमणमात्रमार्गनिरूपकत्वं न तु ब्रह्मप्रापकमार्गस्य। अतस्तदनुपपत्तिपरिहारोऽनर्थकः। नन्वनेकपर्वविशिष्टत्वेन मार्गस्यैकत्वे तं निरूपयन्ती श्रुतिः क्वचित् किञ्चित् पर्व निरूपयति क्वचिन्नेति कथम्। उपसंहारेण प्राप्स्यत इतितात्पर्येण तथेति चेद् ब्रवीषि, तदा शाखान्तरमविदुषस्तदसम्भवेन तं प्रति श्रुतेर्न्यूनतापातः। न हि सर्वशाखाविदं प्रत्येव कथनमिति वक्तुमुचितम्। तस्यासम्भवात्। अतः स्वस्वशाखाज्ञानवन्तं प्रत्येव तथा। अध्ययनविधेरपि तावन्मात्रपरत्वात्। शाखान्तरसंवादिपर्वकथनानुपपत्तिश्च। उपसंहारेणैव तस्यापि प्राप्तिसम्भवात्। अतो विरुद्धदिक्कानां स्वस्वमार्गेणैकग्रामप्राप्तिवदिहापि भवितुमर्हति। स्वातन्त्र्येण सर्वैर्मार्गैर्ब्रह्मप्राप्तिः। न चैवम् " अथैतयोः पथोः "

मार्गत्वमेव नाडीनां वक्तव्यमित्यर्थः। अन्यदपि प्रकारान्तरमाहुः **उपसंहारे**ति। उक्तार्थं द्रढयन्ति **एवमि**ति। **तदनुपपत्ती**ति। ब्रह्मप्रापकमार्गानुपपत्तिरीत्यर्थः। एक एव मार्ग इत्यत्र दूषणमुद्भावयन्ति **नन्वि**ति। अत्रावान्तरसमाधानमाहुः **उपसंहारेणे**ति। तद्दूषयन्ति **तदे**ति। सर्वशाखाध्ययनासंभवमाहुः **अध्ययनविधेरि**ति। **तावन्मात्रे**ति। पितृपितामहप्राप्तशाखाध्ययनमात्रपरत्वादित्यर्थः। अनुपपत्तौ हेतुमाहुः **उपसंहारेणे**ति। वस्तूनामभेदात्फलाभेदाच्च जायमानो य उपसंहारस्तेनेत्यर्थः। **तस्यापि** शाखान्तरेऽनुक्तपर्वण इत्यर्थः। एतावता प्रबन्धेनापरोक्तं दूषितम्। इदानीं स्वमतमाहुः **अत** इति। **विरुद्धे**ति। प्राचीविरुद्धा प्रतीची। एवंरीत्या सर्वदिक्स्थितानामित्यर्थः। **ब्रह्मप्राप्तिरि**ति।

(छा. ५. १०. ८.) इतिद्विवचनानुपपत्तिः " जायस्व म्रियस्व " (छा. ५. १०. ८.) इत्यस्य तृतीयत्वं चानुपपन्नमिति वाच्यम् । अर्चिरादिकमुक्त्वोपसंहरति " एष देवयानः पन्थाः " (छा. ५. १०. २.) इति । श्रुत्यन्तरे च " स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति " इति (कौ. १. ३.) । तथा च ब्रह्मप्रापकाः सर्वे मार्गा देवयाना इत्युच्यन्ते । " दैवी सम्पद् विमोक्षाय " (भ. गी. १६. ५.) इतिभगवद्वाक्याद् दैव्यां सम्पदि ये जातास्ते देवा इत्युच्यन्ते । तेषां यानं गमनं यत्रेति ते सर्वेपि मार्गा देवयानशब्देनोच्यन्ते । द्वितीयस्त्वविशिष्टः । एवं द्वित्वं त्रित्वं चोपपद्यते । न चोक्तरीत्या लाघवादेक एव स मन्तव्यः । स्वतःप्रमाणभूता हि श्रुतिः । सा येन यदा या श्रुता तदर्थावधारणे द्वितीयस्यानुपस्थितत्वान्न लाघवगौरवतद्विचारावसरः । क्वचिदुपस्थितौ चोक्तबाधकैरुपसंहारानवकाशः । अपरं च । ब्रह्मविदः क्रममुक्तौ गन्तव्यो मार्गो ह्ययमुपदिश्यते । तत्तल्लोके तदानन्दानुभवश्चावश्यकः । तथा

भवितुमर्हतीतिपूर्वेणान्वयः । द्विवचनाद्यनुपपत्तिं शङ्कते **न चेति** । परिहरन्ति **अर्चिरादिकमिति** । लाघवमाशङ्क्य दूषयन्ति **नचे**त्यादिना । दूषणप्रकारमाहुः **स्वत इति** । **येन** यच्छाखाध्ययनकर्त्रा ।

बहुशाखाध्यायिनोऽनेकमार्गज्ञानाद्गौरवलाघवविचारतादृगवस्थ्यमाशङ्क्य निषेधति **क्वचिदिति** । **उक्तबाधकैरिति** । शाखान्तरसंवादिपर्वकथनानुपपत्तिरूपैरित्यर्थः । स्वमते युक्तिमाहुः **अपरं चेति** । **तत्तल्लोक इति** । इन्द्रादिलोकेऽमृतपानाद्यानन्दानुभवः पुराणप्रसिद्धत्वादावश्यक इत्यर्थः ।

चोपासनभेदात् फलभेदस्यावश्यकत्वान् मार्गभेदोपि तथेति सर्वेष्वेकरूपफलप्रसञ्जक उपसंहारो न युक्तः। किं चोपासने कर्मणि चोपसंहारः सम्मतः। मार्गस्तु नान्यतररूपोतो यस्योपासकस्य येन मार्गेण गमनं स मार्ग उपदिश्यत इति नोपसंहारो युक्तः। अविधेयत्वादपि तथा। एतद् यथा तथा पुरस्तान् निरूपितम्। " उपसंहारोथाभेदाद् विधिशेषवत् समाने च " (ब्र. सू. ३. ३. ५.) इत्यत्र। एवं सत्यर्चिषशब्देनार्चिरुपलक्षितो मार्ग उच्यते। आदिपदेनान्ये सर्वे मार्गाः संगृह्यन्त इति नानुपपत्तिः काचिदिति चेत्।

अत्र वदामः। अर्चिरादिभ्य इत्युक्तं भवेत् त्वद्रीतिरेव चेदभिप्रेता भवेत्। तस्मान्नैवमित्यवधार्यते। अर्चिरादिनेत्येकवचनान्यथानुपपत्त्या मार्गस्यैकत्वमवश्यमूरीकार्यम्। एवं सति श्रुतिषु

मार्गभेदोपि तथेति। मार्गभेदोपि आवश्यक इत्यर्थः। उपसहारे बाधकमाहुः **किंचे**ति। **नान्यतररूप** इति। उपासनकर्मान्यतररूपो नास्तीत्यर्थः। ननु मास्त्वन्यतररूपत्वं तथापि ब्रह्मप्राप्तिरूपप्रयोजकनैकस्य सत्त्वादुपसंहारः कुतो नास्तीत्यत आहुः **अविधेयत्वादि**ति। अविधेयत्वस्य बाधकत्वं पूर्वमेवोक्तमित्याह **एतदि**ति। अग्निहोत्रं तु सर्वेषां समानमेव परंतु आपस्तम्बैः स्वशाखोक्तमेव कर्तव्यं नाश्वलायनोक्तम्। एवमुपासनशेषे यत्पर्वको मार्गः कथितः तं प्रति स एव मार्गो विधेयः। एवं चान्यान्प्रति तादृशमार्गस्याविधेयत्वमार्गोपसंहारो न युक्त इतिमन्तव्यम्।

एवं सति सिद्धमाहुः **एवं सती**त्यादि। सिद्धान्तमाहुः **अत्रे**ति। **ऊरीकार्यं** स्वीकार्यम्। तथा सत्युपपादयन्ति **एवं सती**ति। **नानुपपन्नमि**ति। यतो

यावन्ति पर्वाण्युक्तानि तानि सर्वाण्येकस्मिन्नेवार्चिरादिमार्गे वर्तमानान्यपि यस्योपासकस्य यावत्पर्वभोगो भावी तं प्रति तावत्पर्वोक्तिर्यस्य यावतां तेषां स न भावी तं प्रति न तदुक्तिस्तद्भोगाभावादिति नानुपपन्नं किञ्चित्। ननु त्वयाप्यनुक्तानां पर्वणां तत्र स्थितिं वदतोपसंहार एवोक्तो भवति प्रापकत्वेनेति चेत्, स्यादेतदेवं यदि तस्यैव गन्तुर्भोगाय तदपि पर्व तत्रोच्येत। न त्वेवं, किन्त्वेकवचनानुरोधान् मार्गैक्ये निश्चिते यं प्रति यत् पर्वोच्यते तत् तत्र कण्ठोक्तमेवेति नोपसंहारापेक्षा। अग्रेऽन्यत्रोक्तानां पर्वणामुक्तस्थले सन्निवेशोक्त्यापि सूत्रकाराभिमत एक एव मार्ग इति ज्ञायते। श्रुतौ सर्वत्र पूर्वपरामर्शादपि तथा ॥ १ ॥

वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥

जनपदप्रापक एक नानाग्रामयुक्तो मार्गः। तत्र कश्चित्पुरुषः कस्मिंश्चिद्ग्रामे निवासं करोति, अन्यस्मिन्नन्यः, एवं रीत्यात्रापीति नानुपपन्नमित्यर्थः। एवंरीत्या कथन उपसंहारोऽस्तीत्याशङ्कते **नन्विति**। **प्रापकत्वेनेति**। प्रवेशप्रापत्वेनेत्यर्थः। परिहरन्ति **स्यादेतदिति**। **कण्ठोक्तमिति**। यद्यत्रोक्तं तत्तेन भुज्यते नान्येनेत्यत उपसंहारापेक्षा नास्तीत्यर्थः। ननु मया यो मार्गभेदः स्वीकृतः सोऽपि समीचीनः पक्ष इति प्रतिभातीत्यत आहुः **अग्र** इति। सूत्रमितिशेषः। **पूर्वपरामर्शादिति**। अर्चिषोऽहरहः पूर्वपक्ष इत्यादिरूपादित्यर्थः। अत्रेदं सिद्धं, मर्यादाभक्तानां सद्योमुक्तिः पूर्वमेवोक्ता, ज्ञानिनां तु मार्गान्तराभावादर्चिरादेरुक्तत्वात्क्रममुक्तिरिति ॥ १ ॥

छान्दोग्ये वायुर्न पठ्यते । कौशीतकिश्रुतौ तु " स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकम् " (कौ. १. ३.) इति वाय्वादयः श्रूयन्ते । तत्रार्चिषोऽग्नेश्चाभेदान्न विचारणीयमस्ति । वायुलोकं कस्माल्लोकाद् गच्छतीत्याकाङ्क्षायामाह वायुमब्दादिति । " अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद् यान् षडुदङ्ङेति मासांस्तान् मासेभ्यः संवत्सरं संवत्सरादादित्यम् " (छा. ५. १०. २.) इत्यत्र संवत्सरलोकात् परस्ताद् वायुलोको निवेशयितव्यः । तथा च संवत्सरलोकाद् वायुलोकं गच्छतीत्यर्थः । तत्र विनिगमकमाहाविशेषविशेषाभ्यामिति ।

अत्रेदं ज्ञेयम् । अग्निहोत्रादिकर्मभिश्चित्तशुद्धावुपासनाभिर्ज्ञानोदये क्रममुक्त्यधिकारी हि तत्तल्लोकं गत्वा भुक्त्वान्ते ब्रह्म प्राप्नोति । कर्म त्वग्निसाध्यं भूलोक एव च भवत्यत आदौ तत्रत्यो भोगस्ततस्तदुपरितनलोकानां " पृथिवीदीक्षा तयाग्निदीक्षया दीक्षितः " (तै. ब्रा. ३. ७. ७.) " यथा पृथिव्यग्निगर्भा " (आप. कल्प. १. १३. ५.) इत्यादिश्रुतिभ्यो भूरग्निप्रधाना भवत्यतोऽर्चिराख्यमग्निलोकमादौ गच्छति । ततः कर्मोपासनयोरहरादिसंवत्सरान्ते काले

यत्र पूर्वं नोक्तं तादृशं स्थलमेव नास्तीत्यतः मार्गस्यैकत्वं न वक्तव्यमित्याशङ्कायां मार्गैकत्वं स्थिरीकर्तुमग्रिमं सूत्रं पठतीत्यभिप्रायेण सूत्रमवतारयन्ति **छान्दोग्य** इति । **श्रुतौ** त्विति । **श्रूयन्त** इत्यग्रिमेणान्वयः । हेतुवाक्यं विशदयन्ति **अत्रेद**मिति । प्रथमतोऽविशेषमाहुः **अग्निहोत्रादिकर्मभिरि-**

विहितत्वात् तत्र तत्र गत्वा भुङ्क्ते । तथा च संवत्सरान्तानां भूसम्बन्धित्वेनाविशेषात् तन्मध्ये वायोर्न प्रवेशः । भूलोकादुपर्यन्तरिक्षलोकस्तदुपरि द्युलोकः । तथा च " वायुरन्तरिक्षस्याधिपतिः " (तै. सं. ३. ४. ५.) इतिश्रुतेः, " सूर्यो दिवोधिपतिः " (तै. सं. ३. ४. ५.) इतिश्रुतेस्तयोः पौर्वापर्ये **विशेषो** हेतुरस्तीत्यादित्यलोकात् पूर्वमुक्तरीत्या भूलोकमध्यपातिसंवत्सरस्य परस्ताच्च वायुर्निवेशयितव्य इत्यर्थः । ननु " तेर्चिषमभिसम्भवन्त्यर्चिषोह्नः " (छा. ५. १०. १.) इत्यादिश्रुतिरुक्तमुक्तमनूद्यानूद्यापादानत्वं वदन्ती पूर्वोत्तरयोरव्यवधानं सूचयतीति नोक्तमादरणीयमिति चेत् । सत्यम् । **यस्योपासकस्य न वायुलोकभोगस्तं** प्रति सोक्तिर्यस्य तु तद्भोगस्तस्योक्तरीतिर्मार्गैक्यादिति नानुपपत्तिः काचित् ।

केचित् तु " स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकम् " (कौ. १. ३.) इत्यविशेषेण

त्यादिना **वायोर्न प्रवेश** इत्यन्तेन । एवं च भूसम्बन्धित्वमेवार्चिरादिसंवत्सरान्तानामविशेषः । विशेषमाहुः **भूलोकादि**त्यादिना **विशेषो हेतुरस्ती**त्यन्तेन । तथा च नीचोच्चलोकाधिपत्यं वाय्वादित्ययोर्विशेषः । छान्दोग्यश्रुतिविरोधमाशङ्कते **नन्विति** । अपादानत्वं वदन्तीत्यादिश्रुतिः अव्यवधानं सूचयतीत्यन्वयः । **नोक्तमिति** । संवत्सराद्वायुलोकमित्यर्थः । भोगपरत्वेन समाधानमाहुः **सत्यमिति** । **सोक्तिरिति** । छान्दोग्योक्तिः । **उक्तरीतिः** सूत्रोक्तरीतिः ।

शंकराचार्यमतमाहुः **केचित्त्विति** । **पदाभावादिति** । अग्नेर्वायु-

वायुरुपदिश्यते। मिथः पौर्वापर्यप्रापकपदाभावात्। "यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छति" (बृ. ५. १०. १.) इतिश्रुत्यादित्यात् पूर्वो वायुर्विशेषेणोपदिश्यत इत्यब्दादित्ययोरन्तराले निवेशयितव्य इत्यर्थं वदन्ति। स चिन्त्यते। यथा "तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छति" (छा. ८. ६. ५.) इतिविशेषोपदेश इत्युच्यते तथा स वरुणलोकमित्यत्रापि वक्तुं शक्यम्। न च स आदित्यमागच्छतीत्यत्र तच्छब्दस्य पूर्वपरामर्शित्वाद् वायुलोकगतस्यैव पूर्वत्वात् तथेति वाच्यम्। "अग्निलोकमागच्छति स वायुलोकं स वरुणलोकम्" (कौ. १.

लोकमित्याकारकपञ्चम्यन्तपदाभावादित्यर्थः। एव चात्रायमेवाविशेषपदार्थः। विशेषपदार्थमाहुः **यदा वा** इति। तथा च वायुर्विशेषेणोपदिश्यत इत्यादिना विशेषपदकथनम्। श्रुत्यर्थस्तु **तस्मै स तत्रेति**। **तस्मै** आगताय **सः** वायुः **तत्र** तदागमनस्थले। **विजिहीत** इति। पूर्वस्तिमितोऽपि तदानीं स्वावयवान् विगमयति। तस्य गमनार्थं विगमनस्थलमानमाह **यथेति**। **ख** छिद्रं रथछिद्राकारं विगमनस्थलमित्यर्थः। तन्मतेऽस्वरसमाहुः **स** चिन्त्यत इति। **स** विशेषोऽस्ति वा न वेति चिन्त्यत इत्यर्थः। चिन्ताप्रकारमेवाहुः **यथेति**। **वक्तुं शक्यमिति**। कौशीतकिब्राह्मणेऽपि वायुलोकानन्तरं वरुणलोकः पठितो भवतीति वाजसनेयिवद्विशेषोपदेश इत्येवमपि वक्तु शक्यमित्यर्थः। न चोर्ध्व आक्रमत इति वाजसनेयिभिः पठितमिति तत्र विशेष इति वाच्यम्। ऊर्ध्वाक्रमणस्यार्थसमानग्रस्तत्वात्। शङ्कते **न चेति**। समाधानमाहुः **अग्निलोकमिति**। **तुल्यत्वात्**। स इति तच्छब्दस्योभयत्रापि सत्त्वात्। एवं च हेतोरर्था-

३.) इत्यत्रापि तुल्यत्वात् । किं चैवमग्निलोकानन्तरं वायुलोक इत्यपि वक्तुं शक्यमतो विद्वद्भिरुपेक्ष्योयम् ।

वाजसनेयिनस्तु " मासेभ्यो देवलोकं देवलोकादादित्यम् " (बृ. ६. २. १५.) इति पठन्ति । तत्राप्यादित्यात् पूर्वो देवलोकात् परो वायुर्ज्ञेयः । एकत्रादित्यात् पूर्वत्वे सिद्धे मार्गैक्यादन्यत्रापि तथात्वस्य न्यायप्राप्तत्वात् । सूत्रकारेण तु छन्दोगश्रुत्यपेक्षयोक्तं वायुमब्दादिति । एवं सति मासेभ्यः परस्तादब्दनिवेशनं कार्यम् । न च " वायुमब्दाद् " इतिसूत्रान् मार्गभेदापत्तिः । देवलोकस्यादित्याधिष्ठेयत्वेनादित्यमध्यपातित्वमभिप्रेत्य छन्दोगश्रुतिस्तथोक्तवती। तदनुसारेण व्यासोप्यतो नानुपपत्तिः ॥ २ ॥

तडितोधि वरुणः सम्बन्धात् ॥ ३ ॥

" आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतम् " (छा. ४. १५.

न्तरसाधकत्वेन प्रकृतसिद्धिर्न भवतीतिभावः । अन्यदपि दूषणमाहुः **किं चेति** । **एवमिति** । पूर्ववर्तित्वेोर्ध्वाक्रमणयोर्विशेषपदार्थत्वस्वीकारे । **उपेक्ष्यमिति** । अब्दानन्तर्यमपि न सिध्यतीत्यत उपेक्ष्यमित्यर्थः । सूत्रांशे विचार्य बृहदारण्यके विशेषांशे शंकराचार्यमतं परिहरन्ति **वाजसनेयिन** इति । तर्हि व्यासैः कथमुक्तमित्यत आहुः **सूत्रकारेणेति** । परिहरन्ति **एवं सतीति** । एव देवलोकनिवेशे । शङ्कते **न चेति** । परिहरन्ति **देवलोकस्येति** । सूर्यो दिवोधिपतिरितिश्रुत्यादित्याधिष्ठेत्यत्वेनेत्यर्थः । **नानुपपत्तिरिति** । तथा च **देवलोकात्पूर्वमेव वायुनिवेश इत्यर्थः** ॥ २ ॥

अस्मिन् सूत्रे वरुणलोकनिवेशनप्रकारमाहुः **आदित्यादिति** । **असंब-**

५.) इत्यत्र पठितविद्युल्लोकात् परतो वरुणलोको निवेशनीयः । तत्र हेतुः सम्बन्धात् । तडितोऽपि सम्बन्धित्वाद् वरुणस्य तत्पतित्वात् तथा ॥ ३ ॥

वरुणाच्चाधीन्द्रप्रजापती ॥ ४ ॥

स्पष्टमिदम् । अर्चिरादिपाठे विद्युदनन्तरं " तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयति " (छा. ४. १५. ५.) इति पठ्यते । तत् तु यस्योपासकस्य वरुणादिलोकगमनापेक्षा नास्ति तमपक्ष्येति ज्ञेयम् । मार्गैक्यनियममभिप्रेत्य सूत्रकारोऽन्यत्रोक्तानामन्येषामपि लोकानां तत्र निवेशनमाह ॥ ४ ॥ १ ॥

॥ इति चतुर्थाध्याये तृतीयपादे प्रथममर्चिराद्यधिकरणम् ॥ १ ॥

न्धित्वादिति । विशाला हि विद्युतो नृत्यन्ति तीव्रस्तनितनिर्घोषो जीमूतोदरेषु नृत्यन्ति अथापः प्रपतन्तीतिब्राह्मणादसबन्धित्वादित्यर्थः । एवं चैतादृशहेतोः सत्त्वात् तन्निवेशसिद्धौ मार्गभेदो नास्तीतिभावः ॥ ३ ॥

स्पष्टमिति । सूत्रे पाठादेव ज्ञायते वरुणलोकानन्तरमिन्द्रप्रजापतिलोको निवेशनीय इत्यर्थः । तडिल्लोकानन्तर वरुणनिवेशे अर्चिरादिश्रुतिविरोधमाशङ्कते **अर्चिरादि**ति । परिहरन्ति **तत्त्वि**ति । **यस्योपासकस्ये**ति । पर्यङ्कविद्योपासकस्येत्यर्थः । एक एव मार्गः सूत्रकारसमतः । **अत्र** युक्तिमाहुः **मार्गैक्ये**ति । **अन्यत्रोक्ताना**मिति । देवयानमार्गस्य यथा अक्षिपुरुषविद्यायां पञ्चाग्निविद्याया प्रत्यभिज्ञानं तथा पर्यङ्कविद्यायामप्यस्ति । एवं वैद्युतस्यापि विद्याद्वये निवेशे पर्यङ्कविद्यायामपि निवेशः कर्तव्यः । एवं च वैद्युतमतिवाहक सर्वत्रावश्यकमित्यनेन मार्गैक्यबोधनमितिभावः ॥ ४ ॥ इतिप्रथमाधिकरणम् ॥

विद्युदनन्तरं " तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयति " इत्यत्र भवति संशयः। उक्तश्रुतेर्गमयित्रैव ब्रह्मप्राप्तिरिति निश्चीयते। स च विद्युदनन्तरमेव पठ्यते। एवं सति यस्य वरुणादिलोकगमनं तस्य वचनाभावेन गमयित्रप्राप्तेर्ब्रह्मप्राप्तिर्भवति न वेति। तत्र वाचनिकस्य यावद्वचनत्वात् तदभावेन सा न भवतीति प्राप्त आह आतिवाहिका इति।

आतिवाहिकास्तल्लिङ्गात् ॥ ५ ॥ (४. ३. २.)

एतदुक्तं भवति। यस्योपासकस्य यावत्फलभोगानन्तरं ब्रह्मप्राप्तिर्भाविनी तस्य तावत्तद्भोगानन्तरं ब्रह्मप्राप्तिर्भवत्यत एव कौशीतकिश्रुतौ प्रजापतिलोकानन्तरं ब्रह्मलोकः पठ्यते। अन्यथा कृतसाधनवैयर्थ्यं तेषां ब्रह्मप्राप्तिसाधनत्वबोधकश्रुतिविरोधश्च स्यात्। तथा च यत्रातिवाहिकश्रुतिर्नास्ति तत्राप्यातिवाहिको भगवदीय एव ब्रह्म प्रापयतीति ज्ञेयम्। वस्तुतस्तु बहव एव तादृशाः सन्तीति-

---

अस्मिन्नधिकरण अवसरसगतिं विषयं चाहुः **विद्युदिति**। सशय व्युत्पादयन्ति **उक्तश्रुतेरिति**। तत्पुरुषोमानव इतिश्रुतेरित्यर्थः। पूर्वपक्षमाहुः **तत्रेति**। सिद्धान्तमाहुः **आतिवाहिका इतीति**। एतस्यैवार्थमाहुः **एतदिति**। अत्रोपष्टम्भकमाहुः **अत एवेति**। **अन्यथेति**। तत्साधनीभूतोपासनेन ब्रह्मप्राप्त्यभावे। **कृतसाधनेति**। ब्रह्मप्राप्त्यर्थं यत् कृतं साधनमित्यर्थः। **आतिवाहिकश्रुतिरिति**। अतिवहनमतिक्रामयित्वा प्रापणमतिवाहः। भावे घञ् तत्संबन्धी **आतिवाहिकः**। तद्बोधका श्रुतिः आतिवाहिकश्रुतिः। ननु तत्पुरुषोमानव इत्येकवचनं श्रुतावस्ति, सूत्रे तु नास्ति, तेन कृत्वा किं

ज्ञापनाय बहुवचनमत्रोक्तम् । तन्मध्ये **कश्चनागत्यैक** एक नयतीति-ज्ञापनाय श्रुतावेकवचनम् । तत्र हेतुस्तल्लिङ्गात् । 'तत्पुरुषोमानवः' इत्यत्र ब्रह्मसम्बन्धित्वं लिङ्गमुच्यते । तेनेदं ज्ञाप्यते, यथा विद्याबलात् तत्तल्लोकप्राप्तिस्तथैव ब्रह्मप्राप्तिरपीति न किन्तु भगवदीयपुरुषानुग्रहेणैवेति । न च पूर्वपूर्वलोकाधिष्ठातृदेवा उत्तरोत्तरलोकं प्रत्यतिवाहिका यथा तथा ब्रह्मप्राप्त्यव्यवहितपूर्वलोकदेवा एव ब्रह्मप्रापका इति तत्पदेन स लोक एवोच्यत इति वाच्यम् । तदेतरलोकेषु तदकथनं **यथा तथात्रापि न कथयेत्** । लोकाधिष्ठातृदेवाना-

---

ज्ञायते । इदं सूत्रमातिवाहिकप्राप्त्यर्थं नास्तीत्यत आहुः **वस्तुतस्त्विति** । **बहव एवेति** । **तादृशा** ब्रह्मप्रापकातिवाहका बहव एवेत्यर्थः । तथा च यस्या श्रुतौ आतिवाहिकपाठो नास्ति ब्रह्मप्राप्तिस्तूक्ता तदन्यथानुपपत्त्या कल्पनीय इतिभावः ।

एवं चेच्छ्रुतावेकवचन किमर्थमत आहुः **तन्मध्य** इति । **तत्र** बहुत्वे । तल्लिङ्गादितिसौत्रो यो हेतुस्तस्यार्थमाहुः **तत्पुरुष** इति । **तेनेति** । तत्पुरुषोऽमानव इतिवाक्योक्तलिङ्गेनेत्यर्थः । **पुरुषानुग्रहेणेति** । ब्रह्मसबन्धिपुरुषाणां बहुत्वाद्बहुवचनमितिभावः ।

अत्राशङ्कते **न चेति** । **पूर्वलोकदेवा** इति । विद्युल्लोकदेवा इत्यर्थः । **तत्पदेनेति** । तत्पुरुषोऽमानव इतिश्रुतौ लुप्तपञ्चम्यन्ततत्पदेनेत्यर्थः । **स लोक एवेति** । विद्युल्लोक एवेत्यर्थः । तथा चामानवः विद्युल्लोकाधिष्ठाता पुरुषः तस्मात् विद्युल्लोकाद् ब्रह्म गमयतीत्यर्थः । एवं च भगवदीयपुरुषानुग्रहेणेति न वक्तव्यमितिशङ्कितुरभिप्रायः । निराकुर्वन्ति **तदेतरेति** । आदित्याच्चन्द्रमसमित्यादौ यथा पुरुषस्याकथनमित्यर्थः । **न कथयेदिति** । विद्यु-

मातिवाहिकत्वोक्तावार्चिर्लोकप्रापकातिवाहिकस्याभावात् तत्प्राप्तिर्न स्यात्। तथा सति देवयानमार्ग एवोच्छिद्येत। अतो यथा विद्याबलेनैवार्चिषः प्राप्तिस्तथैतरेषामपीति बुध्यस्व। कस्यचिदल्पलोकगत्यनन्तरमेव ब्रह्मप्राप्तिः कस्यचिद् बहुलोकगत्यनन्तरं सोच्यत इति भोगभूमित्वमेव तेषामवगन्तव्यम्। सर्वेषां सर्वत्र गमने देवयानं पन्थानं वदन्त्याः श्रुतेः सामितत्कल्पनमनुपपन्नं स्यात्। अत उपासनाभेदेन फलभेदं ज्ञापयन्ती तथा वदतीति युक्तमुत्पश्यामः ॥ ५ ॥

ननु 'तेषामिह न पुनरावृत्तिः' (बृ. ६. २. १५.) अस्तीत्यादिश्रुतिभ्यो देवयानं पन्थानं प्राप्तानां पुंसां ब्रह्मवित्त्वमवश्यं वाच्यम्। तेन सद्योमुक्तौ सम्भवत्यां सत्यां क्षयिष्णुत्वेन क्षुद्रानन्दत्वेन च

ल्लोकानन्तरं न कथयेदित्यर्थः। तथा च विद्युल्लोकसबन्धादेव आतिवाहिकस्य प्राप्तत्वादितिभावः। दूषणान्तरमाहुः लोकेति। तथा सतीति। अर्चिर्लोकप्रापकातिवाहकाभावे सति। एवं च विद्युदन्तलोके गमयित्रपेक्षा नास्ति ब्रह्मणि तु तदपेक्षेति सूचितम्।

ननु सर्वासु विद्यासु सर्वेषां लोकानां कथनं श्रुतौ नास्तीत्यतो विद्याबलेन विद्युदन्तलोकप्राप्तिर्नास्तीतिश्रुतितात्पर्यमवगम्यत इत्यत आहुः **कस्यचिदिति**। **भोगभूमित्वमिति**। एवं च लोकाधिष्ठातृदेवता नोच्यते येन तस्या आतिवाहिकत्वं स्वीकर्तव्यम्, अपि तु भोगभूमित्वमित्यर्थः। भोगभूमित्वाभावे अनुपपत्तिमाहुः **सर्वेषामिति**। **सामितत्कथनं** अर्धलोककथनम् ॥ ५ ॥

सूत्रमवतारयन्ति **नन्विति**। कामनाभावात् तादृशीनामुपासमानां सभव एव न सभवतीत्याहुः **तेषामिति**। भक्तस्य क्रममुक्तिर्नास्तीत्यत्रानुपपत्तिमाहुः

हेयानां परमफलप्राप्तिविलम्बहेतूनामर्चिरादिलोकानां कामना कुतो यतस्तद्धेतुभूतोपासनाः सम्भवन्ति । किञ्च । " अर्चिरादिना तत्प्रथितेः " (ब्र. सू. ४. ३. १.) इत्यत्र यदुक्तं ज्ञानमार्गीयस्यैवार्चिरादिप्राप्तिर्न भक्तिमार्गीयस्येति तदप्यनुपपन्नम् । " यत् कर्मभिर्यत् तपसा ज्ञानवैराग्यतश्च यत् " (भाग. ११. २१. ३२.) इत्युपक्रम्य " सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा । स्वर्गापवर्गं मद्धाम कथञ्चिद् यदि वाञ्छति " (भाग. ११. २१. ३३.) इतिभगवद्वाक्याद् भक्तस्याप्येतद्वाञ्छाफले सम्भवतोऽन्यथा प्रभुर्न वदेत् । एवं सति भक्तिसुखं हित्वान्यत्र कामनायां हेतुर्वाच्य इत्याकाङ्क्षायां तमाह

उभयव्यामोहात् तत्सिद्धेः ॥ ६ ॥

अत्रेदं ज्ञेयम् । देवयानः पन्था अपि भगवतैव सृष्टोऽस्ति । तथा चोक्तहेतुभिस्तत्र कस्यापि कामाभावे तत्सृष्टिर्व्यर्था स्यादतो भगवानेव कांश्चन व्यामोहयति ज्ञानिनो मर्यादामार्गीयभक्तांश्चातस्तत्कामनासिद्धेस्तत्फलभोग इति ।

यत्त्वार्चिरादिमार्गगन्तॄणां देहवियोगेन संपिण्डितकरणग्रामत्वेना-

---

किं चेति । सूत्रार्थं विशदयन्ति **अत्रेदमिति** । **तत्फलभोग इतीति** । इदं च सर्वं स वै नैव रेमे इत्यादिश्रुत्या लीलासपत्यर्थं करोतीत्युक्त्या सपद्यत इतिमन्तव्यम् । अत्रान्येषां व्याख्यानमाहुः **यत्त्विति** । **संपिण्डितेति** ।

स्वातन्त्र्यं व्यामोहः। अर्चिरादीनां चाचेतनत्वेनास्वातन्त्र्यं व्यामोहः। कार्यकरणासामर्थ्यमिति यावत्। तेनार्चिराद्यधिष्ठातृदेवैरतिवाह्यन्त इति सिद्धमितिव्याख्यानं, तन्न साधीयः। व्यामोहशब्दस्यान्यथाज्ञान-वाचकत्वेनासामर्थ्यावाचकत्वात्। तथा सत्यर्चिर्लोकमपि न प्राप्नुयात् प्रापकाभावादित्युक्तम् ॥ ६ ॥

ननु विद्युतो वरुणादिलोकप्राप्त्यनन्तरं यस्य ब्रह्मप्राप्तिस्तस्य तल्लोकसम्बन्धी ब्रह्मप्रापकः पुरुषोऽस्त्युत स स्वत एव तत् प्राप्नोतीतिसंशय उत्तरं पठति

वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ७ ॥

न हि ब्रह्मप्राप्तिर्विद्युल्लोकसम्बन्धिपुरुषसामर्थ्येनोच्यते किन्तु ब्रह्मसम्बन्धितत्सामर्थ्येन। तथा च यत एव लोकात तत्प्राप्तिस्ततो ब्रह्मसम्बन्धिपुरुषादेव। एवं सति विद्युल्लोकात् तत्प्राप्तौ यो ब्रह्म-

---

समुदायो यस्य स तथा। तेन किं जातमत आहुः **अस्वातन्त्र्यमिति**। अयं व्यामोहशब्दार्थो न भवतीतिखण्डयन्ति **तन्नेति**। तथा सति गन्तुः। सपिण्डितकरणग्रामवत्त्वेनास्वातन्त्र्ये व्यामोहशब्दार्थे वक्तव्ये सति। **प्रापकाभावादिति**। अर्चिरादिमार्ग एवाधिष्ठातृदेवता तत्पूर्वमधिष्ठातृदेवताया अभावादित्यर्थः ॥ ६ ॥

सूत्रमवतारयन्ति **नन्विति**। **ब्रह्मप्राप्तिरिति** श्रुतावुक्तेतिशेषः। **संशय** इति। वरुणलोकसबन्धी पुरुषः ब्रह्मप्रापको वा स्वत एवागच्छतीतिसंशय इत्यर्थः। सूत्रार्थमाहुः **न हीति**। अत्र बृहदारण्ये वाजसनेयिशाखायां पञ्चाग्नि-

सम्बन्धी पुरुषः प्रापक उक्तस्तेनैव ततो वरुणादिलोकेभ्यो ब्रह्मप्राप्तिः । तत्र हेतुमाह तच्छ्रुतेः । " तान् वैद्युतान् पुरुषो मानस एत्य ब्रह्मलोकान् गमयति " (बृ. ६. २. १५.) इतिश्रुतेः । अत्रेत्येतिवचनाद् यत एव लोकाद् ब्रह्मप्राप्तिर्भवित्री तत्रैवागत्य ब्रह्म प्रापयतीति श्रुतौ वैद्युतं लोकमागत्य तस्माद् ब्रह्मलोकान् गमयतीत्युक्तमिति स पुरुषो वैद्युत इत्युच्यते । न तु तल्लोकवासित्वेन । तथा सत्येत्येति न वदेत् तत एव ब्रह्मप्रापणे । अत एव मानस इत्युक्तः । यदैवं भगवन्मनसि भवत्यथैनं मां प्रापयत्विति तदैव प्रापयतीति तथा । छान्दोग्ये तु " अमानवः " (छा. ४. १५. ५.) इति पठ्यते । तच्चालौकिकत्वं, तदप्युक्तरूपमेवेति न कश्चिद् विशेषः । वाजसनेयके " ब्रह्मलोकान् गमयति " (बृ. ६. २. १५.) इति पठ्यते, छान्दोग्ये तु 'ब्रह्म' इति । तत्रायं

सम्यक्पिण्डितः पिण्डाकारं प्राप्तः, एकीभूत इतियावत्, करणग्राम इन्द्रियविद्यास्थं प्रमाणमाहुः **तान्वैद्युतानिति** । अस्याः श्रुतेस्तात्पर्यार्थमाहुः **अत्रेति** । **गम्यत** इति । मानसः पुरुषः ब्रह्म प्रापयतीति ज्ञायत इत्यर्थः । ननु तादृशपुरुषस्य विद्युल्लोकवासित्वाभावे वैद्युतमिति तस्य संज्ञा श्रुतौ कथमित्यत आहुः **श्रुतौ वैद्युतमिति** । **तथा सतीति** । **ब्रह्मप्रापणे** इत्यनन्तरमेत्येतीत्यस्य संबन्धः । **अत एव** तल्लोकवासित्वाभावादेव । **तथा मानस** इत्यर्थः । नन्वेवं चेत् छान्दोग्ये अमानव इतिकथमुक्तमत आहुः **छान्दोग्ये त्विति** । **ननु कश्चिद्विशेष** इति । अलौकिकत्वं मानसत्वमेकमेवेत्यर्थः । यदंशविशेषस्तमाहुः **वाजसनेयक** इति । **ते** वैकुण्ठलोका इत्यर्थः । **उभयेति** ।

भावः । भक्तं तु वैकुण्ठलोकं नयति । ते बहुविधा इति ब्रह्मलोकानित्युक्तम् । ज्ञानमार्गीयं त्वक्षरं ब्रह्म प्रापयतीति ब्रह्मेत्युक्तम् । अत एवोभयव्यामोह उक्त आचार्येण ॥ ७ ॥ २ ॥

॥इति चतुर्थाध्याये तृतीयपादे द्वितीयमातिवाहिकाधिकरणम् ॥२॥

अत्र सिद्धान्तदार्ढ्यार्थमुक्तमर्थं हस्तपिहितमिव कृत्वा बादरिमतं पूर्वपक्षत्वेनाह ।

कार्यं बादरिरस्य गत्युपपत्तेः ॥ ८ ॥ (४. ४. ३.)

" स एतान् ब्रह्म गमयति " (छा. ५. १५. २.) इत्यत्र ब्रह्मपदेनाविकृतं परमेव ब्रह्मोच्यत उत कार्यरूपो ब्रह्मलोक इति भवति संशयः । परस्य व्यापकत्वेन देशविशेषगमयित्रोरनपेक्षितयोरुक्तेः ।

अक्षरं वा वैकुण्ठं वा अस्त्वित्युभयं ब्रह्मशब्देनोक्तमितिव्यामोहो बादरायणेनोक्त इत्यर्थः ॥ ७ ॥ इति द्वितीयाधिकरणम् ॥

सूत्रमवतारयन्ति **अत्रेति** । **सिद्धान्तेति** । क्रममुक्तौ परब्रह्मैव प्राप्यं भवतीतिसिद्धान्तस्य दृढीकरणार्थम् । **उक्तमर्थं** मध्यमाधिकारिणामर्चिरादिमार्गः परप्राप्तिसाधनमितीममर्थम् । **हस्तेति** । अयमर्थोऽग्रे व्यवस्थापनीयः, इदानीमनुक्त इतिकृत्वा **हस्तपिहितमि**वेत्युक्तमित्यर्थः । इदमधिकरण भवतीतिकृत्वा विषयमाहुः **स एतानिति** । संशयमाहुः **ब्रह्मपदेनेति** । श्रुतौ गतिपदं ब्रह्मपदं चास्तीतिसंशयमूलम् । पूर्वपक्षमाहुः **परस्येति** । **देशेति** । देश-

कार्यरूप एव स ब्रह्मपदेनोच्यत इति बादरिराचार्यो मन्यते। कुतः। अस्य गत्युपपत्तेः। तस्य परिच्छिन्नत्वेन तत्स्थितिदेशं प्रत्यस्य गन्तुर्गतेरुपपत्तेरित्यर्थः ॥ ८ ॥

विशेषितत्वाच्च ॥ ९ ॥

"ब्रह्मलोकान् गमयति ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति" (बृ. ६. २. १६.) इतिश्रुतौ बहुत्वेन च **विशेषिता** लोकाः। गन्तारश्च दूरदेशगत्या **विशेषिता** इति परं ब्रह्म तत् किन्तु कार्यमेवेत्यर्थः। लोकपदं तज्जन्यभोगपरम्। तेन तस्यैकत्वेपि विविधभोगज्ञापनाय बहुवचनं घटते ॥ ९ ॥

तत्र ब्रह्मशब्दप्रयोगे हेतुमाह

सामीप्यात् तु तद्व्यपदेशः ॥ १० ॥

तल्लोकस्थितानां नान्यलोकव्यवधानं परप्राप्तौ किन्तु तत एवेति

विशेषश्च गमयिता चेतिद्वन्द्वः। सः ब्रह्मलोकः। **तस्येति**। कार्यब्रह्मलोकस्य ॥ ८ ॥

तस्य कार्यरूपत्वं व्यवस्थापयितुं सूत्रार्थमाहुः **ब्रह्मलोकानिति**। **गन्तारश्चे**त्यस्याग्रेणान्वयः। **न परं ब्रह्मे**ति। ब्रह्म गमयतीतिश्रुतौ प्राप्यत्वेन यदुक्तं तन्न परं ब्रह्मेत्यर्थः। ननु श्रुतौ लोकपदमप्युक्तमिति कथं कार्यब्रह्मपरत्वमत आहुः **लोकपदमिति** ॥ ९ ॥

परब्रह्मसामीप्याद् ब्रह्मत्वेन व्यपदेशः कृतः । तुशब्दस्तु वस्तुतो ब्रह्मत्वं व्यवच्छिनत्ति ॥ १० ॥

ननु " आ ब्रह्मभवनाल्लोकाः पुनरावर्तिनोऽर्जुन " (भ. गी. ८. १६.) इतिवाक्यात् ततः पुनरावर्तते । अत्र " तेषामिह न पुनरावृत्तिरस्ति " (बृ. ६. २. १६.) इति पठ्यत इति परमेवात्र ब्रह्मशब्देनोच्यत इति प्राप्त उत्तरं पठति

कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥११॥

कल्पसमाप्तौ कार्यस्य ब्रह्मलोकस्य नाशे सति तदध्यक्षेण चतुर्मुखेन ब्रह्मणा सहातो ब्रह्मणः सकाशात् परमीश्वरं प्राप्नोत्यतोऽपुनरावृत्तिश्रुतिर्न विरुध्यते । अत्र प्रमाणमाहाभिधानादिति । श्रुतौ तथाभिधानादित्यर्थः । सा तु " वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद् यतयः शुद्धसत्त्वाः । ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे " (तै. महानारा. १२. ३.) इति । 'परान्तकाले' इत्यत्र परशब्देन ब्रह्मणः पूर्णमायुरुच्यते ॥ ११ ॥

सूत्रमवतारयन्ति **तत्रेति** । सूत्रं व्याकुर्वन्ति **तल्लोकस्थानामिति** । अग्रे स्पष्टम् ॥ १० ॥

सूत्रमवतारयन्ति **नन्विति** । **पठ्यत इति** । विषयश्रुतौ पठ्यत इत्यर्थः । तथा च ब्रह्मसामीप्याद् ब्रह्मत्वमिति न स्वीकार्यमितिभावः । सूत्रं व्याकुर्वन्ति **कल्पेति** । **ब्रह्मणः सकाशादिति** । चतुर्मुखाद् ब्रह्मणः सकाशादित्यर्थः ॥ ११ ॥

उक्तेऽर्थे श्रुतिं प्रमाणत्वेनोक्त्वा स्मृतिमप्याह

स्मृतेश्च ॥ १२ ॥

" ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे । परस्यान्ते कृतात्मान प्रविशन्ति परं पदम् " (कूर्म. पू. ख. ९२. २६९.) इतिस्मृत्यापि स एवार्थः प्रतिपाद्यते ॥ १२ ॥

परं जैमिनिर्मुख्यत्वात् ॥ १३ ॥

" स एनान् ब्रह्म गमयति " इत्यत्र ब्रह्मपदेन **परमेव** ब्रह्मोच्यत इति **जैमिनि**राचार्यो मनुते । कुतः । **मुख्यत्वात्** । बृहत्त्वादिधर्मविशिष्टं हि ब्रह्मपदेनोच्यते । तादृक् **परमेव** ब्रह्म भवतीति मुख्या वृत्तिर्ब्रह्मपदस्य **परस्मिन्नेवा**न्यत्र गौणी । तथा च **मुख्य**गौणयोर्मध्ये **मुख्यस्यैव** बलिष्ठत्वात् तथा ॥ १३ ॥

दर्शनाच्च ॥ १४ ॥

" स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकम् "

स्मृतेश्च । स्मृतिवचनात् ॥ १२ ॥

सूत्रमवतारयन्ति **अत्रे**ति । बादरिमते । सूत्रं व्याकुर्वन्ति **स एतानि**ति । **मनुत** इति । जैमिनिर्मनुत इत्यनेन स्वस्याप्ययमेव सिद्धान्त इति सूचितम् । **मुख्या वृत्तिरि**ति । यथा घटत्वविशिष्टे घटे घटपदस्य शक्तिः एवं बृहत्त्वविशिष्टे ब्रह्मणि ब्रह्मपदस्य शक्तिरितिवृत्तौ मुख्यत्वमित्यर्थः ॥ १३ ॥

सूत्रं व्याकुर्वन्ति **स एतमि**ति । **प्रजापतिलोकस्ये**ति । त्रैलोक्य-

(कौ. १. ३.) इतिकौशीतकिश्रुतिरग्न्यादिलोकप्राप्तिवदविशेषेणैव प्रजापतिलोकप्राप्त्यनन्तरं ब्रह्मलोकप्राप्तिं दर्शयति। न हि तत्र ब्रह्मलोकशब्देन कार्यः स उच्यत इति वक्तुं शक्यम्। पार्थक्येन प्रजापतिलोकस्योक्तत्वात्।

अपरं च। " ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्ति " (छा. ५. १०. १.) इति छान्दोग्यश्रुतिं विषयी कृत्य हि " अर्चिरादिना तत्प्रथितेः " (ब्र. सू. ४. ३. १.) इत्युपक्रम आचार्येण कृतोऽन्यत्रार्चिःशब्दस्याभावात्। तत्र चान्ते 'ब्रह्म गमयति' (छा. ५. १०. १.) इत्युच्यते। तथा च छान्दोग्येनुक्तानामन्यत्रोक्तानां लोकानां मार्गैक्यसिद्ध्यर्थं तत्रैव सन्निवेशो 'वायुमब्दात्' 'तडितोऽधिवरुणो' 'वरुणाच्चाधीन्द्रप्रजापती' (ब्र. सू. ४. ३. २-४.) इत्यन्तेनोक्तः। एवं सत्यादावर्चिषं ततोऽहस्ततः सितपक्षं तत उदगयनं ततः संवत्सरं ततो वायुं ततो देवलोकं तत आदित्यं ततश्चन्द्रमसं ततो विद्युतं ततो वरुणं तत इन्द्रं ततः प्रजापतिं ततश्चामानवेन पुरुषेण ब्रह्मप्राप्तिरितिनिर्णयः सम्पद्यते। एवं सति प्रजापतिलोकादन्यस्य कार्यब्रह्मलोकस्यासम्भवात् तच्छङ्कापि

शरीरो विराड् यः समष्टिव्यष्टिरूपः संसारमण्डलस्थायी ब्रह्मा प्रजापतिशब्देनोच्यते स एव हिरण्यगर्भः। तस्य तु जन्यत्वं "हिरण्यगर्भं पश्यति जायमानम्" इति तैत्तिरीयश्रुतेः। तदनन्तरं यो ब्रह्मलोकः स नित्य इत्याखण्डलार्थ.।

नन्विदं जैमिनेरभिमतं न तु व्यासस्येति कथमयं सिद्धान्त इत्यत आहुः **अपरं** चेत्यादिना अवददितिज्ञायत इत्यन्तेन। **तथावदद्**िति।

भवितुं नार्हति यद्यपि तथापि व्यासोक्तमार्गैक्यममन्वानस्तथावदिति ज्ञायते। परन्तु वेदार्थनिर्णयार्थमेव प्रवृत्तत्वाद् भगवदवतारत्वाच्च तदुक्त एव शास्त्रार्थ इति मन्तव्यम्। किञ्च, "स प्रजापतिलोकं स ब्रह्मलोकम्" (कौ. १. ३.) इत्यत्र ब्रह्मपदस्य परवाचकत्वं तेनापि वाच्यं चेत् तद्दृष्टान्तेनान्यत्रापि तथैव वाच्यम्। बाधकाभावात्।

ननु परस्य व्यापकत्वान्निर्विशेषत्वाच्च न गन्तव्यतोपपद्यते। जीवस्याप्यविद्योपाध्यवच्छिन्नतादशायां परब्रह्मणि गन्तृत्वासम्भवात् तन्नाशे च वस्तुतोभिन्नत्वात् स्वरूपेणावस्थानमेव भवतीति न

जैमिनिरिति शेषः। तथा च व्यासैर्जैमिनिरवददित्युक्तं तेन कृत्वा किं ज्ञायते सिद्धान्तस्तूभयोरेक एव परं तु मार्गभेद इतिभावः। ननु जैमिन्युक्तमार्गभेदः कुतो नाद्रियत इत्यत आहुः **परं त्विति**। ननु बादरिजैमिनिमतयोर्मध्ये व्यासेन जैमिनिमतादरणं कृतं तत्र किं कारणमत आहुः **किं चेति**। **तेनापि** बादरिणापि। **तथैव वाच्यमिति**। अग्निपुरुषविद्यायां पञ्चाग्निविद्याया च तथैव वाच्यमित्यर्थः। **बाधकाभावादिति**। पूर्वोक्तगत्युपपत्त्यादिदूषणाना परिहारस्य कृतत्वात् बाधकाभावादित्यर्थः। एवं च जैमिनिमतादरणे श्रुतिसामञ्जस्यं कारणमितिभावः।

बादरिमतं समीचीनमित्यभ्युपगन्तॄणां शंकराचार्याणां मतमाहुः **ननु परस्येति**। **व्यापकत्वादिति**। आकाशवत्सर्वगतश्च नित्य इतिश्रुत्या व्यापकत्वादित्यर्थः। **निर्विशेषत्वादिति**। आत्मैवेदं सर्वमितिश्रुत्या तथात्वादित्यर्थः। **न गन्तव्यतेति**। सर्वत्र सत्त्वादित्यर्थः। **जीवस्यापीति**। जीवस्याज्ञानदशायां ब्रह्मप्राप्तिर्नास्त्येवेति न गन्तृत्वमुपपद्यत इत्यर्थः। ज्ञान-

गन्तृत्वमप्युपपद्यते । तस्यैवाभावात् । जीवत्वदशायामुपाध्यवच्छेदाद् गन्तृत्वं जीवस्यापरस्य ब्रह्मणश्चाविद्यकरूपनामवत्त्वेन गन्तव्यता चोपपद्यते । उपासनाफलत्वादस्य गमनस्योपास्यस्य च सगुणत्वेन तत्प्राप्तेरेवोचितत्वाच्च । निर्गुणब्रह्मविद्यावतो गन्तृत्वासम्भव इत्युक्तमतो बादरिमतमेव साधीयः । न च ब्रह्मपदस्य मुख्यार्थत्वमुक्तरीत्यात्र सम्भवत्यतोऽत्रामुख्यार्थत्वमेवानुसर्तव्यमिति चेत् ।

दशायामाहुः **तस्यैवेति** । जीवस्यैवेत्यर्थः । नन्वेवं चेद्बादरिमते गत्युपपत्तिः कथमित्यत **आहुः जीवत्वदशायामिति** । गतिविषया **याः** श्रुतयस्ताः पञ्चाग्निविद्यायां पर्यङ्कविद्यायां वैश्वानरविद्यायां च श्रूयन्ते । एवं च तासां सगुणोपासनाविषयत्वात् सगुणब्रह्मविषया गतिर्वक्तव्या । तथा चाज्ञानरूपेणोपाधिना यावत्पर्यन्तं जीवदशा वर्तते तावत्पर्यन्तमुपास्योपासकतावश्यकत्वात्, अविद्यया कल्पितनामरूपत्वात्, ब्रह्मण उपास्यत्वाच्च जीवे गन्तृत्वं ब्रह्मणि गन्तव्यत्वं चोपपद्यत इत्यर्थः । नन्वेवं चेत् परब्रह्मप्रातिबोधकश्रुतीनां का गतिरित्यत आहुः **उपासनेति** । **तत्प्राप्तेरिति** । सगुणब्रह्मप्राप्तेरित्यर्थः । तथा चापरस्मिन् **ब्रह्मणि वर्तमाना गतिश्रुतयः** परे ब्रह्मण्यध्यारोप्यन्त इतिभावः । नन्वेवं चेद् ब्रह्मद्वयं भवन्मते संपन्नमिति । तन्न । एतद्वै सत्यकाम परं चापरं च ब्रह्म **यदोंकार इति श्रुतेः अस्थूलादिशब्दैर्यत्प्रतिपाद्यते** तत्परं तदेव नामरूपविशिष्टमुपासनायोपदिश्यते तदपरम् । एवं चाविद्याकृतनामरूपत्वेनाद्वितीयश्रुतिविरोधोऽपि नास्ति । ब्रह्मणो व्यापकत्वेऽपि घटाकाशगमनवत् बुद्ध्याद्युपाधिगमनं चोपपद्यते । इदं च सर्वं तद्गुणसारत्वात्तु तद्व्यपदेश इति सूत्रे स्पष्टमेवोक्तं प्राक् । निर्गुणब्रह्मविषया गतिरेव नास्तीत्याहुः **निर्गुणेति** । **इत्युक्तमिति** । न तस्य प्राणा उत्क्रामन्तीति श्रुतावुक्तमित्यर्थः । **बादरिमतमेवेति** । इयं शंकराचार्योक्तिः । **न चेति** । न हीत्यर्थः । अत्र ब्रह्मपदस्य मुख्यार्थत्वं न हि सम्भवति अत इत्यन्वयः । **इति चेदिति** । एतावत्पर्यन्तं बादरिमतं शंकराचार्यैः स्थापितम् ।

स्यादेतदेवं यद्यौपाधिकमुपास्यरूपं जीवत्वं वा स्यात्। न त्वेवम्। "प्रकृतैतावत्त्वं हि प्रतिषेधति" (ब्र. सू. ३. २. २२.) इत्यादिभिः "तद्गुणसारत्वाच्च तद्व्यपदेशः" (ब्र. सू २. ३. २९.) इत्याद्यधिकरणैः श्रुत्यर्थनिर्णयेन ब्रह्मणि विशेषाणामौपाधिकत्वस्य जीवपुरुषोत्तमाभेदस्य च पुरस्तादेव निरस्तत्वात्। न च

इतः परं तन्मतं दूषयितमाहुः **स्यादेतदेव**मित्यादिना **निरस्तत्वादि**त्यन्तेन। औपाधिकमपरं ब्रह्म उपास्यरूपमथ च तादृशमौपाधिकं जीवत्वं वा स्यात्तदेव नास्तीत्याहुः **यद्यौपाधिक**मिति। **पुरस्तादेव** पूर्वमेव **निरस्तत्वा**दिति। अयमर्थः। सदेव सोम्येदमग्र आसीदिति निर्विशेषब्रह्मप्रतिपादिका, यतो वा इमानीत्यादिश्रुतिः ब्रह्मणो जगत्कारणत्वप्रतिपादिका। एवं च निर्विशेषमेव जगत्कारणमित्येकमेव ब्रह्म श्रुत्या वाक्यद्वयेन प्रतिपाद्यते। सा कारणता उपादानरूपा वक्तव्या। आत्मैवेदं सर्वमित्यादिश्रुतिभ्यः। तटस्थकारणतायाः प्रागेव निराकृतत्वात्। अत एवैकादशस्कन्धे 'यथा सुवर्णं सुकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य। तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्मि तद्वद्" इतिभगवद्वाक्यात्। अथ च तदनन्यत्वमारम्भणशब्दादिभ्यः इति सूत्रकृतोक्तत्वाद् घटशरावादयो मृद एव नामान्तरं यथा तथा प्रपञ्चरूपो विकारोऽपि ब्रह्मण एव नामान्तरम्। एवं चोपादानतत्सिद्धौ ब्रह्मणि अनेकशक्तिमत्त्वं सिद्धम्। एवं च विरुद्धधर्माधारत्वादेकमेव परापरशब्देन व्यवह्रियते। अत एव "अतः परं नान्यदणीयसं हि परात्परं यो महतो महान्तम्" इतिश्रुतावुक्तम्। "द्वे ब्रह्मणी वेदितव्ये" इत्यादिश्रुतौ तु अक्षरपरब्रह्मणी विषयौ, न तूपाधिमत्त्वेनापरत्वं तदभावेन परत्वं ब्रह्मणो वक्तव्यम्। एवं जीवेष्युपाधिर्नास्ति। नापि ब्रह्माभेदः। अंशो नानाव्यपदेशादितिसूत्रेणांशत्वमेव व्यवस्थापितत्वात्। तस्मात्प्रकृतैतावत्त्वमित्याद्यधिकरणैरिदं सर्वं निषिध्यत इत्यर्थः। एवं च बादरिमताग्रहो न कर्तव्य इतिदिक्।

व्यापकत्वं गन्तव्यत्वे बाधकम् । प्रारब्धभोगं विना तत्प्राप्त्यसम्भवात् । यदा यत्र तद्भोगसमाप्तिस्तदा तत्र तत्प्राप्तेर्निःप्रत्यूहत्वात् । किं चोपास्यरूपाणां सर्वेषां निर्गुणत्वमेवोपासकस्य, परं सगुणत्वेन तत्तारतम्यात् फलतारतम्यम् । यस्तु भगवदनुग्रहेण प्राकृतगुणरहितोभूत् स निर्गुणब्रह्मविद्यावानित्युच्यते । तादृशस्यैव मुक्तिप्रकारद्वयमुक्तं सद्योमुक्तिक्रममुक्तिभेदेन । "न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते ब्रह्मैव सन् ब्रह्माप्येति" (बृ. ४. ४. २२.) इत्यादिश्रुतिस्तु प्रारब्धरहितविषया । निर्गुणब्रह्मविद्यावतोपि

मम बादरिमताग्रहो मास्तु, परं तु भवन्मते गन्तव्यत्वं न संभवति । ब्रह्मणो व्यापकत्वादित्याशङ्कते **न चेति** । परिहरति **प्रारब्धेति** । **यदा** यस्मिन्काले **यत्र** यस्मिंल्लोके स्वर्गादौ । तथा च प्रारब्धभोगस्य प्रतिबन्धकत्वात्तदभावस्य कारणत्वाद् गमनेन प्रतिबन्धकनिवृत्तिरितिभावः । नन्वेवं रीत्या अनुपपत्तिपरिहारो भवतु नाम । परंतु सगुणनिर्गुणभेदेन विद्याद्वयमस्ति । सगुणविद्या अपरापदवाच्या, परापदवाच्या निर्गुणब्रह्मविद्या । तत्र पञ्चाग्निविद्या तु परा तत्र गतिश्रुतीनामपि तदङ्गत्वेन पाठो दृश्यत इति तासां श्रुतीनामुभयविद्यासाधारणत्वमेवास्तीति वक्तव्यम् । एवं च सगुणब्रह्मविद्योपासकस्य सगुणब्रह्म लोके कार्यरूपे कमलासनस्य लोके गतिः सिद्धा । एवं पञ्चाग्निविद्योपासकस्यापि तत्रैव गतिर्वक्तव्या गतिश्रुतीनां साधारणत्वादित्यत आहुः **किं चेति** । **निर्गुणत्वमेवेति** । प्राकृतगुणरहितत्वमेवेत्यर्थः । नन्वेवं चेत् सगुणब्रह्मविद्यावान्निर्गुणब्रह्मविद्यावानिति व्यवहारोच्छेद इत्यत आहुः **यस्त्विति** । **तादृशस्यैवेति** । निर्गुणब्रह्मविद्यावत इत्यर्थः । **भेदेनेति** । प्रारब्धरहितस्य सद्योमुक्तिः, तत्सहितस्य क्रममुक्तिरित्यर्थः । तत्र प्रारब्धसहितस्य क्रममुक्तिबोधिका श्रुतिस्तु शतं चैका पुरुषस्यनाड्यः, तेऽर्चिरभिसंभवन्तीति ।

प्रारब्धभोगस्तु त्वयापि वाच्यः । अन्यथा प्रवचनासम्भवेन ज्ञानमार्ग एवोच्छिद्येत । " ते ब्रह्मलोके तु परान्तकाले " (तै. महा. नारा. १२. ३.) इतिश्रुतिरपि परान्तकाल एव येषां प्रारब्धभोगसमाप्तिस्तद्विषयिणीति मन्तव्यम् । अन्यथा " वेदान्तविज्ञान " (तै. महा. नारा. १२. ३.) इत्याद्युक्तधर्मविशिष्टानां मुक्तौ विलम्बो नोपपद्यत इतिदिक् ॥ १४ ॥

न च कार्ये प्रतिपत्त्यभिसन्धिः ॥ १५ ॥

अपि च " ब्रह्मविदाप्नोति परम् " (तै. २. १.) इति संक्षेपेणोक्त्वा " तदेषाभ्युक्ता " इति तद्विवरिकामृचं प्रस्तुत्य सोक्ता " सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता " (तै. २. १.)

ननु निर्गुणब्रह्मविद्यावतोऽपि प्रारब्धं स्वीकर्तव्यमित्यसमञ्जसमित्यत आहुः **निर्गुणब्रह्मविद्यावत** इति । **उच्छिद्येते**ति । यस्य निर्गुणब्रह्मज्ञाने जाते प्रारब्धाभावे शरीरनाशे सति अध्यापनरूपप्रवचनाभावे ज्ञानमार्गप्रचारो न स्यादित्यर्थः । ननु " ते ब्रह्मलोके तु परान्तकाले " इतिश्रुतौ सर्वपदग्रहणात्सगुणब्रह्मविद्यवतामपि परामर्श इति स्वीकर्तव्यम् । अन्यथा श्रुतिव्याकोपः स्यादित्यत आहुः **ते ब्रह्मलोक** इति । **सगुणब्रह्मविद्यावतः अशुद्धसत्त्व**त्वात् श्रुतौ पूर्वार्धे शुद्धसत्त्वा इतिविशेषणानर्थक्यम् । तथा च लक्षणया कथंचिद् व्याख्यानं तु बादरेराचार्यस्य संमतं नास्माकमित्यलं पल्लवितेन ॥१४॥

अनेन सूत्रेणान्यदपि श्रुतिवाक्यं सगुणचतुर्मुखब्रह्मपरं न भवतीत्यत्रापरं हेतुं व्याख्यातुमाहुः **अपि चे**ति । **सोक्ते**ति । सा ऋक् उक्ता । सा का इत्यत आहुः **सत्यमि**ति । ब्रह्मणा सहेत्यत्र सगुण ब्रह्म विवक्षितं न भवतीत्यत्र

इति । अत्रोपक्रमानुरोधेन परेणैव ब्रह्मणा सह सर्वकामभोगलक्षणा प्रतिपत्तिरुच्यत इति कार्यरूपे वस्तुमात्रे प्रतिपत्तिर्न क्वापि श्रुतेरभिप्रेता । अतोत्रापि परमेव ब्रह्मपदेनोच्यते । ऋगर्थस्त्वानन्दमयाधिकरणे प्रपञ्चित इति नात्रोक्तः ॥ १५ ॥ ३ ॥

॥ इति चतुर्थाध्याये तृतीयपादे तृतीयं कार्याधिकरणम् ॥ ३ ॥

क्रममुक्त्यधिकारिणः प्रारब्धं भुक्त्वाऽमानवेन पुरुषेण प्रापिताः परमेव ब्रह्म प्राप्नुवन्तीति सिद्धम् । तत्रेदं सन्दिह्यते । आर्चिरादिलोकप्राप्तिर्ह्युपासनाविशेषफलम् । एवं सत्यमानवः पुरुषस्तान् सर्वान् ब्रह्म प्रापयत्युत कांश्चिदेवेति ।

किमत्र युक्तम् । सर्वानेवेति । यतोर्चिरादिमार्गगतानामन्ते ब्रह्मप्रापणार्थमेव स नियुक्तस्ततोन्यथाकरणे हेत्वभावात् तथैव स कर्तेति प्राप्त उच्यते

अप्रतीकालम्बनान् नयतीति उभयथादोषात् तत्क्रतुश्च ॥ १६ ॥

हेतुमाहुः **अत्रेति** । आप्नोति परमित्यत्र परशब्देन परब्रह्मण एवोपक्रमोऽस्तीति तदनुरोधेनेत्यर्थः । **वस्तुमात्रे प्रतिपत्तिरिति** । प्रतिशब्दस्य प्रतिकूलार्थकत्व पत्तिशब्दस्य गत्यर्थकत्वम् । एवं च संसारप्रतिकूला गतिः **न क्वापि** कार्ये श्रुतेर**भिप्रेते**त्यर्थः ॥ १५ ॥ इति तृतीयाधिकरणम् ॥

सिद्धार्थानुवादपूर्वकं सूत्रमवतारयन्ति **क्रमेति** । संशयमाहुः **तत्रेदमिति** । **तानिति** । उपासनाविशेषवतः । पूर्वपक्षमाहुः **किमत्रेति** । सिद्धान्तं वक्तु

श्रुतौ ब्रह्मत्वेनैव सर्वत्रोपासनाया उक्तत्वादुपास्येषु भगवद्विभूतिरूपत्वेन शुद्धब्रह्मरूपेष्वप्यतथात्वं ज्ञात्वा श्रुतिर्ब्रह्मत्वोपासनायाः फलसाधनत्वं वदति न तूपास्ये ब्रह्मतामपीति मन्वाना य उपासते ते **प्रतीकालम्बना** इत्युच्यन्ते । तथा च सत्यपि वेदविहितत्वेनोपासनायाः कृतत्वेन सफलत्वात् तत्फलत्वेनोपासकानामर्चिरादिलोकप्राप्तावपि तानमानवः पुरुषो ब्रह्म **न** प्रापयति किन्तु शुद्धब्रह्मत्वं ज्ञात्वा य उपासते तानेव प्रापयतीति **बादरायण** आचार्यो मन्यते । तत्र हेतुमाहोभयथा **दोषा**दिति ।

वस्तुतो यद् ब्रह्मरूपं तत्राब्रह्मत्वनिश्चय उपासनार्थं च ब्रह्मत्वेन भावनमेवमुभयथाकरणे **दोषः** सम्पद्यत इति तस्य न ब्रह्मप्राप्तावधिकारोऽस्तीति युक्तं तदनयनमित्यर्थः । तथा च श्रुतिः

सूत्रार्थमाहुः **उच्यत** इति । **अतथात्व**मब्रह्मत्वं **ज्ञात्वा** । अस्यैवार्थमाहुः **श्रुतिर्ब्रह्मत्वेने**त्यारभ्य **मन्वाना** इत्यन्तेन । **प्रतीकालम्बना इति । न प्रतीक** इतिसूत्रोक्तं (४. १. ४) अतस्मिंस्तत्त्वेनोपासनं प्रतीकं, तथोपासकाः प्रतीकालम्बनपदवाच्या इत्यर्थः । **तथा चे**ति । एवं च तेषां प्रतीकालम्बनत्वे सति । **सफलत्वादि**ति । यथा शुद्धकर्मिणां पूर्वकाण्डस्य ब्रह्मणि तात्पर्यं नास्ति किंतु कर्मणि एवं च तात्पर्यभ्रमेण यजतः कर्मणः सफलत्वमेवं प्रतीकोपासनायाः सफलत्वादित्यर्थः । **तत्फलत्वेने**ति । तादृशोपासनायाः फलमर्चिरादिरित्यर्थः । **अर्चिरादिलोके**ति । यजतां स्वर्गादिरूपं फलं यथा तथा तादृशोपासकानां तल्लोकप्राप्तावपीत्यर्थः । तथा च तेषां स्वर्गभोगानन्तरं पुनरावृत्तिर्यथा तथोपासकानामपि पुनरावृत्तिरितिभावः ।

सौत्रहेतोरर्थमाहुः **वस्तुत** इति । तथा दोषसत्त्वे प्रमाणं श्रुतिद्वयमाहुः

" असन्नेव स भवति असद् ब्रह्मेति वेद चेद् " (तै. २. ६.) इति " योन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन-न कृतं पापं चौरेणात्मापहारिणा ॥ (महा. भा. १२. २२१. २७.) इति । एवं ज्ञानमार्गीयव्यवस्थामुक्त्वा भक्तिमार्गीयस्यापि तामाह तत्क्रतुश्चेति । " सर्वं मद्भक्तियोगेन " (भाग. ११. २०. ३२.) इतिवाक्यान्न तस्योपासनापेक्षेति न प्रतीकादिसम्भावना । तत्र " कथञ्चिद् यदि वाञ्छति " (भाग. ११. २०. ३२.) इतिवाक्यादिच्छामात्रेण तद्भोगकरणानन्तरं प्राचीनभगवद्भजनलक्षणक्रतुश्च नीयत इत्यर्थः । वस्तुतस्तु भक्तस्यामानवपुमपेक्षाभावात् स्वयमेव ब्रह्मलोकान् प्राप्नोतीतिज्ञापनाय प्रथमान्त उक्तः ।

ननु ब्रह्मणोधिकं न किञ्चिदस्ति " न तत्समश्चाभ्यधिकश्च दृश्यते " (श्वे. ६. ८.) इतिश्रुतेः । एवं सति छान्दोग्ये सन-

---

तथा चेति । सूत्रशेषं व्याकर्तुमाहुः **एवमि**ति । अर्थमाहुः **सर्वमि**ति । **न प्रतीकादी**ति । यथा च सूत्रे **अप्रतीकालम्बनानि**तिपदेन भक्तस्यापि परिग्रहः **तत्क्रतुश्चे**त्यत्र तत्पदस्य तदनन्तरमर्थः, एवं च अमानवः पुरुषो भक्तान् नयति स्वकीयेच्छया **तत्** तदनन्तरं ब्रह्मलोके भोगानन्तरं क्रतुश्च नीयत इत्यर्थः । एवं च कर्मार्थत्वेनात्र **नीयत** इति सूत्रे नयतीतिलटः कर्त्रर्थस्य लकारार्थव्यत्यय इत्यस्वरसः । इममस्वरसं हृदि निधाय प्रकारान्तरमाहुः **वस्तुत** इति । **स्वयमेवे**ति । **तत्क्रतुरि**तिप्रथमान्तं भक्तवाचकम् । एवं च तत्क्रतुभक्त इच्छामात्रेण स्वयमेव स्वात्मानं नयतीत्यर्थे न प्रयोगव्यत्यय इतिभावः ।

इदानीमुपास्येषु अब्रह्मत्वज्ञाने असमत्वज्ञाने च दोष इत्युक्तम् । तत्र पूर्वपक्षमाहुः **नन्वि**ति । **छान्दोग्ये** अन्ते । **विज्ञानादीनामि**ति । नामे-

त्कुमारनारदसंवादे " स यो नाम ब्रह्मेत्युपास्ते " (छा. ७. १०. १.) इत्यादिना नामवाङ्मनःसङ्कल्पचित्तध्यानविज्ञानादीनां ब्रह्मत्वेनोपासनमुत्तरोत्तरं पूर्वस्मात् पूर्वस्माद् भूयस्त्वं चोच्यतेतो न ब्रह्मत्वं सर्वेषामुपास्यानां वक्तुं शक्यमिति चेत् । नैवम् । विभूतिरूपाणां नियतफलदातृत्वाद् येन रूपेणाल्पफलदानं तत्राधिकगुणप्राकट्ये प्रयोजनाभावात् तावन्मात्रगुणप्रकटनं, येन रूपेण ततोधिकफलदानं तत्र ततोधिकगुणप्रकटनमिति पूर्वस्मादाधिक्यमुच्यते । एवमेव सर्वत्र । नियतफलदानं तु स्वतन्त्रेच्छत्वाल्लीलारूपमिति नानुपपन्नं किञ्चित् । प्रतिमादिष्वावाहनेन सन्निहिते विभूतिरूपे तद्भावनं पूजामार्गे । भक्तिमार्गे तु भक्त्या तत्र प्रकटे तथा । गुरौ तु " शाब्दे

त्यादीनां सताना भूमव्यतिरिक्तानामित्यर्थः । तथा च तेषु असमत्वज्ञानमब्रह्मत्वज्ञानं चास्तीति तयोर्न दोषत्वं छान्दोग्यप्रामाण्यादितिभावः । समाधानमाहुः **नैवमिति** । **लीलारूपमितीति** । नामादिरूपेषु न्यूनाधिकगुणप्रकटनमिच्छया कृतम् लीलार्थं न तु तै रूपैर्ब्रह्मणः समाभ्यधिकत्वहानिः । ब्रह्मणोऽनन्तरूपत्वात्तेषां ब्रह्माभिन्नत्वाद्ब्रह्मण एकत्वाच्च । अत्र दृष्टान्तः । विस्फुलिङ्गानां न्यूनाधिकभावेपि अग्नेरग्नित्वहानिर्नास्ति । विस्फुलिङ्गानामपि नाग्नित्वहानिः । तथा चाब्रह्मत्वज्ञानं दोषावहमिति समीचन एव पूर्वसूत्रार्थ इतिभावः । ननूपास्यरूपेषु ब्रह्मत्वाभावे का हानिः यथा प्रतिमादौ देवबुद्ध्या पूजायां फलसिद्धिस्तथात्रापि मोक्ष इत्यत आहुः **प्रतिमादिष्विति** । **आदि**पदेन सूर्योऽग्निर्ब्राह्मणा गाव इत्यादीनां संग्रहः । **तद्भानमिति** । विभूतिरूपदेवबुद्धिरित्यर्थः । भक्तावाहुः **भक्तीति** । **तत्र** प्रतिमादौ भक्त्येत्यनेन आवाहनापेक्षा नास्तीति । **प्रकट** इत्यनेन पूजापेक्षया आधिक्यं च सूचितम् । **तथा** तद्भावनम् । ननु गुरौ आवाहनाभावेन सन्निहितत्वाभावेपि कार्यसिद्धि-

परे च निष्णातं ब्रह्मणि " (भाग. ११. ३. २१.) इतिविशेषणवत्त्वेन भगवदावेशात्तत्र तद्भावनमिति सर्वमवदातम् ।

अपि च बादरिजैमिनिमतोक्त्यनन्तरं स्वमतोक्त्या तत्समानविषयत्वमत्रापीत्यवगम्यते । तत्र च कार्यब्रह्मलोकप्राप्तिपरब्रह्मप्राप्तिविषयत्वमुक्तं पूर्वोत्तरपक्षभेदेन । बादरिमते सविशेषस्यैवोपास्यत्वाद् विशेषाणां चाविद्यकत्वादुपासनानां सर्वासां प्रतीकतद्रूपत्वमेव सिध्यति । एवं सत्यप्रतीकालम्बनान् नयतीति वदता व्यासेन बादरिमतानुसारिण उपासकस्य न कस्यापि ब्रह्मप्राप्तिरिति ज्ञाप्यते ।

जायते सा न स्यादित्यत आहुः गुरौ त्विति । शाब्दे परे च निष्णातं ब्रह्मणीतिवचनादुपनिषद्रूपशब्दजन्यशाब्दबोधविषये ब्रह्मणि निष्णातत्वरूपविशेषणविशिष्टत्वेन भगवदावेशस्य सत्त्वान्नावाहनापेक्षेति भावः । एवं च केवलं बुद्धिमात्रं फलप्रयोजकं न भवति किंतु तत्तद्रूपसन्निधानं प्रतिमादावपेक्षितमितिहृदयम् ।

इदानीमृषिद्वयमतकथनानन्तरं स्वमतकथने तात्पर्यमाहुः अपि चेति । तत्समानेति । उभयमतसमानविषयत्वम् । अत्रापि व्यासमतेपीत्यर्थः । तथा च स एतान्ब्रह्म गमयतीत्यत्र ब्रह्मपदे त्रयाणा विचारात् समानविषयत्वमितिभावः । तत्र जैमिनिमते कार्यं ब्रह्मेति बादरिमतोक्तं पूर्वपक्षीकृत्य परं ब्रह्मैव सिद्धान्तितमिति कार्यब्रह्मपरब्रह्मविषयत्व, बादरिमते तु कार्यं ब्रह्मैव विषयः, व्यासमते तु परं ब्रह्मैव विषयः । तदेतद्विशदयन्ति तत्र चेत्यादिना । तत्र च जैमिनिमते च । प्रतीकेति । प्रतीकोपासनरूपत्वमित्यर्थः । एवं च बादरिमते व्यासोक्तमस्वरस स्फुटीकुर्वन्ति एवं सतीति । बादरिमते प्रतीकोपासनासिद्धौ सत्याम् । व्यासेनेति । ज्ञाप्यत इत्यग्रेणान्वयः । तन्मते उपासनायाः

वस्तुतस्तूपासनायामुपास्यस्वरूपज्ञानस्याप्यङ्गत्वात् तन्मतीयानामुक्त-रीत्या तदभावेन निरङ्गत्वादार्चिराप्तिरपि न संभवति किं पुनर्ब्रह्मण इति निगूढाशयो व्यासस्य। एवं सति परप्राप्तावेवोपोद्बलकमुक्तं भवतीति सैव व्यासाभिमतेति सिद्धम्।

ये तु प्रतीकेष्वब्रह्मक्रतुत्वं वदन्तः पञ्चाग्निविद्यायास्तथात्वेपि वचनबलात् तद्वतो ब्रह्मप्राप्तिरिति वदन्ति, तत्रेदमुच्यते। वचनं तु वस्तुसतः पदार्थस्य बोधकं न तु कारकमतस्तच्चेद् बोधयति तदा **प्रतीकालम्बनान् नयती**तिव्यासोक्त्यविरोधाय तत्राप्यप्रतीक-त्वमूरीकार्यम्। अन्यथा पञ्चाग्निविद्यानिरूपिकां श्रुतिं पश्यन्नेवं स

कार्यब्रह्मलोकप्रापकत्वमपि नास्तीतिव्यासाशयं प्रकटीकुर्वन्ति **वस्तुतस्त्व**िति। **उक्तरीत्ये**ति। उपास्ये अब्रह्मत्वमज्ञात्वा ब्रह्मत्वेनोपासनेतिरीत्येत्यर्थः। **एवं सती**ति। अङ्गज्ञानाभावेनाप्राप्यत्वे सति। **उपोद्बलकमि**ति। अप्रती-कालम्बननयनकथनमितिशेषः।

अत्रैव शंकराचार्यमतमाहुः **ये त्वि**ति। **अब्रह्मक्रतुत्वं** ब्रह्माप्रापकोपास-नत्वम्। **वदन्त** इति। ये तन्मते इतिशेषः। **तथात्वेपि** अब्रह्मक्रतुत्वेपि। **तद्वतः** प्रतीकपञ्चाग्न्युपासनावत इत्यर्थः। **वचनबलात्** पञ्चाग्निविद्यास्थाति-वाहिकवचनबलात्। एवं च प्रतीकेष्वपि ब्रह्मप्राप्तिर्वर्तत इतिभावः। तन्मते दूषणमाहुः **वचनं त्वि**ति। विधिभिन्नं वचनं त्वित्यर्थः। **बोधकं** यथा ब्रह्म-विदाप्नोति परमिति वाक्यं बोधकं तथेत्यर्थः। **न तु कारकमि**ति। यथा ज्योतिष्टोमेन यजेतेति वाक्यमित्यर्थः। एवं चेत्प्रकृते किमत आहुः **अत** इति। **बोधयति** ब्रह्मप्राप्तिं बोधयतीत्यर्थः। **तत्रापि** पञ्चाग्निविद्यायामपि। **ऊरीकार्यमि**ति। स्वीकार्यमित्यर्थः। तथा च पञ्चाग्निविद्याया मूर्धैव सुतेजा

न वदेत् । न चौत्सर्गिकं पक्षमाश्रित्य तथोक्तमिति वाच्यम् । तस्य बाधकापनोद्यत्वाद् वचनस्य चोक्तन्यायेनाबाधकत्वात् । यत्र वचनस्य बाधकत्वमुच्यते तत्र बाधबोधकत्वमेव न तु तथात्वमित्युपेक्षणीयास्ते ।

ननु मनःप्रभृतीनां शुद्धब्रह्मत्वे " मनो ब्रह्मोपास्ते " (छा.

इत्यादिश्रुत्या लोकादीनां ब्रह्माङ्गत्वादङ्गविद्यात्वादप्रतीकत्वमितिभावः । **एवं स न वदे**दिति । अप्रतीकालम्बनान्नयतीति **स** व्यासः न वदेदित्यर्थः । अत्राशङ्कते **न चे**ति । **औत्सर्गिकमि**ति । तत्क्रतुं नयतीतिसामान्यपक्षमाश्रित्येत्यर्थः । **तथोक्तमि**ति । अप्रतीकालम्बननयनमुक्तमित्यर्थः । एवं चाथ पदार्थान्निरूपयतीत्युक्तं, तदनन्तरं द्रव्यादीन्निरूपयतीत्युक्तं यथा तथा तत्क्रतुन्याये सामान्यपक्षमाश्रित्याप्रतीकालम्बननयनरूपविशेषबोधनमिति न विरोध इतिभावः । उत्तरमाहुः **तस्ये**ति । **तस्य** औत्सर्गिकपक्षस्य । **वचनस्ये**ति । पञ्चाग्निवचनस्येत्यर्थः । **उक्तन्यायेन** ब्राह्मश्रमणन्यायेनेत्यर्थः । ननु बाध्यबाधकभावो विधिभिन्नवाक्यस्थले न स्वीक्रियते चेत् वाक्ययोर्बाध्यबाधकभावप्रसिद्धिर्न स्यादित्यत आहुः **यत्रे**ति । **न तु तथात्वमि**ति । न तु बाधकत्वमित्यर्थः । विधिभिन्नवाक्यस्य कारकत्वाभावादितिभावः । ननु बाधकत्वाभावे निवृत्तिर्न स्यादितिचेन्न । बाधबोधेनैव निवृत्तिर्भविष्यतीति **उपेक्षणीया** इति । तेषां मते तत्क्रतुश्रुतिबाधकल्पनं, तत्क्रतुपञ्चाग्निवाक्ययोर्बाध्यबाधकभावकल्पनं, व्यासे तत्क्रुत्यविचारापादनं, पुनरौत्सर्गिकपक्षबोधकतया तद्विचारकल्पनमिति**कल्पनाचतुष्टयम्** । अस्मन्मते तु तत्क्रतुपञ्चाग्निवाक्ययोः सामान्यविशेषभावेन समानविषयत्वमात्रं कल्पनीयमितिलाघवात् ते उपेक्षणीया इत्यर्थः ।

पञ्चाग्निविद्याया ब्रह्मविद्यात्वमेव नास्तीति शङ्कते **ननु मन** इति ।

७. ३. २.) इति वदेन् न तु प्रकारवाचीतिशब्दशिरस्कं ब्रह्मपदमुत उपासनाप्रकारावच्छेदकत्वमेव ब्रह्मपदस्य न तु स्वरूपनिरूपकत्वमिति चेत् । हन्तेदं शब्दार्थानवगमविजृम्भितमेव । यतो "मन उपास्स्व" (छा. ७. ३. १.) इत्युक्त्वा तदुपासनाफलं "यावन्मनोगतं तत्रास्य कामचारो भवति" इति वदिष्यंस्तदुपासनाया एतत्फलसाधकत्वे प्रयोजकरूपाकाङ्क्षायामाह "मनो ब्रह्म इति" (छा. ७. ३. २.) । इति शब्दोत्र हेतुत्ववाची । तथा च यतो मनो ब्रह्मातो हेतोस्तदुपासनं तादृक्फलसाधकमित्यर्थः । अत एव "मनो हि ब्रह्म मन उपास्स्व" (छा. ७. ३. १.) इति पूर्वमुक्तम् । सर्वत्रैवमेव ज्ञेयम् ॥ १६ ॥ ४ ॥

॥ इति चतुर्थाध्याये तृतीयपादे चतुर्थमप्रतीकाधिकरणम् ॥ ४ ॥

प्रकारवाचीति । प्रकारवाची य **इतिशब्दः** तच्छिरस्कं ब्रह्मपदं मनो ब्रह्मेत्युपासीतेति वाक्ये न वदेदित्यर्थः । **अत** इति । अतः कारणाद् ब्रह्मत्वेन या उपासना तस्यां **प्रकारीभूतं** यद् ब्रह्मत्वं **तदवच्छेदकत्वं** तद्घटकत्वं ब्रह्मपदस्येत्यर्थः । खण्डयन्ति **हन्ते**ति । **हन्त** इति खेदे । **शब्दार्थ** इति । **इति**शब्दार्थ इत्यर्थः । कथमिदमित्यत आहुः **यत** इति । **इति**शब्दस्य हेतुत्ववाचकत्वे योऽर्थस्तमाहुः **तथा चे**ति । अत्रोपष्टम्भकमाहुः **अत एवे**ति । **पूर्वमुक्त**मिति । मनो ब्रह्मेत्युपासीतेति इतिशब्दशिरस्कं यद्वाक्यं तत्कथनात्पूर्वमित्यर्थः । **सर्वत्रे**ति । येऽन्नं ब्रह्मोपासते ये प्राणं ब्रह्मोपासते इत्यादिवाक्येषु इतिशब्दशिरस्कता न दृश्यते । अन्ते मनो ब्रह्मेत्युपासीतेतिवाक्ये इतिशब्दस्य हेत्वर्थत्वं वक्तव्यमित्यर्थः । अत्रान्नाद्युपासनासु ब्रह्मोपासनात्वं नास्तीति शङ्का तत्समाधानं च विस्तरेण **प्रकाशे** उक्तमिति विस्तरभयादत्र विरम्यते ॥ १६ ॥ इति चतुर्थाधिकरणम् ॥

सर्वाण्युपास्यानि रूपाणि ब्रह्मरूपाण्येवेति तदुपासकानां परप्राप्तिरेवेति सिद्धम् । तत्रेदं चिन्त्यते । ज्ञानमार्गीयाणां चाविशेषेणैव परप्राप्तिरुत कश्चिद् विशेषोऽस्तीति । तत्रोभयोरपि ब्रह्मोपासकत्वेनाविशेषेणैव फलं भवतीति प्राप्ते प्रत्याह

विशेषं च दर्शयति ॥ १७ ॥ (४. ३. ५.)

विशेषं च श्रुतिर्दर्शयति । तैत्तिरीयके पठ्यते " ब्रह्मविदाप्नोति परम् " (तै. २. १.) इति । गूढाभिसन्धिना सामान्यत एतावदुक्त्वा गूढं तमुद्धाट्यन्त्यतिगोप्यत्वमस्मिन्नर्थेनुभवैकवेद्यत्वं च ज्ञापयन्त्याह " तदेषाभ्युक्ता सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता " (तै. २. १.) इति ।

तत् पूर्वोक्तं प्रतिपाद्यत्वेनाभिमुखीकृत्यैषर्गुक्ता । तदनुभवकर्तृभिरितिशेषः । ब्रह्मविदक्षरब्रह्मविददाप्नोति सान्निध्यादक्षरमेवाप्नोति । एतावानर्थो यो वेदेत्यन्तयर्चोक्तः । अथ परमाप्नोतीत्यस्यार्थ उच्यते ' निहितम् ' इत्यादिना । अत एव मध्ये क्रियापद-

---

पूर्वाधिकरणसिद्धार्थमाहुः **सर्वाणीति** । अधिकरणमवतारयन्ति **तत्रेति** । संशयमाहुः **ज्ञानमार्गीयाणामिति** । पूर्मपक्षमाहुः **तत्रेति** । सिद्धान्तसूत्रमेवाहुः **विशेषमिति**। श्रुतिमेवाहुः **ब्रह्मविदिति** । तदर्थमाहुः **गूढेति** । **उक्त्वेति** । श्रुतिरितिशेषः । **आहेति** । श्रुतिरितिशेषः । का वा श्रुतिरित्याकाङ्क्षायामाहुः **तदेषेत्यादिना विपश्चितेत्यन्तेन** ।

अस्यार्थमाहुः **तत्पूर्वोक्तमिति** । **मध्ये क्रियापदमिति** । **आप्नोतीति**

मुभयसम्बन्धित्वज्ञापकत्वमुक्तम् । तत्प्राप्तिश्च मर्यादापुष्टिभेदेन द्वेधा । तत्रादौ मर्यादायामुच्यते ।

इहायमाशयो ज्ञेयः । " नायमात्मा प्रवचनेन " (कठ. २. २२) इतिश्रुत्या भगवद्वरणातिरिक्तसाधननिरासः क्रियते पुरुषोत्तमप्राप्तौ । एवं सत्यक्षरब्रह्मज्ञानस्य तत्साधनत्व उच्यमाने तद्विरोधः स्यात् । तेनैवमेतदर्थो निरूप्यते । ज्ञानमार्गीयाणामक्षरज्ञानेनाक्षरप्राप्तिस्तेषां तदेकपर्यवसायित्वात् । भक्तानामेव पुरुषोत्तमपर्यवसायित्वात् । तदुक्तं भगवद्गीतासु " एवं सततयुक्ता ये " (भ. गी. १२. १.) इतिप्रश्ने (भ. गी. १२. २. ३.) " मय्यावेश्य मनो ये माम् ", 'ये त्वक्षरमनिर्देश्यम्' । श्रीभागवते च 'भक्त्याहमेकया ग्राह्यः' " तस्मान् मद्भक्तियुक्तस्य " (भाग. ११. १४. २१.) इत्युपक्रम्य " न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह " (भाग. ११. २०. ३१.) इत्यादिना । तथा च ब्रह्मविदं चेद् भगवान् वृणुते तदा भक्तिरुदेति । तत्प्रचुरभावे सति स्वयं तद्धृदि प्रकटीभविष्णुः स्वस्थानभूतं व्यापिवैकुण्ठं तद्गुहायां हृदयाकाशे प्रकटीकरोति तत् परमव्योमशब्देनोच्यते । अलौकिकप्रयोगेण तस्यालौकिकत्वं ज्ञाप्यते । यथा स्वस्थापितं वस्त्ववश्यं

क्रियापदमित्यर्थः । **तत्प्राप्तिश्च** परप्राप्तिश्च । **उच्यत** इति । निहित गुहायामित्यादिना ।

कथमुच्यते इत्येतदर्थमाशयं वर्णयन्ति **इहेति** । **एवमेतदर्थो निरूप्यत** इत्युक्तम्, तत्र स एवार्थ इत्याहुः **ज्ञानेति** । ज्ञानिभक्तानां परप्राप्तिप्रकारमाहुः **भक्तानामित्यारभ्य परमाप्नोतीत्यर्थः संपद्यत** इत्यन्तेन । **अलौकिक-**

स्वदर्शनयोग्यं भवति तथात्र भगवानपीतिज्ञापनाय निहितमित्युक्तम् । तथा च परमाप्नोतीतिपदविवृतिरूपत्वादस्य गुहायां परमे व्योम्नि निहितं यो वेद स " नास्य प्राणा उत्क्रामन्तीहैव समवलीयन्ते ब्रह्मैव सन् ब्रह्माप्येति " (बृ. ४. ४. २२.) इतिश्रुत्युक्तरीत्या परमाप्नोतीत्यर्थः सम्पद्यते ।

अथ शुद्धपुष्टिमार्गेङ्गीकृतस्य व्यवस्थामाह सोश्नुते इत्यादिना । अत्रायमभिसन्धिः । यथा स्वयं प्रकटीभूय लोके लीलां करोति तथात्यनुग्रहवशात् स्वान्तःस्थितमपि भक्तं प्रकटीकृत्य तत्स्नेहातिशयेन तद्वशः सन् स्वलीलारसानुभवं कारयतीति 'स' भक्तो 'ब्रह्मणा' परब्रह्मणा पुरुषोत्तमेन सह 'सर्वान् कामानश्नुते' इति । चकारादुक्ता श्रुतिः स्मृतयश्च संगृह्यन्ते । एवं सति ज्ञानमार्गीयाणामक्षरप्राप्तिरेव, भक्तानामेव पुरुषोत्तमप्राप्तिरिति सिद्धम् ॥१७॥५॥

॥ इति चतुर्थाध्याये तृतीयपादे पञ्चमं विशेषाधिकरणम् ॥५॥

॥ इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये चतुर्थस्याध्यायस्य तृतीयः पादः समाप्तः ॥

प्रयोगेणेति । व्योम्नित्यलौकिकप्रयोगेणेत्यर्थः ।

पुष्टिमार्गे त्वाहुः **अथेति** । **चकारादिति** सूत्रोक्तचकारादित्यर्थः ॥१७॥

इतिश्रीमन्मुकुन्दरायसहजमाधुरीपरमानिर्वचनीयसरसवदनतामरससुधाह्रदावगाहिश्रीमदाचार्यपदाब्जकृपापारसारश्रीमत्प्रभुचरणात्मजमहाराजयदुनाथकुलोद्भवगोस्वामिश्रीगोपालात्मजगिरिधरविरचितेऽणुभाष्यविवरणे **चतुर्थाध्यायस्य तृतीयः पादः** समाप्तिमफाणीत् ।

अथ चतुर्थाध्यायस्य चतुर्थः पादः ।

"ब्रह्मविदाप्नोति परम्" (तै. २. १.) इत्युपक्रम्य 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' इति तैत्तिरीयके पठ्यते। तत्रेदं सन्दिह्यते। किमन्तःस्थित एवाश्नुत उत पुनर्जन्म प्राप्येति। तत्रान्त्यस्त्वनुपपन्नः। "न स पुनरावर्तते" (छा. ८. १५. १.) "तेषामिह न पुनरावृत्तिरस्ति" (बृ. ६. २. १५.) इत्यादि-श्रुतिविरोधात् कर्माभावाच्चेति प्राप्ते प्रतिवदति

सम्पद्याविर्भावः स्वेन शब्दात् ॥ १ ॥ (४. ४. १.)

सम्पद्य ब्रह्म सम्पद्यापि स्थितस्य जीवस्य प्रभोरत्यनुग्रहवशात् स्वरूपात्मकभजनानन्ददित्सायां तत्कृत आविर्भावो भवत्येव। आविर्भावस्य भगवदधीनत्वज्ञापनायास्य तत्र कर्तृत्वं नोक्तम्। ननूक्तं

पादद्वयेन सद्योमुक्तिप्रकारः क्रममुक्तिप्रकारः, अथ च प्राप्यप्रकारः, ज्ञानमार्गे भक्तिमार्गे च क्रमेणाक्षरप्राप्तिः पुरुषोत्तमप्राप्तिप्रकारश्च दर्शितः। अधुना चतुर्थे पादे पुरुषोत्तमस्वरूपं तदनुभवप्रकारश्च प्रदर्श्यते। सूत्रार्थमाहुः **ब्रह्मविदिति**। संशयमाहुः **किमिति**। लये सति भेद एव नास्तीति भोगे स्वातन्त्र्याभावात् प्रथमाविभक्त्यनुपपत्तिरितिभावः। पूर्वपक्षमाहुः **तत्रेति**। तथा च श्रुति-विरोधापेक्षया विभक्त्यर्थस्वातन्त्र्यबाध एवोचित इति पूर्वपक्ष्याशयः।

सिद्धान्तं वक्तुं सूत्रार्थमाहुः **संपद्येति**। भगवता सह एकीभावं प्राप्येत्यर्थः। **आविर्भावः** ब्रह्मभिन्नत्वेनानुभवविषयत्वयोग्यत्वम्। **अस्य**

" न स पुनरावर्तते " (छं. ८. १४. १.) इत्यादिश्रुतिविरोधः कर्माभावश्च बाधक इत्यत आह स्वेनेति । स्वशब्दोत्र भगवद्वाची । तथा च भगवत्स्वरूपबलेनैवाविर्भाव इत्यर्थः । एवं सत्युक्तश्रुतिर्मर्यादामार्गविषयिणीति न विरोध इतिभावः । तेषामिह प्रपञ्चे न पुनरावृत्तिरस्तीति हि श्रुतिराह । लीलायाः प्रपञ्चातीतत्वात् तत्राविर्भावस्य निषेधाविषयत्वादपि न विरोधः । अत्र प्रमाणाकाङ्क्षायामाह शब्दादिति । " सोश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता " (तै. २. १.) इतिश्रुतिः पुरुषोत्तमेन सह सर्वकामभोगं वदति । स च न विग्रहं विना सम्भवतीति श्रुतिबलादेव तथा मन्तव्यमित्यर्थः ॥ १ ॥

जीवस्य । तत्र आविर्भावे । सौत्रं स्वेनेति पदमवतारयन्ति नन्विति । तथा चेति । छान्दोग्ये भूमविद्यायां तस्य ह वा एतस्येत्युपक्रम्य आत्मत आविर्भावतिरोभावावात्मतोऽन्नमित्यादिश्रावणाद्भगवदिच्छयाविर्भावः । उक्तश्रुतिः । न स पुनरावर्तत इतिश्रुतिः । न विरोध इति । समाने विषये प्रतिबध्यप्रतिबन्धकभावः, न तु भिन्ने विषय इतिभावः । तेषां मर्यादामार्गीयाणाम् । श्रुतिराहेति । पञ्चाग्निविद्यायामिहेतिश्रवणात् अर्चिपुरुषविद्यायां च इमं मानवमावर्तं नावर्तन्त इतिश्रवणाच्च प्रपञ्चे नावृत्तिरित्यर्थः । लीलायामावृत्तौ न विरोध इत्याहुः लीलाया इति । तथा च मर्यादामार्गापेक्षया पुष्टिमार्गे जघन्यत्वं नास्तीतिभावः । एतादृशार्थे यः सौत्रो हेतुस्तमवतारयन्ति अत्रेति । हेतोरर्थमाहुः सोश्नुत इति । तथा मन्तव्यमिति । यद्विना यदनुपपन्नं तत्तेनाक्षिप्यत इत्यर्थापत्तिप्रमाणेन विग्रहं विना भोगो न संभवतीतिविग्रहस्याक्षेपलभ्यत्वं मन्तव्यमित्यर्थः ॥ १ ॥

हेत्वन्तरमाह

मुक्तः प्रतिज्ञानात् ॥ २ ॥

अत्रोपक्रमे " ब्रह्मविदाप्नोति परम् " (तै. २. १.) इति-वाक्येन परप्राप्तिलक्षणां मुक्तिं प्रतिज्ञाय हि तद्विवृतिरेव सोऽश्नुत इत्यादिना क्रियते । तेन पुष्टिमार्गीयमुक्तिरूपत्वमेव तस्याशनस्य सिध्यत्यतोपि हेतोस्तदाविर्भावस्य न लौकिकत्वं न चावृत्तिरूपत्व-मित्यर्थः ॥ २ ॥

ननु परस्य ब्रह्मणो निर्गुणत्वात् कामभोगस्य गुणसाध्यत्वात् सह ब्रह्मणा इत्यत्र ब्रह्मपदं सगुणतत्परमतो न तस्य मुक्तिरूपत्व-मित्यत आह

आत्मा प्रकरणात् ॥ ३ ॥

अत्र ब्रह्मपदेनात्मा व्यापको मायातद्गुणसम्बन्धरहितो यः स एवोच्यते । कुतः । प्रकरणात् । " ब्रह्मविदाप्नोति परम् " (तै.

सूत्रमवतारयन्ति **हेत्वन्तरमिति** । एतादृशाविर्भावेपि मुक्तत्वमस्तीत्यत्र एतत्प्रकरणोक्तं हेत्वन्तरमाहेत्यर्थः । सूत्रार्थमाहुः **अत्रेति** । **परमाप्नोति** ब्रह्म-विदिति शेषः । एवं चोपक्रमवाक्ये **मुक्तेः प्रतिज्ञानात्** यस्याविर्भावः स मुक्त इतिसूत्रयोजना ॥ २ ॥

सूत्रमवतारयन्ति **नन्विति** । **न तस्य मुक्तिरूपत्वमिति** । भोगस्य मुक्तिरूपत्वं नास्तीत्यर्थः । सूत्रार्थमाहुः **अत्रेति** । **उच्यत इति** । एवं च तस्माद्वा एतस्मादात्मन आकाशः सभूत इतिवाक्यं तस्मिन्नेव प्रकरणे पठितम् ।

२. १.) इत्युपक्रम्य तत्पाठाद् गुणातीतस्यैवैतत् प्रकरणमिति तदेवात्र ब्रह्मशब्देनोच्यत इत्यर्थः ॥ ३ ॥

ननु "ब्रह्मविदाप्नोति परम्" (तै. २. १.) इति भिन्नं वाक्यमृग् भिन्नातो नैकं प्रकरणमिति सगुणमेव तत्र ब्रह्मपदेनोच्यत इत्याशङ्क्य प्रतिवदति

अविभागेन दृष्टत्वात् ॥ ४ ॥

पूर्ववाक्येन सममविभागेनैवेयमृक् पठिता न तु विभागेन । कुतः । **दृष्टत्वात्** । ब्रह्मविदितिवाक्यानन्तरं 'तत्' पूर्वोक्तमर्थं प्रतिपाद्यत्वेनाभिमुखीकृत्यैषर्गुक्तेतिश्रुतिर्दृश्यते "तदेषाभ्युक्ता" इति । तेन पूर्ववाक्योक्तार्थमधिकृत्यैवर्गुच्यत इति गुणातीतमेव तदत्र वाच्यमित्यर्थः ॥ ४ ॥ १ ॥

॥ इति चतुर्थाध्याये चतुर्थपादे प्रथमं सम्पद्याविर्भावाधिकरणम् ॥ १ ॥

तथा चैतादृशकार्यकर्ता निर्गुणः पुरुषोत्तम एव, आविर्भाव्य भोगमपि स एव कारयतीति तस्य मोक्षरूपत्वमितिभावः । तादृशभोगस्य कार्यत्वान्न मोक्षत्वमिति न शङ्कनीयमितिहृदयम् ॥ ३ ॥

सूत्रमवतारयन्ति **नन्विति** । **नैकमिति** ऋचः वाक्यस्य च परस्परसापेक्षबोधकपदसत्त्वे एकं प्रकरणमितिवक्तव्यं तदेव नास्तीतिभावः । सूत्रार्थमाहुः **पूर्ववाक्येनेति** । **तेनेति** । तदेषेतिश्रुत्यैवैकवाक्यता **उच्यत** इत्यर्थः ॥ ४ ॥ **इतिप्रथमाधिकरणम्** ॥

पूर्वेण मुक्तो जीवो भगवदनुग्रहातिशयेच्छातो बहिराविर्भूतो गुणातीतेन पुरुषोत्तमेनैव सह सर्वान् कामानश्नुत इति सिद्धम्। अथ तत्रैवेदं विचार्यते। आविर्भूतो जीवः प्राकृतेन शरीरेण भुङ्क्त उताप्राकृतेनेति। तत्र भोगस्य लौकिकत्वे तदायतनस्यापि तादृशेनैव भवितव्यमिति मन्वानं प्रत्याह

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥ (४. ४. २.)

ब्राह्मेण ब्रह्मसम्बन्धिना ब्रह्मणा भगवतैव स्वभोगानुरूपतया सम्पादितेन सत्यज्ञानानन्दात्मकेन शरीरेण पूर्वोक्तानश्नुत इति **जैमिनि**राचार्यो मनुते। तत्र हेतुरुपन्यासादिभ्य इति। " ब्रह्मविदाप्नोति परम् " (तै. २. १.) इति ब्रह्मविदः परप्राप्तिं प्रतिज्ञाय, तदर्थस्यैवोपन्यासोऽग्रिमयर्चा क्रियते " सोऽश्नुते " (तै. २. १.) इत्यादिना। तथा च परप्राप्तेर्मुक्तिरूपत्वात् पुष्टिमार्गीयायास्तस्या एवंरूपत्वादक्षरब्रह्मणः पुरुषोत्तमायतनरूपत्वात् तदात्म-

---

पूर्वसूत्रद्वयसिद्धार्थानुवादपुरःसरं सूत्रमवतारयन्ति **पूर्वेणे**ति। आद्यसूत्रद्वयेनेत्यर्थः। **अथे**ति। तत्सिद्ध्युत्तरमित्यर्थः। **तत्रैवे**ति। **तस्मिन्** वाक्यार्थे **इदं** वक्ष्यमाणम्। संशयमाहुः **आविर्भूत** इति। पूर्वपक्षमाहुः **तत्रे**ति। सूत्रार्थकथनेन सिद्धान्तमाहुः **ब्राह्मणे**ति। अस्यैवार्थमाहुः **ब्रह्मणे**ति। **शरीरेणे**त्यन्तं हेतुं व्याकर्तुमाहुः **उपन्यासादिभ्य** इति। उप समीपे न्यासः कथनं विवरणं, स एवादिर्येषां ते उपन्यासादयस्तेभ्यः। हेतुं विवृण्वन्ति **ब्रह्मविदि**ति। **अग्रिमयार्चे**ति। अग्रिमया ऋचा इति छेदः। **तस्याः** मुक्तेः। **एवंरूपत्वादि**ति। सर्वकामाशनरूपत्वादित्यर्थः। ननु ब्रह्मभावे संपन्ने,

कमेव शरीरं तस्य वक्तुमुचितं, न तु प्राकृतम् । एतद्बोधनायैवा-ग्रेन्नमयादीनि विभूतिरूपाण्युक्तानि । भक्तशरीरे प्रतीयमानाना-मर्थानां विभूतिरूपत्वेन ब्रह्मात्मकत्वं तेन साधितं भवति । इदमेवा-दिपदेन बहुवचनेन च ज्ञाप्यते । एतदानन्दमयाधिकरणे प्रप-ञ्चितमतो नात्र पुनरुच्यते । यत्र कर्मवादी जैमिनिरेवं मनुते तत्रान्येषामेवमङ्गीकारे किमाश्चर्यमितिज्ञापनाय तन्मतोपन्यासः कृतः ॥ ५ ॥

चिति तन्मात्रेण तदात्मत्वादित्यौडुलोमिः ॥ ६ ॥

"स यथा सैन्धवघनोनन्तरोबाह्यः कृत्स्नो रसघन एवं वा अरे अयमात्मानन्तरोबाह्यः कृत्स्नोः प्रज्ञानघनः" (बृ. ४. १. १३.) इतिश्रुतौ घनपदेन ज्ञानात्मकविग्रहात्मत्वं ब्रह्मणो बोध्यते । अन्यथा न वदेत् । प्रयोजनाभावात् । तथा च तादृशेन सह भोग-

---

व्यापकत्वं यथा, पूर्वशरीराकारस्याविर्भावः कुतो न जायते ब्राह्मणशरीराङ्गी-कारः किमर्थमित्यत आहुः **एतदिति** । **अग्रे** औषधीभ्योन्नमित्यनन्तरम् । उक्तानां तेषां फलमाहुः **भक्तशरीरे**ति । **तेन** कथनेन । **आदिपदेने**त्यादि । उपन्यासादिभ्य इत्यादिपदं बहुवचनं च बोध्यम् । **एतदिति** । तन्निरूपक-स्यापि तुल्यफलत्वमित्यनेन प्रपञ्चितमित्यर्थः । इदमेव **पुष्टिप्रवाहमर्यादा-ग्रन्थे** स्वरूपेणावतारेणेति सार्धश्लोकेनोक्तम् । तथा च यथा व्यापकत्वस्या-विर्भावः तथा सच्चिदानन्दात्मकाक्षरात्मकदेहस्याप्याविर्भावे लीलारसानुभवरूपो मोक्षः सिध्यतीतिभावः । अयं च **सेवाफले** महान् भोगः प्रथमे विशते सदेत्यत्रोक्त इत्यवधेयम् । मतोपन्यासप्रयोजनमाहुः **यत्रे**ति ॥ ५ ॥

सूत्रं व्याकुर्वन्ति **स यथे**ति । **अन्यथे**ति । अन्यथा घनपदं न

कर्त्री तादृशेनैव भाव्यमिति चिति चिद्रूपे ब्रह्मणि तन्मात्रेण चिन्मात्रेण रूपेण कामान् भुङ्क्ते, न तु विग्रहेण । श्रुतौ जीवस्य तथात्वस्यानुक्तेः । पूर्णानन्दत्वाद् भगवतस्तत्सम्बन्धेन तदानन्दानुभवतीत्यर्थः सम्पद्यते । चिदात्मत्वं जीवस्य यतो नैसर्गिकमित्यौडुलोमिराचार्यो मनुते । "अशरीरं वाव" (छा. ८. १२. १.) इतिश्रुतिरेतादृशान्यविषयिणीति ज्ञेयम् । मुक्तिदशायां तदनुभवस्य भगवदिच्छाविषयत्वाभावान्न तथा । तथाचैतदेतज्जातीयकानन्दानुभवोऽस्य भवत्वितिभगवदिच्छैव श्रुतौ कामशब्देनोच्यते ॥ ६ ॥

एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॥ ७ ॥

वदेदित्यर्थः । अनुक्तेरिति । जीवस्य विग्रहवत्त्वस्यानुक्तेरित्यर्थः । 'अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतः' इतिश्रुतेः । व्यर्थत्वं स्यादित्यत आहुः अशरीरमिति । एतादृशान्येति । एतादृशाद् भगवदानन्दादन्यः दुःखसंभिन्न आनन्दस्तद्विषयिणीत्यर्थः । तथा च श्रुतौ प्रियपदमप्रियपदसमभिव्याहृतं श्रुतमितिहेतोस्तथा बोध्यमितिभावः । अन्यदपि कारणमाहुः मुक्तिदशायामिति । भगवदिति । दुःखसंभिन्नसुखानुभवस्य भगवदिच्छाविषयत्वं नास्तीत्यर्थः । अस्मिन्नर्थे उपष्टम्भकमाहुः तथा चेति । एतदेतदितिवीप्सया विलक्षणानन्दो द्योत्यते वैलक्षण्येन च दुःखासंभिन्नत्वमानन्दे द्योत्यते । एवं च तादृशेच्छाविषयानुभवश्चिन्मात्रेणेति न शरीरापेक्षेति औडुलोमेर्मतमिति हृदयम् ॥ ६ ॥

परमाचार्यो बादरायणस्तु नैवं मनुते । "ब्रह्मविदाप्नोति परम्" (तै. २. १.) इत्यस्योपन्यास एवमपि विग्रहवत्त्वेनापि कृतो यतः । तथा हि । "यो वेद निहितं गुहायाम्" (तै. २. १.) इत्यत्र गुहाया उक्तत्वात् तस्या विग्रह एव सम्भवात् । किञ्च प्रथमान्तोपस्थितत्वेन प्राप्नोतीत्युक्त्या च ब्रह्मविदः परप्राप्तौ स्वातन्त्र्यं ज्ञाप्यते । तदेव ब्रह्मणा सहेतिपदेनोपन्यस्तम् । तेन ब्रह्मणोपि तत्समानक्रियावत्त्वं ज्ञाप्यते परन्त्वप्राधान्येन । तथा च भक्तस्यैव कामा वक्तुमुचिताः । ते च न विग्रहं विना सम्भवन्ति । किञ्च विपश्चितेतिविशेषणेन विविधं पश्यच्चिद्रूपत्वमुच्यते । कामभोगोक्तिप्रस्ताव एतदुक्त्या तदुपयोग्येव सर्वं वाच्यम् । एवं सति भक्तविविधभावान् पश्यति स्वयं भोगचतुरश्चेत्युक्तं भवति । एतेनापि भक्तविग्रहः सिध्यति । ननु विग्रहस्यागन्तुकत्वेन लौकिक-

---

सिद्धान्तबोधकं सूत्रं व्याकुर्वन्ति **परमेति** । **नैवमिति** । औडुलोमिमतरीत्या न मनुत इत्यर्थः । सूत्रांशं **उपन्यासादिति**हेतुं व्याकुर्वन्ति **ब्रह्मविदिति** । यत एवमविग्रहवत्त्वेनापि उपन्यासः कृत इति योजना । ननु ब्रह्मविदित्यादिवाक्ये विग्रहश्रवणाभावात् कथमिदमित्यत आहुः **तथा हीति** । **तस्याः** गुहायाः सोऽश्नुत इत्यनेनापि विग्रहो बोध्यते, कामभोगस्य विग्रहाधीनत्वादितिभावः । युक्त्यन्तरमाहुः **किं चेति** । **ज्ञाप्यते** बोध्यते । **अप्राधान्येनेति** । ब्रह्मणा विपश्चितेत्यत्र सहयुक्तेऽप्रधान इत्यनुशासनेनाऽप्राधान्ये तृतीयाया जायमानत्वादित्यर्थः । **तथेति** । कामानां शरीराधीनत्वादितिभावः ।

विपश्चित्पदमपि विग्रहबोधकमित्याहुः **किं चेति** । **तदुपयोग्येवेति** । कामोपभोगोपयोग्येवेत्यर्थः । **एतेनेति** । विपश्चित्पदेनेत्यर्थः । **पूर्वभावादिति**

त्वादलौकिकेन ब्रह्मणा भोगो विरुद्ध इत्यत आह पूर्वभावादिति। भक्तप्राप्तेः पूर्वमेव भगवद्दित्सितभोगानुरूपविग्रहाणां सत्त्वान्न विरोधः। किञ्चोक्तश्रुतिसूत्रैः पुरुषोत्तमेन सह भक्तस्य कामभोगो निरूपितः। स यावतार्थेन विना नोपपद्यते तावान् स श्रुत्यभिमत इति मन्तव्यम्। तथा च ब्रह्मसम्बन्धयोग्यानि शरीराणि नित्यानि सन्त्येव। यथानुग्रहो यस्मिन् जीवे स तादृशं तदाविश्य भगवदानन्दमश्नुत इति सर्वमवदातम्॥ ७॥

एवं परप्राप्तिः केषाञ्चिदेव भवति। तत्र हेत्वपेक्षायामाह

सङ्कल्पादेव च तच्छ्रुतेः॥ ८॥

भजनानन्दं दातुं यमेव सङ्कल्पविषयं करोति स एवैवं प्राप्नोतीति भगवत्सङ्कल्प एव तत्र हेतुः। तत्र प्रमाणमाह तच्छ्रुतेः।

सौत्रं हेत्वन्तरमवतारयन्ति **नन्विति**। हेत्वन्तरार्थमाहुः **भक्तेति**। भक्तस्य भगवत्प्राप्तेः पूर्वमेवेत्यर्थः। **भगवदिति**। भगवता दातुमिच्छितानां भोगानुरूपविग्रहाणामित्यर्थः। **न विरोध** इति। चिन्मात्रत्वब्राह्मशरीरत्वयोर्न विरोध इत्यर्थः। एवं च बादरायणो विग्रहवत्त्वं मन्यत इतिभावः। एतावता यत्सिद्धं तदाहुः **किं चेति**। **मन्तव्यमिति**। यद्विना यदनुपपन्नं तत्तेनाक्षिप्यते इत्यर्थापत्तिप्रमाणेनानुक्तोप्यर्थो मन्तव्य इत्यर्थः। **तदाविश्येति**। अयं मम देह इत्यभिमानं कृत्वा।

अत्रास्मिन् सूत्रे ब्रह्मविदाप्नोति परमित्यस्य विषयवाक्यत्वमस्ति न वेति, अथ च मुक्तानां शरीरमस्ति वा न वेति बहवो विवदन्ते। तद्विचारस्तु विस्तरेण **प्रकाशे** प्रपञ्चितः। अत्र विस्तरभयाद्विरम्यते॥ ७॥

सूत्रमवतारयन्ति **एवमिति**। सूत्रार्थमाहुः **भजनेति**। **संकल्पेति**।

" नायमात्मा " (कठ. २. २२) इत्युपक्रम्य " यमेवैष वृणुते तेन लभ्यः " इतिश्रुतिः श्रूयते । अतः स एवात्र हेतुः । श्रुतौ प्रवचनादिनिषेधः कृत इत्यत्राप्येवकार उक्तः । चकारात् तज्जनितैवैतदनुरूपा परमार्तिः सङ्गृह्यते ॥ ८ ॥

अत एव चानन्याधिपतिः ॥ ९ ॥

यतो हेतोः साधनं फलं चोक्तरीत्या स्वयमेव नान्योतो हेतोस्तेषां हृदि साधनत्वेन फलत्वेन प्रभुरेव स्फुरति, नान्यस्तेनानन्यास्ते । तेषामेवाधिपतिः पुरुषोत्तमः । अन्यत्राधिपत्यं विभूतिरूपैः करोत्यतः " सर्वस्याधिपतिः " (बृ. ४. ४. २२.) इतिश्रुतिरपि तदभिप्रायेणैवेतिभावः । चकारात् " मदन्यत् ते न जानन्ति नाहं तेभ्यो मनागपि " (भाग. ९. ६. ८.) इतिभगवद्वाक्यं सङ्गृह्यते ।

अस्य भक्तस्य भजनानन्दानुभवो भवत्वितिसंकल्पं कृत्वेत्यर्थः । **स एवेति** । वरणरूपः संकल्प एवात्र हेतुरित्यर्थः । **श्रुतौ** नायमात्मा प्रवचनेन लभ्य इतिश्रुतौ । **एवकार** इति । एवकारस्यान्ययोगव्यवच्छेदार्थकत्वादन्यनिषेधः सूत्रे उक्त इत्यर्थः । **तज्जनितैवेति** । भगवदनुग्रहजनितैवेत्यर्थः । **संगृह्यते** तस्या व्यवच्छेदः संगृह्यत इत्यर्थः ॥ ८ ॥

सूत्रार्थमाहुः **यत** इति । यतः कारणात् । **साधनमिति** । पुष्टिमार्गीयाणां वरणादिरूपमित्यर्थः । **फलमिति** । स्वस्वरूपात्मकमित्यर्थः । एवं चानन्याधिपतिरिति सौत्रवाक्यस्यार्थं विशदयन्ति **तेनेति** । ननु किमिदमुच्यते सर्वस्य वशी सर्वस्येशान इतिश्रुत्या सर्वस्यैव तथास्ति, केवलं पुष्टिमार्गीयाणा कथमित्यत आहुः **अन्यत्रेति** । **तदभिप्रायेणैवेति** । विभूतिरूपाभि-

अन्यथा सर्वज्ञस्याकुण्ठितज्ञानशक्तेरेवङ्कथनमयुक्तं स्यात् । अतः **पुष्टिमार्गोनुग्रहैकसाध्यः प्रमाणमार्गाद् विलक्षणस्तत्र विश्वासश्च** तथेति सिद्धम् ॥ ९ ॥

मुक्तोपि जीवः पुष्टिमार्गेङ्गीकृतो भगवद्दत्तं विग्रहं प्राप्य भजनानन्दं प्राप्नोतीति सिद्धम् । अत्र प्रत्यवष्ठिते

अभावं बादरिराह ह्येवम् ॥ १० ॥

बादरिराचार्यो मुक्तस्य देहाद्यभावं मनुते । तत्र हेतुराह ह्येवमिति । ब्रह्मविदो हि मुक्तिरुच्यते " यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति " (बृ. २. ४. १४.) इत्याद्युक्त्वा " यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् " (बृ. २. ४. १४.) इत्यादिना द्वितीयज्ञाननिषेधमाह ब्रह्मविदः श्रुतिः । तथा च तस्य कामभोगवार्ता दूरतरेति तदाक्षेप्यदेहोपि तथा ॥ १० ॥

भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥

प्रायेणेत्यर्थः । अत्रोपष्टम्भकमाहुः **चकारा**दिति । तथेति । अनुग्रहादित्यर्थः ॥ ९ ॥

सूत्रं व्याकुर्वन्ति **मुक्तोपी**ति । मुक्तोपीत्यादिना सिद्धमित्यन्तेन बादरिकृतप्रत्युपस्थानार्थं पूर्वोक्तार्थं स्मारयन्ति । **अत्रे**ति । अस्मिन्नर्थे **बादरिः** निरानन्दवादी । **आहे**ति । एवं श्रुतिराहेत्यर्थः । का वा श्रुतिरित्यत आहुः **यत्र ही**ति ॥ १० ॥

जैमिनिराचार्यस्तु मुक्तस्य पुंसो देहादेर्भावं सत्तां मन्यते। तत्र हेतुर्विकल्पेत्यादि। "ब्रह्मविदाप्नोति परम्" (तै. २. १.) इतिश्रुत्या ब्रह्मज्ञानस्य तत्प्राप्तिसाधनत्वमुच्यते। "नायमात्मा" (कठ. २. २२.) इतिश्रुत्या तु वरणमात्रप्राप्यत्वं "सोऽश्नुते" इत्यादिना च परप्राप्त्युपन्यासः क्रियते। "इहैव समवनीयन्ते ब्रह्मैव सन् ब्रह्माप्येति" (बृ. २. ४. २२.) इति च पठ्यते। एवं सति मिथोविरोधे तदभावायोक्तव्याख्यानरीत्या ज्ञानमार्गीयस्य ब्रह्मज्ञानेनाक्षरब्रह्मप्राप्तिः, पुष्टिमार्गीयभक्तस्य तु "सोऽश्नुते" इत्यनेनोक्ता परप्राप्तिरितिव्यवस्थितविकल्प एव श्रुत्यभिमत इति ज्ञायते। तेन "नायमात्मा" इतिश्रुतिः परप्राप्तिविषयिणी, "इहैव" इत्यादिश्रुतिस्तु मर्यादामार्गीयविषयिणीति मन्तव्यम्। एवं सति पुष्टिमार्गीयस्य भोगसाधनात्मकविग्रहवत्त्वं निःप्रत्यूहं सिध्यति। "तत् केन कं पश्येत्" (बृ. २. ४. १४.) इत्यादिना तु

सूत्रं व्याकुर्वन्ति **जैमिनिरि**ति। हेतुं व्याकुर्वन्ति **विकल्पे**ति। विरुद्धाः कल्पाः श्रुतौ कथिताः पक्षा विकल्पाः तेषामासमंतात् **मननात्** विचारात्। एवं च विचारेण व्यवस्थितविकल्पं साधयन्ति **ब्रह्मविदि**त्यादिना **मन्तव्यमि**त्यन्तेन। तत्र प्रथमतो ज्ञानसाधनमाहुः **ब्रह्मविदि**ति। ज्ञानविरुद्ध वरणं साधनमाहुः **नायमात्मे**ति। फले विरोधमाहुः **सोऽश्नुत** इति। **इहैवे**ति। **एवं सती**ति। मिथः साधनयोः फलयोर्विरुद्धत्वे सति। **तदभावाय** विरोधाभावाय। अधिकारिभेदः स्वीकर्तव्य इतिशेषः। श्रुतिविरोधं परिहरन्ति **तेने**ति। **एवं सति** व्यवस्थितविकल्पाङ्गीकारे सति।

ब्रह्मज्ञानसामयिकीं व्यवस्थामाह, न तु तदुत्तरकालीनपरप्राप्तिसामयिकीमिति किमनुपपन्नम् ॥ ११ ॥

द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥

ब्रह्मणा सह सर्वकामाशनप्रयोजकं शरीरम् । शरीरत्वस्य भूतजन्यत्वव्याप्यत्वात् तदभावेनाशरीररूपं तद्भोगायतनत्वेन शरीररूपमपीति **बादरायण** आचार्यो मन्यते । अत्र हेतुरत इति । तथाविधश्रुतेरित्यर्थः । तथा हि " भूमैव विजिज्ञासितव्यः " (छा. ७. २३. १.) इत्युक्त्वा तत्स्वरूपमाह "यो वै भूमा तत् सुखम्" इत्युपक्रम्याग्र उच्यते । " यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा" (छा. ७. २४. १.) इति । अनेन केवलभावविषयत्वं पुरुषोत्तमलक्षणमुक्त्वा केवलभाववतो भक्तस्य विप्रयोगसामयिकीं व्यवस्थामाह " स एवाधस्तात् स उपरिष्टात

शरीराङ्गीकारमप्याहुः **पुष्टीति** । शरीराङ्गीकारे तत्केन कं पश्येदिति श्रुतिविरोधं परिहरन्ति **तत्केनेति** ॥ ११ ॥

सूत्रं व्याकुर्वन्ति । **ब्रह्मणेति** । बादरायणमते शरीरमशरीरं चेति द्विविधशरीरम् । तत्र कामाशनं शरीरं विना न संभवतीति शरीरं स्वीकर्तव्यम् । भौतिकत्वं तत्र नास्तीत्यशरीरत्वम् । तदेतद्विशदयन्ति **सर्वेति** । **तद्भोगायतनत्वेन** ब्रह्मणा सह भोगायतनत्वेन । श्रुतिमेवाहुः **भूमैवेति** । ब्रह्मैवेत्यर्थः । **तत्स्वरूपमिति** । तस्य शरीरस्य स्वरूपमाहेत्यर्थः । ननु भूमविद्यायां भूम्नः स्वरूपमुच्यते न तु शरीरस्येत्यत आहुः **यो वै भूमेति** । **अग्र इति** । सुखरूपं भूम्नः स्वरूपमुक्त्वाग्रे सुखरूपत्वेन शरीरमुच्यत इत्यर्थः । केन वाक्येनोच्यत इत्यत आहुः **यत्र नान्यदित्यादिना आत्मत एवेदं सर्वमित्यन्तेन** ।

स पश्चात् स पुरस्तात्" (छ. ७. २५. २.) इत्यादिना । ततः "स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्" इतिपूर्वावस्थामनूद्य संयोगावस्थामाह "आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः" (छा. ७. २५. २.) इतिवाक्येन "सोश्नुते" इतिश्रुतिसंवादिनमर्थमुक्त्वा भक्तस्वरूपमाह "तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राणः" (छा. ७. २६. १.) इत्युपक्रम्य आत्मत एवेदꣳ सर्वम् इति । तेनाशरीरत्वं सिध्यति ।

अव्ययप्रयोगेणाविकृतादेव पुरुषोत्तमात् प्राणाद्याविर्भाव उच्यते । अत्र ल्यब्लोपे पञ्चमी । पूर्वं विरहदशायां प्राणादयो भगवत्येव लीना आसंस्ततस्तत्प्राकट्ये तत एव प्राणादयोपि सम्पन्ना इति तत्प्राप्तेर्निमित्तत्वम् । यतो विभूतिरूपाणामपि पुरुषोत्तमे लयो

भक्तानां प्रथमतो विप्रयोगावस्था तदनन्तरं संयोगावस्थेतिरीत्या व्यवस्थामाहुः **भक्तस्येति** । **आत्मत एवेद सर्वमिति** । एतेन शरीरस्यात्मजन्यत्वं न तु भूतजन्यत्वम् । तेन भूतजन्यत्वाभावात् शरीरत्वं नास्तीति, "आत्मरतिः आत्मक्रीडः" इत्यनेन क्रीडायतनत्वादप्राकृतशरीरत्वं सिध्यतीति सूचितम् ।

ननु किमदमुच्यते, ब्रह्मणः सकाशात् सृष्टेरुक्तत्वाच्छरीरस्य का वार्तेत्यत आहुः **अव्ययप्रयोगेणेति** । **आत्मत** इत्यव्ययप्रयोगेणेत्यर्थः । **अत्र** आत्मत इत्यत्र । एवं च सृष्टेराकाशादिरूपविकृतिभावं प्राप्ताद्ब्रह्मणः सकाशादुत्पत्तिः, भक्तशरीरस्य तु अविकृतादेव भूम्नः सकाशादेवेति विशेष इतिभावः । नन्वियं भक्तस्यैवं व्यवस्था इत्यत्र किं गमकमित्यत आहुः **पूर्वमिति** । **इति तत्प्राप्तेरिति** । एवमेव भक्तस्य भगवत्प्राप्तेरित्यर्थः । ननु विभूतिरूपाणां प्राणादीनां भगवति लयः कथमित्यत आहुः **यत इति** ।

नानुपपन्नः । आत्मरतिरित्यादिना सोऽश्नुत इत्यनेन च शरीरत्वम् । जैमिनिरप्यत एव "ब्राह्मेण" (ब्र. सू. ४. ४. ५.) इति मनुते । एकस्य विरुद्धोभयधर्मवत्त्वममन्वानं प्रति वैदिकं दृष्टान्तमाह द्वादशाहवदिति । "यः कामयेत प्रजायेयेति स द्वादशरात्रेण यजेत" (तै. सं. ७. २. ९.) इतिचोदनया "द्विरात्रेण यजेत" (तै. सं. ७. १. ४.) इत्यादिवन्नियतकर्तृकत्वेनाहीनत्वं गम्यते द्वादशाहस्य । "द्वादशाहमृद्धिकामा उपेयुर्य एव विद्वांसः सत्रमुपयन्ति (तै. सं. ७. ५. १.) इतिश्रुत्या च सत्रत्वं बहुकर्तृकस्य गम्यते । एवमेव द्वादशाङ्गशरीरेन्द्रियप्राणान्तःकरणात्मभिरश्नुत इति सत्रतुल्यत्वम् । वस्तुतो भगवद्विभूतिरूपत्वेन ब्रह्मात्मत्वेनैकरूपत्वमतो द्वादशाहवदुभयविधम् । सत्रे प्रत्येकं चेतनानां यजमानानां फलभागित्ववदत्रापि तादृग्भक्तदेहादीनामपि

अग्रे तस्य ह वा एतस्येत्यादिना ब्रह्मणः प्राणादीनामाविर्भावः श्रूयते । तेन कृत्वा किं ज्ञायते । तत्र लयोऽस्तीति हृदयम् ।

इदानीं शरीरत्वसाधिका श्रुतिमाहुः **आत्मरतिरिति** । **सोऽश्नुत** इति तैत्तिरीये । तस्यैवं विदुषो यज्ञस्यात्मा यजमान इति तैत्तिरीयोपनिषत्समाप्तौ या दशोक्ता सा फलानुभवस्य प्रथमावस्था । अत्र पूर्वमीमांसकसंमतिमाहुः **जैमिनिरिति** । हेतुं व्युत्पाद्य दृष्टान्तार्थमाहुः **एकस्येति** । **यः कामयेतेति** । इदं च तैत्तिरीये सप्तमाष्टके । **द्वादशो** इति पौण्डरीकयागस्य संज्ञा । तस्यैवाहीनत्वमेककर्तृकत्वेन यथा द्विरात्रस्य तस्यैव बहुकर्तृकत्वे सत्रत्वम् । दार्ष्टान्तिके योजयन्ति **एवमिति** । **द्वादशेति** । द्वादश अङ्गभूता ये शरीरेन्द्रियादय इत्यर्थः । शरीरं, पञ्चेन्द्रियाणि, पञ्चप्राणाः, एकमन्तःकरणमि ति

ब्रह्मात्मकत्वाच्चेतनत्वमेवेत्यप्यनेन दृष्टान्तेन ज्ञाप्यते । अत एव श्रीभागवते " देहन्द्रियासुहीनानां वैकुण्ठपुरवासिनाम् " (भाग. ७. १. २४.) इति गीयते ॥ १२ ॥ २ ॥

॥ इति चतुर्थाध्याये चतुर्थपादे द्वितीयं ब्राह्मेणेत्यधिकरणम् ॥२॥

अथेदं चिन्त्यते । भगवत्स्वरूपे प्राकृतशरीर इवावस्था दृश्यन्ते तत्कालीनैः पुंभिरिति कथमप्राकृतत्वमुपपद्यत इति । तत्रोपपत्तिमाह

तत्त्वभावे सन्ध्यवदुपपत्तेः ॥ १३ ॥ (४ ४. ३.)

तद्दर्शनस्य वास्तववस्तुविषयकत्वव्यवच्छेदेन पूर्वपक्षव्युदासाय तुशब्दः । तत् प्राकृततुल्यतादर्शनमभावे तथात्वस्याभाव एव भवति । न तु तत्र प्राकृता धर्माः सन्ति । नन्वविद्यमानानामर्थानां कथं दर्शनमुपपद्यत इत्यत आह सन्ध्यवदिति । स्वप्ने यथा वासनावशादविद्यमानानमप्यर्थानां दर्शनं भवति तथा भगवदिच्छावशात्

द्वादशेतिबोध्यम् । अत एवोक्तं " ब्रह्मभावात्तु भक्तानां गृह एव विशिष्यते " इत्युक्तम् । **अत एवेति** । इदं च मर्यादामार्गीयभक्तानुसारेण । तथा च पुष्टिमार्गीयाणां किं वक्तव्यमितिभावः ॥ १२ ॥ इति द्वितीयाधिकरणम् ॥

एवं देहप्रकारः फलानुभवप्रकारे विचारितः । आत्मा प्रकरणादिति सूत्रद्वयेन फलं विचारितम् । **इदानीं** फलप्रकारं विचारयितुमधिकरणमवतारयितुमाहुः **अथेति** । संशयमाहुः **भगवदिति** । तथा च प्रकृतिसंबन्धविशिष्टं रहितं वेति संशयः । **अवस्था दृश्यन्ते** इति । अतस्तद्विशिष्टमिति पूर्वपक्षमाहुः **इति कथमिति** । प्राकृतत्वस्य भ्रान्तत्वमिति सिद्धान्तमाहुः **तद्दर्शनस्येति** । ननु सन्ध्यवदित्युक्तं तत्किंप्रमाणमत आहुः **तथा चेति** ।

तत्रापि प्राकृततुल्यत्वदर्शनस्योपपत्तेर्न प्राकृतत्वं तत्र ज्ञेयमित्यर्थः। तथा च श्रुतिः "सन्ध्यं तृतीयꣳ स्वप्नस्थानं तस्मिन् सन्ध्ये स्थाने तिष्ठन्नुभे स्थाने पश्यतीदं च परलोकस्थानञ्च अथ यथाक्रमोयं परलोकस्थाने भवति तमाक्रममाक्रम्योभयान् पाप्मन आनन्दांश्च पश्यति स यत्रायं प्रस्वपिति" (बृ. ४. ३. ९.) इत्युपक्रम्य "स्वयं विहृत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयंज्योतिर्भवति न तत्र रथा न रथयोगा न पन्थानो भवन्ति" (बृ. ४. ३. १०) इत्यादिरूपा। एवमेव भगवानासुराणां प्राकृतगुणे तमस्येव दुःखात्मके लयं चिकीर्षुः स्वस्मिन् प्राकृतत्व-बुद्धिसम्पादनाय तादृशीमिव लीलां दर्शयत्यतो न प्राकृतत्वशङ्का-गन्धोप्यत्र। अत एव भगवतोक्तं "मामात्मपरदेहेषु प्रद्विषन्तो-भ्यसूयकाः" (भ. गी. १६. १८.) इत्युपक्रम्य "ततो यान्त्यधमां गतिम्" (भ. गी. १६. २०.) इति। तेषामासुरत्वेन मुक्त्यनधिकारित्वात् तथाकरणम्। अतः सुष्ठूक्तं सन्ध्यवदुपपत्ते-रिति ॥ १३ ॥

भावे जाग्रद्वत् ॥ १४ ॥

इयं बृहदारण्ये ज्योतिर्ब्राह्मणे। **इत्यादिरूपेति**। इदं च श्रुतिरिति-पूर्वेणान्वितम्। अस्यार्थस्तु तद्भाष्यादावनुसंधेयः। दार्ष्टान्तिके योजयन्ति **एवमिति**। अत्र प्रमाणमाहुः **अत एवेति**। **अभ्यसूयकाः** गुणेषु दोषा-रोपकाः ॥ १३ ॥

लौकिकवद् भासमाने लीलापदार्थे यद् दर्शनं भक्तानां तत् तु भावे विषये विद्यमाने सति भवति। अत्र दृष्टान्तमाह जाग्रद्वत्। यथा मोहाभाववतः पुंसः एवार्थस्य दर्शनं तथेति।

एताभ्यां सूत्राभ्यामेतदुक्तं भवति। "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" (तै. २. १.) इतिश्रुत्या भक्तकामपूरणाय भगवाँल्लीलां करोतीति गम्यते। यद्दर्शनश्रवणस्मरणैर्भक्तानां दुःखं भवति तादृशीमपि तां करोतीति श्रूयते। यथा सौभयुद्धे मोहवचनानि, हस्तादायुधच्युतिः, प्रभासीयलीला च। उक्तरीत्या सोऽश्नुते इतिश्रुत्या परब्रह्मत्वमवगम्यते। उक्तलीलया तद्वैपरीत्यं च। एवं सत्येकस्या वास्तवत्वमन्यस्या अवास्तवत्वं वाच्यम्। "ते ते धामान्युश्मसि" "विष्णोः कर्माणि पश्यत" "तद् विष्णोः परमं पदम्" "तद् विप्रासो विपन्यवः" इत्यादिश्रुतिभिः (तै. सं. १. ३. ६.) "**सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवं विश्वं नारायणं देवमक्षरं परमं पदं विश्वतः परमं नित्यं विश्वं नारायणं हरिं** विश्वमेवेदं पुरुषस्तद् विश्वमुपजीवति पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम्" (म. ना. १३. १.) इत्यादिभिश्च शुद्धब्रह्मणस्त-

---

दोषदर्शन उपपत्तिरुक्ता। इदानीं गुणदर्शन उपपत्तिमाह भाव इति। व्याकुर्वन्ति **लौकिकवदिति**।

सूत्रद्वयव्याख्यानोत्तरं तत्प्रयोजनमाहुः **एताभ्यामिति**। एवमुपपाद्य वास्तवमाहुः **एवं सतीति**। **इत्यादिश्रुतिभिः**। लीलानां नित्यत्वप्रतिपादनं कृत्वा

द्विपरीतदर्शनेऽवश्यं हेतुर्वाच्यः। स त्वासुरव्यामोहनमेवेति पूर्वसूत्रेणोपपादितः। भक्तेभ्यः स्वरूपानन्ददानाय "लोकवत् तु लीलाकैवल्यम्" (ब्र. सू. २. १. ३३.) इतिन्यायेन या लीलाः करोति, यथा रिङ्गणादिलीला, भगवतो नैसर्गिकधर्मरूपानन्दात्मकत्वेन विद्यमाना एव, ता भक्ताः पश्यन्तीति द्वितीयसूत्रेणोक्तम्। अत एव लीलाया अनेकरूपत्वाद् ब्रह्मणश्च श्रुतौ सैन्धवदृष्टान्तेनैकरसत्वनिरूपणाच्छुद्धब्रह्मधर्मत्वं न सम्भवतीतिशङ्कानिरासाय कैवल्यमित्युक्तम्। "साक्षी चेता केवलो निर्गुणश्च" (श्वे. ६. ११.) इत्यादिश्रुतिषु यान्यधर्मराहित्यलक्षणा केवलतोक्ता सा लीलात्मिकैव। लीलाविशिष्टमेव शुद्धं परं ब्रह्म न कदाचित् तद्रहितमित्यर्थः पर्यवस्यति। तेन स्वरूपात्मकत्वं लीलायाः पर्यवस्यति। तेन च नित्यत्वम्। एतद् विद्वन्मण्डने प्रपञ्चितम्। अथवा लीलैव कैवल्यं जीवानां मुक्तिरूपम्। तत्र प्रवेशः परमा मुक्तिरितियावदित्यर्थः॥ १४ ॥ ३ ॥

॥ इति चतुर्थाध्याये चतुर्थपादे
तृतीयं तत्त्वभावाधिकरणम्॥ ३ ॥

प्रथमसूत्रप्रयोजनमाहुः **शुद्धेति**। द्वितीयस्यार्थमाहुः **भक्तेभ्य** इति। लीलानां ब्रह्मस्वरूपत्वमितिज्ञापनाय लोकवत्तु लीलाकैवल्यमितिसूत्रार्थं स्मारयन्ति **अत एवेति**। एतत्सूत्रस्य प्रकारान्तरेणार्थमाहुः **अथ वेति**। अत्र मोक्षे केचिद् भोगं नाङ्गीकुर्वन्ति तेषामुपरि अस्वरसः प्रकाशोऽनुसन्धेयः। विस्तरभयाद्विरम्यते॥ १४ ॥ इति तृतीयाधिकरणम्॥

ननु पूर्णज्ञानक्रियाशक्तिमता ब्रह्मणा तुल्यभावेन तत्रापि प्रधानभावं प्राप्य कामभोगकरणमपूर्णज्ञानक्रियावतो भक्तस्यानुपपन्नमित्याशङ्कायां तत्रोपपत्तिमाह

प्रदीपवदावेशस्तथा हि दर्शयति ॥ १५ ॥ (४. ४. ४.)

न हि तदा नैसर्गिकज्ञानक्रियाभ्यां तथा भोक्तुं शक्तो भवति किन्तु भगवांस्तस्मिन्नाविशति यदा तदायमपि तथैव भवतीति सर्वमुपपद्यते। **एतदेवाह प्रदीपवदिति।** यथा प्राचीनः प्रकृष्टो दीपः स्नेहयुक्तायां वर्त्यामर्वाचीनायामाविष्टः स्वसमानकार्यक्षमां तां करोति, स्नेहाधीनस्थितिश्च भवति स्वयं तथात्रापीत्यर्थः। अत्र प्रमाणमाह **तथा हि दर्शयति** श्रुतिः। " भर्ता सन् भ्रियमाणो बिभर्ति एको देवो बहुधा निविष्टः " (तै. आ. ३. १४.) इति। " सर्वान् कामान् " इत्युक्तत्वाद् यस्य कामस्य भोगो यथा निवेशे सति भवति तत्

एवं फलस्वरूपं विचार्य फलानुभवोपकरणं विचारयितुमधिकरणमवतारयन्ति **नन्वित्यादिना**। अत्र भोगे जीवस्य स्वतः सामर्थ्यं नास्ति। श्रुतौ तु भोग उक्तो भवति। अतो भगवद्भोगो जीवस्यास्ति वा न वेतिसंशयः। नास्तीतिपूर्वः पक्षः। जीवस्यास्वाधीनत्वादिति। अस्तीतिसिद्धान्तः। भगवदावेशात्। तदेतद्विशदयन्ति **तदेति**। भगवत्प्राप्तिरूपमोक्षावस्थायाम्। दृष्टान्तं व्युत्पादयन्ति **एतदेवेति**। **यथा प्राचीन** इति। पूर्वं स्थित इत्यर्थः। **स्वयमिति**। स्वयं स्नेहाधीनस्थितिश्च भवतीत्यन्वयः। **तथा हीति** सूत्रांशं व्याकुर्वन्ति **अत्र प्रमाणमिति**। **भर्ता सन्निति**। इयं श्रुतिः तैत्तिरीयोपनिषदि।

श्रुत्यर्थमाहुः **सर्वान्कामानित्यारभ्य मोदमदस्वप्रकान्तिगति-**

तथा तदा निवेश इति बहुधा निवेश उक्तः। अयं निवेशो नान्तर्यामित्वेन। तस्यैकधैव प्रवेशात्। निसर्गतः सर्वेषां जीवानां भगवान् भवत्येव प्रभुर्यद्यपि तथापि यं स्वीयत्वेन वृणुते तस्य विवाहितः पतिरिव भर्ता सन् वरणजस्नेहातिशयेन भक्तेनापि भ्रियमाणः सन् स इव स्वयमपि तं स्वस्मिन् बिभर्ति। अत एव स्नेहराहित्येनायोगोलकादिकं विहाय प्रदीपं दृष्टान्तमुक्तवान् व्यासः। अत एव देवपदमुक्तं स्वरूपानन्ददानाद् भावोद्दीपनात् पूतनादिमुक्तिदानेन स्वमाहात्म्यद्योतनाद् वैकुण्ठादिस्थितेश्च। तदुक्तं निरुक्ते "दिवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा यो देवः" (७. १५.) इति। किञ्च भक्तानां कामभोजनार्थं क्रीडाकरणात् क्रीडायामेव जयेच्छाकरणाद् भक्तैः सह व्यवहारकरणाद् भक्तेषु स्वमाहात्म्येच्छादिद्योतनात् "न पारयेहम्" (भाग. १०. २९. ३७.) "न त्वादृशीं प्रणयिनीम्" (भाग. १०. ५७. ५५.) इत्यादिभिः स्तुतिकरणाद् भक्तप्रपत्तिदर्शनेन कालीयदमनादौ मोदकरणात् तेष्वेव भक्तिमदकरणात् ते स्वप्नेपि प्रियमेव पश्यन्तीति स्वप्नकरणात् तेषां कान्तिकरणादिच्छाकरणाद्वा तन्निकटे गमनादपि

ष्विवत्यन्तेन। अत्र श्रुतिव्याख्याने **वरणजस्नेहातिशयेने**त्युक्तं, तत्रोपष्टम्भकमाहुः **अत एवे**ति। अस्मिन्ननुवाके एको देवो बहुधा निविष्ट इति वाक्यं, तत्र देवपदेनायमेवार्थोऽभिप्रेत इति। श्रुतितात्पर्ये गमकमित्याहुः **अत एव देवपदमि**ति। देवपदस्यार्थानाहुः **स्वरूपे**ति। अस्मिन्नर्थे निरुक्तं प्रमाणमाहुः **तदुक्तमि**ति। अन्यमपि देवपदस्यार्थमाहुः **किं चे**ति।

द्वेः । तदुक्तं धातुपाठे " दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु " (पा. धा. दि. १.) इति । एवं सति युक्तमेव तेषां तथात्वमिति हिशब्देनाह ॥ १५ ॥

ननु " अस्थूलमनण्वह्रस्वम् " (बृ. ३. ८. ८.) इत्याद्यनन्तरं पठ्यते " न तदश्नोति कश्चन न तदश्नोति कश्चन " (बृ. ३. ८. ९.) इति । उक्तश्रुतौ च ब्रह्मणा सह जीवस्य भोग उच्यते । तथा च सगुणनिर्गुणभेदेन विषयभेदोऽवश्यं वाच्यो विरोधपरिहारायेत्यत उत्तरं पठति

स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ १६ ॥

इहायमाशयः । " प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः " (ब्र. सू. ३. २. २२.) इत्याद्यधिकरणैः " परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च " (श्वे. ६. ८.) इत्यादिश्रुतिभिश्च प्राकृता एव धर्मा निषिध्यन्ते ब्रह्मण्यप्राकृता एव बोध्यन्ते । अन्यथा तद्बोधनमेव न स्यात् । निषेधकवाक्य एव तद्बोधनमपि न स्यात् । " एतस्यैवाक्षरस्य प्रशासने "

अस्मिन्नर्थे धातुपाठोक्तं प्रमाणमाहुः **तदुक्तमिति** ॥ १५ ॥

सूत्रमवतारयन्ति **नन्विति** । **न तदश्नोतीति** । अश्नोतीत्यत्र विकरणव्यत्ययेनाशनमेवार्थ इतिभावः । सूत्रं व्याकुर्वन्ति **इहायमिति** । पूर्वोक्तं स्मारयन्ति **प्रकृत इति** । अन्यथानुपपत्तिं प्रमाणयन्ति **अन्यथेति** । अन्यमपि-

(बृ. ३. ८. ९.) इत्यादिरूपम् । अतोऽचिन्त्यानन्तशक्तेर्भगवतः का वा कार्याक्षमता यया प्राकृतान् गुणानूरीकुर्यात् । अतो निर्गुणमेव सदा सर्वत्र भगवद्रूपमिति मन्तव्यम् । एवं सति " तद् यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विदन्ति " (छा. ८. ३. २.) इतिछान्दोग्यश्रुतेः प्रस्वापदशायां न कश्चिद् ब्रह्माश्नाति तच्च न कञ्चनेति तद्विषयिणी निषेधिका श्रुतिर्ब्रह्मविदाप्नोति परमितिश्रुत्युक्तंपरब्रह्मप्राप्तिदशाविषयिणी भोगबोधिका सेति न विरोधगन्धोपि ।

एतदेवाह । स्वाप्ययः प्रस्वापः " स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते " (छा. ६. ८. १.) इतिश्रुतेः । सम्पत्तिर्ब्रह्मसम्पत्तिरुक्तरीत्या पुष्टिमार्गीयो मोक्षः । एतयोरन्यतरापेक्षमुभयश्रुत्युक्तमित्यर्थः । भगवत्कर्तृकभोगस्य लीलारूपत्वात् तस्याश्च " लोकवत् तु लीला कैवल्यम् " (ब्र. सू. २. १. ३३.)

श्रुतिविरोधं परिहरन्ति **एवमिति** । तथा च **न कंचनेती**त्यादिश्रुतिः प्रस्वापदशाविषयिणी, भोगबोधिका तु ब्रह्मविदाप्नोतीतिश्रुतिरित्यर्थः । अत्रोपष्टम्भकमाहुः **एतदेवेति** । **इत्यर्थ** इति । स्वाप्ययसंपत्त्योर्मध्येऽन्यतरापेक्षमुभयश्रुत्युक्तमाविष्कृतमिति समुदितार्थः (अत्र **प्रकाशकारा** एवमाहुः— अन्यतरापेक्षमित्येतदग्रे आविष्कृतमाविष्करणं भगवत्प्राकट्यमिति यावत् ।

इत्यत्र मुक्तित्वेन निरूपणात् तत्प्राप्तेः सम्पद्रूपत्वं युक्ततरमिति हिशब्दार्थः ॥ १६ ॥ ४ ॥

॥ इति चतुर्थाध्यायस्य चतुर्थपादे चतुर्थं प्रदीपवदित्यधिकरणम् ॥ ४ ॥

ब्रह्मणा सह भोगकरणं लौकिकव्यापारयुतमुत नेति संशये तद्युतमिति पूर्वः पक्षः । तथा सति मुक्तित्वभङ्गात् पूर्वोक्तमनुपपन्नमिति प्राप्त आह जगदित्यादि ।

जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥ १७ ॥ (४. ४. ५.)

पूर्वोक्तस्य जगत्सम्बन्धी लौकिको यो व्यापारः कायवाङ्मनसां तद्वर्जं तद्रहितं भोगकरणम् । तत्र हेतू आह **प्रकरणादसन्निहितत्वाच्चेति** । "ब्रह्मविदाप्नोति परम्" (तै. २. १.) इत्युपक्रमेण मुक्तिप्रकरणात् तत्र लौकिकव्यापारोऽसम्भावितः । किञ्च

हि यतो हेतोरतो युक्तम्—एतावती त्रुटिर्बोध्येति । सं.) ॥ १६ ॥ इति चतुर्थाधिकरणम् ॥

भोगप्रकारं विचारयितुमधिकरणमवतारयन्ति **ब्रह्मणा सहेति** । संशयमाहुः **लौकिकेति** । पूर्वपक्षमाहुः **तद्युतमिति** । सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति **पूर्वोक्तस्येति** । परब्रह्मणि प्राप्तस्य भक्तस्य । **हेतू आहेति** । हेतुद्वयमाहेत्यर्थः । प्रथमहेतुं व्याकुर्वन्ति **ब्रह्मविदिति** । असन्निहितत्वरूपं

लीलायाः कालमायाद्यतीतत्वेन प्राकृतं जगद् दूरतरमितोऽपि हेतोर्न तत्सम्भवः। कदाचिल्लोके लीलाप्रकटनेच्छायां तदधिष्ठानत्वयोग्ये मथुरादिदेशेऽतिशुद्धे गोलके चक्षुरिन्द्रियमिव स्थापयित्वा लीलां करोति तदापि लीलामध्यपातिनां न लौकिकव्यापारसम्भवः। न हि चक्षुरिन्द्रियं गोलककार्यं करोति न वा तन्नाशे नश्यति। एतत् सर्वं "दिवीव चक्षुराततम्" इतिश्रुतिव्याख्याने विद्वन्मण्डने प्रपञ्चितम्। किञ्च छान्दोग्ये "भूमैव सुखं भूमा त्वेव विजिज्ञासितव्यः" (७. २३. १.) इत्युक्त्वा भूम्नो लक्षणमाह "यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमा" (७. २४. १.) इति। अत्र नान्यद् विजानातीत्येतावतैव चारितार्थ्येऽपि यदिन्द्रियव्यापारो निषिद्धस्तत्राप्यन्यविषयकस्तेन भगवद्विषयकः

द्वितीयं हेतुं व्याकुर्वन्ति **किं चेति**। **दूरतरमिति**। असन्निहितमित्यर्थः। तथा च भोगस्थानमक्षरं ब्रह्मेतिभावः। अत एवोक्तं द्वितीयस्कन्धे–निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नम इति। ननु ते ते धामान्युश्मसीत्यनया श्रुत्या भूमौ भोग उक्तः, तस्य का वा गतिरित्यत आहुः **कदाचिदिति**। यदा जगत उद्धारेच्छा तदेत्यर्थः। **लीलामिति**। अक्षरं ब्रह्म भूमौ स्थापयित्वा लीलां करोतीत्यर्थः। नन्वेवं चेत् तत्रत्यभक्तानां भूमिसंबन्धे लौकिकव्यापारो भविष्यत्येवेत्यत आहुः **तदापीति**।

अस्मिन्नर्थे प्रमाणमाहुः **एतत्सर्वमिति**। **प्रपञ्चितमिति**। चक्षुरितिद्वितीयैकवचनान्तं पदमित्यादिना प्रपञ्चितमित्यर्थः। अपरं प्रमाणमाहुः **किं चेति**। **यदिन्द्रियव्यापारो निषिद्ध** इति। पश्यतीत्यनेन शृणोतीत्यनेन च य उक्तः स निषिद्ध इत्यर्थः। एवं चानया श्रुत्यापि लौकिक-

स सिद्धो भवतीति जगद्व्यापारराहित्यं सिद्धम्। तत्र तेन भगवत तव स्वतन्त्रफलत्वमुक्तं भवति। न हि सुखस्यान्यत् प्रयोजनमस्ति ॥ १७ ॥

प्रत्यक्षोपदेशादिति चेन्नाधिकारिक-मण्डलस्थोक्तेः ॥ १८ ॥

नन्वेतत्प्रकरण एव छान्दोग्ये पठ्यते, "सर्वं ह पश्यति" (छा. ७. २६. २.) इति सर्वविषयकप्रत्यक्षमुपदिश्यत इत्यन्यविषय-व्यापारराहित्यं नोपपद्यत इत्याशङ्क्य समाधत्ते आधिकारिकेत्यदिना।

अत्रेदमुच्यते। "सोऽश्नुते" (तै. २. १.) "लोकवत् तु लीला कैवल्यम्" (ब्र. सू. २. १. ३३.) इत्यादिभिर्नित्य-लीलामध्यपातित्वं तस्योच्यते। "नान्यत् पश्यति" (छा. ७. २४. १.) इत्यादिश्रुतिवशाज् जगद्व्यापारवर्जं भोगकरणं पूर्व-सूत्रेणोक्तम्। अत्रेदं विचार्यते। नान्यत् पश्यतीतिप्रकरण एव

व्यापारवर्जत्वं सिद्धमितिभावः। एवं च सिद्धस्य फलमाहुः **तत्र तेनेति**। कुत एतदित्यत आहुः **न हीति**। साधनादिकस्य सर्वस्य प्रयोजनं सुखं, पुनः सुखस्यापि प्रयोजनान्तरापेक्षा न वक्तव्येत्यर्थः ॥ १७ ॥

सूत्रं व्याकुर्वन्ति **नन्विति**। नन्वक्षरे ब्रह्मणि जगद्व्यापारवर्जो भोगो न संभवति कुत इत्यत आहुः **एतत्प्रकरण एवेति**। **अन्यविषयेति**। प्राकृतविषयेत्यर्थः। प्रकारान्तरेणावतारयन्ति। अवतरणग्रन्थे **इदं** वक्ष्यमाण-मधिकमित्यर्थः। किं तदधिकमित्यतो विषयमाहुः **सोऽश्नुत** इत्यादिना। **तस्योच्यत इति**। भक्तस्योच्यत इत्यर्थः। **अत्रेदमिति**। अस्मिन्सूत्रे

" सर्वंह पश्यति " (छा. ७. २६. २.) इति सर्वविषयकं दर्शनमुच्यते तत् कथं पूर्वोक्तमुपपद्यत इति । किञ्च । एकस्यैव भक्तस्य देशकालभेदेन क्रियमाणानेकलीलासम्बन्धित्वं भवति । तच्च लीलानित्यतायां न घटते । यतस्तत्तद्देशतत्तत्कालसम्बन्धिनी सा नित्या । एवं सत्येकस्यानेकरूपत्वं जीवस्य न सम्भवतीति तन्नित्यत्वमपि न सिध्यतीति ।

तत्रोच्यते । श्रुतौ सर्वपदेन न जगदुच्यते किन्तु यस्यां यस्यां लीलायां देशकालभेदेन क्रियमाणायामधिकृतो य एको भक्तस्तस्यैव तावन्ति रूपाणि सन्ति तान्याधिकारिकाणीत्युच्यन्ते । तेषां मण्डलं समूहस्तत्र स्थितवस्तुमात्रमुच्यत इति नानुपपन्नं किञ्चित् । अत

इदमुक्तश्रुतिसूत्राभ्या यदुक्तम्, विचारमाहुः **नान्यदिति** । **उपपद्यत** इति । अनेन पूर्वोक्तैवाशङ्कानूदिता । द्वितीयामाहुः **किं चेति** । **एकस्यैवेति** । ' सोऽश्नुते ' इत्यत्र स वा एष एवं पश्यन् इत्यादिषु एकत्वकथनेनैकस्यैवेत्यर्थः । **एवं सती**ति । देशकालभक्तविशिष्टाया नित्यत्वे सतीत्यर्थः । **जीवस्य** भक्तस्य **न संभवती**ति । अनुक्तत्वादितिशेषः । **तन्नित्यत्वमपीति** । लीलाया नित्यत्वमपीत्यर्थः । सूत्रे **प्रत्यक्षोपदेशा**दित्यत्र षष्ठीतत्पुरुषः प्रथमपक्षे, द्वितीयपक्षे तु कर्मधारय इति ज्ञेयम् ।

एवमाशङ्कांशं द्वेधा व्याख्याय समाधानांशार्थमाहुः **तत्रोच्यत** इति । **आधिकारिकमण्डलोक्ते**रित्यस्य व्याख्यानमाहुः **श्रुतावि**ति । **किंत्वि**ति । अस्य पदस्य **वस्तुमात्रमुच्यत** इत्यनेनान्वयः । **अधिकृत** इति । **अधिकारः** भक्तानां लीलानुभवयोग्यता, तत्संबन्धि **आधिकारिकम्** । **नानुपपन्नमि**ति । सर्वः सर्वं पश्यतीतिश्रुतौ सर्वपदेन जगद्ग्रहणाभावात्

एवाग्रे पठ्यते " सर्वमाप्नोति सर्वशः " (छा. ७. २६. २.) इति, " स एकधा भवति त्रिधा भवति पञ्चधा भवति सप्तधा चैव पुनश्चैकादश स्मृतः शतञ्च दश चैकश्च सहस्राणि च विंशतिः " (७. २६. २.) इति । यथा मण्डलवर्तिषु पुंसु नैकस्य प्राथम्येन प्राधान्यं वक्तुं शक्यं तथैतेष्वपि रूपेष्विति ज्ञापनाय मण्डल-पदमुक्तम् ॥ १८ ॥

नन्वेवं सति श्वस्त्वद्गेहमायास्य इति प्रभुणोक्ते तदाशया तत्स्थितिर्नोपपद्यते । नित्यत्वाल्लीलायास्तस्य कालस्य च तदापि वर्तमानत्वात् । तथा प्रभूक्तिरपि नोपपद्यत इत्याशङ्क्य समाधत्ते

विकारावर्ति च तथा हि स्थितिमाह ॥ १९ ॥

जगद्व्यापाररहितत्वं नानुपपन्नम् । एवं सोऽश्नुते इत्यत्र एकवचनं भक्तस्वरूप-बोधकम् । तथा च एक एव भक्त आधिकारिकदेहं स्वीकृत्य तत्तद्देशकाल-विशिष्टलीलानामनुभवकर्ता इति न तस्यानेकत्वमनित्यत्वं च । लीलानामपि तादृशविशेषणविशिष्टाना नित्यत्वमिति नानुपपन्नमित्यर्थः । अत्र प्रमाणमाहुः **अत एवेति** । **अग्रे** सर्वं हि पश्यः पश्यतीत्यस्याग्रे । अत्र सर्वपदार्थस्य संकोचात् जगद्ग्रहणं नास्ति । एकस्य भक्तस्य बहुधाभवने प्रमाणमाहुः **स एकधेति** । ननु चक्राकारः समूहो मण्डलपदेनोच्यते । तस्य किं तात्पर्यमत आहुः **यथेति** । तथा च बहुपुरुषेषु एकस्यैव प्राधान्यमिति नास्तीतिभावः ॥ १८ ॥

एतावता श्रुतिविरोधः परिहृतः । लोके असामञ्जस्यं परिहरन्ति **विकारावर्ति चेति** । सूत्रं व्याकर्तुमवतारयन्ति **नन्विति** । **एवं सति** लीलाया नित्यत्वे सति । **तथा प्रभूक्तिरपीति** । एवं च प्रभूक्त्या किं ज्ञायते । श्वस्त्वद्गेहे विलक्षणां लीलां करिष्यामीतिध्वन्यते, नित्यत्वं लीलाया ज्ञायत

इह भगवल्लीला प्रकृतिस्तद्विरुद्धोऽर्थो विकार इत्युच्यते । तत्र न- वर्तते तज्ज्ञानं तादृशं च भवति । यत्स्वरूपं प्रति तथा वदति तस्य स्वगेहे तदा भगवत्स्थितिज्ञानं न भवतीत्यर्थः । उपलक्षणं चैतदतो यद्देशकालविशिष्टा यादृशी या लीला तस्यास्तादृश्या एव तल्लीलामध्यपातिनो भक्तस्य ज्ञानं नान्यविषयकमिति ज्ञेयम् । अत एव द्वितीयस्यापि मह्यं पूर्वमुक्तमासीत् तेनागत इत्येव ज्ञानं भवति । तदैव हि रसोदयोऽतो रसस्वरूपमध्यपातित्वाल्लीलाया रसस्य च भगवदात्मकत्वाद्भगवद्रूपत्वेन सर्वमुपपद्यते लीलायाम् । अत्र प्रमाणमाह तथा हि स्थितिमाहेति । " सर्वमाप्नोति सर्वशः " (छा. ७. २६. २.) इतिश्रुतिरेकस्यैव भक्तस्य सर्वशः सर्वैः प्रकारैः सर्वलीलारसमाप्नोतीति वदन्त्युक्तरीत्यैव लीलाया स्थितिमाहेत्यर्थः ।

इतिभावः । समाधानं व्याकुर्वन्ति **इहेति** । **इह** भगवत्संबन्ध्यर्थविचारे । **प्रकृतिः** रसात्मिका । **तद्विरुद्धोऽर्थो** लौकिकः, स हि विकारः । **तत्रेति** । लौकिके विकारभूतेऽर्थे । **तज्ज्ञानमिति** । तस्य ब्रह्मणा सह भोगकरणस्य ज्ञानम् । आधिकारिकमण्डलस्थं सर्वं ज्ञानं **विकारावर्ति** विकाररहितमित्यर्थः । **तादृशं** तत्समानाकारं चेत्यर्थः । **चकारेणा**त्मत आविर्भावतिरोभावौ सूचितौ । **तथा वदति** श्वस्त्वद्गृहमायास्य इति वदति । प्रथमदिने स्वगेहे भगवदिच्छाया भगवत्स्थितिज्ञानं न जायते । अन्यथा लीलारसानुभवो न स्यादितिभावः । सूत्रेऽनुक्तमभ्याहुः **उपलक्षणमिति** ।

अत्रोपष्टम्भकमाहुः **अत एवेति** । **द्वितीयस्यापीति** । **ज्ञानमि**त्यग्रेणान्वयः । **सर्वमुपपद्यत** इति । " अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् । प्रकृतिभ्यः परं यच्चतदचिन्त्यस्य लक्षणम् ॥ " इति **मत्स्य-**

अतो वस्त्वेवेदमलौकिकमीदृशमिति मन्तव्यं वैदिकैरितिभावः। अलौकिकेऽर्थे लौकिकरीत्यनुमरणं न युक्तं, किन्त्वलौकिकरीत्यनुसरणमेव युक्तमिति हिशब्देन द्योत्यते। एतेन " रसो वै सः " (तै. २. ७.) इतिश्रुतेर्लीलाविशिष्ट एव प्रभुस्तथेति तादृश एव परमफलमिति ज्ञापितं भवति ॥ १९ ॥

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥

न च लौकिकयुक्तिविरोधोऽत्र बाधकत्वेन मन्तव्यः, किन्तु साधकत्वेन। यतः प्रत्यक्षानुमाने श्रुतिस्मृती अपि लौकिकयुक्त्यप्रसारेणालौकिके भगवत्सम्बन्धिन्यर्थेऽन्यथाभावनं निषेधति। " नैषा तर्केण मतिरापनेया " (कठ. १. २. ९.) " परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च " (श्वे. ६. ८.) " अलौकास्तु ये भावा न तांस्तर्केण योजयेत् " (महा. भा. ५. ५. १२.)। श्रीभागवते च " न हि विरोध उभयं भगवत्यपरिगणितगुणगण ईश्वरेऽनवगाह्यमाहात्म्येऽर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्क-

---

पुराणोक्तेरिति न तत्र तर्कापेक्षेतिभावः। पूर्वोक्तार्थे प्रामाण्यं द्योतयितु सूत्रशेषमवतारयन्ति **अत्रे**ति। एतावता यत्सिद्धं तदाहुः **अत** इति ॥ १९ ॥

पूर्वं तर्कनिषेधो भगवत्संबन्धिपदार्थेषूक्तः। इदानीं तस्मिन्नेवार्थे उपष्टाम्भकं सूत्रान्तरमाहुः **दर्शयतश्चे**ति। व्याकुर्वन्ति **न चे**त्यादिना। **न चे**ति। न हीत्यर्थः। **साधकत्वेने**ति। भगवन्माहात्म्यमेव तादृशं यत्र भगवति लौकिकयुक्तिप्रसरो नास्तीति साधकत्वेनेत्यर्थः। सौत्र**प्रत्यक्षानुमान** इत्यस्यार्थमाहुः **यत** इति। श्रुतिमाहुः **नैषे**ति। स्मृतिमाहुः **अलौकिके**ति।

शास्त्रकलिलान्तःकरणाशयदुरवग्रहवादिनां विवादानवसरे" (भाग. ६. ९. ३६.) इत्यादिवाक्यैरचिन्त्यानन्तशक्तिमत्त्वेन भगवत्स्वरूपस्यैव परमफलत्वं प्रदर्श्यते ।

किञ्च "ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः । अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि" (ऋक्सं. २. २. २४.) इत्यृग्वेदे पठ्यते । किञ्चित्पाठभेदेन यजुःशाखायामपि । 'ता' तानि 'वास्तूनि' 'वां' गोपीमाधवयोः सम्बन्धीनि 'गमध्यै' प्रसादत्वेन प्राप्तुम् 'उश्मसि' कामयामहे । तानि कानीत्याकाङ्क्षायां गूढाभिसन्धिमुद्घाटयति । 'यत्र' श्रीगोकुले 'गावो भूरिशृङ्गाः' बहुशृङ्गा रुरुप्रभृतयः, वसन्तीतिशेषः । ग्राम्यारण्यपशूपलक्षणार्थमुभयोरेव ग्रहणम् । 'अत्राह' भूमावेव 'तदुरुगायस्य' बहुगीयमानस्य 'वृष्णः' भक्तेषु कामान् वर्षतीति वृषा तस्य 'पदम्' स्थानं वैकुण्ठं ततोऽपि 'परमम्' अधिकमत्र विचित्रलीलाकरणाद् । 'भूरि' यमुनापुलिननिकुञ्जगोवर्धनादिरूपत्वेन बहुरूपम् । तथा च तत्रत्यानि तानि कामयामह इतिवाक्यार्थः सम्पद्यते । एतेन लीलासम्बन्धि-

---

प्रमाणान्तरमाहुः **श्रीभागवत** इत्यादिना **प्रदर्श्यत** इत्यन्तेन । **अनवगाह्ये**त्यारभ्य **वादिना**मित्यन्तमेकं पदम् ।

इदानीं भगवतः फलत्वे ऋक्शाखीयं वाक्यमाहुः **किं चे**ति । अत्र निरुक्ते यास्केन सूर्यकिरणपरं व्याख्यानं कृतमिति भ्रमनिरासायाहुः **किञ्चि**दिति । अर्थमाहुः ता इत्यादिना **संपद्यत** इत्यन्तेन । **उभयोः** गोभूरिशृङ्गयोः । रुरुप्रभृतयो भूरिशृङ्गा ज्ञेयाः । अत्र वेदाशयं स्फुटीकुर्वन्ति

वस्तूनां यत्र फलत्वेन बहुरूपप्रार्थनं तत्तल्लीलाकर्तुः किं वाच्यमित्याशयो ज्ञाप्यते। "अथ ह वाव तव महिमामृतसमुद्रविप्रुषा सकृल्लीढया स्वमनसि निष्यन्दमानानवरतसुखेन विस्मारितदृष्टश्रुतसुखलेशाभासाः परमभागवताः" (भाग. ६. ९. ३९.) इति श्रीभागवते । एतेनापि कैमुतिकन्यायेन प्रभोरेव स्वतःपुरुषार्थत्वं ज्ञाप्यते । फलप्रकरणत्वात् तदेवाचार्यतात्पर्यविषय ज्ञायते ॥ २० ॥

भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

इतोऽपि हेतोः पुरुषोत्तमस्वरूपमेव परमं फलमिति । यतः 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' (तै. २. १) इतिश्रुतौ भक्तसाम्यमुच्यते । तच्च पुरुषोत्तम एव सम्भवति । यतः सख्यं दत्त्वा तत्कृतात्मनिवेदनमङ्गीकुर्वन्नतिकरुणः स्वस्वरूपानन्दमनुभावयंस्तं प्रधानीकरोति। अन्यथा भक्तोऽनुभवितुं न शक्नुयात् ।

एतेनेति । अत्रार्थे यास्केन शृङ्गादिपदस्य निरुक्तिरुक्ता न तु किरणे तात्पर्यमिति ज्ञापयितुं भागवतवाक्यमुपष्टम्भकमाहुः **अथ ह वावेति** । किं च ऋग्वेदस्थऋचः विष्णुसूक्ते पाठोऽस्ति, तैत्तिरीये विष्णोरितिपदमेवास्ति एतदग्रे विष्णोः कर्माणीतिमन्त्रो दृश्यते । अतः प्रथममन्त्रो भगवत्पर एवेति बोध्यम् ॥ २० ॥

सूत्रमवतारयन्ति **इतोऽपीति** । **इतः** भोग एव साम्यं श्रुतौ **सह**पदेनोच्यते, अस्मादेव हेतोरित्यर्थः । सूत्रं व्याकुर्वन्ति **यत** इति । **पुरुषोत्तम एवे**त्यत्र **एव**कारेणाक्षरब्रह्मणो व्यावृत्तिः । तत्र कारणमाहुः **यतः सख्यमिति** । ननु श्रुतौ कामभोगः श्रूयते, अतो भोगस्यैव फलत्वमित्या-

युक्तं चैतत् । प्राप्तं फलं स्वाधीनं भवत्येवान्यथा फलत्वमेव न स्यात् । तथाचास्माल्लिङ्गादपि प्रभोरेव परमफलत्वं सिध्यति । " न तत्समश्चाभ्यधिकश्च दृश्यते " (श्वे. ६. ८.) इतिश्रुतिविरोधपरिहाराय मात्रपदम् । न चात्र कामभोगस्य फलत्वं शङ्कनीयम् । " आप्नोति परम् " इत्येतद्व्याकृतिरूपत्वात् स्वरूपानुभवरूपत्वाद् भोगस्य । अनुभूयमानस्यैव हि सुखस्य लोके पुरुषार्थत्वोक्तेः ॥ २१ ॥

एवं भगवतः स्वतःपुरुषार्थरूपत्वमुक्त्वा कर्मफलभोगानन्तरमावृत्तिवदत्राप्यावृत्तिर्भविष्यतीत्याशङ्कानिरासायोत्तरं पठति

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥

अनावृत्तिर्भक्तानां ज्ञानिनां चोच्यते । तत्र मानं शब्दः । स च

शङ्कते **न चेति** । उत्तरमाहुः **आप्नोति परमिति** । **व्याकृतीति** । एतद्वाक्यव्याख्यानरूपत्वादित्यर्थः । ननु विवरणे कामानामशनं किमर्थमुक्तमित्यत आहुः **स्वरूपेति** । इदं च सर्वं **श्रीमदाचार्यैः पुष्टिप्रवाहमर्यादाग्रन्थे** कण्ठरवेणोक्तं – भगवानेव हि फलं स यथाविर्भवेद्भुवि । गुणस्वरूपभेदेन तथा तेषां फलं भवेत् ॥ इति । अनेन सूत्रपञ्चकेन भोगरूपं परमफलं भगवानेवेतिसूचितम् ॥ २१ ॥

सूत्रमवतारयन्ति **एवमिति** । सूत्रं व्याकुर्वन्ति **अनावृत्तिरिति** । **उच्यत** इति । अनेन सूत्रेणोच्यत इत्यर्थः । **स चेति** । अस्य **स चेति**

" तयोर्ध्वमायन्नमृतत्वमेति " (छा. ८. ६. ६.) " न तेषां पुनरावृत्तिरेतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते " . (छा. ४. १५. ६.) " ब्रह्मलोकमभिसम्पद्यते " " न च पुनरावर्तते " (छा. ८. १५. १.) इत्यादिरूपस्तु ज्ञानिनां तामाह । न हि भक्तानां नाड्यादिप्रयुक्तममृतत्वम् "तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः। न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥" (भाग. ११. २०. ३१.) इत्यादिवाक्येभ्यः । किन्तु "यमेव" (कठ. २. २२.) इतिश्रुतेर्वरणमात्रलभ्यः पुरुषोत्तमः । एवं सति " ब्रह्मविदाप्नोति परम् " (तै. २. १.) इतिश्रुतेर्विरोधपरिहारपूर्वकोक्तव्याख्यानरीत्या भक्तस्य परं ब्रह्म प्राप्तस्य निर्दोषत्वादावृत्तिहेत्वभावात् प्रपञ्चे

पदस्य **इत्यादिरूपस्त्विति**त्यनेनान्वयः । तया चेत्यादिरूपः **शब्दो ज्ञानिनामेव ताम**नावृत्तिमाहेत्यर्थः। स को वा शब्द इत्यत आहुः **तयेति** । ऊर्ध्वगतिहेतुभूतयोर्ज्ञानवैराग्ययोः काठके बृहदारण्ये चोक्तत्वाज्ज्ञानिनामेव तामाहेत्यर्थः। भक्तस्य नास्तीत्यत्र किं मानमत आहुः **तस्मादिति** । ननु भक्तस्यानावृत्तिः कस्माद्वाक्यादवगन्तव्येत्यत आहुः **किन्त्विति** । **पुरुषोत्तम** इति । स एवामृतत्वं तेषामित्यर्थः । स तु **अक्षरात्पर** एव । ' अक्षरात्परतः परः ' इतिश्रुतेः, ' यस्मात्क्षरमतीतोऽहम् ' इति गीतावचनाच्च । **एवं सतीति** । अक्षरात्परत्वे सतीत्यर्थः । **उक्तव्याख्यानेति** । येन वरणं कृतं तस्य तु स्वरूपानन्दानुभवः सर्वकामाशनरूपः, येन वरणं न कृतं तस्याक्षरप्राप्तिरक्षरानन्दानुभव इतिपूर्वव्याख्यानरीत्येत्यर्थः । **परं ब्रह्मेति** । अक्षराधिष्ठातारमित्यर्थः । **प्राप्तस्य** वरणेन प्राप्तस्य भक्तस्य । **आवृत्तिहेत्वभावादिति**। अविद्याकामकर्मणामभावादित्यर्थः । ननु भक्तस्यापि व्यामोह **उभयव्यामोह**-

नावृत्तिः सम्भवति । तादृशं प्रतीश्वरेच्छापि न तथा भवितुमर्हति । "ये दारागारपुत्राप्तप्राणान् वित्तमिमं परम् । हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे ॥" (भाग. ९. ४. ६५.) इति भगवद्वाक्यात् परप्राप्तिरूपत्वाच्च भोगस्य न नाशसम्भावना । किञ्च यत्रैकस्यैव भक्तस्य देशकालभेदेनानेकविधलीलासम्बन्धित्वेपि तत्तल्लीलासम्बन्धित्वमनश्वरमुच्यते तत्र सर्वथा तदभावः कथं वक्तुं शक्यो ब्रह्मणापि ।

अपरञ्च कालसाध्यो हि नश्वरः स्यात् । न हि पुरुषोत्तमे कालः प्रभवितुं शक्नोति । " न यत्र कालो निमिषां परः प्रभुः " (भाग. ३. २. १७.) इत्यादिवाक्येभ्यः । तथा च ज्ञानमार्गीयभक्तिमार्गीययोरनावृत्तौ तुल्यत्वेपि फलप्राप्तौ वैलक्षण्यात् पूर्ववाक्येन भक्तानामाहानावृत्तिमुत्तरवाक्येन ज्ञानिनामिति ज्ञायते । न च फलप्रकरणान्तेऽनावृत्त्युक्तेः संसाराभाव एव जीवस्य परमं फल-

---

सूत्र उक्त एव, कदाचिदिच्छयावृत्तिः स्यादित्यत आहुः **तादृशमिति** । कैमुतिकन्यायेनाप्यावृत्त्यभावं दृढीकर्तुमाहुः **किं चेति** ।

ननु लीलायां **देशो** व्रजादिरूपः **कालः** वसन्तादिरूप उक्त एवेतिकथं नित्यत्वमत आहुः **अपरं चेति** । एवंरीत्या स्वरूपानुभवस्य अथ च लीलाया नित्यत्वं साधितं तेन कृत्वा यत्सिद्धं तदाहुः **तथा चेति** । **पूर्ववाक्येन भक्तानामित्यत्र** हेतुमाहुः **वैलक्षण्यादिति** । ज्ञानमार्गीयफल उत्कर्षमाशङ्कते **न चेति** । **परमं फलमिति** । न तु परप्राप्तिरित्यर्थः । **आचार्याभिप्रायः**

मित्याचार्याभिप्रायो ज्ञायत इति वाच्यम्। ब्रह्मविदः परमाप्तिं फलत्वेनोक्त्वा तत्स्वरूपस्य सर्वकामभोगत्वेन श्रुत्या निरूपणात्। स च स्वस्वाधिकारानुसारेण निवेदितार्थाङ्गीकाररूप एवेति ज्ञेयम्। तेन स एव परमं फलमनावृत्तिस्त्वार्थिकी। परं त्वावृत्तौ सम्भवन्त्यां परमफलत्वं नोपपद्यत इतिज्ञानदुर्बलशङ्कानिरासायेयमुक्ता। पुष्टिमार्गीयभक्तविशेषप्रवर्तकनिवर्तकवेणुशब्दाद् भगवन्निकटगतावनावृत्तिः पूर्वेणोक्ता। मर्यादामार्गीयाणां वेदरूपाच्छब्दात्तदुक्तसाधनादनावृत्तिं द्वितीयेनेत्यपि तात्पर्यविषयः श्लिष्टोऽर्थो ज्ञेयः। तथा सति परमफलमग्रे स्वत एव भावीति भाव इत्यलं विस्तरेण ॥ २२ ॥ ५ ॥ समाप्तश्चतुर्थाध्यायः।

व्यासाशयः। समाधानमाहुः **ब्रह्मविद** इति। **स चेति**। भोगश्चेत्यर्थः। **तेन स एवेति**। अनुभूयमानः पुरुषोत्तम एवेत्यर्थः। **आर्थिकी** अर्थसमाग्रस्ता। तथा च यत्रावृत्तिस्तत्र परमफलत्वं नास्ति, अत्र तु परमफलत्वमस्तीत्यनेनार्थादेवानावृत्तिरितिभावः। नन्वार्थिकी चेदनावृत्तिस्तर्हि कण्ठरवेण किमर्थमुक्तेत्यर्थत आहुः **परं त्विति**। **संभवन्त्यामिति**। भगवदिच्छया संभवन्त्यामित्यर्थः। द्विरुक्तेः समाप्तिबोधनं प्रसिद्धमेव। अन्यदपि तात्पर्यमाहुः **पुष्टीति**। **उक्तेति**। वाङ्मनसि दर्शनाच्छब्दाच्चेतिसूत्र उक्तत्वादितिभावः। नन्वेतेनानावृत्तिरुक्ता न तु परमं फलमित्यत आहुः **तथा सतीति**। अनावृत्तौ सत्यामित्यर्थः।

एतावता ब्रह्मविदाप्नोतिपरमित्यनेन साधनमथ च ब्रह्मैव सन् ब्रह्माप्येतीत्यनेनफलमस्मिन् पादे विचारितम्। अत्राध्यायचतुष्टये प्रत्यधिकरणं परमता-

जानीत परमं तत्त्वं यशोदोत्सङ्गलालितम् ।
तदन्यदिति ये प्राहुरासुरांस्तानहो बुधाः ॥ १ ॥

नानामतध्वान्तविनाशनक्षमो
वेदान्तहृत्पद्मविकासने पटुः ।
आविष्कृतोऽयं भुवि भाष्यभास्करो
मुधा बुधा धावत नान्यवर्त्मसु ॥ २ ॥

नुवादपूर्वकं तन्निराकरणं च **श्रीपुरुषोत्तमैः प्रकाशे** सम्यक् प्रतिपादितमेवेति नात्रप्रकाशितमित्यलं विस्तरेणेति ।

अत्रादृश्यत्वादिगुणको धर्मोक्तेरित्यनेनाक्षरोपासनया अक्षरब्रह्मप्राप्तिः, ब्रह्मैव सन्ब्रह्माप्येतीतिवाक्यात् । अत्रादित्याद्यङ्गोपासनासत्त्वे अर्चिरादिमार्गेण गत्वा अमानवेन पुरुषेण भगवल्लोकप्राप्तिरैश्वर्यभोगश्च । उपासनायां यदा भक्तिसत्त्वे वैकुण्ठादौ भगवत्सेवकत्वं, पुष्टिभक्तौ तु भगवति प्रवेशः पुनः निर्गमनं भजनानन्दानुभवः । प्रवेशे भक्त्या मामभिजानातीत्यादिवाक्यं प्रमाणं, निर्गमने भूमविद्याप्रमाणमितिसर्वमनवद्यमित्यलं विस्तरेणेतिशुभम् ॥ २२ ॥

एवंरीत्या सर्वसूत्राणां व्याख्यानं कृत्वा संक्षेपेण वेदान्तसिद्धान्तज्ञानार्थमुपदिशन्ति **जानीतेति** । **परमं तत्त्वं** वेदान्तसिद्धान्तम् । **तदन्यदिति** । **तत्** परमं तत्त्व**मन्यत्** कर्तृत्वाकर्तृत्वादिधर्मरहितम् ॥ १ ॥

अस्य भाष्यस्यैव चिन्तनं कर्तव्यमित्युपदेशं प्राहुः **नानेति** । **ध्वान्ते**त्यनेन श्लिष्टप्रयोगेण **द्वैतवादी माध्वः** परामृश्यते । तेन च स्वस्मिन्नद्वैतत्वं

पुरन्दरमदोद्भवप्रचुरवृष्टिसम्पीडित–
स्वकीयवरगोकुलावनपरायणो लीलया ।
स्मितामृतसुवृष्टिभिः परिपुपोष तान् यो गिरिं
दधार च स एव हि श्रुतिशिरःसु संराजते ॥ ३ ॥

श्रीकृष्णकृपयैवायं सिद्धान्तो हृदि भासते ।
तेनाधिकं वरीवर्ति न वक्तव्यं हरेर्नृणाम् ॥ ४ ॥

परामृश्यते । जीवे अंशत्वेऽपि नाद्वैतहानिः । न हि विस्फुलिङ्गौ नाग्निरिति **भाष्यप्रयोगात्** ॥ २ ॥

भगवतः कृपालुत्वसत्त्व एव वेदान्तार्थस्फुरणं भविष्यतीत्याशयेन तस्य कृपालुत्वं वर्णयन्ति **पुरन्दरेति** । पुरन्दरस्य यो **मदः** गर्वः, तस्मादुद्भवो यस्याः एतादृशी या **प्रचुरवृष्टिः** अत्यधिका वृष्टिः, तया **संपीडिता** ये **स्वकीयाः** गोपाः, **वरगोकुलानि** श्रेष्ठगवां कुलानि, तेषा**मवनं** रक्षणं तत्र **परायणः** । एतादृशः श्रीभगवान् **लीलया**, एतेन श्रमाभावः सूचितः, **गिरिं दधार च** पुनः यः **तान्** स्वकीयान् **स्मितामृतसुवृष्टिभिः स्मितं** हास्यं तदेवामृतं तस्य सुवृष्टयः, ताभिः **परिपुपोष स एवो**पनिषत्सु **संराजते** ॥ ३ ॥

नन्वेतादृशो वेदान्तसिद्धान्तश्चेत् तस्य ज्ञानं दुर्लभमित्यत आहुः **श्रीकृष्णेति । अयं** भाष्योक्तः । **तेन** कारणेन इदं भाष्य**मधिकं वरीवर्ति** ।

भाष्यपुष्पाञ्जलिः श्रीमदाचार्यचरणाम्बुजे ।
निवेदितस्तेन तुष्टा भवन्तु मयि ते सदा ॥ ५ ॥

॥ इति चतुर्थाध्याये चतुर्थपादे पञ्चमं
जगद्व्यापाराधिकरणम् ॥ ५ ॥

तेन कारणेन **हरेः** संबन्धार्थे षष्ठी। संबन्धश्च सेव्यसेवकभावादिः। **नृणां** मनुष्याणाम्। हरिसंबन्धिमनुष्याणां न वक्तव्यमितियावत्। एतेन भगवत्संबन्धिभिः पदपदार्थज्ञानार्थमध्ययनं कर्तव्यं सिद्धान्तार्थस्फुरणं तु स्वत एव भविष्यतीति-सूचितम्॥ अत्र **श्रीप्रकाशकृतस्तु** भाष्यविभावनार्थस्फुरणेऽपि भगवत्कृपाया एव कारणत्वं न पाण्डित्यादेरित्याशयेमाहुः **श्रीकृष्णे**त्यादीत्याहुः ॥ ४ ॥

इदानीं समाप्तौ मङ्गलं कर्तव्यमिति सूचयितुं **सार्धाध्यायस्य स्वयंकरणात् श्रीप्रभुचरणैः** श्रीमदाचार्यचरणे निवेदितम्। श्रीमदाचार्यचरण-रूपवस्तुनिर्देशात्मकं मङ्गलं चाचरन्ति **भाष्ये**त्यादिना। **सदे**तिपदात् निरन्तरं संतोषप्रार्थनेतिशुभम् ॥ ५ ॥

हरिर्यत्कृपया साक्षाद्भक्तस्य भवति ध्रुवम् ।
श्रीमदाचार्यचरणेष्वयं ग्रन्थः समर्पितः ॥ १ ॥

श्रुतिसूत्रविरोधो हि वाच्यवृत्त्या निवारितः ।
भाष्येऽस्मिन् श्रीमदाचार्यैस्तस्याधिक्यं कथं न हि ॥ २ ॥

॥ इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते श्रीब्रह्मसूत्राणुभाष्ये चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तिः ॥

॥ समाप्तं श्रीब्रह्मसूत्राणुभाष्यम् ॥

भाष्यस्यास्य दुरूहत्वात् प्रकाशस्य तथात्वतः ।
व्याख्यानं तद्विवरणरीत्या तु कृतवानहम् ॥ ३ ॥

इतिश्रीमन्मुकुन्दरायसहजमाधुरीपरमानिर्वचनीयसरसवदनतामरससुधाह्रदावगाहिश्रीमदाचार्यपदाब्जकृपापारसारश्रीमत्प्रभुचरणात्मजमहाराजश्रीयदुनाथकुलोद्भवगोस्वामिश्रीगोपालात्मजगिरिधररचितेऽणुभाष्यविवरणे **चतुर्थाध्यायस्य चतुर्थः पादः** समाप्तिमफाणीत् ॥

समाप्तम्

VERIFIED 1989

शोधपत्रम् ।

*

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
६	१२	द्विपिनम्	द्वीपिनम्
२२	१	ब्राह्मणाना०	ब्राह्मणादीना०
२८	१५	ममायत्त०	यमायत्त०
२९	११	क्षेत्रो०	क्षुद्रा०
	१३	अमुक्त०	अनुक्त०
३०	५	यदि	यदिदं
३१	५	स्मर्यन्तेऽपि	स्मर्यतेऽपि
	१७	सामा०	सोमा०
	१९	मूर्छा०	मूर्च्छा०
३३	६	०रन्ना०	०रन्न०
	१०	अन्त इति	अत इति
	१५	०रोदीघ०	०रोदीच्य०
३५	२	करणांश०	करणाशभाव०
३६	१	०भाववदन्न०	०भाववद्भिन्न०
३७	१	०धिष्ठिते पूर्व०	०धिष्ठितेऽपूर्व०
८१	१५	व्रह्मणि	ब्रह्मणि
११८	१	च भाव०	चाभावाभाव०
	१३	भावाभावेति	अभावा०

R 6893,5x1,1
N61 VERIFIED-2001

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
११८	१४	भावो घटत्व०	अभावाभावो घटत्व०
		घटरूपत्वेऽपि	घटत्वरूप०
	१६	०स्वरूपाद०	०स्वरूपत्वाद०
	१७	०तिरिक्तमेव	०तिरिक्तत्वमेव
	१९	०भावादिकरण०	०भावस्याधिकरण०
	२२	निरुप्यते	निरूप्यते
१२२	२२	श्रैष्ठ्यं	श्रैष्ठ्यं
१२७	४	(ाग.	(भाग. १०
१५१	१९	श्रीजगन्नाथादा	श्रीजगन्नाथादौ
१६०	२१	चोनुपा०	चोपा०
३०१	२	०या दण्दा वाग्देह	०यामा दण्डा वाग्देह-
३३७	१९	०धित्वने०	०धित्वेने०
४०२	१०	०ब्रह्मपिषया	०ब्रह्मविषया
४०३	६	तत्मतं	तन्मतं
	६	दूषयित०	दूषयितु०
४१६	१६	व्योन्नित्य०	व्योमन्नि०
४१९	१९	भुक्ति	मुक्ति०
४२४	८	चिग्रहं	विग्रहं
४२८	३	तत्पाप्ति०	तत्प्राप्ति०
४३२	८	तद्दशनस्य	तद्दर्शनस्य
४४०	४	चतुर्थ	चतुर्थं
४४६	६	प्रत्क्षानुमाने	प्रत्यक्षानमाने

D 1989